मिस्तर डारसी—(स्वगत) काय करावें! रात्रंदिवस दुसरा विचारच सुचत नाहीं! एलिझाबेथचें प्रेम कसें संपादन करितां येईल या गोष्टीचा कसा निदिध्यास लागून राहिला आहे.! तिचें प्रेम संपादन व्हावें ह्मणून आजपर्यंत मीं किती तरी प्रयत्न केले आहेत! परंतु असे प्रयत्न करून नंतर फलांची आशा करण्याचा धडा तरी मला तिनेंच शिकविला! केंटशायरमध्यें तिनें जी माझी मागणी नाकारिली, त्यावेळीं मला त्याचें महत्त्व फारसें वाटलें नाहीं; परंतु त्या गोष्टीचा मी जों जों विचार करूं लागलों तों तों तिचें करणें अगदीं बरोबर होतें, असेंच वाटूं लागलें. तिनें मला जो धडा दिला तो अगदीं यथार्थ होता. त्याचा परिणाम मनावर फार उत्तम झाला. आपलें वर्तन सुधारण्याचा दृढ निश्चय करून त्याप्रमाणें मी वागूं लागलों. डारबीशायरमध्यें पुनः जेव्हां तिची गांठ पडली तेव्हां आपल्या मनावर तिच्या कानउघाडणीचा परिणाम चांगलाच झाला आहे हें तिला शक्य त्या मार्गांनीं मीं दाखविलें. पुढें तिच्या दुर्दैवानें परंतु माझ्या कदाचित् सुदैवानें लिडियावर तो प्रसंग आला तेव्हांहि आपण खटपट करून तो लागत असलेला काळीमा घालविला तर एलिझाबेथला बरें वाटेल व त्यायोगानें माझ्याविषयीं तिच्या मनांत प्रेमोद्भव होईल अशी आशा वाटत होती; नाहींतर त्या घाणेरड्या कामांत कोण पडलें असतें? मिस्तर विखमसारख्या पाजी माणसाची मनधरणी मीं काय ह्मणून केली असती? हजारों

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

पौंड खर्च करून लिडियाचें लग्न जुळवून आणण्याचें काय कारण होतें! पण ही सर्व खटपट, हे सर्व श्रम, ही सर्व झीज, केवळ त्या एका रत्नाच्या प्राप्तीसाठीं चालविली! जेन व विंगले यांचें लग्न जुळल्यानेंहि थोडी भर पडेल ह्मणून मिस्तर विंगले यास नेदरफील्डला येण्याचा आग्रह करून त्याला घेऊन आलों. जेनच्या अन्तःकरणांत विंगलेविषयीं खरें खरें प्रेम वसत असल्याचें दिसून येतांच पूर्वीच्या सर्व गोष्टींची हकीगत मिस्तर विंगले यास सांगितली. त्या बाबतींत जें थोडें फार कपट करावें लागलें होतें त्यामुळें प्रथम जरी माझ्यावर तो रागावला, तरी माझ्यावर त्याची भक्ति विलक्षण असल्यामुळें तो तें सर्व विसरून जाऊन आतां सर्वांच्या इच्छेप्रमाणें त्यांच्या लग्नाचा योग जुळून आला आहे. पण माझी स्थिति काय होणार? एलिझाबेथशिवाय अन्य स्त्रीवर माझें मन जाणें अगदीं अशक्य आहे, आणि त्या मानी व बाणेदार पोरीनें तर माझें ह्मणणें एकदां नाकबूल केलें आहे, तेव्हां कसें करणार? पुरुष जातीच्या व्यर्थ अभिमानास न पेटतां पुन्हां तिचें मन पहाण्याचा प्रयत्न केल्याशिवाय माझ्या मनाची तळमळ राहणार नाहीं! परंतु तसा योग जुळूनच येत नाहीं. कदाचित् या तिच्या आवडत्या फिरण्याच्या रस्त्यावर तिची गांठ पडेल ह्मणून एकटाच इकडे फिरण्यास आलों आहें. पहावें तर खरें काय होतें तें.

(एका बाजूनें जातो, तों एलिझाबेथ दुसऱ्या बाजूनें प्रवेश करिते.)

एलिझाबेथ—(स्वगत) माझ्या मनोवृत्तींत पडलेला फरक मिस्तर डारसी यांच्या लक्षांत आला असेल काय? परंतु हा विचार करण्यापूर्वी मजविषयींचें त्यांचें प्रेम अद्याप कायम असेल का?—एक मन होय ह्मणून उत्तर देतें, तों दुसरें मन नाहीं ह्मणून सुचवितें—पण नाहीं ह्मणावें तर ते इकडे येतात कां, पण आले तर बोलत कां नाहींत? या खेपेच्या पहिल्याच भेटीला मामा व मामींची चौकशी करण्यापलीकडे एक अक्षरहि आपण होऊन ते बोलले नाहींत—मलाहि जास्त बोलवेना—पण त्यांचा तो गंभीर चेहरा आपला कायम तो कायमच! यावरून काय बाई तर्क करणार? माझी त्यांनां मुळींच गरज नाहीं, हाच नव्हे का याचा अर्थ? पण असें ह्मणावें, तर ते नेदरफील्डला—नव्हे आमच्या घरीं, आपण होऊन आले तरी कां! हें बाई कशाचें लक्षण! मला तर बाई त्यांनीं माझ्याशीं पुष्कळ बोलावें, पूर्वी सारखें बोलावें—नव्हे मागणी घालावी, असेंच वाटत आहे—पण—पण मीच ना त्यांची मागणी एकदा नाकबूल केली आहे? तेव्हां ते होऊन पुनः मागणीचें

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

बोलणें काढतील, हें संभवनीय तरी आहे का? कोण हा वेडेपणा! केवढा हा भ्रम! परमेश्वरा! पुरुषजातींत अशी एक दिव्य शक्ति असेल कीं, जिला तसें करणें जिवापलीकडचें वाटणार नाहीं. हाय! हाय! हे विचार मनांत आले ह्मणजे मला कितीदा सखेदाश्चर्य वाटूं लागतें व पूर्वीच्या माझ्या वर्तनाबद्दल अत्यंत दुःख होतें. पण आतां कसें करणार? लेडी कॅथेराईन येथून गेल्यावर त्यांची व तिची भेट होईल व ते येथें येणारच नाहींत, असें वाटलें होतें; पण त्यांनां आलेले पाहून मनाला त्या दिवशीं खरें खरें समाधान वाटलें. मला जे आवडते विचार सुचत आहेत तेच विचार त्यांच्याहि अन्तःकरणांत घोळत असतील काय? वेडे, एलिझाबेथ! संशय कसला घेतेस? लेडी कॅथेराईनची व त्यांची गांठ पडली असली पाहिजे, यांत काडीइतका संशय नाहीं. आणि गांठ पडली असूनहि ते येथें आले, यांतच काय तें समज. तें कसें का असेना, पण लिडियाच्या बाबतींत जे आमच्या कुटुंबावर पर्वतप्राय उपकार त्यांच्या हातून झाले आहेत, त्यांजबद्दल त्यांचे केव्हां एकदा आभार मानीन, असें मला झालें आहे. माझ्या-शिवाय दुसऱ्या कुणालाच आमच्या घरांत ही गोष्ट माहीत नसल्यामुळें माझ्या कुटुंबांतील मंडळीचें त्यांच्याशीं जें वर्तन चालू आहे त्याजबद्दल मला फारच वाईट वाटत आहे. पण उपाय काय? रात्रंदिवस हेच विचार मनांत घोळत असल्यामुळें चैन कसें तें पडत नाहीं. मनाला थोडी हुशारी यावी ह्मणून माझ्या ह्या आवडत्या फिरण्याच्या रस्त्याला आलें, पण मनच जेथें थाऱ्यावर नाहीं तेथें बाह्य सृष्टीचें सौंदर्य काय करणार? सृष्टिसौंदर्याचा जीवंतपणा पहाणाराचे अन्तः-करणवृत्तींत प्रतिबिंबित व्हावा लागतो. तेव्हांच त्याची जाणीव उत्पन्न होते. (पाहिलेंसें करून) अग बाई, इकडे कोण येत आहे हें? मिस्तर डारसी वाटतें! वा, फारच बरें. आतां एकदा मनाचा धीर करून मी त्यांच्याशीं बोलणारच!

(मिस्तर डारसी प्रवेश करितो.)

एलिझाबेथ—(उघड) आपली गांठ सहजीं पडली ह्मणावयाची! मला नव्हतें ठाऊक, आपण इकडेच फिरावयाला आलां आहां. मिस्तर डारसी, आज किती दिवस सांगेन ह्मणून ह्मणत होतें, पण संधिच आली नाहीं. मी जें कांहीं सांगणार त्यामुळें तुमच्या मनाला काय वाटेल याची मुळींच पर्वा न करितां, केवळ माझ्या मनाला समाधान व्हावें ह्मणून स्वार्थैक बुद्धीनें मी ही गोष्ट तुमच्या जवळ काढीत आहें, इतकी मी आपमतलबी बनलें आहें. माझ्या बहिणीच्या

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

लग्नाच्या बाबतींत तुम्हीं जे अनंत उपकार आमच्यावर केले आहेत त्यांबद्दल तुमचे अन्तःकरणपूर्वक आभार मानिल्यावांचून माझ्यानें राहावत नाहीं. ती गोष्ट कळल्यापासून मला किती कृतज्ञता वाटत आहे ह्मणून सांगुं ! तुमच्याजवळ हें केव्हां एकदां कबूल करीन असें मला झालें होतें, आणि माझ्या घरच्या दुसऱ्याहि माणसांनां ही गोष्ट कळली असती तर मला एकटीलाच आभार मानण्याचें कारण उरतेंना.

मिस्तर डारसी—खरेंच, मला फारच अवघड वाटत आहे ! मीं जें कांहीं केलें त्याचा भलताच अर्थ केला जाऊन तुह्मांला कसेंसेंच वाटेल, अशी ही गोष्ट तुमच्या कानावर गेली तरी कशी ? मिसेस गार्डिनर अशा रीतीनें फसवितील असें मला वाटलें नव्हतें. !

एलिझाबेथ—माझ्या मामींला दोष देण्याचें कारण नाहीं. लिडियाच्या उच्छृंखळपणामुळेंच, आपण तिच्या लग्नाच्या वेळीं हजर होतां, असें तिच्या तोंडून बाहेर पडलें. आणि मग माझ्यानें तर खुलासा करून घेतल्याशिवाय राहवेना. तेव्हां मींच मामींला लिहून सर्व खुलासा आणविला. तेव्हां त्या दोघांनां शोधून काढण्यांत जे कष्ट आपण घेतलेत, जो अपमान सहन केलात, त्याबद्दल माझ्या कुटुंबांतील सर्व माणसांच्या तर्फें मी पुनःपुनः आपले मनापासून आभार मानितें.

मिस्तर डारसी—जर तुह्माला माझे आभारच मानावयाचे असतील तर ते केवळ स्वतःकरितांच माना. अशी गोष्ट केल्यानें तुह्माला सुख होईल ह्मणून, व मनांतील इतर हेतु साध्य होण्याचा संभव दिसला ह्मणून, ती गोष्ट करावी असें माझ्या मनानें घेतलें, हें मी नाकबूल करीत नाहीं. परंतु तुमच्या कुटुंबांतील इतर माणसांचा यांत कांहीं संबंध येत नाहीं ! माझ्या अन्तःकरणांत केवळ तुमचीच मूर्ति वसत होती. एलिझाबेथ ! असें करूं नका ! तुमचें अन्तःकरण इतकें उदार आहे कीं, माझी अवहेलना तुमच्यानें करवणार नाहीं. जर तुमच्या मनोवृत्ति गेल्या एप्रिलमध्यें होत्या तशाच अद्याप कायम असतील तर मला तसें आतांच सांगा. माझ्या प्रेमांत मात्र अंतर पडलेलें नाहीं, व माझ्या पूर्वींच्या इच्छा अद्याप कायम आहेत. परंतु तुमच्या तोंडून शेवटचा असा एक शब्द एकदांचा ऐकला ह्मणजे या बाबतींत पुनः ब्रंहि काढण्याचें कारण उरणार नाहीं !

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

एलिझाबेथ—या दीन दासीवर फारच उपकार झाले! अगदीं शुद्ध प्रेमानें, कृतज्ञतापूर्वक व मोठ्या संतोषानें मी एवढेंच ह्मणतें कीं, मी आपल्या ह्मणण्याचे बाहेर नाहीं!

मिस्तर डारसी—खरेंच कीं काय? अहाहा! प्रिये, तुझ्या या उत्तरानें मला जो आनंद झाला आहे त्याचें शब्दानें वर्णन करितां येत नाहीं.! एलिझाबेथ,—माझे लाडके! या भाषणानें तूं जणूं मला अमृत पाजून पुनरपि जिवंत केलेंस, असेंच मला भासूं लागलें आहे!

एलिझाबेथ—(स्वगत) यांच्या मुखकमलाकडे माझ्यानें आतां पहावतच नाहीं—तें किती प्रफुल्लित झालें असेल!! तर पाहूंच का एकदां? (पाहण्याचा प्रयत्न करिते, तोंच लाजून) नाहीं, धीरच होत नाहीं! डोळ्यांनों! किती तुह्मी लबाड आहांत! आतां तुह्मांला त्यांच्याकडे पहा ह्मणूनच सांगत असतां तुह्मी पहात नाहीं. आणि नको ह्मटलें तर तुमच्यानें राहवत नाहीं! (उघड) आपली फार आभारी आहें.

मिस्तर डारसी—एलिझावेथ! माझ्या गृहिणीपदाला तूंच एक योग्य आहेस. आपला हा अद्वितीय संयोग उभयतांच्या गुणवृद्धीस कारण होऊन सर्व जगाला धडा घालून देण्याचें सामर्थ्य आपणांस उत्पन्न होणार आहे.

एलिझाबेथ—आपण ह्मणाल तें थोडेंच आहे! माझ्या अंगीं तसे कांहीं गुण आहेत, असें मला तरी वाटत नाहीं. तरी पण, जें कांहीं माझ्यामध्यें चांगलें असेल त्याचें कौतुक आपल्याशिवाय दुसरें कोण करणार?

मिस्तर डारसी—खरेंच, मावशीची व माझी, अलीकडे लंडनमध्यें जी गांठ पडली ती जर पडतीना, तर हा योग इतक्या लौकर जुळून आला नसता!

एलिझाबेथ—ह्मणजे! लेडी कॅथेराईन यांनीं आपली गांठ घेतलीच ह्मणावयाची तर? मला तसें होईल असें वाटलेंच होतें!

मिस्तर डारसी—नुसती गांठच घेतली इतकेंच नव्हे, तर तिनें तुझा व तिचा जो संवाद झाला त्याची कच्ची हकीगत मला सांगितली. त्याचा परिणाम मात्र तिच्या कल्पनेच्या अगदीं उलट असा झाला. त्यामुळें माझ्या अन्तःकरणांत फारच आशा उत्पन्न झाली. कारण, मला तुझ्या स्वभावाची जी काय ओळख आहे त्यावरून तुझ्या अन्तःकरणांत जर माझ्याविषयीं प्रेम उद्भवलें नसतें तर तूं तें स्पष्टपणें व खुल्या दिलानें तिला सांगून टाकिलें असतेंस.

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

एलिझाबेथ—(हंसत) हो तर! माझ्या स्पष्टवक्तेपणाची आपल्याला चांगलीच आठवण राहिली असेल! आपल्याला आपल्या तोंडावर इतक्या शिव्या दिल्या तर आपल्या नातेवाईकांजवळ आपल्याविषयीं वाटेल तें मी बोलेन, हें अगदीं साहजिकच आहे.

मिस्तर डारसी—योग्य तेंच त्या वेळीं तूं बोललीस! त्या वेळची माझी वागणूकच अशी होती कीं, माझ्या डोळ्यांत पडलें तें अंजन अगदीं योग्य होतें! माझी मलाच त्या वर्तनाबद्दल खंती वाटत आहे.

एलिझाबेथ—त्या दिवशीं झालेल्या प्रकाराबद्दल एकमेकांनां दोष लावून भांडत बसण्यांत अर्थ नाहीं. कारण, खरी पारख करावयाची तर दोघांचेहि वर्तनांत दोषच आढळून येईल. परंतु त्यानंतर दोघांमध्यें बरीच सुधारणा झाली आहे.

मिस्तर डारसी—तुझ्या बाबतींत हें म्हणणें कितपत खरें ठरेल कोणास ठाऊक, परंतु माझ्या बाबतींत तें बरेंच खरें आहे. त्या प्रसंगींच्या तुझ्या एका उद्गाराचें मला पक्कें स्मरण आहे.

एलिझाबेथ—अग बाई, असें कोणचें तें बोलणें बरें?

मिस्तर डारसी—'आपण जरा जास्त सभ्य रीतीनें वागलां असतां तर' असेच तुझे शब्द होते. त्या शब्दांनीं मला तुझ्या कल्पनेच्या बाहेर छळलें आहे. त्यांचा खरेपणा लक्ष्यांत यावयाला बराच काल लागला, हेंहि या वेळीं कबूल केलें पाहिजे.

एलिझाबेथ—त्या शब्दांचा एवढा मोठा परिणाम होईल, असें मला नव्हतें वाटलें!

मिस्तर डारसी—तूं म्हणतेस तें अगदीं खरें. मांझ्या अन्तःकरणाला मार्दव नसावेंच, अशी तुझी कल्पना असली पाहिजे. कारण, त्यावेळीं माझें वर्तनच तसें होतें. बरें पण माझ्या पत्रानें कांहीं परिणाम केला का?

एलिझाबेथ—त्या पत्राविषयीं बोलावयाचें म्हणजे थोडक्यांत सांगून भागणार नाहीं. परंतु येवढें खरें कीं, आपल्याविषयींचा गैरसमज दूर होण्यास मुख्य कारण तें पत्रच झालें. परंतु आतां त्या पत्राचा विचारच नको! ज्या व्यक्तीनें तें पत्र लिहिलें, व ज्या व्यक्तीला तें लिहिलें होतें त्यांच्या त्यावेळच्या व हल्लींच्या वृत्तींत इतका फरक पडला आहे कीं, त्या प्रसंगांतील प्रत्येक दुःखजनक गोष्ट आपण विसरून गेलें पाहिजे. माझें तत्वज्ञान आपण आतां हळुहळू

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

शिकावें, बरें का ? ज्या मागील गोष्टींनीं मनाला सुख होईल तितक्याच गोष्टींचें स्मरण ठेवणें चांगलें.

मिस्तर डारसी—ह्या तुझ्या तत्वज्ञानांत कांहीं अर्थ नाहीं! तुझ्या मागील वर्तनाचें सिंहावलोकन केलें तर त्यांत तुझ्या हातून कांहीं दोष झाला आहे, अशी नुसती भावनाहि उत्पन्न होत नाहीं; परंतु माझी स्थिति मात्र तशी नाहीं! तत्वशः नसलों तरी व्यवहारांत मी तोंपर्यंत आप्पलपोटेपणानें वागत आलों. लहान असतां मला चांगल्या गोष्टींचें ज्ञान करून दिलें होतें, परंतु आपल्या मनावर योग्य दाब ठेवण्यास मला शिकविलें नव्हतें. मला उत्तम तत्वांची ओळख करून दिली होती, परंतु त्यांचें अवलंबन गर्विष्ठपणानें व तोऱ्यानें करण्याची संवय होऊं दिली होती. दुर्दैवानें मी एकुलता एक मुलगा व कित्येक वर्षे एकुलतें एकच मूल असल्यामुळें माझ्या आईबापांनीं स्वतः, विशेषतः वडील चांगले असून मला त्यांनीं विघडविलें, व आप्पलपोटेपणांत व घमेंडींत वागण्यास शिकविलें. आपल्या कुटुंबांतील व्यक्तीखेरीज इतरांशीं बेपर्वाईनें वागणें व सर्व जनतेकडे क्षुद्र दृष्टीनें पाहणें, निदान आपल्याशीं तुलना केल्यास त्यांचें ज्ञान कांहींच नाहीं अशी भावना धरण्यास त्यांनीं संधि दिली—शिकविलें म्हटलें तरी चालेल. काय सांगूं एलिझाबेथ! असा मी अठ्ठावीस वर्षांचा होईपर्यंत होतों, आणि पुढेंहि तसाच राहिलों असतों; परंतु लाडके! तुझ्यामुळेंच माझ्यामध्यें हा इष्ट फरक पडला! मी तुझा कां बरें ऋणी नाहीं ? तूंच मला प्रथम जरा कटु परंतु परिणामीं हितकर असें औषध दिलेंस. तुझ्याचमुळें मला योग्य वळण लागलें. प्रेम संपादन होण्याला योग्य अशा स्त्रीचें मन वळविण्याला माझ्या अंगचे गुण किती कमी होते हें तूं मला शिककिलेंस. केवढी तुझी ही योग्यता—

एलिझाबेथ—पुरे आतां ही स्तुती! आतां इतकेंच विचारतें कीं, आपण जें मजवर प्रेम करूं लागलां त्याला आरंभ कसा झाला ? कारण, एकदां आरंभ झाल्यावर मग पुढें त्याची वाढ आपल्या हातून कशी झाली हें मला तर्कानें समजून घेतां येईल.

मिस्तर डारसी—कोणच्यावेळीं, अगर कोणच्या ठिकाणीं, अगर कोणच्या शब्दांनीं अगर नेत्रकटाक्षानें प्रेमाचा उद्गम झाला, हें नक्की सांगतां येणार नाहीं. कारण, तो प्रारंभ झाल्यास बराच काळ लोटून गेल्यावर त्या प्रेमाची मला जाणीव उत्पन्न झाली.

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

एलिझाबेथ--आतां हें पुरें नाहीं का? पुन: केव्हां तरी स्वस्थपणें बोलूं. मिस्तर विंगले यांनीं जेनला मागणी घातली व ती तिनें स्वीकारली, याबद्दल आपल्याला कसें काय वाटतें?

मिस्तर डारसी—मला त्यापासून खरा खरा संतोष वाटत आहे! बरें पण, आतां पुढें कसें काय करावयाचें? मिस्तर बेनेट यांचा रुकार मी आतां घरीं जातांच घेतों. तूंहि आपल्या आईचा रुकार लौकरच घे.

एलिझाबेथ—बरें तर.

[जातात.

प्रवेश सातवा.

[स्थळ—मिस्तर बेनेटचा वाडा. माडीवरील एका दिवाणखान्यांत मिस्तर बेनेट प्रवेश करितो]

मिस्तर बेनेट—(स्वगत) पोरीनें मनांत तरी काय आणिलें आहे! मिस्तर डारसीचा तिला किती तरी तिट्कारा अन् असें असून तिनेंच त्याची मागणी कबूल करावी! केवढें आश्चर्य! आमच्या लिझीच्या शहाणपणाबद्दल आजपर्यंतचा भरंवसा पोकळ ठरूं पाहातो! मिस्तर डारसीच्या केवळ संपत्तीला भुलून खरें प्रेम नसतां तिनें त्याचा स्वीकार केला असें जर असेल, तर फारच फसगत झाली ह्मणावयाची. असो. मिस्तर डारसीबरोबर तिला वर येण्याविषयीं मीं निरोप पाठविलाच आहे. ती आतां आली कीं सर्व खुलासा होईल. परंतु आश्चर्यानें माझें मन अगदीं गोंधळून गेलें आहे. कांहींच तर्क करवत नाहीं.

(एलिझाबेथ प्रवेश करिते.)

मिस्तर बेनेट—लिझी, तूं करते आहेस तरी काय? या मनुष्याची मागणी कबूल करितांना तूं शुद्धीवर तर होतीस ना? अग, तूं त्याचा नेहमीं द्वेषच नव्हतीस का करीत?

एलिझाबेथ—(स्वगत) मीं प्रथमपासून आपलें मत देण्यांत जरा मऊपणा धरला असता तर किती बरें झालें असतें? आणि तें मतहि जरा विचारपूर्वक बनविलें असतें, तर आजचा हा प्रसंग टळला असता. आतां सर्व गोष्टी खुलासेवार सांगितल्याखेरीज गत्यंतर नाहीं. (उघड) काय सांगूं बाबा, माझ्या अन्त:करणांत त्यांच्याविषयीं खरें खरें प्रेम वसत आहे.

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

मिस्तर बेनेट—मग असेंच कां ह्मणेनास कीं, त्याच्याशीं लग्न लावण्याबद्दल तुझा निश्चयच झाला आहे. तो श्रीमान् आहे, जेनपेक्षां कपडालत्त्यांचा आणि गाडीघोड्यांचा तुझा वडेजाव जास्त राहील, एवढी गोष्ट खरी; पण त्यांत तुला खरें सौख्य लाधेल काय ?

एलिझाबेथ—बाबा, माझ्या मनांतील प्रेमाच्या अभावाखेरीज दुसरें वैगुण्य तर त्यांच्यामध्यें तुह्माला नाहींना दिसून येत ?

मिस्तर बेनेट—दुसरें वैगुण्य तें काय असणार ? तो गर्विष्ठ व त्रासदाईक असल्याचें आपल्याला ठाऊक आहे; पण तुझें त्याच्यावर प्रेम असल्यावर मग या गोष्टीचें काय मोठेंसें आहे.

एलिझाबेथ—बाबा, काय सांगूं, माझा कंठ दाटून येत आहे. माझ्यानें बोलवत नाहीं–मला ते आवडत–न–व्हे माझें त्यांच्यावर पूर्ण प्रेम आहे. खरें ह्मटलें तर, त्यांच्या अंगीं खरा खरा गर्व ह्मणून ज्याला ह्मणतात असा मनोविकार मुळींच नाहीं. ते खरोखरच मनमिळाऊ आहेत. त्यांचा खरा खरा स्वभाव तुह्माला कळलाच नाहीं. बाबा, त्यांच्याविषयीं असे उद्गार काढून मला दुःख होईल असें करूं नका.

मिस्तर बेनेट—लिझी, मीं आपला रुकार आधींच दिला आहे. तो माणूसच तशा योग्यतेचा आहे. तो जें जें कांहीं कृपादृष्टीनें मागेल तें तें नाहीं ह्मणण्याची कोणाची प्राज्ञा आहे ? जर तुझा निश्चय झाला आहे तर मी तुलाहि आपला रुकार देतों; परंतु तूं अधिक चांगला विचार कर, असें सांगितल्यावांचून माझ्यानें राहवत नाहीं. लिझी, तुझा स्वभाव मला पुरा माहितीचा आहे. तुझ्या पतीविषयीं तुझ्या मनांत आदर असल्याशिवाय, तो तुझ्याहून श्रेष्ठ आहे अशी तुझी भावना झाल्याखेरीज, तुला खरें सुख होणार नाहीं. अयोग्य संबंधानें तुझ्या असाधारण हुषारीवर भलताच परिणाम होईल. तुझ्या नशिबीं मग दुःख आणि अविश्वास हींच असणार ! तुझ्या अंगीं पतिनिष्ठा नाहीं असें पहाण्याचा दुःखद प्रसंग मजवर आणूं नकोस. तूं काय करीत आहेस हें निदान तुझ्यासारखीला तरी सांगण्याचें प्रयोजन नाहीं.

एलिझाबेथ—बाबा, किती सांगूं अन् सांगू तरी काय ? त्यांच्याविषयीं माझ्या अन्तःकरणांत एकदम प्रेमोद्भव झाला नाहीं; एवढेंच नव्हे, तर त्यांच्याविषयीं माझ्या मनांत जो गैरसमज होता तो थोडथोडा कमी होत जाऊन अखेर त्याची

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

जागा शुद्ध आणि सात्विक अशा प्रेमानें घेतली आणि माझ्या मनोदेवतेला शेवटीं असेंच वाटूं लागलें कीं, माझ्या योग्य पति जर कोणी असतील तर मिस्तर डारसी हेच होत ! हें कसें घडलें हें पाल्हाळ लावून आतांच सांगत बसत नाहीं. परंतु माझें त्यांच्यावर खरें खरें प्रेम आहे. ही गोष्ट शपथपूर्वक आपणाला सांगतें.

मिस्तर बेनेट—इतकें सांगितल्यावर आणखी काय पाहिजे ! बरें तर, आतां मला जास्त कांहीं बोलावयाचें नाहीं. तसें आहे तर तुझ्या योग्य असाच तो गृहस्थ आहे. याहून कमी योग्यतेच्या माणसाच्या पदरीं मीं माझ्या लाडक्या लिझीला टाकिलें नसतें, समजलीस ?

एलिझाबेथ—बाबा, त्यांच्या उदारपणाबद्दलसुद्धां कितीक सांगण्यासारखें आहे. आपल्या लिडियाच्या लग्नाच्या बाबतींत सर्व खर्च आणि खटपट आमच्या मामांनीं केली अशी आपली जी समजूत आहे ती सर्व चुकीची आहे. तें सर्व डारसी यांनीं केलें हो !

मिस्तर बेनेट—खरेंच कीं काय ! बा, आजचा हा दिवस केवळ आश्चर्यांचाच दिसतो ह्मणावयाचा. काय ह्मणतेस, मिस्तर डारसीनेंच या सर्व गोष्टी केल्या ? लग्न जुळवून आणिलें, त्यांनींच विखमला पैसा दिला, आणि त्याचें कर्जहि त्यांनींच वारिलें, व त्याला नोकरीहि त्यांनींच मिळवून दिली ?

एलिझाबेथ—होय, या सर्व गोष्टी त्यांनींच केल्या.

मिस्तर बेनेट—तर मग उत्तमच झालें ह्मणावयाचें. माझा किती तरी त्रास चुकेल व काटकसरींतून मी मोकळा होईन. जर तुझ्या मामानें हें सर्व केलें असतें तर त्याचे उपकार फेडणें मला भाग होतें, व त्याचा पैसाहि देऊन टाकिला असता; परंतु हे उतावीळ तरुण पुरुष सर्वच गोष्टी आपल्या ह्मणण्याप्रमाणें करूं पहातात. उद्यां मी त्याचा पैसा परत देण्याविषयीं गोष्ट काढितों, आणि काय बहार होते ती पहा. ! तो तुझ्या प्रेमाचे गोडवे गाऊं लागेल व सर्व गोष्टी जेथच्या तेथेंच रहातील ! खरेंच, बरें स्मरण झालें. त्या कॉलीन्सच्या पत्राची मौज माझ्या इतकी त्यावेळीं तुला कां वाटली नाहीं हें आतां लक्ष्यांत आलें. खरा प्रकार निराळाच असल्यामुळें त्याच्या थट्टेंत तूं सामील झाली नाहींस, हें अगदीं साहजिक होतें. पोरी, एकंदरींत आधीं लाथ मारून मग पाया पडण्यासारखाच प्रकार केलास ह्मणावयाचा ! अहाग वेडे, प्रथम त्याची टेर उडविण्यांत एका पायावर तयार, तर आत्तां त्याचीं स्तुतिस्तोत्रें गाण्याला तितकीच आतुर!

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

चांगला तावूनसुलाखून नवरा पसंत केलास ह्मणावयाचें ! नशीब विचाऱ्याचें, तो या तुझ्या प्रयोगांतून वांचला. बाळे लिझी, खुशाल आनंदानें जा बरें खालीं. माझ्या मनांतील सर्व संशय नाहींसा झाला, व तुलाहि जेनसारखेंच सौख्य लाभणार हें पाहून मला मनापासून समाधान वाटत आहे. दैवयोगानें तुह्मां दोघींनांहि अनुरूप पति मिळालेले पाहून माझ्या मनाला जें समाधान वाटत आहे, तें सांगतां पुरवत नाहीं !

(एक चाकर प्रवेश करितो.)

चाकर—धनीसाहेब, खालीं मिस्तर कॉलीन्स सहकुटुंब आले आहेत. ते व मिस्तर बिंगले वगैरे मंडळी बोलत बसलीं आहेत व आपणाला भेटावयाचें आहे ह्मणून वर्दी देण्यासाठीं मला पाठविलें आहे.

मिस्तर बेनेट—जा, व सर्वच मंडळींनां वर लायब्ररींत बोलाविलें आहे ह्मणून सांग.

(मिस्तर व मिसेस कॉलीन्स, जेन, बिंगले, आणि मिस्तर डारसी प्रवेश करितात.)

मिस्तर बेनेट—मिस्तर कॉलीन्स, आपण केव्हां आलां ?

मिस्तर कॉलीन्स—हीं आह्मी दोघेंहि आत्तांच आलों.

मिस्तर बेनेट—वा ! यावेळीं तुह्मी आलांत, हें फार बरें झालें. मिस्तर कॉलीन्स, आमची लिझी लौकरच मिस्तर डारसीची बायको होणार हो. आतां लेडी कॅथेराईनचें सर्वतोपरी शांतवन करणें तुमच्यावरच येणार. परंतु मला विचाराल तर झालें हेंच ठीक झालें, असेंच मी कोणालाहि सांगेन.

मिस्तर कॉलीन्स—असा कांहीं प्रकार इकडे घडणार याचा वास आह्मांला तेथेंच लागला. तेव्हां मिसेस कॉलीन्सनीं असें ठरविलें कीं, लेडी कॅथेराईन बाई साहेबांचा राग जरा शांत होईपर्यंत इकडे निघून यावें, व मलाहि मोठ्या कष्टानेंच खरें ह्मटलें तर त्यांच्या ह्मणण्याला रुकार द्यावासा वाटला, आणि मग तडक इकडेच निघून आलों.

मिसेस कॉलीन्स—लेडी कॅथेराईनची शिष्टाई फुकट गेलेली कळतांच वारा कसा वहात आहे हें माझ्या ध्यानीं आलें. मग अशा वेळीं लिझीजवळ असणें बरें असें वाटून इकडे येण्याचा बेत केला.

मिस्तर बेनेट—तुमचा विचार फार उत्तम ठरला, यांत शंका नाहीं..कारण, अशा आनंदाच्या प्रसंगीं लिझीची जिवलग मैत्रिण जवळ असणें जरूरच होतें. खरें कीं नाहीं लिझी ?

3392

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

अंक पांचवा, प्रवेश सातवा.

एलिझाबेथ—बाबा, शार्लटला या वेळीं एथें पाहून मनाला फारच बरें वाटतें !

मिसेस कॉलीन्स—(एलिझाबेथकडे वळून हळूच) लिझी, शेवटीं ज्यांनीं तुझी खोडी काढली ह्मणून चिडली होतीस त्यांनांच पसंत केलेंस ! पाहिलेंस, ईश्वरी सूत्र हें असें असतें बरें !

एलिझाबेथ—(मिसेस कॉलीन्सकडे वळून) कर बाई थट्टा ! तुला तशी संधिच मिळाली आहे.

मिस्तर बेनेट—मिस्तर बिंगले, आपल्या जिवलग मित्राचें आपण अभिनंदन केलें पाहिजे.

मिस्तर बिंगले—यांत काय संशय ! आतांच खुद्द त्याच्याचकडून मला सर्व प्रकार समजला व मनाला फारच समाधान वाटलें. जेनलाहि तसेंच वाटत आहे.

जेन—बाबा, आनंदातिशयानें माझ्या तोंडून शब्दच उमटत नाहींत. लिझी तूं धन्य आहेस !

मिस्तर कॉलीन्स—मिस्तर डार्सी, या प्रांतांतील हें दिव्य रत्न आपण संपादन केलेंत, याबद्दल लेडी कॅथेराईन यांनां काय वाटेल हा विचार बाजूला ठेवून, मी आपला मनापासून धन्यवाद गातों. तुमच्या अगदी योग्य अशी गृहिणी तुह्माला प्राप्त झाली आहे. आतां तिच्या समागमें मोठ्या आनंदानें व पूर्ण सौख्यानें संसार करा.

मिस्तर डारसी—तथास्तु !

[शेवटचा पडदा पडतो.]

समाप्त.

SRI JAG... WA ADHYA
JNANA SIMHASAN J... NAMANDIR
LIBRARY
Jangamwadi Math, VARANASI
Acc. No. १२९ 3392

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

डॉ. ... मल्लाशाक्य ...
स्व, वेदा... जी ...
"मां" को अर्पण,
३५-७-७४

रुक्मिणीहरणम् ।

प्रथमः सर्गः ।

शिवः शिवापदतलगः शवोऽपि सन्
भवन्महाम्बरमपि यो निरम्बरः ।
रमार्द्धभाक् तनुरपि मारमारकः
स वो भवो भवतु विभुर्विभूतिदः ॥१॥

अन्वयः—यः शिवापदतलगः शवः सन्नपि शिवः, यः महाम्बरं भवन्नपि निरम्बरः, यश्च रमार्द्धभाक्तनुरपि मारमारकः, सः विभुर्भवः वः विभूतिदः भवतु ॥१॥

नमो गणेशाय ।

धरां धरति यः सदा स तव वासुकिर्भूषणं
भिनत्ति गिरिमिव या सुरधुनी च सा मूर्द्धनि ।
जगज्जनजनन्यपि त्रिजगदाश्रया वक्षसि
प्रभो ! त्यज न मे मनोऽत्यणुतरं स्वपादाम्बुजात् ॥
महाकवेर्महाकाव्य-व्याचिख्यासाख्यया धिया ।
सिन्धोरिव प्रकाशेच्छा ज्योतिरिङ्गणरोचिषा ॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

अथ तत्रभवान् महाकविः (१) श्रीहरिदाससिद्धान्तवागीशः "काव्यं यशसेऽर्थकृते" इत्याद्यालङ्कारिकवचनप्रामाण्यमङ्गीकुर्वन् यशोलिप्सया रुक्मिणीहरणं नाम महाकाव्यं चिकीर्षन् सम्भाव्यमानमन्तरायमन्तरेण तत्परिसमाप्तिं विधित्सन् "सर्गबन्धो महाकाव्यमुच्यते तस्य लक्षणम्। आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्॥" इत्यपरालङ्कारिकोक्तयोर्नमस्क्रियावस्तुनिर्देशयोर्महाकाव्यान्तरेषु दर्शनात् परानुकरणं परिजिहीर्षन् परिशेषाशीर्व्यपदेशेनाभीष्टदेवतास्मरणरूपमङ्गलमाचरति शिव इति। प्रथमं देवतानामोच्चारणेन गणादिशुद्धिरवधेया। यः शिवायाः कालिकायाः पदतलगः चरणाधोवर्त्ती शवः सर्वानभीष्टविषयत्वादमङ्गलरूपो निष्प्राणदेहः सन्नपि, शिवः मङ्गलरूप इति विरोधः; महादेव इति च तत्समाधानम्। यः महाम्बरम् अखण्डाकाशो भवन् सन्नपि, निरम्बरः अनम्बर इति विरोध; वसनशून्य इति च तत्समाधानम्। यश्च रमायाः स्त्रियाः पार्व्वत्याः अर्द्धं भजत इति रमार्द्धभाक् तनुर्देहो यस्य सः अर्द्धनारीश्वरत्वात् तादृशः सन्नपि, मारमारकः कामहन्तेति कामिनीधारणकामहननयोर्विरोधः; भगवन्महिम्ना च तत्समाधानम्। स विभुर्व्यापकः, भवो महादेवः, वो युष्माकं श्रोतॄणाम्, विभूतिदः सम्पत्प्रदाता भवतु।

अत्रार्थालङ्कारो विरोधाभासः, शब्दालङ्कारश्च वृत्त्यनुप्रासच्छेकानुप्रासौ इत्येतेषां परस्परनिरपेक्षतया संसृष्टिः। श्रीहर्षकृतनैषधचरित इवास्मिन् काव्येऽपि इत्थमेव प्रतिश्लोकमनुप्रासालङ्कारप्राचुर्य्यमनायाससुन्नेयम्।

अत्र अभीष्टविषयस्य मङ्गलरूपत्वादनभीष्टविषयस्यामङ्गलरूपत्वं सिद्धमिति शवस्यानभीष्टरूपत्वादमङ्गलरूपत्वम्। "मूर्त्तयोऽष्टौ शिवस्यैता"

(१) "महाकविः स एव स्यादयो महाकाव्यकृत् कविः" इति भोजराजः।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

সমন্ততো বিষয়ততের্ললামনি
প্রথীয়সি প্রথিতবিদর্ভনামনি ।
পরান্ পরং কিল বিষয়ে বিভীষয়ন্
স ভীষ্মকঃ সমিতি বভূব ভূপতিঃ ॥২॥

ইত্যাদিস্মৃতৌ শিবস্যাকাশমূর্ত্তিত্বমনুসন্ধেয়ম্ । ননু নির্মক্ষিকমিত্যাদৌ নিরুপসর্গস্যাত্যন্তাভাবপরত্বাৎ নিরম্বর ইত্যন্যোন্যাভাবপরত্বে লক্ষণা-পত্ত্যা নেয়ার্থতাদোষাপত্তিরিতি চেন্ন; "তস্য নিরবদ্যবিদ্যোদ্যোতেন দ্যোতিত-স্তত্ত্বতোঽয়মর্থঃ" ইতি দায়ভাগে নিরুপসর্গস্যান্যোন্যাভাবপরতাদর্শনাৎ । ন চ তত্রাপি অবদ্যেতি ভাবে নিপাতমঙ্গীকৃত্য অত্যন্তাভাবপরত্বস্য সুবচত্বমিতি বাচ্যম্ ; "পণ্যাবদ্যবর্য্যাবিক্রেয়গর্হ্যানিরোধেষু" ইতি সূত্র-বৃত্তৌ কর্ম্মণি নিপাতস্যৈবোদাহৃতত্বেন ভাবে তন্নিপাতাঙ্গীকারাসম্ভবাৎ, কিঞ্চ "নিরুৎসুকানামভিযোগভাজাং সমুৎসুকেবাঙ্কমুপৈতি সিদ্ধিঃ" ইতি ভারবিপ্রয়োগে নিরুৎসুকানামিতি নিরুপসর্গস্য অন্যোন্যাভাবপরতায়া অকামেনাপ্যঙ্গীকার্য্যত্বাৎ ।

"রমঃ কান্তে রক্তাশোকে মন্মথে চ রমা স্ত্রিয়াম্" ইতি হেমচন্দ্রঃ ।

অস্মিন্ সর্গে রুচিরা নাম বৃত্তম্—"জভৌ জরৌ গিতিরুচিরা চতুর্গ্রহৈঃ" ইতি লক্ষণাৎ ॥১॥

বাঙ্গালা—যিনি কালীর চরণতলগত শব হইয়াও শিব, যিনি অখণ্ড আকাশ হইয়াও আকাশভিন্ন (দিগম্বর) এবং যিনি (কামচরিতার্থতার জন্য) আপন দেহার্দ্ধে কামিনীকে ধারণ করিয়াও কামহন্তা ; সেই বিশ্ব-ব্যাপক মহাদেব তোমাদের সম্পৎপ্রদাতা হউন ॥১॥

অন্বয়ঃ—সমন্ততঃ বিষয়ততেঃ ললামনি প্রথীয়সি প্রথিতবিদর্ভনামনি বিষয়ে সমিতি কিল পরান্ পরং বিভীষয়ন্ স ভীষ্মকঃ নাম ভূপতিঃ বভূব ॥২॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

মহাকবিঃ সকলসবর্ণযোজনে
সুতো রবেরবিনয়দণ্ডধারিণি ।
ক্ষমাভৃতাং ক্ষিতিভৃদশেষসত্ত্ববান্
মনস্বিভিঃ কৃতিমননৈরমানি যঃ ॥৩॥

বস্তু নির্দ্দিশতি সমন্তত ইতি । সমন্ততঃ সর্ব্বাসামেব দিশাম্, বিষয়ততের্দেশসমূহস্য, ললামনি প্রধানে, প্রথীয়সি অতিবিশালে, প্রথিত প্রসিদ্ধ বিদর্ভেতি নাম যস্য তস্মিন্, বিষয়ে দেশে, সমিতি যুদ্ধে, পরান্ শত্রূন্, পরমত্যন্তং বিভীষয়ন্ সংগ্রামেষু ভয়ং প্রাপয়ন্, স প্রসিদ্ধো ভীষ্মকো নাম ভূপতির্বভূব ।

অত্র ভীষ্মকনাম প্রতি বিভীষয়ন্নিতি পদস্যার্থো হেতুরিতি পদার্থহেতুকং কাব্যলিঙ্গমলঙ্কারো যমকবৃত্ত্যনুপ্রাসাভ্যাং সংসৃজ্যতে ।

"নীবৃজ্জনপদো দেশবিষয়ৌ" ইত্যমরঃ । "ধরাধরেন্দ্রং ব্রততীততীরিব" ইতি মাঘে সমূহার্থে ততিশব্দঃ । "ললাম স্যাৎ প্রভাবে চ লাঞ্ছনধ্বজবাজিষু । শৃঙ্গে প্রধানে ভূষায়ামপি বালধিপুণ্ড্রয়োঃ ॥" ইতি মেদিনী ।

বিশেষেণ বিভ্যতং প্রযুঞ্জান ইতি বিভীষয়ন্ ভীধাতোরিনি "ভীষিবিন্তি—" ইত্যাদিজ্ঞাপকাৎ ষান্ততা, করণভয়াচ্চ "হেতুকর্ত্তৃভীষ্যোরিন্" ইতি রুচাদিত্বান্নাত্মনেপদবিষয়তা ॥২॥

বাঙ্গালা—সকল দিকের দেশসমূহের মধ্যে শ্রেষ্ঠ অতিবিশাল বিদর্ভদেশে শত্রুগণের অত্যন্ত ভয়জনক 'ভীষ্মক'নামে একজন প্রসিদ্ধ রাজা ছিলেন ॥২॥

অন্বয়ঃ—কৃতিমননৈঃ মনস্বিভিঃ যঃ সকলসবর্ণযোজনে মহাকবিঃ, অবিনয়দণ্ডধারিণি রবেঃ সুতঃ, ক্ষমাভৃতাং অশেষসত্ত্ববান্ ক্ষিতিভৃৎ (চ) অমানি ॥৩॥

পঞ্চবিংশত্যা শ্লোকৈ রাজানং বর্ণয়তি মহাকবিরিতি । কৃতি

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

कलावतः सकलजनप्रमोदिनः
सितात्मनोऽप्यमृतकरस्य यस्य च ।

-स्तुस्वरूपनिरूपणनिपुणं मननं सम्भावनं येषां तैः कृतिमननैः अतएवामीषां मननं यथार्थमेवेति भावः । मनस्विभिः प्रशस्तमनोभिर्जनैः, यो भीष्मकः, सकलाः सवर्णा ब्राह्मणादयः समाना जातय एव सवर्णा अकारादीनि समानान्यक्षराणि तेषां योजनम् एकस्मिन् ग्रामादाववस्थापनमेव योजनं काव्यादौ प्रयोगस्तस्मिन्, महाकविः महाकविस्वरूपः ; विशिष्टो नयो विनयः न विद्यते विनयो येषां तेषामविनयानां दुर्नीतिपरायणानां जनानां दण्डधारणं दण्डविधानमेव दण्डधारणं लगुड़ग्रहणं तस्मिन्, रवेः सुतो यमस्वरूपः ; क्षमा सहिष्णुतेव क्षमा पृथिवी तस्याः भृतौ वहने, अशेषसत्त्ववान् सर्व्वविधाध्यवसायशाली सकलप्राणिमांश्च ; क्षितिभृत् पर्व्वतश्च, अमानि सम्भावितः ।

अत्र श्लेषेण ब्राह्मणप्रभृतिसमानजात्यादिषु अकारप्रभृतिसमानाक्षरत्वारोपो राजनि भीष्मके महाकवित्वाद्यारोपे निमित्तमिति श्लिष्टपरम्परितं रूपकमलङ्कारः, एकस्य भीष्मकस्य अनेकधोल्लेखादुल्लेखः, वाच्या भावाभिमानिनो जात्याद्युत्प्रेक्षालयश्च इत्येतेषामङ्गाङ्गिभावेन सङ्करः, सोऽपि पुनश्छेकानुप्रासेन संसृज्यते ।

"क्षितिक्षान्त्योः क्षमा" इति "द्रव्यासुव्यवसायेषु सत्त्वमस्त्री तु जन्तुषु" इति चामरः ॥३॥

বাঙ্গালা—যাঁহাদের সম্ভাবনা বস্তুস্বরূপনিরূপণ করিতে নিপুণ, সেই মনস্বীরা যে ভীষ্মকরাজাকে ব্রাহ্মণাদি সকল জাতিরূপ অকারাদি সমস্ত বর্ণের যোগ করার বিষয়ে মহাকবিস্বরূপ, দুর্জ্জনদিগের দণ্ডদানরূপ দণ্ডধারণ বিষয়ে যমস্বরূপ এবং ক্ষমারূপ পৃথিবী ধারণ বিষয়ে সর্ব্ববিধ অধ্যবসায়রূপ সর্ব্ববিধ জন্তুযুক্ত পর্ব্বতস্বরূপ মনে করিতেন ॥৩॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

कलङ्किनीं किल परिचायिनीं तनो-
र्विधोर्विधां ननु विदधौ पटुर्विधिः ॥४॥

अन्वयः—पटुः विधिः कलावतः सकलजनप्रमोदिनः सितात्मनः अमृतकरस्य अपि यस्य च परिचायिनीं ननु विधोः तनोः कलङ्किनीं विधां विदधौ किल ॥४॥

चन्द्रादेनं विशिनष्टि कलेति। पटुः सृष्टिनिपुणो विधिः, कला-न्नृत्यगीतादिचतुःषष्टिप्रकारा विद्या षोडशभागश्च सा अस्यास्तीति कलावान् तस्य कलावतः, सकलान् जनान् प्रमोदयति व्यवहारेण किरणेन च आनन्दयतीति तस्य सकलजनप्रमोदिनः, सितो निर्म्मलः शुभ्रश्च आत्मा बुद्धिः शरीरश्च यस्य तस्य सितात्मनः, अमृतं पीयूषमिव करः सुखस्पर्शो हस्तः किरणश्च यस्य तस्य, अपिः समुच्चये, यस्य च राज्ञो भीष्मकस्य परिचायिनीं भेदबुद्धिजनिकाम्, नन्वित्यवधारणे, विधोश्चन्द्रस्य, तनोः मूर्त्तेः, कलङ्किनीं शशचिह्नवतीम्, विधां प्रकारम्, विदधौ चकार, किलेति सम्भावनायाम्। लोकेऽपि निर्म्माणनिपुणः कुलालो घटयोः साम्ये विशेषविज्ञानाय तयोरन्यतरं कृष्णादिचिह्नेनाङ्कयति। कला-वत्त्वादिधर्म्मसाम्येऽपि यो निष्कलङ्कः स भीष्मकः, यश्च सकलङ्कः स चन्द्र इति संक्षिप्तः सरलार्थः।

अत्रोपमानाच्चन्द्रादुपमेयस्य भीष्मकस्याधिक्यवर्णनया श्लेषाश्लिष्टो व्यतिरेकालङ्कारः, विधेस्तादृशोद्देशेन कलङ्कविधानासम्बन्धेऽपि तत्-सम्बन्धोक्तेरतिशयोक्तिश्चानयोरङ्गाङ्गिभावेन सङ्करः, सोऽपि छेकानुप्रास-वृत्त्यनुप्रासाभ्यां संसृज्यते ; व्यतिरेकालङ्कारेण च निष्कलङ्को भीष्मक इति वस्तु व्यज्यत इत्यलङ्कारेण वस्तुध्वनिः।

"बलिहस्तांशवः कराः" इति "विधा वृत्तौ प्रकारे च" इति चामरः ॥४॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

তমোঽপহং প্রতিদিননূতনোদয়ং
ধরাধরোপস্থিতসহস্রধাকরম্।
দিনং দিনং দিনমণিমস্তগামিনম্
অনস্তগং যমপি জনাঃ স্ম জানতে ॥৫॥

বাঙ্গালা—চন্দ্রের কলা আছে, ভীষ্মকরাজারও কলা (নৃত্যগীতাদি কলাবিদ্যা) ছিল ; চন্দ্র জ্যোৎস্নাদ্বারা সমস্ত লোককে আনন্দিত করেন, ভীষ্মকরাজাও ব্যবহারদ্বারা সমস্ত লোককে আনন্দিত করিতেন ; চন্দ্রের আত্মা (মূর্ত্তি) নির্ম্মল, ভীষ্মকরাজারও আত্মা (বুদ্ধি) নির্ম্মল ছিল এবং চন্দ্রের কর (কিরণ) অমৃততুল্য, ভীষ্মকরাজারও কর (হস্ত) অমৃততুল্য ছিল ; (সুতরাং চন্দ্র ও ভীষ্মকরাজার অভিন্নতা প্রতীতি হইতে পারে বলিয়া) নির্ম্মাণনিপুণ বিধাতা ভীষ্মকরাজার ভেদ বুঝিবার জন্য চন্দ্রের উপরে একটী কলঙ্ক বিধান করিয়াছিলেন ॥৪॥

অন্বয়ঃ—জনাঃ তমোঽপহং প্রতিদিননূতনোদয়ং ধরাধরোপস্থিতসহস্রধাকরং দিনমণিং দিনং দিনং অস্তগামিনং, যং অপি অনস্তগং জানতে স্ম ॥৫॥

সূর্য্যাদস্য ভেদং বোধয়তি তম ইতি। জনাস্তদানীন্তনা লোকাঃ, তমঃ অন্ধকারং তমোগুণনিবন্ধনমজ্ঞানঞ্চ অপহন্তি কিরণেন সদুপদেশেন চ নাশয়তীতি তম্, প্রতিদিনং নূতন উদয় উদয়াচলোদ্গমঃ সম্পদুৎপত্তিশ্চ যস্য তম্, ধরাধরেষু পর্ব্বতেষু সামন্তনৃপতিষু চ উপস্থিতা স্থাপিতা সহস্রধা সহস্রপ্রকারাঃ করাঃ কিরণা রাজগ্রাহ্যাংশাশ্চ যেন তম্, দিনমণিং সূর্য্যম্, দিনং দিনং প্রত্যহম্, অস্তগামিনম্ অস্তাচলসম্বদ্ধম্, যমপি যং ভীষ্মকঞ্চ, অনস্তগম্ অবিনাশিনম্, জানতে স্ম অবগতবন্তঃ।

অত্রাপ্যুপমানাৎ সূর্য্যাৎ উপমেয়স্য ভীষ্মকস্য আধিক্যবর্ণনাৎ শ্লেষানুপ্রাণিতো ব্যতিরেকালঙ্কারশ্ছেকানুপ্রাসো বৃত্ত্যনুপ্রাসশ্চেত্যেতেষাং

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

শিবান্বিতং শশিবিশদোত্তমাঙ্গকং
ত্রিলোচনং পরিগতশাস্ত্রলোচনৈঃ।
নিরীক্ষ্য যং নিয়তমনুগ্রবিগ্রহং
জনো মনো হরবিষয়ং ন্যবীবৃতৎ ॥৬॥

সংসৃষ্টিঃ, ন চ তৃতীয়পাদান্তিমাক্ষরস্য লঘুতয়া হতবৃত্ততাদোষ ইতি বাচ্যম্, "বিজ্ঞেয়মক্ষরং গুরু পাদান্তস্থং বিকল্পেন" ইতি পরিভাষায়াঃ সর্বপাদান্তিমাক্ষরস্যৈব পরিগ্রহাৎ। এতচ্চামুনা কবিনৈব সাহিত্যদর্পণ-টীকায়াং সপ্তমপরিচ্ছেদে হতবৃত্ততাদোষপ্রকরণে সোদাহরণং বহুধা বিস্পষ্টম্।

ধরাং ধরতীতি ব্যুৎপত্ত্যা ধরাধরশব্দেন পর্বতরাজানাবুভা-বপ্যুচ্যেতে ॥৫॥

বাঙ্গালা—সূর্য্য তম (অন্ধকার) নাশ করেন, ভীষ্মকরাজাও তম (অজ্ঞান) নাশ করিতেন; সূর্য্যের প্রত্যহ নূতন উদয় হয়, ভীষ্মক-রাজারও প্রত্যহ নূতন উদয় (অভ্যুদয়) হইত; সূর্য্য ধরাধর-(পর্ব্বত) সমূহের উপরে সহস্র কর (কিরণ) স্থাপন করেন, ভীষ্মকরাজাও ধরাধর-(সামন্তরাজ) সমূহের উপরে সহস্র প্রকার কর (খাজনা) স্থাপন করিতেন; (এইরূপে সূর্য্য ও ভীষ্মকরাজার অভিন্নতা হইলেও) সূর্য্য প্রতিদিন অস্তগামী হন; কিন্তু ভীষ্মকরাজা সেরূপ অস্তগামী হন না—এই ভাবে তৎকালের লোকেরা সূর্য্য ও ভীষ্মকরাজার বিভিন্নতা বুঝিত ॥৫॥

অন্বয়ঃ—জনঃ শিবান্বিতং শশিবিশদোত্তমাঙ্গকং পরিগতশাস্ত্রলোচনৈঃ ত্রিলোচনং (অপি) যং নিয়তং অনুগ্রবিগ্রহং নিরীক্ষ্য হরবিষয়ং মনঃ ন্যবীবৃতৎ ॥৬॥

শিবাদস্য বিশেষং দ্যোতয়তি শিবেতি। জনঃ, শিবয়া দুর্গয়া শিবেন মঙ্গলেন চান্বিতং যুক্তম্, শশিনা চন্দ্রেণ বিশদং নির্ম্মলম্ উত্তমাঙ্গং

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

শিবান্বিতঃ সকলতনৌ তনূনপা-
ন্মহামহা বহুতরচক্রধারকঃ।
উরঃস্থলে পরিলসদেককশ্রিয়ং
জহাস যো মধুরিপুমেকচক্রকম্ ॥৭॥

মস্তকং যস্য তম্, অন্যত্র শশিনশ্চন্দ্রস্যেব বিশদানি নির্ম্মলানি অতএব উত্তমানি অঙ্গানি হস্তপদাদীনি যস্য তম্, পরিগতানি লব্ধানি শাস্ত্রা-ণ্যেব লোচনানি তৈঃ কপিঞ্জলন্যায়েন ত্রিভিরিতি গম্যতে, ত্রীণি লোচনানি যস্য তং তাদৃশমপি নিয়তং ধ্রুবং যং ভীষ্মকম্, ন উগ্রো ভয়ঙ্করো বিগ্রহঃ শরীরং যস্য তম্, অন্যত্র ন বিদ্যতে উগ্রবিগ্রহঃ শিবমূর্ত্তির্যস্য তম্, নিরীক্ষ্য দৃষ্ট্বা হরঃ শিব এব বিষয়ী যস্য তত্তাদৃশং মনঃ ন্যবীবৃতৎ হরোঽয়মিতি বিষয়াৎ নিবর্ত্তিতবান্। শিবান্বিতাদি-সাম্যেঽপি অনুগ্রবিগ্রহনিরীক্ষণাদিবেতি ভাবঃ।

অত্র শিবাদুপমানাৎ উপমেয়স্য ভীষ্মকস্য উগ্রবিগ্রহন্যূনতাবর্ণনা-দ্ব্যতিরেকালঙ্কারঃ মনসো নিবর্ত্তনং প্রতি অনুগ্রবিগ্রহং নিরীক্ষ্যেতি পদার্থস্য হেতুতয়া পদার্থহেতুকং কাব্যলিঙ্গঞ্চেত্যুভয়োঃ পূর্ব্ববৎ সঙ্করঃ, সোঽপি চ শ্লেষেণ পূর্ব্ববদেবানুপ্রাসাভ্যাঞ্চ সংসৃজ্যতে ॥৬॥

বাঙ্গালা—মহাদেব শিবান্বিত (দুর্গাযুক্ত), ভীষ্মকরাজাও শিবান্বিত (শিব-মঙ্গল-যুক্ত; মহাদেব শশিবিশদোত্তমাঙ্গক (ললাটে চন্দ্র থাকায় তাঁহার কিরণে নির্ম্মল মস্তকযুক্ত), ভীষ্মকরাজাও শশিবিশদোত্তমাঙ্গক (চন্দ্রের ন্যায় নির্ম্মল ও উত্তম অঙ্গযুক্ত); এবং মহাদেব ত্রিলোচনযুক্ত, ভীষ্মকরাজাও তিনটী শাস্ত্ররূপ ত্রিলোচনযুক্ত; (এই ভাবে মহাদেব ও ভীষ্মকরাজার অভিন্নতা হইয়া পড়িলেও) মহাদেব উগ্রমূর্ত্তি, আর ভীষ্মক-রাজা উগ্রমূর্ত্তি নহেন; এইরূপ দেখিয়া সে কালের মানুষ (ভীষ্মকরাজাকে দেখিবার সময়ে) মহাদেব মনে করিত না ॥৬॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

রণোদ্যমে ধরণিবিকম্পসংশয়াৎ
হুলুধ্বনিং প্রথমমদুস্ব যস্য যাঃ ।
অনন্তরং হৃদয়মপি প্রকম্পিতং
বিলোক্য তা রিপুবনিতা বিতত্রসুঃ ॥৮ ॥

অন্বয়ঃ—সকলতনৌ শ্রিয়াশ্রিতঃ তনূনপান্মহামহাঃ বহুতরচক্রধারকঃ (চ) যঃ উরঃস্থলে পরিলসদেককশ্রিয়ং একচক্রক মধুরিপুং জহাস ॥৭॥

নারায়ণাদস্য ব্যতিরেকং সূচয়তি শ্রিয়েতি । সকলতনৌ সর্বশরীরে, শ্রীঃ শোভৈব শ্রীর্লক্ষ্মীস্তয়া আশ্রিতঃ, তনূং ন পাতি সংসক্তো ন রক্ষতীতি তনূনপাদগ্নিস্তস্যেব মহৎ মহস্তেজো যস্য স তনূনপান্মহামহাঃ, বহুতরং চক্রং রাজ্যমেব চক্রমস্ত্রবিশেষং ধারয়তীতি বহুতরচক্রধারকশ্চ, যো ভীষ্মকঃ, উরঃস্থলে বক্ষোদেশে পরিলসন্তি শোভমানা একিকা শ্রীর্লক্ষ্মীর্যস্য তম্, একমেব চক্রং সুদর্শনং যস্য তঞ্চ, মধুরিপুং নারায়ণং জহাস ।

অত্র শোভালক্ষ্ম্যো রাজ্যচক্রয়োশ্চ ভেদেঽপি শ্লেষেণাভেদাধ্যবসায়াদতিশয়োক্তিরলঙ্কারঃ নারায়ণাৎ ভীষ্মকস্যাধিক্যবর্ণনাৎ ব্যতিরেকঃ, হাসং প্রতি কতিপয়পদার্থানাং হেতুত্বাৎ পদার্থহেতুকং কাব্যলিঙ্গঞ্চেত্যেতেষামঙ্গাঙ্গিভাবেন সঙ্করঃ, সোঽপি পুনঃ যমক-চ্ছেকবৃত্ত্যনুপ্রাসৈঃ সংসৃজ্যতে ।

“শ্রীর্লক্ষ্মীর্বেশসম্পত্তস্ব ভারতী শোভয়োরপি” ইতি ত্রিকাণ্ডশেষঃ ; “জাতবেদাস্তনূনপাৎ” ইতি “মহস্তূৎসবতেজসোঃ” ইতি “চক্রং রাষ্ট্রেঽপি” ইতি চামরঃ ॥৭॥

বাঙ্গালা—সমস্ত শরীরে শ্রীযুক্ত, অগ্নির ন্যায় মহাতেজা এবং বহুতরচক্রধারী (বহুসংখ্যকরাজ্যপালক) যে ভীষ্মকরাজা, কেবল বক্ষঃস্থলে একমাত্র শ্রীযুক্ত এবং একমাত্র চক্রধারী নারায়ণকে উপহাস করিতেন ॥৭॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

द्विषच्चमूं प्रति गतिमात्रतोऽपि यो
जयश्रियं प्रथममशिश्रियन्मृधात्।
उषामसौ पुरत उपैत्यहर्पतिः
परं ततस्तिमिरततिं हिनस्ति हि ॥९॥

अन्वयः—याः यस्य रणोद्यमे धरणिविकम्पसंशयात् प्रथमं हुलुध्वनिं चक्रुः, अनन्तरं हृदयं अपि प्रकम्पितं विलोक्य ताः रिपुवनिताः वितत्रसुः ॥८॥

रणोद्यम इति। याः रिपुवनिताः, यस्य भीष्मकस्य रणोद्यमे युद्धोद्योगे धरणिविकम्पसंशयात् सैन्यानां पदभरेण भूमिकम्पमनुभूय नागादिचलनेन भूमिकम्पसन्देहात् प्रथमं हुलुध्वनिम्, अद्रुः अकुर्वन्, अनन्तरं हृदयमपि उद्वेगेन प्रकम्पितं विलोक्य अनुभूय, ता एव रिपुवनिताः वितत्रसुः भीष्मकेणाक्रमणसम्भवात् त्रासं प्रापुः।

अत्र भीष्मकरणोद्यमे रिपुवनितानां हुलुध्वनिदानासम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिरलङ्कारः चतुर्थचरणगतवृत्त्यनुप्रासेन संसृज्यते। भूमिकम्पानुभवे स्त्रीणां हुलुध्वनिदानं देशाचारः ॥८॥

বাঙ্গালা—যে ভীষ্মকরাজা যুদ্ধের উপক্রম করিলে, যে সকল বিপক্ষ মহিলা ভূমিকম্পের আশঙ্কা করিয়া প্রথমে হুলুধ্বনি দিত, তাহারাই পরে আপনাদের হৃদয়ও কম্পিত হইয়াছে দেখিয়া বিশেষ উদ্বিগ্ন হইত ॥৮॥

अन्वयः—यः अपि द्विषच्चमूं प्रति गतिमात्रतः मृधात् प्रथमं जयश्रियं अशिश्रियत्। असौ अहर्पतिः हि पुरतः उषां उपैति, ततः परं तिमिरततिं हिनस्ति ॥९॥

राज्ञः शौर्य्यं विवृणोति द्विषदिति। योऽपि यश्च भीष्मकः, द्विषच्चमूं शत्रुसेनां प्रति, गतिमात्रतः केवलादुगमनादेव, मृधात् युद्धात्, प्रथमं पूर्वम्, जयश्रियं विजयलक्ष्मीम्, अशिश्रियत् प्रापत् भयेन शत्रुसेनायाः

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

उर:स्थलस्थितकमलास्थमत्सरात्
सरस्वती शुचिरसनासना सती ।
यदीयके यशसि मनस्यनारतं
रुचिच्छलादपि हसिते विदिद्युते ॥१०॥

पलायनादिति भाव: । असौ अहर्पति: सूर्य्यो हि, पुरत: पूर्वम्, उषां प्रत्यूषम्, उपैति प्राप्नोति ; तत: परं तिमिरततिम् अन्धकारसमूहम्, छिनत्ति नाशयति ।

अत्र युद्धात् पूर्व्वं जयश्रियो लाभासम्बन्धेऽपि तत्सम्बन्धोक्ते-रतिशयोक्तिरलङ्कार: साधर्म्म्येण दृष्टान्त:, छेकानुप्रासो वृत्त्यनुप्रासश्च इत्येतेषां मिथो निरपेक्षतया संसृष्टि: ।

"मृधमास्कन्दनं संख्यम्" इति युद्धपर्य्याये अमर: ॥९॥

বাঙ্গালা—যে ভীষ্মকরাজা শত্রুসৈন্যের প্রতি গমন করিয়া যুদ্ধ করিবার পূর্ব্বেই বিজয়লক্ষ্মী লাভ করিতেন। কারণ, সূর্য্য প্রথমে উষাকে লাভ করেন, তাহার পরে অন্ধকারসমূহ বিনষ্ট করিয়া থাকেন ॥৯॥

अन्वय:—सरस्वती उर:स्थलस्थितकमलास्थमत्सरात् रुचिच्छलात् शुचिरसनासना सती यदीयके यशसि मनसि हसिते अपि अनारतं विदिद्युते ॥१०॥

राज्ञो विद्यावैभवमाह उर इति । सरस्वती वाग्देवी, उर:स्थले वक्षोदेशे स्थिता या कमला विशालतया श्रीःलक्ष्मी: तस्यां तिष्ठतीति स तादृशो यो मत्सरो विद्वेषस्तस्मात्, रुचिच्छलात् शुभ्रदन्तप्रभाव्यपदेशात्, शुचि: पवित्रा या रसना जिह्वा सैव आसनं यस्या: सा तादृशी सती, यदीयके यस्य भीष्मकस्य सम्बन्धिनि यशसि मनसि हसिते अपि, अनारतं निरन्तरम्, विदिद्युते बभौ ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

निरन्तरं दिशि दिशि गायतां सतां
सुखाम्लिकापरिणतिचिह्नचिह्नितम्।
सुधाम्बुधेर्जलविमलञ्च यद्यशः
जगज्जनाः शशधरमेव मेनिरे ॥११॥

अत्र काव्यैश सरस्वत्यां सपत्नीव्यवहारसमारोपात् समासोक्तिरलङ्कारः, अपह्नुतिः, एकस्याः सरस्वत्याः मनःप्रभृत्यनेकगोचरतया पर्य्यायश्च इत्येतेषाम् अङ्गाङ्गिभावेन सङ्करः, सोऽपि च यमकवृत्त्यनुप्रासाभ्यां संसृज्यते।

"मत्सरोऽन्यशुभद्वेषे तद्वत् कृपणयोस्त्रिषु" इत्यमरः ॥१०॥

বাঙ্গালা—যে ভীষ্মকরাজার বিশাল বক্ষোদেশে সর্ব্বদা বীরলক্ষ্মী অবস্থান করিতেন বলিয়া তাঁহার প্রতি বিদ্বেষবশতঃ সরস্বতী শুভ্রদন্তপ্রভাচ্ছলে যে ভীষ্মকরাজার নির্ম্মল রসনাদেশে থাকিয়া যশ, মান এবং হাস্যেও সর্ব্বদা প্রকাশ পাইতেন ॥১০॥

अन्वयः—जगज्जनाः दिशि दिशि निरन्तरं गायतां सतां मुखाम्लिकापरिणतिचिह्नचिह्नितं सुधाम्बुधेः जलविमलञ्च यद्यशः एव शशधरं मेनिरे ॥११॥

राज्ञो यशःप्रसारं वर्णयति निरन्तरमिति। जगज्जनाः, दिशि दिशि, निरन्तरम्, गायतां यश एव कीर्त्तयताम्, सतां सज्जनानाम्, मुखेषु या अम्लिका स्वाभाविकाम्लरसः तस्याः परिणत्याः परिणामेन यच्चिह्नं कांस्यपात्रादौ तिन्तिरिविन्दुवत् कलङ्कः तेन चिह्नितम् अङ्कितम्, सुधाम्बुधेः क्षीरसमुद्रस्य जलवद्विमलम्, यस्य भीष्मकस्य यश एव शशधरं चन्द्रं मेनिरे सम्भावितवन्तः।

अत्र यशसश्चाद्रस्यचिह्नचिह्नितत्वासम्बन्धेऽपि तत्सम्बन्धोक्तेरति-

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

দ্বিবর্ণভাগ্‌যদি চ যশো জগত্‌পতেঃ
তথাপ্যভূদ্বহুতরবর্ণসংযুতম্ ।
সমৈরিরত্ প্রতিবনিতাগতের্ষ্যয়া
তটান্তরে ক্ষিতিরপি কীর্ত্তিমম্বুধেঃ ॥১২॥

ন্যয়োক্তিরলঙ্কারঃ বাচ্যা ভাবাভিমানিনী দ্রব্যোত্প্রেক্ষা বৃত্ত্যনুপ্রাসশ্রুত্যনুপ্রাসচ্ছেকানুপ্রাসাশ্চ ইত্যেতেষাং সংসৃষ্টিঃ ॥১১॥

বাঙ্গালা—যে ভীষ্মকরাজার যশ ক্ষীরসমুদ্রের জলের ন্যায় নির্ম্মল ছিল, সাধুপ্রকৃতি লোকেরা সর্ব্বদা সকল দিকে সেই যশ গাহিয়া বেড়াইতেন, তাহাতেই তাঁহাদের মুখের অন্ন কালচিহ্নরূপে পরিণত হইয়া সে যশকে অঙ্কিত করিত, এহেন যশকেই জগতের লোক শশাঙ্ক বলিয়া মনে করিত ॥১১॥

অন্বয়ঃ—জগত্‌পতেঃ যশঃ যদি চ দ্বিবর্ণভাক্, তথাপি বহুতরবর্ণসংযুতম্ অভূত্ । ক্ষিতিঃ অপি প্রতিবনিতাগতের্ষ্যয়া কীর্ত্তিম্ অম্বুধেঃ তটান্তরে সমৈরিরত্ ॥১২॥

রাজ্ঞঃ কীর্ত্তির্যশসোর্বিস্তারমাহ দ্বিবর্ণভাগিতি । জগত্‌পতের্ভূপতেভীষ্মকস্য, যশো যশঃশব্দঃ, যদি চ যদ্যপি, দ্বৌ বর্ণৌ ব্রাহ্মণাদিবর্ণদ্বয়ং স্বররূপে দ্বে অক্ষরে চ ভজত ইতি দ্বিবর্ণভাক্ ; তথাপি, বহুতরৈর্বর্ণৈঃ ব্রাহ্মণাদিভিঃ স্বরৈশ্চ সংযুতং সম্বদ্ধমভূত্ । ক্ষিতিরপি অধিকৃতা ভূমিশ্চ, প্রতিবনিতাং সপত্নীং গতা চাসৌ ঈর্ষ্যা চেতি তয়ৈব, কীর্ত্তিম্, অম্বুধেঃ সমুদ্রস্য, তটান্তরে অপরতীরে, সমৈরিরত্ প্রেরিতবতী । ভীষ্মকস্য যশঃ সর্ব্বজাতিভিরুদ্‌ঘোষিতম্, কীর্ত্তিশ্চ দিগ্‌দিগন্তগতেতি সরলার্থঃ ।

অত্র পূর্ব্বার্দ্ধে শ্লেষেণ বিরোধসমাধানাত্ বিরোধাভাসোঽলঙ্কারঃ ; পরার্দ্ধে তু প্রতীয়মানা ভাবাভিমানিনী গুণোত্প্রেক্ষা ; অনয়োঃ পরস্পরনিরপেক্ষতয়া সংসৃষ্টিঃ ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

शरीरिणां सहभवदूषणानि षड्-
जितेन्द्रिये यमवति तत्र राजनि ।
महाज्वरे विकृतिमतो महौषधे
विषाणि वा परमगुणानजीजनन् ॥१३॥

"यशः कीर्त्तिः समज्ञा च" इति कीर्त्तियशसोः पर्य्यायत्वेऽपि "शौर्य्यादिप्रभवा कीर्त्तिर्दानादिप्रभवं यशः" इति महाजनकृतलक्षणात् कीर्त्तियशसोर्भेदेन निर्द्देशः ; "स जीवति यशो यस्य कीर्त्तिर्यस्य स जीवति" इत्यादिवत् ।

"वर्णो द्विजादौ शुक्लादौ स्तुतौ वर्णन्तु वाक्षरे" इत्यमरः ॥१२॥

বাঙ্গালা—ভীষ্মকরাজার বংশটী যদিও দুইটী বর্ণ-(অক্ষর) যুক্ত ছিল, তথাপি বহুতর বর্ণ-(জাতি) সমন্বিত হইত এবং অধিকৃত ভূমিও সপত্নীগত ঈর্ষ্যাবশতই যেন তাঁহার কীর্ত্তিকে সমুদ্রের অপর পারে প্রেরণ করিয়াছিল ॥১২॥

अन्वयः—शरीरिणां षट् सहभवदूषणानि जितेन्द्रिये यमवति तत्र राजनि महाज्वरे विकृतिमतः महौषधे विषाणि वा परमगुणान् अजीजनन् ॥१३॥

भीष्मकस्य दूषितकामाद्यभावं दर्शयितुं प्रस्तौति शरीरिणामिति । शरीरिणाम्, षट्, सहभवदूषणानि काम-क्रोध-लोभ-मोह-मद-मात्सर्य्य-रूपाः सहजा दोषाः, जितेन्द्रिये, यमवति संयमशालिनी, तत्र राजनि भीष्मके, महाज्वरे, विकृतिमतो विकारिणः रोगिणः, महौषधे महौषध-घटकानि विषाणि वा विषाणीव, परमगुणान् अतीवोत्कर्षान् उपकारांश्च, अजीजनन् उत्पादितवन्ति ।

अत्र दूषणानि परमगुणानजीजनन्निति कारणविरुद्धकार्य्योत्पत्ते-र्विषमालङ्कारः श्रौतोपमया सङ्कीर्य्यते ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

ধনান্যসাবচকমতার্থিসাৎকৃতৌ
রিপৌ রুষঃ সুকৃতকৃতৌ চ লোভবান্।
মুমোহ দুর্ব্বচসি চ সৎকথোন্মদঃ
সমৎসরোঽভবদখিলান্ খলান্ প্রতিঃ ॥১৪॥

"বা স্যাৎ বিকল্পোপময়োরেবার্থে চ সমুচ্চয়ে" ইতি বিশ্বঃ ॥১৩॥

বাঙ্গালা—মহাজ্বর বিকাররোগীর পক্ষে মহৌষধের অন্তর্গত বিষ যেমন অত্যন্ত উপকার উৎপাদন করে, সেইরূপ জিতেন্দ্রিয় ও সংযমযুক্ত ভীষ্মকরাজার পক্ষে প্রাণিগণের স্বাভাবিক কাম, ক্রোধ, লোভ, মোহ, মদ ও মাৎসর্য্য—এই ছয়টা দোষ অত্যন্ত গুণ উৎপাদন করিয়াছিল ॥১৩॥

অন্বয়ঃ—অসৌ অর্থিসাৎকৃতৌ ধনানি অচকমত, রিপৌ রুষঃ, সুকৃতকৃতৌ চ লোভবান্, দুর্ব্বচসি মুমোহ, সৎকথোন্মদঃ, অখিলান্ খলান্ প্রতি চ সমৎসরঃ অভবৎ ॥১৪॥

প্রস্তুতং দোষাণাং গুণজননং বর্ণয়তি ধনানীতি। অসৌ ভীষ্মকঃ, অর্থিসাৎকৃতৌ যাচকেভ্যো দানায়, ধনানি অচকমত অভিলষিতবান্; রিপৌ শত্রৌ, রোষতোঽপি রুষঃ, সুকৃতকৃতৌ পুণ্যকর্ম্মণি, লোভবান্ লোলুপঃ, দুর্ব্বচসি কস্মিন্নপি প্রতি কটূক্তৌ; মুমোহ মোহং বৈচিত্ত্যং প্রাপ; সৎকথায়াম্ উন্মদঃ অধিকমত্ততাশালী; অখিলান্ খলান্ দুর্জ্জনান্ প্রতি চ, মৎসরেণ শুভদ্বেষেণ সহেতি সমৎসরঃ, অভবৎ। দানায় ধনকামনা, শত্রৌ ক্রোধঃ, পুণ্যকার্য্যে লোভঃ, কটূক্তৌ মোহঃ, সদালোচনায়াং মত্ততা, দুর্জ্জনে মাৎসর্য্যঞ্চ পুরুষস্য মহান্তমুৎকর্ষং জনয়ত্যেবেতি ভাবঃ।

অত্র অর্থিসাৎকৃতাবেব ধনান্যচকমত ন পুনর্ভোগায়েত্যাদি-

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

दिवा पदं नहि तनुते निशीथिनी
न विद्यते द्युमणिभवा निशि द्युतिः ।
अगोचरे विचरति नैव कोऽपि चेत्
तदात्र काप्यजनि न दुर्जनक्रिया ॥१५॥

कथितान्यव्यपोहनादार्थिपरिसंख्यालङ्कारः अखिलान् खलान् इति छेकानुप्रासेन संसृज्यते ।

रोषतीति रुषः "नाम्युपध-प्री-कृ-गॄज्ञां कः" इति कप्रत्ययः ॥१४॥

বাঙ্গালা—ভীষ্মকরাজা প্রার্থিগণকে দান করিবার জন্য ধন কামনা করিতেন এবং তাঁহার শত্রুর প্রতি ক্রোধ, পুণ্যকার্য্যে লোভ, দুর্ব্বাক্যে মোহ, সৎকথায় মত্ততা ও সমস্ত খললোকের প্রতি মাৎসর্য্য (বিদ্বেষ) ছিল ॥১৪॥

अन्वयः—निशीथिनी दिवा पदं नहि तनुते, द्युमणिभवा द्युतिः (च) निशि न विद्यते । कः अपि चेत् अगोचरे न एव विचरति, तदा अत्र का अपि दुर्जनक्रिया न अजनि ॥१५॥

रात्रौ दोषाभावं दर्शयति दिवेति । निशीथिनी रात्रिः, दिवा दिनाभिधाने काले, पदं प्रवृत्तिचेष्टाम्, नहि तनुते न खलु करोति, द्युमणेः सूर्य्यात् भवतीति द्युमणिभवा द्युतिर्दीप्तिश्च, निशि रात्रौ न विद्यते । अतएव कोऽपि चेत् अगोचरे आत्मनः अविषये, न विचरति, तदा अत्र भीष्मके काऽपि दुर्जनक्रिया परानर्थविधानादिरूपा, न अजनि न जाता, अस्य तदविषयत्वादेवेति भावः ।

अत्र विशेषद्वयेन वक्ष्यमाणसामान्यसमर्थनादर्थान्तरन्यासोऽलङ्कारः, "मदसिक्तमुखैर्मृगाधिपः" इत्यादिकिरातश्लोके मल्लिनाथोक्तवत् । छेकानुप्रासो वृत्त्यनुप्रासश्चेति संसृष्टिः ॥१५॥

বাঙ্গালা—রাত্রি, দিনের বেলায় পদক্ষেপ করিবার চেষ্টা করে না

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

न केवलं किल कलया पृथक् पृथक्
दिगीश्वरा मिलितिमुपागता मिथः।
अवातरन्नवनिपतेः कलेवरे
शशास यद्दश दिश एक एव सः ॥१६॥
विकर्त्तनो महसि, मुखे शशी, क्रतौ
स मङ्गलो, मनसि बुधो, गुरुर्गुणे।

এবং সূর্য্যের দীপ্তিও রাত্রিতে প্রকাশ পায় না। অতএব কোন পদার্থই যদি অবিষয়ে প্রবৃত্ত না হয়, তবে এই ভীষ্মকে কোনও দুর্জনকার্য্য প্রবৃত্ত হয় নাই (ভীষ্মক কোনও দুর্জনকার্য্য করিতেন না) ॥১৫॥

अन्वयः—दिगीश्वराः पृथक् पृथक् कलया केवलं न, (अपि तु) मिथः किल मिलितिम् उपागताः (सन्त एव) अवनिपतेः कलेवरे अवातरन्। यत् एक एव सः दश दिशः शशास ॥१६॥

राज्ञो महिमानं प्रतिपादयति नेति। दिगीश्वरा इन्द्रादयो दिक्पालाः "अष्टानां लोकपालानां मालाभिर्निर्म्मितो नृपः" इति स्मरणात्, पृथक् पृथक् कलया अंशेन, केवलं न, अपि तु, मिथः परस्परं किल, मिलितिं सम्मेलनम्, उपागताः प्राप्ताः सन्त एव, अवनिपतेः राज्ञो भीष्मकस्य, कलेवरे देहे, अवातरन् अवतीर्णाः। यद्यस्मात्, एक एव, स भीष्मकः, दश दिशः शशास। दिक्पालानां पूर्णत्वाभावे पूर्णशासनं न सम्भवतीति भावः।

अत्र दिक्पालानां सम्मेलनपूर्व्वकावतरणासम्बन्धेऽपि तत्सम्बन्धोक्ते-रतिशयोक्तिरलङ्कारः, छेकानुप्रासवृत्त्यनुप्रासाभ्यां संसृज्यते ॥१६॥

বাঙ্গালা—ইন্দ্রপ্রভৃতি দিক্পালগণ পৃথক্ পৃথক্ অংশেই যে কেবল ভীষ্মকরাজার শরীরে অবতীর্ণ হইয়াছিলেন, তাহা নহে; কিন্তু তাঁহারা পরস্পর সম্মিলিত হইয়াই পূর্ণভাবে তাঁহার দেহে অবতীর্ণ হইয়াছিলেন। যেহেতু, তিনি একাকীই দশ দিক্ শাসন করিতেন ॥১৬॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

कविर्गिरि द्विषति शनिश्च तस्थिवान्
तथाप्यभून्नृपतिरसौ सुदुर्ग्रहः ॥१७॥
ज्वलन्ति चेन्नहि जलजं जले जले
न चेत् क्षितौ फलति फलं वने वने।
नृपोचितो न खलु तदा तदात्मनि
मदो मनागपि धनसम्भवोऽभवत् ॥१८॥

अन्वयः—विकर्त्तनः महसि, शशी मुखे, सः मङ्गलः क्रतौ, बुधः मनसि, गुरुः गुणे, कविः गिरि, शनिश्च द्विषति तस्थिवान्, तथापि असौ नृपतिः सुदुर्ग्रहः अभूत् ॥१७॥

तत्र राजनि सर्वग्रहाणामेव ग्रहाणामधिष्ठानं दुर्द्धर्षत्वञ्च वर्णयति विकर्त्तन इति। विकर्त्तनः सूर्य्यः, महसि तेजसि; शशी चन्द्रः, मुखे वदने; स प्रसिद्धो मङ्गलः, क्रतौ क्रियामात्रे; बुधः, मनसि; गुरुर्बृहस्पतिः, गुणे दयादाक्षिण्यादौ; कविः शुक्रो वर्णयिता च, गिरि वाक्ये, शनिः द्विषति शत्रौ च, तस्थिवान् तस्थौ। तथापि असौ नृपतिर्भीष्मकः, सुदुर्ग्रहः अतीवदुष्प्रापा ग्रहा यत्र स इति विरोधः, अतीवदुर्द्धर्ष इति तत्समाधानम्। अभूत्।

अत्रापि विकर्त्तनादीनां महःप्रभृतिषु स्थितत्वासम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिरलङ्कारः, विरोधाभासश्चेत्युभयोर्मिथो निरपेक्षतया संसृष्टिः। अतिशयोक्त्या च राज्ञो महःप्रभृतीनां सातिशयत्वं व्यज्यत इत्यलङ्कारेण वस्तुध्वनिः।

"महन्तूत्सवतेजसोः" इत्यमरः। तस्थिवान् इति स्थाधातोः क्वसुप्रत्यये रूपम्। अभूदिति च अस्तेरद्यतन्यां प्रयोगः ॥१७॥

বাঙ্গালা—ভীষ্মকরাজার তেজে সূর্য্য, মুখে চন্দ্র, কার্য্যে মঙ্গল, হৃদয়ে বুধ, গুণে বৃহস্পতি, বাক্যে কবি (শুক্র) এবং শত্রুবর্গে শনি থাকিতেন; তথাপি সেই রাজা অতিদুর্গ্রহ (অতিদুর্লভগ্রহ, অতিদুর্দ্ধর্ষ) ছিলেন ॥১৭॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

भवेज्जले ज्वलनभवापि तप्तता
सुरार्पणात् पुनरनलेऽपि शीतता।
अभून्नृपे सति च विकारकारणे
दृढ़ाशये नहि विकृतिः कियत्यपि ॥१९॥

अन्वयः—क्षितौ जलजं चेत् जले जले नहि जजन्ति, फलं (च) चेत् वने वने न फलति, तदा धनसम्भवः नृपोचितः मनाक् अपि मदः तदात्मनि न खलु अभवत् ॥१८॥

राज्ञो धनमत्तता नासीदित्याह जजन्तीति। क्षितौ पृथिव्याम्, जलजं पद्मञ्चेत्, जले जले प्रतिजलम्, नहि जजन्ति न जायते; फलञ्चेत्, वने वने प्रतिवनम्, न फलति तरुर्नोत्पादयति स्वयं नोत्पद्यते वा, तदा, धनात् सम्भवतीति धनसम्भवः, नृपोचितः राजयोग्यः, मनाक् अल्पोऽपि मदः मत्तता, तस्य भीष्मकस्य आत्मनि चित्ते न खलु अभवत्। जलवने पद्मफलयोरिव धनं न मत्ततायाः नियतं कारणमिति भावः।

अत्र दृष्टान्तोऽलङ्कारः पूर्ववदनुप्रासाभ्यां संसृज्यते।

"किञ्चिदीषन्मनागल्पे" इत्यमरः। जजन्तीति "जन जनने" इत्यस्य वर्त्तमानातिविभक्तौ जुहोत्यादित्वाद्द्विर्वचने रूपम् ॥१८॥

বাঙ্গালা—পৃথিবীতে প্রত্যেক জলে যদি পদ্ম না জন্মে, প্রত্যেক বনে যদি ফল উৎপন্ন না হয়, তাহা হইলে রাজার যোগ্য ধনসম্ভূত অল্প মত্ততাও ভীষ্মকরাজার চিত্তে উৎপন্ন হয় নাই ॥১৮॥

अन्वयः—जले अपि ज्वलनभवा तप्तता भवेत्, पुनः अनले अपि सुरार्पणात् शीतता भवेत्। (किन्तु) दृढ़ाशये नृपे विकारकारणे सति च कियती अपि विकृतिः नहि अभूत् ॥१९॥

राज्ञश्चित्तविकारनिबन्धनं विचारवैरूप्यं नासीदित्याह भवेदिति। नियतशैत्यगुणे जलेऽपि ज्वलनादग्नेर्भवतीति ज्वलनभवा अग्निसन्तापनिबन्धना तप्तता सन्तापो भवेत्; पुनः अनले अग्नावपि सुरायाः मद्य-

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

মহীপতৌ মনুমনুসৃত্য শাসতি
প্রজাং নহি ক্বচিদপি দুঃখমস্পৃশত্।
বিরোচনে সতি হি চকাসতি প্রগে
করোতি নো জননয়নাবৃতিং তমঃ ॥২০॥

বিশেষস্য অর্পণাত্ নিক্ষেপাত্, শীততা শৈত্যগুণো ভবেত্; কিন্তু দৃঢ়াশয়ে অবিচলিতচিত্তবৃত্তৌ নৃপে ভীষ্মকে, বিকারকারণে সতি চ, কিয়তী অপি বিকৃতির্বিকারঃ বিকারনিবন্ধনং বিচারবৈরূপ্যমিত্যর্থঃ, নহি অভূত্।

অত্র বৈধর্ম্ম্যে দৃষ্টান্তোঽলঙ্কারঃ, কারণে সত্যপি কার্য্যানুত্পত্তে-র্বিশেষোক্তিশ্চ অনয়োরঙ্গাঙ্গিভাবেন সঙ্করশ্ছেকানুপ্রাসেন সংসৃজ্যতে ॥১৯॥

বাঙ্গালা—অগ্নিসন্তাপনিবন্ধন জলেও উষ্ণতা হয় এবং মন্ত্রবিশেষ নিক্ষেপ করিলে অগ্নিতেও শীতলতা হইয়া থাকে; কিন্তু বিকারের কারণ থাকিলেও দৃঢ়চিত্ত ভীষ্মকরাজার চিত্তে অল্প বিকারও হইত না ॥১৯॥

অন্বয়ঃ—মহীপতৌ মনুম্ অনুসৃত্য শাসতি (সতি) দুঃখং ক্বচিদপি প্রজাং নহি অস্পৃশত্। হি প্রগে বিরোচনে চকাসতি সতি তমঃ জননয়নাবৃতিং নো করোতি ॥২০॥

রাজ্ঞঃ সুশাসনমাহ মহীতি। মহীপতৌ ভীষ্মকে, মনুং মানবং ধর্ম্মশাস্ত্রম্, অনুসৃত্য শাসতি রাজ্যে শাসনং কুর্ব্বতি সতি, দুঃখং কর্তৃ, ক্বচিত্ কদাচিদপি, প্রজাং জনম্, নহি অস্পৃশত্ লেশতোঽপি ন খলু সমবধ্নাত্; রাজ্ঞঃ সুশাসনগুণাদেব তস্করাদিনিবন্ধনসর্ব্বদুঃখনিবৃত্তে-রিতি ভাবঃ। হি তথাহি, প্রগে প্রভাতে কালে, বিরোচনে সূর্য্যে, চকাসতি প্রকাশমানে সতি, তমঃ অন্ধকারঃ, জনানাং নয়নাবৃতিং চক্ষুরাবরণং ন করোতি।

অত্র সাধর্ম্ম্যেণ দৃষ্টান্তোঽলঙ্কারশ্ছেকানুপ্রাসশ্চেত্যুভয়োঃ সংসৃষ্টিঃ। "প্রজা স্যাত্ সন্ততৌ জনে" ইতি "প্রগে প্রাতঃ" ইতি চামরঃ ॥২০॥

বাঙ্গালা—ভীষ্মকরাজা মনুপ্রণীত ধর্ম্মশাস্ত্র অনুসারে রাজ্যশাসন করিতে থাকিলে, কখনও কোন দুঃখ আসিয়া প্রজাগণকে স্পর্শ করিত

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

তমঃক্রমো নিশি, চলতা লতাততৌ,
দিবোষ্ণতা, শশিনি কলঙ্ককালিমা ।
কলির্যুগে, বচসি বিভক্তিযোজনম্,
তদাঽভবদ্বপুষি চ শক্তিধারণম্ ॥২১॥

না। কারণ, প্রভাতকালে সূর্য্য উদিত হইলে, অন্ধকার লোকের নয়ন আবৃত করে না ॥২০॥

অন্বয়ঃ—তদা তমঃক্রমঃ নিশি, চলতা লতাততৌ, উষ্ণতা দিবা, কলঙ্ককালিমা শশিনি, কলিঃ যুগে, বিভক্তিযোজনং বচসি, শক্তিধারণঞ্চ বপুষি অভবৎ ॥২১॥

তদানীন্তনলোকানাং প্রায়েণ দোষাভাবং সূচয়তি তম ইতি। তদা ভীষ্মকশাসনকালে, তমঃক্রমঃ অন্ধকারপরম্পরা, নিশি রাত্রৌ, ন পুনস্তমঃক্রমস্তমোগুণনিবন্ধনাজ্ঞানপরম্পরা লোকসমাজে। চলতা চঞ্চলতা, লতাততৌ বল্লীসমূহে; ন পুনশ্চলতা চিত্তচাঞ্চল্যং স্ত্রীজাতৌ। উষ্ণতা, দিবা সৌরকিরণাবচ্ছিন্নকালে; ন তু উষ্ণতা কোপসন্তাপো জনসমাজে। কলঙ্ককালিমা শশচিহ্নকার্ষ্ণ্যম্, শশিনি চন্দ্রে; ন পুনরপবাদমালিন্যং লোকচরিত্রে। কলিঃ অন্তিমযুগম্, যুগে সত্যাদিযুগপর্য্যায়ে, ন পুনঃ কলিঃ কলহো লোকসমাজে। বিভক্তিযোজনং সুপ্তিঙ্প্রয়োগঃ, বচসি বাক্যে; ন তু বিভক্তিযোজনং বিভাগসম্পাদনং ভ্রাত্রাদৌ। শক্তিধারণং বলাশ্রয়ণঞ্চ, বপুষি শরীরে; ন তু শক্তিধারণং শক্তিনামকাস্ত্রগ্রহণং বিবদমানজনেষু অভবৎ; সর্ব্বত্র রাজ্ঞশ্চেষ্টাবৈচিত্র্যাদিতি ভাবঃ।

অত্র প্রদর্শিতরীত্যা কথিতান্যবস্তুব্যপোহনাৎ শ্লেষসঙ্কীর্ণা আর্থী পরিসংখ্যালঙ্কারশ্ছেকানুপ্রাসাভ্যাং সংসৃজ্যতে।

"কলঙ্কোঽঙ্কাপবাদয়োঃ" ইত্যমরঃ, "কলিঃ স্যাৎ কলহে শূরে কলিরন্ত্যযুগে যুধি" ইতি বিশ্বঃ ॥২১॥

বাঙ্গালা—ভীষ্মকরাজার শাসনসময়ে রাত্রিতে তমঃক্রম (অন্ধকার সমূহ) থাকিত, কিন্তু লোকসমাজে তমঃক্রম (অজ্ঞানপরম্পরা) থাকিত

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

অহর্পতেরহনি করৈঃ প্রফুল্লতি
সরোজিনী নিশি চ পুনর্নিমীলতি।
মহীপতের্জগতি করৈস্তদাতনী
প্রজাঽভজৎ সততমতীবফুল্লতাম্ ॥২২॥

না; লতাসমূহে চঞ্চলতা ছিল, কিন্তু স্ত্রীজাতিতে চঞ্চলতা ছিল না; দিনের বেলায় উষ্ণতা (গরম) হইত, কিন্তু লোকসমাজে উষ্ণতা (ক্রোধসন্তাপ) হইত না; চন্দ্রে কলঙ্ককালিমা (শশচিহ্নের কৃষ্ণবর্ণ) ছিল, কিন্তু লোকচরিত্রে কলঙ্ককালিমা (অপবাদমালিন্য) ছিল না; যুগপর্য্যায়ে কলি (শেষযুগ) ছিল, কিন্তু লোকসমাজে কলি (কলহ) ছিল না; বাক্যে বিভক্তিযোজন (সুপ্‌ ও তিঙ্‌বিভক্তির প্রয়োগ) হইত, কিন্তু ভ্রাতৃ-প্রভৃতির মধ্যে বিভক্তিযোজন (বিভাগ করা) হইত না এবং মানুষ শরীরে শক্তি ধারণ (বল ধারণ) করিত, কিন্তু বিবাদের সময় শক্তিধারণ (শক্তিনামক অস্ত্র গ্রহণ) করিত না ॥২১॥

অন্বয়ঃ—সরোজিনী অহনি অহর্পতেঃ করৈঃ প্রফুল্লতি, পুনঃ নিশি চ নিমীলতি। (কিন্তু) তদাতনী প্রজা জগতি মহীপতেঃ করৈঃ সততং (এব) অতীবফুল্লতাং অভজৎ ॥২২॥

ভীষ্মকপ্রজাসু নিত্যমেব সন্তোষ আসীদিত্যাহ অহর্পতেরিতি। সরোজিনী পদ্মিনী, অহনি দিবসে, অহর্পতেঃ সূর্য্যস্য, করৈঃ কিরণৈঃ প্রফুল্লতি বিকসতি হৃষ্যতি চ; পুনর্নিশি রাত্রৌ চ নিমীলতি সঙ্কুচতি বিষীদতি চ। কিন্তু তদাতনী ভীষ্মকসমকালীনা, প্রজা জনঃ, জগতি, মহীপতেঃ ভীষ্মকস্য, করৈঃ রাজগ্রাহ্যধনাংশৈঃ, সততমেব অতীব-ফুল্লতাং নিতান্তমেব বিকাশং হর্ষঞ্চ, অভজৎ প্রাপ্নোৎ; অধিকতদ্গ্রহণা-ভাবাদিতি ভাবঃ।

অত্র সূর্য্যাপেক্ষয়া ভীষ্মকস্যাধিক্যবর্ণনাৎ ব্যতিরেকোঽলঙ্কারঃ ॥২২॥

বাঙ্গালা—পদ্মিনী দিনের বেলায় সূর্য্যের কিরণে প্রফুল্ল (বিকসিত)

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

नृपो मनोर्वचनमृते न कर्म्मकृत्
जनः पुनर्नृपवचनं विना च न।
जनं जहत्यरमत नो रमापि सा
रमां त्यजन्भवनमभून्न किञ्चन ॥२३॥
विरूपता वियति, विदूनता दिने,
विलोड़नात् कलुषितता जलाशये।

হয়, আবার রাত্রিতে সঙ্কুচিত হইয়া যায়, কিন্তু তৎকালের প্রজা, ভীষ্মক-রাজার করগ্রহণের ব্যবস্থায় সর্ব্বদাই অত্যন্ত প্রফুল্ল থাকিত ॥২২॥

अन्वयः—नृपः मनोः वचनम् ऋते कर्म्मकृत् न अभूत्, पुनः जनस्य नृपवचनं विना कर्म्मकृत् न अभूत्, सा रमा अपि जनं जहती न अरमत, किञ्चन भवनं रमां त्यजत् न अभूत् ॥२३॥

भीष्मकराज्यस्य सर्वमङ्गलास्पदतां प्रतिपादयति नृप इति। नृपो भीष्मकः, मनोः मनुप्रभृतिधर्म्मशास्त्रकारगणस्य, वचनम् ऋते विना, कर्म्मकृत् न अभूत् किमपि कार्य्यं नाकार्षीदित्यर्थः। पुनर्जनस्य नृप-वचनं विना कर्म्मकृत् न अभूत्। सा प्रसिद्धा रमा लक्ष्मीरपि, जनं भीष्मकराज्यस्थलोकम्, जहती त्यजन्ती, न अरमत अन्यत्रानन्दं नान्वभवत्। किञ्चन किञ्चिदपि, भवनं गृहम्, कर्त्तृ, रमां लक्ष्मीम्, त्यजत् न अभूत्।

जहतीति "ओहाक् त्यागे" इति हाधातोः शन्तृङ्प्रत्यये रूपम् ॥२३॥

বাঙ্গালা—ভীষ্মকরাজা মনুপ্রভৃতি ধর্ম্মশাস্ত্রকারগণের বাক্য ব্যতীত কোন কার্য্য করিতেন না; আবার প্রজারাও তাঁহার উপদেশ ভিন্ন কোন কর্ম্ম করিত না, লক্ষ্মী সেই প্রজাগণকে পরিত্যাগ করিয়া অন্যত্র আনন্দ অনুভব করিতেন না এবং সেই রাজ্যে কোন গৃহই লক্ষ্মী শূন্য ছিল না ॥২৩॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

पथश्च्युतिर्जलधरवृष्टसम्बरे
विशीर्णताऽवसदपि पापतापयोः ॥२४॥
अवास्थित प्रतिकुसुमं मधुव्रतः
शरासने स्फुटकुसुमं स्मरस्य च ।

अन्वयः—विरूपता वियति, विदूनता दिने, विलोड़नात् कलुषितता जलाशये, पथः च्युतिः जलधरवृष्टसम्बरे, विशीर्णता अपि पापतापयोः अवसत् ॥२४॥

भीष्मकप्रजानां सौन्दर्य्यादिसम्पदमाह विरूपतेति। विरूपता रूपशून्यता, वियति आकाश एवामूर्त्तत्वात् ; न पुनर्मानुषे विरूपता कुत्सितत्वम् ; विदूनता सन्तापः, दिने सूर्य्यकिरणप्रभावाद्दिवस एव ; न पुनर्मानुषचित्ते विदूनता शोकादिसन्तापः। विलोड़नात् अवघट्टनात्, कलुषितता आविलता, जलाशये पुष्करिण्यादावेव, न तु लोकसमाजे कलुषितता पापम्। पथो मार्गात्, च्युतिर्भ्रंशः, जलधरवृष्टसम्बरे मेघोत्सृष्टजल एव ; न तु लोकसमाजे पथश्च्युतिः सदाचाराद्भ्रंशः। विशीर्णतापि क्षीणतापि, पापतापयोरेव ; न तु धर्म्मसुखयोः अवसत्।

अत्रापि पूर्ववदार्थी परिसंख्यालङ्कारः, अवसदित्येकया क्रियया विरूपतादीनां कर्त्तृतयाभिसम्बन्धात् तुल्ययोगिता चेत्येतयोरङ्गाङ्गिभावेन सङ्करः, सोऽपि पुनर्वृत्त्यनुप्रासच्छेकानुप्रासाभ्यां संसृज्यते।

"नीरक्षीराम्बुसम्बरम्" इत्यमरः। विदूनतेति "दूङ् परितापे" इति विपूर्वकस्य दूधातोः क्तप्रत्यये "ल्वादिभ्य" इति "ओदितश्च" इति तकारस्य नकारः ॥२४॥

বাঙ্গালা—আকাশে বিরূপতা (রূপহীনতা) ছিল, কিন্তু মানুষে বিরূপতা (সৌন্দর্য্যহীনতা) ছিল না। আলোড়ননিবন্ধন জলাশয়ে কলুষিততা (আবিলতা) হইত ; কিন্তু উপদ্রব করিলেও মনুষ্যসমাজে কলুষিততা (পাপাচরণ) হইত না। মেঘের জলই পথ হইতে বিচ্যুত হইত, কিন্তু মানুষ পথ (সদাচার) হইতে বিচ্যুত হইত না এবং পাপ ও সন্তাপেই ক্ষীণতা থাকিত ; কিন্তু ধর্ম্ম ও পুণ্যে ক্ষীণতা থাকিত না ॥২৪॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

स्मरः पुनर्नवनवयौवने नृणां
शतावधौ वयसि च यौवनं तदा ॥२५॥
सरस्वती निखिलनरानुपाययौ
समीरिता जगति तथापि सा सती ।
वदन्ति ये किल कमलाञ्च चञ्चलां
मृषागिरस्त इति जगुर्धनेश्वराः ॥२६॥

अन्वयः—तदा मधुव्रतः प्रतिकुसुमं, स्फुटकुसुमञ्च स्मरस्य शरासने, स्मरः पुनः नृणां नवनवयौवने, यौवनञ्च शतावधौ वयसि अवास्थित ॥२५॥

तदानीन्तनलोकानां दीर्घजीवनवर्णनेन राजवर्णनमुपसंहरति अवास्थितेति । तदा भीष्मकशासनसमये, मधुव्रतो भ्रमरः, प्रतिकुसुमं प्रतिविकसितपुष्पे अवास्थित, स्फुटकुसुमं विकसितपुष्पञ्च, स्मरस्य कामदेवस्य, शरासने धनुषि, अवास्थित । स्मरः स कामः पुनः, नृणां नराणाम्, नवनवयौवने अवास्थित, यौवनञ्च, शतावधौ शतवर्षपर्य्यन्ते, वयसि अवास्थित ।

अत्रापि अवास्थितेत्येकया क्रियया मधुव्रतादीनां कर्त्तृतयान्वयात् तुल्ययोगितालङ्कारः ।

अवास्थितेति स्थाधातोः "समवप्रविभ्यः" इति तथादित्वादद्यतन्या आत्मनेपदप्रथमपुरुषैकवचनम्, "स्थादोरिरद्यतन्यामात्मने" इत्याकारस्येकारः ॥२५॥

বাঙ্গালা—ভীষ্মকরাজার শাসনসময়ে প্রত্যেক পুষ্পে ভ্রমর বসিত, প্রত্যেক প্রস্ফুটিত পুষ্প আবার কামদেবের ধনুতে থাকিত ; সেই কামদেব আবার মানুষের নূতন নূতন যৌবনে অবস্থান করিতেন এবং সে যৌবন মানুষের একশত বৎসর বয়স পর্যন্ত থাকিত ॥২৫॥

অন্বয়ঃ—সরস্বতী নিখিলনরান্ উপায়যৌ, তথাপি জগতি সা সতী সমীরিতা । যে চ কিল কমলাং চঞ্চলাং বদন্তি, তে মৃষাগিরঃ ইতি ধনেশ্বরাঃ জগুঃ ॥২৬॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

नयाहृते कियदयनं बभूव नो
प्रजान्तरे न च विनयं विना प्रथा।
रथाङ्गने न, न भवने गदाश्रयः
सदागमादभवदलं मुदागमः ॥२७॥

भीष्मकराज्ये सर्व्वेषामेव विद्वत्त्वं धनित्वञ्चाह सरस्वतीति। सरस्वती वाग्देवी, निखिलनरान् उपाययौ भेजे, तथापि सा सरस्वती जगति भीष्मकराज्ये, सती अव्यभिचारिणी अभ्यर्च्चिता च समीरिता लोकैरुक्ता। ये च लोकाः कमलां लक्ष्मीं चञ्चलां वदन्ति, ते मृषागिरः मिथ्यावाच इति धनेश्वराः तदानीन्तना धनिनः जगुः ऊचुः, स्वेषु कमलायाश्चिर-स्थिरत्वादिति भावः।

अत्र विरोधाभासोऽलङ्कारश्छेकानुप्रासेन संसृज्यते।

"सत्ये साधौ विद्यमाने प्रशस्तेऽभ्यर्च्चिते च सत्" इत्यमरः ॥२६॥

বাঙ্গালা—সরস্বতী তৎকালীন সমস্ত লোককে ভজনা করিতেন, তথাপি তাঁহাকে লোকে সতী বলিত; আর যাঁহারা লক্ষ্মীকে চঞ্চলা বলে, তাহারা মিথ্যাবাদী, এই কথা তদানীন্তন ধনীরা বলিতেন ॥২৬॥

अन्वयः—नयात् ऋते कियत् अपि अयनं नो बभूव, प्रजान्तरे च विनयं विना प्रथा न बभूव। गदाश्रयः रथाङ्गने न बभूव, भवने (च) न बभूव, सदागमात् अलं मुदागमः अभवत् ॥२७॥

तदानीन्तनीं लोकानामवस्थामाह नयादिति। नयात् नीतेः, ऋते विना कियत् किञ्चिदपि अयनं पन्था नो बभूव, प्रजानां जनानाम् अन्तरे मध्ये च विनयं विना प्रथा व्यवहारो रीतिः न बभूव। गदाश्रयः गदा-धारणं रथाङ्गने न बभूव रणस्यैवाभावात्, भवने गृहे च गदानां रोगाणाम् आश्रयः अवस्थितिर्न बभूव, सर्व्वेषामेव स्वास्थ्यनियमानुवर्त्तित्वा-दित्याशयः। सतां सज्जनानाम् आगमात् गृहे उपस्थितेः अलं सर्व्वाम एव मुदागमः आनन्दोत्पत्तिरभवत्।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

ইতীষ্টৈরখিলসুখৈরখণ্ডিতৈঃ
ধরেশিতুর্ভুবনতলে বভূব সা।
স্খলত্তুলা কিল নগরী গরীয়সী
ধ্রুবে ভবেৎ ক্ক ন সতি কারণে ক্রিয়া ॥২৮॥

অত্র বভূবেত্যেকয়া ক্রিয়য়া বহূনাং কর্তৃতয়াভিসম্বন্ধাৎ তুল্যযোগিতা-লঙ্কারঃ, গদাময় ইতি শ্লেষেণ বৃত্ত্যনুপ্রাসচ্ছেকানুপ্রাসাভ্যাঞ্চ সংসৃজ্যতে।

"অয়নং বর্ত্ম মার্গাধ্বপন্থানঃ পদবী সৃতিঃ" ইতি "রোগব্যাধি-গদাঽময়াঃ" ইতি চামরঃ ॥২৭॥

বাঙ্গালা—ভীষ্মরাজার শাসনকালে নীতিপথব্যতীত মানুষের অন্য কোন পথ ছিল না, প্রজাদের মধ্যে সবিনয় ব্যবহার ভিন্ন অন্য কোন ব্যবহারের রীতি ছিল না, সমরাঙ্গণে গদা ধারণ হইত না, কিংবা গৃহস্থের গৃহে কোন রোগের আবির্ভাবও হইত না এবং সর্ব্বত্রই সজ্জনের উপস্থিতি-নিবন্ধন লোকের প্রচুর আনন্দই জন্মিত ॥২৭॥

অন্বয়ঃ—ধরেশিতুঃ সা গরীয়সী নগরী ইতি ইষ্টৈঃ অখণ্ডিতৈঃ অখিলসুখৈঃ ভুবনতলে স্খলত্তুলা বভূব কিল। কারণে ধ্রুবে সতি ক্ক ক্রিয়া ন ভবেৎ ॥২৮॥

বিদর্ভরাজধান্যাঃ প্রাধান্যমাহ—ইতীতি। ধরেশিতুর্ভূমিপতে-ভীষ্মকস্য, সা গরীয়সী সর্ব্বগৌরবাস্পদীভূতা, নগরী রাজধানী, ইতি ইয়দন্তৈ যাবৎ উক্তৈঃ, ইষ্টৈঃ, অখণ্ডিতৈঃ পূর্ণৈঃ, অখিলসুখৈঃ, ভুবন-তলে, স্খলন্তী চ্যবমানা তুলা ঔপম্যং যস্যাঃ সা নিরুপমেত্যর্থঃ বভূব। কিলেত্যৈতিহ্যে। কারণে ধ্রুবে নিয়তে সতি, ক্ক কস্মিন্ স্থানে ক্রিয়া কার্য্যং ন ভবেৎ অপি তু সর্ব্বত্রৈব ভবেদিত্যর্থঃ।

অত্র সামান্যেন বিশেষসমর্থনরূপোঽর্থান্তরন্যাসোঽলঙ্কারঃ, পূর্ব্ববদনু-প্রাসাভ্যাং সংসৃজ্যতে ॥২৮॥

বাঙ্গালা—ভীষ্মকরাজার সেই গৌরবিত নগরী এইরূপ সর্ব্বপ্রকার

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

স যৌবনে নিরবিশদেকদোর্ব্বরাং
বসুন্ধরাং বিদুষিতরাং বধূমপি।
তদাদিমাঽনবরতযোগ্যলালনাৎ
প্রজাবতী ভবতিতরাং স্ম, নাপরা ॥২৯॥

পরিপূর্ণ সুখে জগতের মধ্যে নিরুপমা হইয়াছিল। নিয়ত কারণ থাকিলে কোথায় ক্রিয়া না হয় ॥২৮॥

অন্বয়ঃ—সঃ যৌবনে একদা উর্ব্বরাং বসুন্ধরাং বিদুষিতরাং বধূম্ অপি নিরবিশৎ। তদাদিমা অনবরতযোগ্যলালনাৎ প্রজাবতী ভবতিতরাং স্ম অপরা ন ॥২৯॥

স ইতি। স ভীষ্মকঃ, যৌবনে কালে একদা উর্ব্বরাং সর্ব্বশস্যাঢ্যাং বসুন্ধরাং ভূমিম্, বিদুষিতরাং বিশেষেণ বিদুষীং বধূমপি ভার্য্যাঞ্চ নিরবিশৎ ভুক্তবান্। তদাদিমা তয়োঃ প্রথমা বসুন্ধরা অনবরতং যোগ্যং যৎ লালনম্ আদরেণ পালনং তস্মাৎ, প্রজাবতী প্রশস্তজনশালিনী, ভবতিতরাং প্রকর্ষেণ ভবতি স্ম, অপরা বধূস্তু প্রজাবতী সন্তানবতী ন ভবতিতরাং স্ম।

অত্র নিরবিশদিত্যেকয়া ক্রিয়য়া বধূবসুন্ধরয়োঃ কর্ম্মতয়ান্বয়াৎ তুল্যযোগিতালঙ্কারঃ প্রজাবতীতি শ্লেষেণ বৃত্ত্যনুপ্রাসেন চ সংসৃজ্যতে।

"নির্বেশো ভৃতিভোগয়োঃ" ইতি "প্রজা স্যাৎ সন্ততৌ জনে" ইতি চামরঃ।

প্রকর্ষেণ বিদুষীতি বিদুষিতরা "যাকারৌ স্ত্রীকৃতৌ হ্রস্বৌ ক্বচিৎ" ইতি স্ত্রীকারস্য হ্রস্বত্বম্। প্রজাবতীতি একত্র প্রশংসায়াম্ অন্যত্র চ সংসর্গে বন্তুপ্রত্যয়ঃ। ভবতিতরামিতি "আখ্যাতকিমেকারান্ত—" ইত্যাদিনা তরাংপ্রত্যয়ঃ ॥২৯॥

বাঙ্গালা—ভীষ্মকরাজা যৌবনকালে এক সময়েই সর্ব্বশস্যশালিনী পৃথিবী এবং বিশেষ বিদুষী ভার্য্যা ভোগ করিতেন, কিন্তু তাহাদের মধ্যে প্রথমা (পৃথিবী) সর্ব্বদা উপযুক্তভাবে পালন করায় প্রজাবতী (প্রশস্ত-

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

निशासमा प्रहरसमान् प्रसूय सा
महीपतेरथ सुषमान् सुतान् प्रिया ।
उषासमामधृत सुतां निजान्तरे
शुभाद्विधेर्विशदरुचीविरोचिनी ॥३०॥

सितद्युतिः शिशुशशिचन्द्रिकान्तरा
नभःप्रभा प्रविरलतारकेव सा ।
विलोकयन्नुनुजमनोविनोदिनी
सुतोदरा परिमितभूषणा बभौ ॥३१॥

প্রজাযুক্ত) হইয়াছিল, কিন্তু দ্বিতীয়া (ভার্য্যা) প্রজাবতী (সন্তানশালিনী) হন নাই ॥২৯॥

अन्वयः—अथ विशदरुचीविरोचिनी निशासमा सा महीपतेः प्रिया शुभात् विधेः प्रहरसमान् सुषमान् सुतान् प्रसूय निजान्तरे उषासमां सुताम् अधृत ॥३०॥

ततः काले राज्ञः सन्तानोत्पत्तिमाह निशेति । अथ अनन्तरम्, विशदरुच्या निर्म्मलगौरकान्त्या विशेषेण रोचते शोभत इति विशदरुचीविरोचिनी, अन्यत्र तु विशदरुच्या चन्द्रस्य शुभ्रप्रभया विरोचत इति सा, निशासमा रात्रितुल्या, सा, महीपतेर्भीष्मकस्य, प्रिया महिषी, शुभात् शुभजनकात्, विधेर्दैवात्, प्रहरसमान्, सुषमान् सुन्दरान् सर्व्वथा समपरिमाणांश्च, सुतान् पुत्रान् प्रसूय, निजान्तरे स्वकीयोदरे आत्मनः शेषांशे च, उषासमाम् उषायास्तुल्याम्, सुतां तनयाम्, अधृत धृतवती ।

अत्रार्थी पूर्णोपमालङ्कारः, वृत्त्यनुप्रासश्छेकानुप्रासश्चेति संसृष्टिः ।

"दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः" इत्यमरः ॥३०॥

বাঙ্গালা—তদনন্তর নির্ম্মল গৌরবর্ণশোভিতা, শুক্লপক্ষরাত্রিতুল্যা রাজমহিষী চারি প্রহরের ন্যায় চারিটী পুত্র প্রসব করিয়া পরে উষার ন্যায় একটী কন্যা গর্ভে ধারণ করিলেন ॥৩০॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

दधाति या धरणिमिमां सदैव, सा
स्वयं हि यज्जठरमविन्ददिन्दिरा।
पदे पदे स्खलितपदालसा च सा
नृपाङ्गना न गुरुतराऽभवत् कथम् ॥३२॥

अन्वयः—सुतोदरा सितद्युतिः परिमितभूषणा च सा शिशुचन्द्रिकान्तरा प्रविरल-तारका नभःप्रभा इव विलोकयन्मनुजमनोविनोदिनो (सती) बभौ ॥३१॥

तदानीन्तनीं महिष्या अवस्थामाह त्रिभिः। सितेति। सुता तनया उदरे यस्याः सा, सितद्युतिर्निर्म्मलकान्तिः, परिमितमल्पं भूषणं यस्याः सा च, सा भीष्मकमहिषी, शिशुचन्द्रिका नवज्योत्स्ना अन्तरे यस्याः सा, प्रविरला अत्यल्पाः तारकाः नक्षत्राणि यस्या सा, नभःप्रभा आकाश-कान्तिरिव, विलोकयतां निरीक्षमाणानां मनुजानां मनो विनोदयति आनन्दयतीति सा तादृशी सती बभौ।

अत्र श्रौतोपमालङ्कारश्छेकानुप्रासेन संसृज्यते ॥३१॥

বাঙ্গালা—গর্ভে কন্যাধারিণী, নির্ম্মলকান্তি ও অল্পভূষণা ভীষ্মক-মহিষী, নবোদিত জ্যোৎস্নাযুক্তা অত্যল্পনক্ষত্রসমন্বিতা আকাশপ্রভার ন্যায় দর্শনকারী লোকদিগের চিত্তবিনোদন করিতে থাকিয়া শোভা পাইতেন ॥৩১॥

अन्वयः—या सदा एव इमां धरणिं दधाति, सा इन्दिरा स्वयं हि यज्जठरं अविन्दत्, सा नृपाङ्गना पदे पदे स्खलितपदा अलसा गुरुतरा च कथं न अभवत् ॥३२॥

दधातीति। या सदैव इमां धरणिं पृथिवीं दधाति पुष्णाति धरति च; सा इन्दिरा लक्ष्मीः, स्वयं हि आत्मनैव, यस्याः जठरमुदरम्, अविन्दत् अलभत; सा नृपाङ्गना भीष्मकमहिषी, पदे पदे प्रतिपदक्षेपे, स्खलितपदा अपसरच्चरणा, अलसा, गुरुतरा अतीवभारवती सम्माना-स्पदीभूता च कथं न अभवत् अपि त्वभवदेव।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

নৃপপ্রিয়া বপুরপুষন্মনোহরং
দিনে দিনে কিল কমলালয়াশ্রিতম্ ।
প্রদীপভৃৎ সুবিমলকাচমোচিকা
তনোত্যলং রুচিররুচিং হি সর্ব্বতঃ ॥৩৩॥

অত্র পালনধারণয়োর্ভারবত্ত্বসম্ভাবিতয়োশ্চ ভেদেঽপি শ্লেষেণাভেদাধ্যবসায়াদতিশয়োক্তিঃ স্খলিতপদত্বং গুরুতরত্বঞ্চ প্রতি পূর্ব্ববাক্যার্থো হেতুরিতি বাক্যার্থহেতুকং কাব্যলিঙ্গঞ্চানয়োরঙ্গাঙ্গিভাবেন সঙ্করঃ; সোঽপি চ বৃত্ত্যনুপ্রাসচ্ছেকানুপ্রাসাভ্যাং সংসৃজ্যতে ।

"ডু ধাঞ্ ভৃঞ্ ধারণপোষণয়োঃ" ইতি গণপাঠাৎ ধাধাতোরুভয়ার্থত্বং প্রতিপত্তব্যম্ ॥৩২॥

বাঙ্গালা—যিনি সর্ব্বদাই এই পৃথিবী ধারণ করিতেছেন, সেই লক্ষ্মী যাঁহার উদরে অবস্থান করিতেছিলেন; সেই রাজমহিষীর প্রত্যেক পদক্ষেপে পদস্খলন কেন না হইবে এবং তিনি অলসা ও ভারাক্রান্তা কেন না হইবেন ॥৩২॥

অন্বয়ঃ—নৃপপ্রিয়া কমলালয়াশ্রিতং দিনে দিনে মনোহরং বপুঃ কিল অপুষৎ । প্রদীপভৃৎ সুবিমলকাচমোচিকা হি সর্ব্বতঃ অলং রুচিররুচিং তনোতি ॥৩৩॥

নৃপেতি । নৃপপ্রিয়া রাজমহিষী, কমলালয়য়া গর্ভরূপয়া লক্ষ্মীদেব্যা আশ্রিতম্, অতএব দিনে দিনে মনোহরম্, অধিকাধিকসৌন্দর্য্যমাপন্নম্, বপুঃ শরীরম্, কিল, অপুষৎ অধারয়ৎ । প্রদীপং বিভর্ত্তীতি প্রদীপভৃৎ অভ্যন্তরে দীপশিখাধারিণী সুবিমলা চাসৌ কাচমোচিকা মোচাকারা কাচনির্ম্মিতাঘটী চেতি সুবিমলকাচমোচিকা, সর্ব্বতঃ সমন্তাৎ, অলম্ অত্যর্থম্, রুচিররুচিং সুন্দরপ্রভাং তনোতি বিস্তারয়তি ।

অত্র দৃষ্টান্তোঽলঙ্কারঃ, পূর্ব্ববদনুপ্রাসৌ চেতি সংসৃষ্টিঃ ॥৩৩॥

বাঙ্গালা—রাজমহিষী স্বয়ং লক্ষ্মীদেবীকর্ত্তৃক অধিষ্ঠিত বলিয়া প্রতিদিন অধিক অধিক সৌন্দর্য্যসম্পন্ন শরীর ধারণ করিতে লাগিলেন।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

दिने दिने नृपवनितातनुश्रिया
नृपस्य च प्रमदविशेषधारया ।
प्रजागणोन्नतिसुखशान्तिसम्पदा
सखीमुदा सह च स गर्भ ऐधत ॥३४॥
वयस्यया कृतवरिवस्यया चिरं
महीभृता प्रणयभृता च सम्भृताः ।
मदप्रदा बहुविधदोहदाः सदा
तदन्तिकं स्म परिहरन्ति नेप्सिताः ॥३५॥

ভিতরে প্রদীপযুক্ত নির্ম্মল কাচমোচা (কাচের ডুম) সকল দিকেই অত্যন্ত সুন্দর প্রভা বিস্তার করিয়া থাকে ॥৩৩॥

अन्वयः—सः गर्भः नृपवनितातनुश्रिया नृपस्य च प्रमदविशेषधारया प्रजागणोन्नतिसुख शान्ति सम्पदा सखीमुदा च सह दिने दिने ऐधत ॥३४॥

गर्भवृद्धिमाह दिन इति । स गर्भः, नृपवनितायाः राजमहिष्याः, तनुश्रिया देहकान्त्या, नृपस्य भीष्मकस्य च, प्रमदविशेषस्य आनन्दातिरेकस्य धारया प्रवाहेण, प्रजागणस्य उन्नतिसुखशान्तिभिर्युक्ता सम्पत् उन्नतिसुखशान्तिसम्पत् तया मध्यपदलोपी समासः । सखीनां मुदा हर्षेण च सह दिने दिने ऐधत अवर्द्धत गर्भस्य लक्ष्मीरूपत्वादित्याशयः ।

अत्र सहोक्तिरलङ्कारो वृत्त्यनुप्रासश्चेत्यनयोः संसृष्टिः ॥३४॥

বাঙ্গালা—রাজমহিষীর দেহকান্তি, রাজার অতিরিক্ত আনন্দপ্রবাহ, প্রজাগণের উন্নতি, সুখ, শান্তি ও সম্পদ্ এবং সখীগণের আমোদের সহিত সেই গর্ভটী দিনে দিনে বৃদ্ধি পাইতে লাগিল ॥৩৪॥

अन्वयः—चिरं कृतवरिवस्यया वयस्यया प्रणयभृता महीभृता च सम्भृताः मदप्रदाः ईप्सिताः बहुविधदोहदाः सदा तदन्तिकं न परिहरन्ति स्म ॥३५॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

न केवलं नृपनगरे जनेप्सिता
हरिप्रिया चिरमचलाऽभवत् स्वयम्।
श्रितोदरा समुपचिताकृतिः क्रमात्
भृशाचलामपि जननीमजीजनत् ॥३६॥

तदानीं महिष्या अभिलाषपूरणमाह वयस्ययेति। चिरं सर्वदा, कृता वरिवस्या परिचर्य्या यया तया वयस्यया सख्या प्रणयभृता तत्प्रेम-शालिना महीभृता राज्ञा च, सम्भृताः संगृहीताः, मदप्रदाः आनन्द-दायिनः, ईप्सिताः अभीष्टाः, बहुविधदोहदाः नानाप्रकारवस्तूनि, सदा तस्याः महिष्याः अन्तिकं न परिहरन्ति स्म न तत्यजुः, अपि तु सर्वदैव तत्रासन्नित्यर्थः।

अत्र सम्भृता इत्येकया क्रियया वयस्यामहीभृतोः कर्त्तृतयान्वयात् तुल्ययोगितालङ्कारश्छेकानुप्रासवृत्त्यनुप्रासौ चेति संसृष्टिः।

"वरिवस्या तु शुश्रूषा परिचर्य्याप्युपासनम्" इत्यमरः। "दोहदः पुंनपुंसकम्" इति रभसः, स च गर्भकालेऽभीष्टः पदार्थः ॥३५॥

বাঙ্গালা—সর্ব্বদা শুশ্রূষাকারিণী সখী এবং প্রণয়শালী স্বয়ং রাজা সংগ্রহ করিয়া দিতেন বলিয়া গর্ভকালে আনন্দজনক নানাবিধ অভীষ্ট বস্তু সর্ব্বদাই মহিষীর নিকটে উপস্থিত থাকিত ॥৩৫॥

অন্বয়ः—जनेप्सिता हरिप्रिया केवलं स्वयं नृपनगरे चिरं अचला न अभवत्। (किन्तु सा) श्रितोदरा क्रमात् समुपचिताकृतिः (सती) जननीं अपि भृशाचलां अजीजनत् ॥३६॥

गर्भवृद्धिं सूचयति नेति। जनैः सर्वैरेव लोकैः, ईप्सिता सर्वसुख-हेतुत्वादाप्तुं लब्धुमिष्टा, हरिप्रिया लक्ष्मीः, केवलं स्वयं नृपस्य भीष्मकस्य नगरे, चिरम् अचला न अभवत्। किन्तु सा, श्रितमवलम्बितम् उदरं मातुर्जठरं यया सा, क्रमात्, समुपचिता सम्यग्वृद्धिं प्राप्ता

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

अभूदथ प्रसवजवेदनोदये
महामहो गणकगणस्तथोन्मुखः ।
वसूपमो वसुपरिवर्षणोद्यतः
प्रतिग्रहग्रहिलजनोऽप्युपस्थितः ॥३७॥

आक्रतिर्यस्याः सा तादृशी च सती, जननीमपि, भृशाचलां गर्भभारादेव चलने अतीवासमर्थाम्, अजीजनत् अकार्षीत् ।

अत्र जनन्या भृशाचलत्वजननकार्य्यं प्रति समुपचिताक्रतिपदस्यार्थो हेतुरिति पदार्थहेतुकं काव्यलिङ्गमलङ्कारः, अर्थापत्तिश्छेकानुप्रासश्च इत्येतेषां मिथो निरपेक्षतया संसृष्टिः ॥३६॥

বাঙ্গালা—সমস্ত লোকের অভীষ্ট লক্ষ্মী কেবল যে ভীষ্মকরাজার রাজধানীতেই চিরকাল অচলা হইয়া রহিয়াছিলেন, তাহা নহে ; কিন্তু তিনি মাতার উদরে প্রবেশ করিয়া ক্রমশঃ বৃদ্ধি পাইতে থাকিয়া সে মাতাকেও অত্যন্ত অচলা করিয়াছিলেন ॥৩৬॥

अन्वयः—अथ प्रसवजवेदनोदये महामहः, गणकगणः उन्मुखः, वसूपमः वसुपरिवर्षणोद्यतः, तथा प्रतिग्रहग्रहिलजनः अपि उपस्थितः अभूत् ॥३७॥

रुक्मिण्याः प्रसवकालीनव्यापारमाह अभूदिति । अथ अनन्तरम्, प्रसवे प्रसवकाले जायते या सा प्रसवजा सा चासौ वेदना चेति तस्या उदये सति उपस्थितौ सत्याम्, महामहः लोकानामतीवोत्सवः, तथा गणकानां दैवज्ञानां गणः, उन्मुखः प्रसवसमयनिरूपणाय उद्ग्रीवः, वसूपमो वसुतुल्यो राजा भीष्मकः, वसुपरिवर्षणाय ब्राह्मणदरिद्रादौ धनवितरणाय उद्यतः उद्युक्तः, तथा प्रतिग्रहाय राज्ञो हस्ताद्धनग्रहणाय ग्रहिल आग्रहवांश्चासौ जनश्चेति सोऽपि, उपस्थितः अभूत् ।

अत्र अभूदित्येकया क्रियया महामहादीनां कर्त्तृतयान्वयात् तुल्ययोगितालङ्कारश्छेकानुप्रासवृत्त्यनुप्रासौ च तेषां संसृष्टिः ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

प्रसूदरं सुरविषयञ्च शून्यताम्
उपाम्बिकाकरमवनीञ्च पूर्णताम् ।
नयन्त्यलं निजजनुषा स्वयं रमा
शुभे दिने समजनि कापि कन्यका ॥३८॥

"मह उद्धव उत्सवः" इत्यमरः । अयं महशब्दस्तु पुमानकारान्तश्चामरटीकायां रघुनाथेनोक्तः । "देवभेदेऽनले रश्मौ वसु रत्ने धने वसु" इत्यमरः । "साग्रहे ग्रहिलस्त्रिषु" इति स्वभूः ॥३७॥

বাঙ্গালা—তাহার পর একদিন মহিষীর প্রসববেদনা উপস্থিত হইলে, রাজভবনে মহোৎসব আরম্ভ হইল, দৈবজ্ঞেরা উদ্‌গ্রীব রহিলেন। বসুতুল্য প্রভাবশালী ভীষ্মকরাজা ধন বিতরণ করিবার জন্য প্রস্তুত থাকিলেন এবং প্রতিগ্রহের আগ্রহশালী লোকেরাও আসিয়া উপস্থিত হইল ॥৩৭॥

अन्वयः—स्वयं रमा शुभे दिने निजजनुषा प्रसूदरं सुरविषयञ्च शून्यताम्, उपाम्बिकाकरं अवनीञ्च अलं पूर्णतां नयन्ती का अपि कन्यका सती समजनि ॥३८॥

रुक्मिण्या जन्माह प्रसूदरमिति । स्वयं रमा लक्ष्मीः, शुभे दिने, निजजनुषा आत्मनो जन्मना, प्रसूदरं जननीजठरम्, सुरविषयं देवलोकञ्च, शून्यताम्, उपाम्बिकाया धात्र्याः करं हस्तम्, अवनीं पृथिवीञ्च, अलमत्यर्थम्, पूर्णताम्, नयन्ती प्रापयन्ती, का अपि कन्यका सती, समजनि सञ्जाता ।

अत्र नयन्तीत्येकया क्रियया प्रसूदरादीनां कर्म्मतयाभिसम्बन्धात् तुल्ययोगितालङ्कारः ; विरूपयोः शून्यतापूर्णतयोः सङ्घटनात् विषमालङ्कारश्च अनयारेकाश्रयानुप्रवेशरूपः सङ्करः ।

"जनयित्री प्रसूर्माता" इति "जनुर्जननजन्मानि जनिरुत्पत्तिरुद्भवः" इति चामरः ॥३८॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

অবেদি ন প্রসবজবেদনাঽমুয়া
সখীজনৈর্জনিতবিনোদসান্ত্বয়া ।
প্রযাতি যত্কৃতকরুণাকণাদপি
ব্যথা, ততঃ কথমথবা ব্যথাকথা ॥২৫॥

বাঙ্গালা—স্বয়ং লক্ষ্মীদেবী নিজের জন্মদ্বারা জননীর উদর ও স্বর্গলোককে শূন্য করিয়া এবং ধাত্রীর হস্ত ও মর্ত্ত্যলোককে পূর্ণ করিয়া, শুভদিনে একটী কন্যা হইয়া উৎপন্ন হইলেন ॥৩৮॥

অন্বয়ঃ—সখীজনৈঃ জনিতবিনোদসান্ত্বয়া অমুয়া প্রসবজবেদনা ন অবেদি । অথবা ব্যথা যত্কৃতকরুণাকণাৎ অপি প্রযাতি, ততঃ ব্যথাকথা কথং (স্যাৎ) ॥২৫॥

জনন্যাঃ প্রসববেদনায়া অকিঞ্চিত্করত্বং সূচয়তি অবেদীতি । সখীজনৈঃ, জনিতে কৃতে বিনোদসান্ত্বনে আশ্বাসসান্ত্বনে যস্যাস্তয়া, অমুয়া ভীষ্মকমহিষ্যা, প্রসবজবেদনা ন অবেদি ন বিদিতা । উক্তমর্থং সমর্থয়িতুমাহ প্রযাতীতি । ব্যথা যত্কৃতকরুণাকণাদপি প্রযাতি অপৈতি, ততস্তস্যাঃ সকাশাৎ ব্যথা বেদনাপ্রসঙ্গঃ কথং স্যাৎ ; অপি তু কথমপি নেত্যর্থঃ ।

অত্র প্রসববেদনায়া অবেদনকার্য্যস্য পরার্দ্ধাভিহিতকারণেন সমর্থনাদর্থান্তরন্যাসোঽলঙ্কারঃ, তদবেদনকার্য্যং প্রতি দ্বিতীয়পাদগতপদার্থানাং হেতুত্বাৎ পদার্থহেতুকং কাব্যলিঙ্গম্, দ্বিতীয়ার্দ্ধে অর্থাপত্তিদ্বয়ঞ্চেতি গুণপ্রধানভাবেনাঙ্গাঙ্গিভাবাৎ সঙ্করঃ, সোঽপি চ ছেকানুপ্রাসবৃত্ত্যনুপ্রাসাভ্যাং সংসৃজ্যতে ॥২৫॥

বাঙ্গালা—সখীরা আশ্বাস দেওয়ায় ও সান্ত্বনা করায় মহিষী প্রসব বেদনা অনুভব করিতে পারেন নাই। অথবা যাঁহার করুণাকণাতেও ব্যথা যায়, তাহা হইতে ব্যথার সম্ভাবনা হইবে কি করিয়া ॥৩৯॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

विरोचिनीमथ विरचय्य मण्डलीं
क्षणात् क्षणक्षयितविषादमण्डलीम्।
प्रचक्रिरे करतलगण्डमण्डनाः
हुलुध्वनिं बहुलविलासिनीजनाः ॥४०॥

अन्वयः—अथ बहुलविलासिनीजनाः करतल-गण्ड-मण्डनाः (सन्तः) क्षणात् क्षण क्षयित-विषाद-मण्डलीं विरोचिनीं मण्डलीं विरचय्य हुलुध्वनिं प्रचक्रिरे ॥४०॥

सन्तानजन्मामोदे योषिदाचारमाह विरोचिनीमिति। अथ अनन्तरम्, बहुलाश्च ते विलासिनीजनाः महिलालोकाश्चेति ते, करतलान्येव गण्डेषु कपोलेषु मण्डनानि भूषणानि येषां ते तादृशाः सन्तः, क्षणात् तत्क्षणादेव, क्षणेन उत्सवेन क्षयिता सञ्जातक्षया विषादमण्डली गृहकर्म्मादिनिबन्धननावसादो यस्यां ताम्, विरोचिनीं मनोहराम्, मण्डलीं मण्डलाकारेणावस्थितिम्, विरचय्य विधाय, हुलुध्वनिं प्रचक्रिरे।

अत्र स्वभावोक्तिरलङ्कारः, यमकं छेकानुप्रासो वृत्त्यनुप्रासश्चेत्येतेषां संसृष्टिः।

"निर्व्यापारस्थितौ कालविशेषोत्सवयोः क्षणः" इत्यमरः। विरचय्येति विरचयतेः क्त्वोयपि "लघुपूर्व्वोऽय् यपि" इति कारितस्यायादेशः। क्षयितेति क्षयशब्दात् तारकादित्वादितच् ॥४०॥

বাঙ্গালা—তাহার পরে অনেক মহিলা আসিয়া সেস্থানে উপস্থিত হইল এবং যাহার যে মনের বিষাদ ছিল, তাহা তখনই আমোদে তিরোহিত হইয়া গেল। তদনন্তর তাহারা সুন্দর একটী মণ্ডলী (গোলাকারে অবস্থান) করিয়া আপন আপন গণ্ডদেশে করতল স্থাপনপূর্ব্বক হুলুধ্বনি করিতে লাগিল ॥৪০॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

अथो मिथः कतिपयकिङ्करीजना:
नृपान्तिके विरुरुधुरग्रतो गतौ।
इतोऽन्तरे चतुरतरा च काचन
प्रपप्रथे त्वरितगतोत्सुकन्तु तम् ॥४१॥

अन्वयः—अथो कतिपयकिङ्करीजनाः नृपान्तिके अग्रतः गतौ मिथः विरुरुधुः। इतऽन्तरे च काचन चतुरतरा तु (किङ्करी) त्वरितगतोत्सुकं तं प्रपप्रथे ॥४१॥

अथ राज्ञे कन्याजन्मवार्त्ताप्रदानमाह अथो इति। अथो अनन्तरम्, कतिपये च ते किङ्करीजना दासीलोकाश्चेति ते कतिपयकिङ्करीजनाः, नृपस्य कन्यापितुर्भीष्मकस्य अन्तिके अग्रतो गतौ प्रथमगमनविषये, मिथः परस्परम्, विरुरुधुः 'प्राचीनत्वादहमग्रे गच्छामी'त्यादिरूपेण विवादं चक्रुः। इतोऽन्तरे अत्रावसरे च काचन काचित्, चतुरतरा किङ्करी तु, त्वरितगताय वार्त्ताश्रवणार्थं स्वयमेव तत्र सत्वरगमनाय उत्सुक-मुत्कण्ठितम्, तं नृपं भीष्मकम्, प्रपप्रथे प्रकर्षेण कन्याजन्मवार्त्तां कथयामास। चतुरताया एवैतत्फलमिति भावः।

अत्रापि पूर्ववत् स्वभावोक्तिरलङ्कारः। प्रथमं प्रख्यानं प्रति चतुरतरापदस्यार्थोहेतुरिति पदार्थहेतुकं काव्यलिङ्गञ्च, अनयोरङ्गाङ्गि-भावेन सङ्करः, स च वृत्त्यनुप्रासेन संसृज्यते।

प्रपप्रथे इति "प्रथ प्रख्याने" इति भौवादिकप्रथधातोः परोक्षायाः प्रथमपुरुषैकवचने रूपम् ॥४१॥

বাঙ্গালা—তাহার পরে রাজার নিকটে সংবাদ বলিতে প্রথমে কে যাইবে এই বিষয় লইয়া কয়েকজন দাসী পরস্পর বিবাদ করিতে লাগিল। এই অবসরে কোনও বিশেষ চতুরা দাসী তাড়াতাড়ি যাইয়া রাজার নিকট সেই সংবাদ বলিল; কিন্তু তখন রাজা নিজেই সেই সংবাদ শুনিবার জন্য সত্বর সে স্থানে যাইতে উৎসুক ছিলেন ॥৪১॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

तथापि सा स्वजनसमानभागतः
महीपतेरलभत पारितोषिकम् ।
न कारणेऽसति च विवेकदृश्वनः
मनस्विनश्चलति मतिः कदाचन ॥४२॥
पदे पदे वसु ववृषुर्जगुर्जनाः
प्रदध्वनुः परिननृतुः समुन्मदाः ।
सुते किका बहुषु सुतेषु तिष्ठतां
गृहाश्रमे मुदमधिकां ददाति हि ॥४३॥

अन्वयः—तथापि सा स्वजनसमानभागतः (एव) महीपतेः पारितोषिकं अलभत। (तथा) च विवेकदृश्वनः मनस्विनः मतिः कारणे न सति कदाचन न चलति ॥४२॥

राज्ञो न्याय्यपारितोषिकदानमाह तथापीति। तथापि प्रथम-प्रख्यानेऽपि, सा किङ्करी, स्वजनसमानभागतः अपरकिङ्करीतुल्यभागेनैव, महीपतेर्भीष्मकात्, पारितोषिकम् अलभत। तथा च विवेकेन दृष्ट-वानिति विवेकदृश्वनः, विवेचनानुसारेण कार्य्यकारिणः इत्यर्थः, मनस्विनः प्रशस्तमनसो जनस्य, मतिर्बुद्धिः, कारणे, न सति न विद्यमाने, कदाचन, न चलति कर्त्तव्यात् न भ्रश्यति। अत्र प्रथमप्रख्यानन्तु चातुर्य्यमात्रा-दकिञ्चित्करमित्याशयः।

अत्र सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः।

विवेकदृश्वन इति "दृशेः क्वनिप्" इति क्वनिप्प्रत्ययः ॥४२॥

বাঙ্গালা—তথাপি সেই দাসী অন্যান্য দাসীর সমান সমানই রাজার নিকট হইতে পারিতোষিক পাইল। কারণ, বিবেচনানুসারে কার্য্য-কারী প্রশস্তহৃদয় লোকের বুদ্ধি বিশেষ কারণ না থাকিলে কর্ত্তব্য ভ্রষ্ট হয় না ॥৪২॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

ধৃতোঽম্বয়া নিববৃত এককোঽর্ভকঃ
পরোঽস্পৃশল্লঘুগতি সূতিকাগৃহম্।
তমঙ্গনা স্নপিতবতী জলস্রবৈঃ
সমস্খলৎ পরমপরশ্চ তজ্জলে ॥৪৪॥

অন্বয়ঃ—সমুন্মদাঃ জনাঃ পদে পদে বসু ববৃষুঃ জগুঃ প্রদধ্বনুঃ পরিননৃতুঃ (চ)। হি বহুষু সুতেষু একিকা সুতা গৃহাশ্রমে তিষ্ঠতাং অধিকং (এব) মুদং দদাতি ॥৪৩॥

কন্যাজন্মবৃত্তান্তপ্রচারে রাজধান্যবস্থামাহ পদ ইতি। সম্যক্ উত্তমশ্চ মদঃ রাজকন্যাজন্মানন্দো যেষাং তে তাদৃশা জনাঃ, পদে পদে স্থানে স্থানে, বসু ধনম্, ববৃষুঃ অকাতরভাবেন দদুঃ, জগুঃ মঙ্গলগানং চক্রুঃ, প্রদধ্বনুঃ মিলিত্বা প্রকর্ষেণানন্দকোলাহলং চক্রুঃ; পরিননৃতুঃ সর্বত্র নৃত্যং চক্রুশ্চ। হি যস্মাৎ, বহুষু সুতেষু পুত্রেষু সৎসু, একিকা একা, সুতা কন্যা, গৃহাশ্রমে তিষ্ঠতাং গৃহস্থানাম্, অধিকামেব, মুদমানন্দং দদাতি। রাজানন্দেনৈব রাজভক্তানামানন্দ ইত্যভিপ্রায়ঃ।

অত্র পূর্বার্দ্ধে বহুনাং ক্রিয়াণামেককর্তৃকারকত্বাৎ দীপকমলঙ্কারঃ; সামান্যেন বিশেষসমর্থনরূপোঽর্থান্তরন্যাসশ্চানয়োঃ পূর্ববৎ সঙ্করঃ ॥৪৩॥

বাঙ্গালা—রাজধানীর আনন্দোন্মত্ত লোকেরা স্থানে স্থানে ধন বিতরণ, গান, আনন্দকোলাহল ও নৃত্য করিতে লাগিল। বহু পুত্র জন্মের পরে একটী কন্যা জন্মিলে, সে গৃহস্থগণের অত্যন্ত আনন্দ জন্মাইয়া থাকে ॥৪৩॥

অন্বয়ঃ—এককঃ অর্ভকঃ অম্বয়া ধৃতঃ (সন্) নিববৃতে, পরঃ লঘুগতি সূতিকাগৃহং অস্পৃশৎ। অঙ্গনা জলস্রবৈঃ তং স্নপিতবতী, অপরশ্চ তজ্জলে পরং সমস্খলৎ ॥৪৪॥

তদানীং শিশূনাং ব্যাপারমাহ ধৃত ইতি। একক একঃ, অর্ভকঃ শিশুঃ, অম্বয়া জনন্যা, ধৃতঃ সন্, নিববৃতে সূতিকাগৃহস্পর্শান্নিবৃত্তঃ;

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

प्रभाचणा विरतनिमेषलोचनाः
विनिश्चला बहुतरवामलोचनाः ।
दिदृक्षवः शिशुकृतकर्षणांशुकाः
चकाशिरे विततविभूषणांशुकाः ॥४५॥

परः अन्योऽर्भकः, लघ्वी द्रुता गतिर्यस्मिन् कर्म्मणि तद्यथा तथा सूतिकागृहम् अस्पृशत्; अङ्गना काचित् स्त्री, जलस्रवैर्जलधाराभिः, तं सूतिकागृहस्पर्शिनमर्भकं स्नपितवती; अपरश्च अर्भकः, परमत्यन्तम्, तज्जले समस्खलत् विचरणादपतत् ।

अत्र स्वभावोक्तिरलङ्कारः ॥৪৪॥

বাঙ্গালা—একটী বালক শুতিকাগৃহ স্পর্শ করিতে যাইতেছিল, তখন তাহার মাতা তাহাকে ধরায় সে নিবৃত্তি পাইল; অপর বালক দ্রুত যাইয়া শুতিকাগৃহ স্পর্শ করিল; তখন কোন মহিলা জলধারাদ্বারা তাহাকে স্নান করাইয়া দিল এবং অন্য কোন বালক আসিয়া সেই জলে পা দিয়া পড়িয়া গেল ॥৪৪॥

अन्वयः—प्रभाचणाः विरतनिमेषलोचनाः शिशुकृतकर्षणांशुकाः विततविभूषणांशुकाः बहुतरवामलोचनाः दिदृक्षवः, विनिश्चलाः (सत्यः) चकाशिरे ॥४५॥

दर्शनार्थं सीमन्तिनीसमवायमाह प्रभेति । प्रभया कान्त्या ख्याता इति प्रभाचणाः, विरता निवृत्ता निमेषा येषां तानि तादृशानि लोचनानि नयनानि यासां ताः, शिशुभिः सन्तानैः कृतं कर्षणम् आकर्षणं येषां तानि तादृशानि अंशुकानि वसनानि यासां ताः, तथा वितता विस्तृता विभूषणानां विशिष्टालङ्काराणाम् अंशवः किरणा यासां ताश्च बहुतर-वामलोचना बहुला एवाङ्गनाः, दिदृक्षवस्तां कन्यां द्रष्टुमिच्छवः, अतएव विनिश्चला अतीवनिष्पन्दाः सत्यः, चकाशिरे शुशुभिरे ।

अत्रान्त्ययमकमलङ्कारः ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

चकासती सितकृतदीपभान्तरे
सुतात्मना समवतरन्त्यपि स्वयम् ।
हरिप्रिया स्तिमितपयःपयोनिधेः
तदोदरे वसतिमिवाकरोन्निशि ॥४६॥

प्रभाचञ्चा इति "तत्प्रख्याति चञ्चुचणौ" इति चणप्रत्ययः। विततविभूषणांशुका इति "बहुव्रीहौ शेषाद्वा" इति कप्रत्ययः ॥४५॥

বাঙ্গালা—সুন্দরী বলিয়া বিখ্যাত বহুতর মহিলা সেই কন্যাটীকে দেখিবার জন্য আসিয়া সেইস্থানে নিস্পন্দ হইয়া শোভা পাইতে লাগিল; তখন তাহাদের নয়নে নিমেষ ছিল না, মূল্যবান্ অলঙ্কারের কিরণগুলি ছড়াইয়া পড়িতেছিল এবং কাহারও কাহারও শিশুসন্তানগণ কাপড় ধরিয়া টানিতে ছিল ॥৪৫॥

अन्वयः—स्वयं हरिप्रिया सुतात्मना समवतरन्ती (सती) अपि तदा निशि सितकृतदीपभान्तरे चकासती (सती) स्तिमितपयःपयोनिधेः उदरे वसतिं अकरोत् इव ॥४६॥

क्षीरोदसागरजाताया लक्ष्मीदेव्या अवताररूपायास्तत्कन्याया शुभ्रवर्णप्रदीपालोकमध्ये अवस्थानात्तत्प्रेक्षते चकासतीति। स्वयं हरिप्रिया लक्ष्मीः, सुतात्मना भीष्मककन्यारूपेण, समवतरन्ती मर्त्ये सम्यगवतरणं प्राप्नुवती सत्यपि, तदा निशि रात्रौ, असिता सिता शुभ्रवर्णा कृता गन्धकादिद्रव्यदानेन सम्पादिता या दीपभा प्रदीपालोकः, तस्या अन्तरे मध्ये, चकासती प्रकाशमाना सती, स्तिमितानि निश्चलानि पयांसि दुग्धानि यस्य तादृशस्य पयोनिधेः क्षीरोदसागरस्य उदरे अभ्यन्तरे, वसतिं वासम् अकरोदिव ; शुभ्रवर्णप्रदीपप्रभाया क्षीरोदसागरतुल्यत्वात् तन्मध्ये च तदानीं तस्या अवस्थानादिति भावः ।

अत्र वाच्या भावाभिमानिनी क्रियोत्प्रेक्षालङ्कारश्छेकानुप्रासेन संसृज्यते ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

यदोः कुलं परमहसज्जगच्च यत्
तदेव किं विधुकिरणच्छलाद्बभौ ।
मनोऽदुनोद्यदपि च चेदिभूपतेः
तदेव च स्फुटमभवद्गुहातमः ॥४৭॥

असिता सिता कृतेति सितकृता श्रेणिकृता इत्यादिवत् "श्रेण्यादयश्च्व्यर्थेत्तयः कृतादिभिः" इति समासः। सितकृता चासौ दीपभा चेति सितकृतदीपभा इति च पुनः कर्म्मधारयः ॥४६॥

বাঙ্গালা—স্বয়ং লক্ষ্মীদেবী ভীষ্মকরাজার কন্যারূপে আবির্ভূত হইয়াও সেই রাত্রিকালে শুভ্রবর্ণ প্রদীপালোকের মধ্যে প্রকাশিত হইতে থাকায় যেন নিশ্চল ক্ষীরোদসাগরের উদরের ভিতরে বাস করিতে ছিলেন ॥৪৬॥

अन्वयः—यदोः कुलं जगच्च यत् परं अहसत्, तदेव किं विधुकिरणच्छलात् बभौ। यदपि च चेदिभूपतेः मनः अदुनोत्, तदेव च स्फुटं गुहातमः अभवत् ॥४৭॥

लक्ष्मीरूपायास्तस्या जन्मनि जगदानन्दं भाविनि भूतवदुपचारात् यदुवंशस्य हर्षं शिशुपालस्य मनस्तापञ्च सूचयति यदोरिति। यदोः कुलं वंशः,, जगच्च कर्त्तृ, यत्, परमत्यन्तम्, अहसत् भाविपदुवंशवध्वा लक्ष्मीरूपाया रुक्मिण्या जन्मना आनन्दात् हास्यमकरोत्; तत् हास्यमेव, किम्, विधुकिरणच्छलात् चन्द्ररश्मिव्याजात्, बभौ चकाशे; "यशसि धवलता वर्ण्यते हासकीर्त्त्योः" इति कविसमयप्रसिद्धहासस्य शुभ्रत्वादिति भावः। यदपि च, चेदिभूपतेः शिशुपालस्य, मनः, अदुनोत् रुक्मिण्या अलसामानत्वात् सन्तापमभजत्; तदेव च स्फुटं स्पष्टम्, गुहातमः पर्व्वतगुहास्थितोऽन्धकारः अभवत्; आनन्दजातस्य हासस्य शुभ्रतया वर्णनीयत्वेन तद्विपरीतस्य नैराश्यजातस्य मनस्तापस्य कृष्णवर्णतया वर्णनौचित्यादित्याशयः।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

त्वया भया मृदुतरया प्रभूतया
खरां क्षशामजयदसौ प्रदीपभाम्।
तदत्र भावलिरिव चन्द्रिकान्तरे
विलीनतामगमदलं तदावली ॥४८॥

अत्र पूर्व्वार्द्धे सापह्नवात्प्रेक्षालङ्कारः परार्द्धे च वाच्या भावाभिमानिनी द्रव्योत्प्रेक्षा, अनयोश्च मिथो निरपेक्षतया संसृष्टिः। किं स्फुटम् इत्युभयमप्युत्प्रेक्षावाचकम् ॥४७॥

বাঙ্গালা—রুক্মিণী জন্ম গ্রহণ করায় যদুবংশ ও সমগ্র জগৎ আনন্দে যে অত্যন্ত হাস্য করিয়াছিল, তাহাই কি (সেই রাত্রিতে) চন্দ্রকিরণচ্ছলে প্রকাশ পাইয়াছিল; আর শিশুপালের যে মনস্তাপ হইয়াছিল, স্পষ্টতঃ তাহাই গুহার অন্ধকার হইয়াছিল ॥৪৭॥

अन्वयः—असौ मृदुतरया प्रभूतया (च) त्वया भया खरां क्षशां (च) प्रदीपभां अजयत्। तत् चन्द्रिकान्तरे भावलिः इव तदावली अत्र अलं विलीनतां अगमत् ॥४८॥

अथ कन्यायाः प्रभाप्राचुर्य्यमाह त्वयेति। असौ भीष्मककन्या, मृदुतरया अतिकोमलया, प्रभूतया प्रचुरया च, त्वया निजया, भया प्रभया, खराम् उष्णतया तीव्राम्, क्षशामल्पाञ्च, प्रदीपानां भां प्रभाम् अजयत्। जयत्यर्थे नोत्कर्षं आक्षिप्यते। तथा च स्वर्गापेक्षे खरप्रभापेक्षया कोमलप्रभा उत्कृष्टैव; अल्पापेक्षया च प्रचुरोत्कर्षः अतएव सिद्ध एवेति भावः। तत् तस्मात्, चन्द्रिकान्तरे ज्योत्स्नामध्ये, भावलिः नक्षत्रश्रेणीरिव, तदावली प्रदीपश्रेणीः, अत्र तत्कन्याप्रभामध्ये, अलमत्यन्तम्; विलीनतां लयमगमत्।

अत्र जयलययोरसम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिद्वयम्, जयं प्रति मृदुतरादिपदार्थानां हेतुत्वात् पदार्थहेतुकं काव्यलिङ्गम्, श्रौतोपमा, वृत्त्यनुप्रासश्च इत्येतेषां संसृष्टिः।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

दरिद्रता प्रबलतमापि पूर्व्वजा
मरिष्यति ध्रुवमचिरादितीव सा ।
उपप्रसूकरयुगलात् प्रसूकरौ
निमीलितेक्षणयुगलं गतारुदत् ॥४९॥

"स्युः प्रभा रुग् रुचिस्त्विड् भा भाश्छविद्युतिदीप्तयः" इति "नक्षत्रमृक्षं भं तारा तारकाप्युडु वा स्त्रियाम्" इति "वीथ्यालिरावलिः पङ्क्ति-श्रेणीलेखास्तु राजयः" इति चामरः। तदावलीति आवलिशब्दात् "इतश्च क्तिवर्ज्जिताद्वा" इतीप्रत्ययः ॥४८॥

বাঙ্গালা—সেই রাজকন্যাটী অতিকোমল ও প্রচুর আপন প্রভাদ্বারা প্রখর ও অল্প প্রদীপগুলির প্রভাকে জয় করিল; সুতরাং পূর্ণ জ্যোৎস্নার মধ্যে নক্ষত্রশ্রেণীর ন্যায় কন্যাটীর প্রভার মধ্যে প্রদীপশ্রেণী একেবারে লয় পাইয়া গেল ॥৪৮॥

अन्वयः—प्रबलतमा पूर्व्वजा अपि दरिद्रता अचिरात् ध्रुवं मरिष्यति, इति इव सा उपप्रसूकरयुगलात् प्रसूकरौ गता (सती) निमीलितेक्षणयुगलं अरुदत् ॥४९॥

कन्यायाः प्रथमरोदनमाह दरिद्रतेति। प्रबलतमा, अधिका अधिकशक्तिका च, पूर्व्वजा स्वजन्मनः पूर्व्वं जाता अग्रजा ज्येष्ठभगिनीरूपा च, अपिश्चार्थे, दरिद्रता लोकविशेषाणां निःस्वता, अचिरात् शीघ्रमेव, ध्रुवं निश्चितमेव च, मरिष्यति अपयास्यति प्राणांस्त्यक्ष्यति च, पूर्णलक्ष्मीरूपाया स्वस्या आविर्भावादिति भावः। इति हेतोरिव, सा राजकन्या, उपप्रसूकरयुगलात् धात्रीहस्तद्वयात्, प्रसूकरौ जननीहस्तौ, गता सती, निमीलितं मुद्रितम् ईक्षणयुगलं चक्षुर्द्वयं यस्मिन् कर्म्मणि तद्यथा तथा, अरुदत्। अन्यापि अचिरध्रुवभाविनि ज्येष्ठभगिनीमरणे रोदिति।

अत्र निरङ्गं श्लिष्टं केवलरूपकमलङ्कारः, हेतूत्प्रेक्षा चानयोरङ्गाङ्गि-भावेन सङ्करः।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

तया कृतादपि मुमुदे प्ररोदनात्
अपि स्मितात् सपदि बभूव विस्मितम् ।
करेरणादपि च धृतिं मुदाऽधृत
प्रसूप्रभृत्युपगतलोकमानसम् ॥५०॥

"जनयित्री प्रसूर्माता" इत्यमरः ॥४८॥

বাঙ্গালা—তদানীন্তন ব্যক্তিবিশেষের গুরুতর দরিদ্রতাস্বরূপ জ্যেষ্ঠাভগিনী অচিরকালমধ্যে নিশ্চয়ই মরিবে বলিয়াই যেন সেই কন্যাটী ধাত্রীর হস্ত হইতে মাতার হস্তে যাইয়া নয়নযুগল মুদ্রিত করিয়া রোদন করিতে লাগিল ॥৪৯॥

अन्वयः—प्रसूप्रभृत्युपगतलोकमानसं, तया कृतात् प्ररोदनात् अपि मुमुदे, तया कृतात् स्मितात् अपि सपदि विस्मितं बभूव, तया कृतात् करेरणात् अपि मुदा धृतिं अधृत च ॥५०॥

तदानीं तत्रत्यलोकानामवस्थां प्रकटयति तयेति। प्रसूप्रभृतीनां जनन्यादीनाम् उपगतानां तत्रोपस्थितानां लोकानां मानसं मनः कर्त्तृ, तया कन्यया, कृतात् प्ररोदनादपि, मुमुदे कौतुकादाननन्द, तया कृतात्, स्मितात् ईषद्धास्यप्रकारादपि, सपदि तत्क्षणात्, विस्मितं विस्मयापन्नं बभूव। तया कृतात्, करेरणात् हस्तसञ्चालनादपि, मुदा आनन्देन, धृतिं निश्चलतानिबन्धनाशङ्कायां धैर्य्यम् अधृत अधारयच्च; तत्तल्लोकस्वभाववैचित्र्यादिति।

अत्र विषादजनकरोदनरूपकारणात् हास्यजनकानन्दोत्पत्तेर्विषमालङ्कारश्छेकानुप्रासेन संसृज्यते ॥५०॥

বাঙ্গালা—কন্যাটীর রোদনেও জননীপ্রভৃতি উপস্থিত ব্যক্তিগণের মন আনন্দিত হইতে লাগিল, সে ঈষৎ হাস্যের ন্যায় ওষ্ঠযুগলের অবস্থা

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

দয়েক্ষণাৎ সমবতি যা প্রজাব্রজং
তদা তু তাং পরমবিতুং পুরন্ধ্রয়ঃ।
মহৌষধিব্রততিততিপ্রবন্ধনৈঃ
বিবেষ্টিরে তৃণকৃতসূতিকাগৃহম্ ॥৫১॥

করিলেও তত্রত্য লোকদিগের বিস্ময় জন্মিতে থাকিল এবং সে হস্ত সঞ্চালন করিলেও আনন্দে তাহাদের চিত্ত ধৈর্য্য ধারণ করিতে লাগিল ॥৫০॥

অন্বয়ঃ—যা দয়েক্ষণাৎ (এব) প্রজাব্রজং সমবতি, তাং অবিতুং তদা তু পুরন্ধ্রয়ঃ মহৌষধিব্রততিততিপ্রবন্ধনৈঃ তৃণকৃতসূতিকাগৃহং পরং বিবেষ্টিরে ॥৫১॥

সূতিকাগৃহে যোষিদাচারসিদ্ধৌষধিবন্ধনমাহ তয়েতি। যা লক্ষ্মীঃ, দয়য়া ঈক্ষণং দর্শনং তস্মাৎ দয়েক্ষণাদেব, প্রজাব্রজং জনসমূহম্, সমবতি সম্যক্ রক্ষতি; তাং তদবতাররূপাং রাজকন্যাম্ অবিতু রক্ষিতুং তদা তু পুরন্ধ্রয়ঃ প্রৌঢ়া যোষিতঃ মহৌষধিরূপা যা ব্রততিততিঃ লতাসমূহঃ তস্যাঃ প্রবন্ধনাৎ তৃণকৃতসূতিকাগৃহম্, পরম্ অত্যন্তং বিবেষ্টিরে পরিবেষ্টিতবত্যঃ।

অত্র বৃত্ত্যনুপ্রাসচ্ছেকানুপ্রাসয়োঃ সংসৃষ্টিরলঙ্কারঃ।

"স্যাত্তু কুটুম্বিনী। পুরন্ধ্রী" ইত্যমরঃ। "পুরং গৃহং ধরতি বাহুলকাৎ ক্বি মুমাগমঃ" ইত্যমরটীকায়াং রঘুনাথঃ। অমরোক্তৌ তু পুরন্ধ্রীশব্দস্য "ইতশ্চ ক্তিবর্জিতাদ্বা" ইতি ঈপ্রত্যয়ান্ততয়া দীর্ঘান্তত্বম্ ॥৫১॥

বাঙ্গালা—যে লক্ষ্মীদেবী দয়াপূর্ব্বক দৃষ্টিপাত করিয়াই জনসাধারণকে রক্ষা করেন, সেই লক্ষ্মীদেবীকেই রক্ষা করিবার জন্য প্রৌঢ় গৃহিণীরা মহৌষধিলতাসমূহ বন্ধনদ্বারা সেই তৃণনির্ম্মিত সূতিকাঘরখানিকে বিশেষভাবে পরিবেষ্টন করিলেন ॥৫১॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

तदङ्गके समुदितशैत्यशान्तये
यदा जनो ज्वलनमजिज्वलद्गृहे।
तदा तयोर्मिलितसुवर्णभायुगं
पृथक्तया न खलु बुधोऽप्यबुध्यत ॥५२॥
हिमैरिवाम्बुजकलिकां निशीथिनी
विधोः कलां प्रकृतिरिवामृतद्रवैः।
असिस्नपद्विमलकवोष्णवारिभिः
करस्थितां मृदु मृदु कापि कामिनी ॥५३॥

अन्वयः—जनः यदा तदङ्गके समुदितशैत्यशान्तये गृहे ज्वलनं अजिज्वलत्, तदा बुधः अपि तयोः मिलितसुवर्णभायुगं पृथक्तया न खलु अबुध्यत ॥५२॥

प्रसूतिकन्ययोर्गात्रे तापदानाय वह्निप्रज्वलनमाह तदिति। जनः किङ्करीलोकः, यदा तयोः प्रसूतिकन्ययोः अङ्गके अङ्गसमूहे समुदितं प्रसवादेव समुत्पन्नं यत् शैत्यं शीतलत्वं तस्य शान्तये निवृत्तये, गृहे सूतिकाभवने, ज्वलनमग्निम्, अजिज्वलत् प्रज्वलितवान्; तदा तु बुधो बुधिमानपि तयोर्वह्निकन्ययोः मिलितयोः, सुवर्णभयोः सुवर्णतुल्यप्रभयोः युगं द्वयं पृथक्तया न खलु अबुध्यत।

अत्र मीलितं नामालङ्कारः, बोधसम्बन्धेऽपि तदसम्बन्धोक्तेरतिशयोक्ति-श्चानयोरङ्गाङ्गिभावेन सङ्करः, सोऽपि च छेकानुप्रासेन संसृज्यते ॥५२॥

বাঙ্গালা—সেই বালিকাটী ও প্রসূতির অঙ্গের শৈত্যনিবৃত্তির জন্য কোন দাসী যখন সূতিকাগৃহে অগ্নি প্রজ্বলিত করিল, তখন সেই বালিকা ও অগ্নির সম্মিলিত সুবর্ণতুল্য দুইটী প্রভাকে বুদ্ধিমান্ লোকও পৃথক্‌রূপে বুঝিতে পারিলেন না ॥৫২॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

जनार्द्दनप्रियमहिला न निर्द्दया
जनान् बहून् समुपगता न चासती।
सरस्वतीप्रतिवनिता न वाग्मिनी
चिरन्तनी न परिचिता च साऽभवत् ॥५४॥

अन्वय:—निशीथिनी हिमैः अम्बुजकलिकामिव प्रकृतिः अमृतद्रवैः विधोः कलामिव (च) कापि कामिनी विमलकवोष्णवारिभिः करस्थितां मृदु मृदु असिस्नपत् ॥५३॥

उष्णवारिणा बालिकायाः स्नपनं वर्णयति हिमैरिति। निशीथिनी रात्रिः, हिमैस्तुषारैः, अम्बुजकलिकां पद्मकलिकामिव, प्रकृतिः अमृतद्रवैः सुधाधाराभिः विधोश्चन्द्रस्य कलामिव च, कापि कामिनी, विमलकवोष्णवारिभिः निर्म्मलेषदुष्णजलैः, करस्थितां हस्तवर्त्तिनीं तां बालिकाम्, मृदु मृदु शनैः शनैः, असिस्नपत् स्नपितवती।

अत्र मालोपमालङ्कारो वृत्त्यनुप्रासेन संसृज्यते ॥५३॥

বাঙ্গালা—রাত্রি যেমন হিমদ্বারা পদ্মকলিকাকে এবং প্রকৃতি যেমন অমৃতরসদ্বারা চন্দ্রের কলাকে স্নান করায়, সেইরূপ কোন মহিলা নির্ম্মল ও ঈষদুষ্ণ জলদ্বারা হস্তস্থিত সেই কন্যাটীকে ধীরে ধীরে স্নান করাইয়া দিল ॥৫৩॥

अन्वय:—सा जनार्द्दनप्रियमहिलापि निर्द्दया न, बहून् जनान् समुपगतापि च असती न, सरस्वतीप्रतिवनितापि वाग्मिनी न, चिरन्तनी अपि परिचिता च न अभवत् ॥५४॥

तस्या वैचित्र्यमाह जनेति। सा लक्ष्मीरूपा कन्या तत्कन्याप्रकृति-भूता लक्ष्मीर्वा, जनानर्द्दयति निर्द्दयभावेन पीड़यतीति जनार्द्दनो नारायणः तस्य प्रियमहिला सत्यपि निर्द्दया नाभवत्, बहून् जनान् भाग्यवतो लोकान्, समुपगतापि धनादिसम्पद्रूपेण प्राप्ता सत्यपि, असती व्यभिचारिणी च नाभवत्; सरस्वत्या वाग्देव्याः प्रतिवनिता सपत्नीप्रतिनिधिभूता वनिता स्त्री च सत्यपि, वाग्मिनी वाक्पटुः

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

अथामनाङ्मुदितमना महीपतिः
स्मितश्रिया धवलितलोहिताधरः ।
फलान्वितं करमनु रुक्ममागतः
वितीर्य्य सोऽधिकतरमोदमग्रहीत् ॥५५॥

नाभवत्, तथा चिरन्तनी पुरातनी सत्यपि, परिचिता लोकेषु स्वरूपेणावगता च नाभवत् ।

अत्र जनार्द्दनप्रियमहिलात्वादिकारणसत्त्वेऽपि तत्कार्य्यभूतनिर्द्दय-त्वाद्यभावात् विशेषोक्तिरलङ्कारश्छेकानुप्रासेन संसृज्यते ॥५४॥

বাঙ্গালা—স্বয়ং লক্ষ্মীস্বরূপা সেই কন্যাটী (অথবা সেই কন্যাটীর প্রকৃতিভূতা লক্ষ্মীদেবী) জনার্দ্দনের প্রিয়তমা হইয়াও নির্দ্দয়া ছিলেন না, বহুলোকসংস্পৃষ্টা হইয়াও অসতী বলিয়া প্রসিদ্ধ হন নাই; সরস্বতীর প্রতিমহিলা হইয়াও বাক্‌পটুতা লাভ করেন নাই এবং প্রাচীনা হইয়াও লোকসমাজে স্বরূপে পরিচিতা ছিলেন না ॥৫৪॥

अन्वयः—अथ अमनाङ्मुदितमनाः स्मितश्रिया धवलितलोहिताधरः स महीपतिः आगतः (सन् तस्याः) करं अनु फलान्वितं रुक्मं वितीर्य्य अधिकतरमोदं अग्रहीत् ॥५५॥

उपहारप्रदानपूर्व्वकं राज्ञः कन्यादर्शनमाह अथेति । अथ कन्या-जन्मश्रवणानन्तरम्, अमनाक् अनल्पं मुदितम् आनन्दितं मनो यस्य सः, स्मितश्रिया ईषद्धास्यधवलकान्त्या, धवलितौ शुभ्रवर्णीकृतौ लोहिताधरौ रक्तोष्ठौ यस्य स तादृशश्च स महीपतिर्भीष्मकः, आगतः तत्सूतिका-गृहान्तिकमुपगतः सन्, करं तस्याः कन्यायाः हस्तम्, अनु लक्षीकृत्य, फलान्वितं किञ्चित्फलयुक्तम्, रुक्मं स्वर्णम्, वितीर्य्य निर्चेपेण दत्त्वा, अधिकतरमोदं पूर्व्वापेक्षयातिरिक्तमानन्दम् अग्रहीत्, तत्सौन्दर्य्य-दर्शनादित्याशयः ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

सुसम्भृतैः सपदि पुरः पुरोधसा
क्षितीश्वरो व्यधित च जातकर्म्म सः ।
ततः सुता कनकलतेव मार्ज्जनात्
महीयसीं रुचिररुचिं दधौ च सा ॥५५॥

अत्र पूर्वार्द्धे लोलिताधरयोः धावल्यगुणग्रहणात् तद्गुणालङ्कारः, परार्द्धे तु फलान्वितस्वर्णदानेन अधिकतरानन्दग्रहणात् परिवृत्तिरलङ्कारश्छेकानुप्रासश्चेत्येतेषां मिथो निरपेक्षतया संसृष्टिः ।

"किञ्चिदीषन्मनागल्पे" इति "रुक्मं कार्त्तस्वरम्" इति च स्वर्णपर्य्यायेऽमरः । धवलः कृत इति धवलितः करोत्यर्थे णयन्तात् धवलशब्दात् कर्म्मणि क्तप्रत्ययः ॥५५॥

বাঙ্গালা—কন্যাজন্মবৃত্তান্তশ্রবণে ভীষ্মকরাজার মন অত্যন্ত আনন্দিত হইয়াছিল; তাহাতে ঈষৎ হাস্যের শুভ্রকান্তিতে তাঁহার রক্তবর্ণ ওষ্ঠযুগল শুভ্রবর্ণ হইয়া গিয়াছিল; সেই অবস্থায় ভীষ্মকরাজা সূতিকাগৃহের নিকটে আসিয়া কন্যাটীর হস্তে কোন ফলসংযুক্ত একখণ্ড স্বর্ণ সমর্পণ করিয়া অধিকতর আনন্দ লাভ করিলেন ॥৫৫।

अन्वयः—सः क्षितीश्वरः सपदि पुरोधसा पुरः सुसम्भृतैः जातकर्म्म व्यधित च, सा सुता मार्ज्जनात् कनकलतेव ततः महीयसीं रुचिररुचिं दधौ च ॥५६॥

तत्कन्याया जातकर्म्मकरणं सूचयति सुसम्भृतैरिति । स क्षितीश्वरो भीष्मको राजा, सपदि सद्यः, पुरोधसा पुरोहितेन, पुरः पूर्वम् सुसम्भृतैर्द्रव्यैः, तस्याः कन्यायाः जातकर्म्मसंस्कारम्, व्यधित अकरोच्च, सा सुता कन्या, मार्ज्जनात्, कनकलता स्वर्णवल्लीव, ततो जातकर्म्मसंस्कारादेव महीयसीं महत्तराम्, रुचिररुचिं मनोहरकान्तिं दधौ धारयामास च । चकारद्वयं क्रिययोर्यौगपद्यं सूचयति ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

अथ निजजननाद्भूरुक्मरूपीकृतत्वात्
तदधिपतिसुतानां रुक्मयोगाच्च नाम्नाम्।
गहनदहनरोचीरुक्मसावर्ण्यतो वा
समलभत सुता सा रुक्मिणीनाम नाम ॥५७॥

अत्र व्यधित च दधौ चेति क्रिययोर्यौगपद्यात् समुच्चयोऽलङ्कारः, "धुनोति चासिं तनुते च कीर्त्तिम्" इति दर्पणोदाहरणवत्; श्रौतोपमा चानयोरङ्गाङ्गिभावेन सङ्करः, सोऽपि छेकानुप्रासेन संसृज्यते ॥५६॥

বাঙ্গালা—রাজপুরোহিত পূর্ব্বেই জাতকর্ম্মের সমস্ত দ্রব্য আয়োজন করিয়া রাখিয়াছিলেন; সুতরাং ভীষ্মকরাজা তৎক্ষণাৎ কন্যাটীর জাতকর্ম্ম সংস্কার করিলেন; তখন মার্জ্জনা করায় স্বর্ণলতার ন্যায় কন্যাটী অধিকতর মনোহর কান্তি ধারণ করিল ॥৫৬॥

अन्वयः—अथ सा सुता निजजननात् भूरुक्मरूपीकृतत्वात्, तदधिपतिसुतानां नाम्नाञ्च रुक्मयोगात्, गहन-दहन-रोची-रुक्मसावर्ण्यतः वा नाम रुक्मिणीनाम समलभत ॥५७॥

"एकवृत्तमयैः पद्यैरवसानेऽन्यवृत्तकैः" इत्यालङ्कारिकवचनप्रामाण्यात् सर्गान्ते वृत्तान्तरेण तस्या नामकरणमाह अथेति। अथाशौचापगमानन्तरम्, सा सुता, निजं यत् जननं जन्म तस्मात्, भुवः पृथिव्याः रुक्मरूपीकृतत्वात् आत्मनो लक्ष्मीरूपतया प्रायेण सम्पदुपचयात् स्वर्णतुल्यमहामूल्यीकरणात्; तस्या भुवः योऽधिपतिर्भीष्मकस्तस्य सुतानां सन्तानानाम्, नाम्नाञ्च रुक्मयोगात् रुक्मीत्यादिरूपेण रुक्मशब्दसम्बन्धात्, गहनं निविड़ं दहनस्य अग्नेरिव रोचिः प्रभा यस्य तत्तादृशं यत् रुक्मं स्वर्णं तस्य सावर्ण्यतः समानवर्णत्वाद्वा; नाम सम्भावनायाम्, रुक्मिणीनाम रुक्मिणीति संज्ञां समलभत प्राप्नोत्।

अत्र रुक्मिणीनामलाभं प्रति कारणत्रयोपन्यासात् समुच्चयोऽलङ्कारः, वृत्त्यनुप्रासच्छेकानुप्रासयोरत्यैतेषां संसृष्टिः।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

प्रातः पयोभिरधिकं परिपूयमानं
सन्ध्यां भजद्विशदधर्म्मि जपाय योग्यम्।
दंशेन भीतिजनकं वदने क्रमेण
तस्या द्विजद्वयमुदित्य परं रराज ॥५८॥

"रुक्मं कार्त्तस्वरम्" इति स्वर्णपर्य्यायेऽमरः।

मालिनी वृत्तम्—"न-न-म-य-य-युतेयं मालिनी भोगीलोकैः इति लक्षणात् ॥५७॥

বাঙ্গালা—সেই কন্যাটী নিজের জন্মদ্বারা পৃথিবীকে রুক্মের (স্বর্ণের) তুল্য মহামূল্য করিয়াছিল বলিয়া, কিংবা ভূপতি ভীষ্মকের সন্তানগণের নামে রুক্মশব্দের যোগ চলিতেছিল বলিয়া, অথবা অগ্নির ন্যায় নিবিড়-কান্তিসম্পন্ন রুক্মের (স্বর্ণের) সমান বর্ণ ছিল বলিয়া, "রুক্মিণী" এই নাম লাভ করিয়াছিল ॥৫৭॥

अन्वयः—प्रातः पयोभिः अधिकं परिपूयमानं, सन्ध्यां भजत्, विशदधर्म्मि, जपाय योग्यं, दंशेन भीतिजनकं (च) द्विजद्वयं क्रमेण उदित्य तस्या वदने परं रराज ॥५८॥

अथ तत्कन्यायाः प्रथमदन्तजननमाह प्रातरिति। प्रातः प्रातः-काले अरुणोदये च, पयोभिर्जलैः, अधिकं यथा स्यात्तथा, परिपूयमानं प्रक्षालनेन दास्या अन्येन वा निर्म्मलीक्रियमाणम्, अन्यत्र तु स्नानेन पवित्रीक्रियमाणम्; सन्ध्यां सन्धानं परस्परसंयोगमिति यावत, भजत् आश्रयत्, अन्यत्र तु सन्ध्यां तदधिष्ठात्रीं देवीम्, भजत् आराधयत्; विशदः शुभ्र एव धर्म्मो गुणोऽस्यास्तीति विशदधर्म्मि, अन्यत्र तु विशदो व्यक्तो धर्म्मः पुण्यमस्यास्तीति विशदधर्म्मि, जपाय मृदुवर्णोच्चारणाय अनुच्चैर्मन्त्रोच्चारणाय च योग्यं समर्थम्; दंशेन दशनेन अभिसम्पातेन च, भीतिजनकञ्च; द्विजद्वयं सम्मुखदन्तद्वयं ब्राह्मणद्वयञ्च; क्रमेण

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

साक्षादियं किल रमापि धरावतीर्णा
बाल्यादिभावमुदभावयदात्मनोनम् ।

उदित्य उत्पद्य आविर्भूय च, तस्याः कन्यायाः वदने, परमत्यन्तं रराज शुशुभे ।

अत्र छेकानुप्रासवृत्त्यनुप्रासयोः संसृष्टिरलङ्कारः, द्विजद्वयं ब्राह्मणद्वयमिव द्विजद्वयं दन्तद्वयमित्युपमालङ्कारश्च व्यङ्ग्य इति शब्दार्थशक्तिमूलोऽलङ्कारध्वनिः । न तु श्लेषः, द्वितीयार्थस्याप्राकरणिकत्वात् ।

"पयः स्यात् क्षीरनीरयोः" इति मेदिनी । "सन्ध्या नदीकालभिदोश्चिन्तामर्य्यादयोरपि । प्रतिज्ञायाश्च सन्धाने सन्ध्या च कुसुमान्तरे ॥" इति विश्वः । विशदः पाण्डुरे व्यक्ते" इति हेमचन्द्रः । "दन्तविप्राण्डजा द्विजाः" इत्यमरः ।

ननु विशदधर्म्मौत्यत्र "न कर्म्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेदर्थप्रतिपत्तिकरः" इति निषेधात् कथं मत्वर्थीय इन्प्रत्यय इति न वाच्यम् । बहुव्रीहिणा प्रशंसाया वक्तुमशक्यत्वात्, अत्र तु प्रशंसायामेव मत्वर्थीयेनप्रत्ययविधानात्, अतएव बहुव्रीहिश्चेदर्थप्रतिपत्तिकर इत्यभिधानात् नीलोत्पलवत् सरः, कृष्णसर्पवान् वल्मीकः" इत्यादिवत् । एतच्च कातन्त्रपरिशिष्टटीकायां गोपीनाथतर्काचार्य्यैरप्युक्तम् ।

वसन्ततिलका वृत्तम्—"उक्ता वसन्ततिलका त-भ-जा जगौ गः" इति लक्षणात् ॥५८॥

বাঙ্গালা—ক্রমে রুক্মিণীর মুখের ভিতরে সুন্দর দুইটী দন্ত উৎপন্ন হইয়া শোভা পাইতে থাকিল; সে দন্ত দুইটী পরস্পর সংযুক্ত ও কোমল শব্দ উচ্চারণ করিতে সমর্থ ছিল এবং দংশনদ্বারা ভয় উৎপান করিত; আর ধাত্রী বা দাসী প্রত্যহ প্রাতঃকালে জলদ্বারা সেই দন্ত দুইটীকে প্রক্ষালন করিয়া দিত ॥৫৮॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

नारी सुरीमभिनिनीषुरुपेत्य रङ्गं
सर्वं करोत्यभिनयं हि तदीयमेव ॥५८॥

कीरालापे पिककलरवे किञ्च वीणानिनादे
अज्ञामज्ञा न खलु पुपुषुः कण्ठमस्याः पिबन्तः।
हास्यज्वालं द्विगुणितसितं कुन्ददन्तप्रभाभिः
संपश्यन्तो दृष्टशरपि नो कौमुदीं मोदयन्तीम् ॥६०॥

इति श्रीहरिदासकृतौ रुक्मिणीहरणे महाकाव्ये
रुक्मिणीसम्भवो नाम प्रथमः सर्गः ॥०॥

——:०:——

अन्वयः—इयं धरावतीर्णा साक्षात् किल रमापि आत्मनीनं बाल्यादिभावं उदभावयत्। सुरीं अभिनिनीषुः नारी हि रङ्गं उपेत्य तदीयमेव सर्वं अभिनयं करोति ॥५८॥

स्वयं लक्ष्मीदेव्या अवतारूपापि सा कन्या मानवीभावमेव सर्वमादत्ते स्मेत्याह साक्षादिति। इयम्, धरायां पृथिव्यां रुक्मिणीरूपेणावतीर्णा, साक्षात् किल रमा लक्ष्मीरपि, आत्मनीनं शरीरसम्बन्धिनम्, बाल्यादिभावं मानवीवशैशवाद्यवस्थाम् उदभावयत् क्रमेणाविरभावयत्। सुरीं देवीम्, अभिनिनीषुर्नाटकादावभिनेतुमिच्छुः, नारी मानवी हि, रङ्गमभिनयस्थानम्, उपेत्य प्राप्य, तदीयमेव देवीसम्बन्धिनमेव, सर्वम्, अभिनयम् अवस्थानुकरणम्, करोति।

अत्र सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारश्छेकानुप्रासेन संसृज्यते।

उदन्तप्रत्ययस्य निष्ठादितया "न निष्ठादिषु" इति कर्म्मणि षष्ठीनिषेधात् सुरीमिति द्वितीयैव ॥५८॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

বাঙ্গালা—পৃথিবীতে রুক্মিণীরূপে অবতীর্ণা স্বয়ং লক্ষ্মীদেবীও ক্রমশঃ নিজের বাল্য ও পৌগণ্ডপ্রভৃতি অবস্থা প্রকাশ করিতে লাগিলেন। কারণ, মানবী, কোন দেবীর অভিনয় ইচ্ছা করিয়া রঙ্গালয়ে যাইয়া সেই দেবী-সম্বন্ধেই সমস্ত অভিনয় করিয়া থাকে ॥৫৯॥

अन्वयः—अस्याः कण्ठं पिबन्तः (जनाः) कीरालापे पिककलरवे किञ्च वीणा-निनादे अद्धा खलु श्रद्धां न पुपुषुः। (तथा) कुन्ददन्तप्रभाभिः द्विगुणितसितं हास्यं अलं संपश्यन्तश्च (जनाः) मोदयन्तीमपि कौमुदीं नो ददृशुः ॥६०॥

रुक्मिण्याः स्वरहास्ययोरसाधारणसौन्दर्य्यं सूचयति कीरेति। अस्या रुक्मिण्याः, कण्ठं कण्ठस्वरम्, पिबन्तः सादरं शृण्वन्तो जनाः, कीरस्य शुकपक्षिणः आलापे स्पष्टभाषणे, पिकस्य कोकिलस्य कलरवे अस्फुट-मधुरध्वनौ, किञ्च अपि च, वीणायाः स्वनामख्यातस्य तन्त्रियन्त्रस्य निनादे शब्दे च, अद्धा निश्चितमेव, खलु श्रद्धां माधुर्य्यविश्वासम्, न पुपुषुः न धारयामासुः। शुककोकिलस्वरापेक्षया तत्स्वरस्य माधुर्य्यातिशयादिति भावः। तथा, कुन्दानि कुसुमानीव ये शुभ्रा दन्ता तेषां प्रभाभिः, द्विगुणितः द्विगुणीकृतः सितः शुभ्रवर्णो यस्य तद्द्विगुणितसितम्, हास्यम्, अलमत्यर्थम्, संपश्यन्तश्च जनाः, मोदयन्तीम् आनन्दयन्तीमपि कौमुदीं ज्योत्स्नाम्, नो ददृशुः, कौमुद्या अपि हास्यस्य सौन्दर्य्यातिरेका-दित्याशयः।

अत्र कीरालापादौ जनानां श्रद्धापोषणासम्बन्धेऽपि कौमुदीदर्शन-सम्बन्धेऽपि च तत्तदसम्बन्धोक्तेरतिशयोक्तिद्वयम्, छेकानुप्रासश्चेत्येतेषां परस्परनिरपेक्षतया संसृष्टिः। अतिशयोक्तिद्वयेन च शुककोकिलस्वरा-पेक्षया तत्स्वरस्य कौमुद्यपेक्षया तदीयहास्यस्य च सौन्दर्य्यातिरेकसूचनात् व्यतिरेकालङ्कारद्वयं व्यज्यत इत्यलङ्कारेणालङ्कारध्वनिः।

"तत्त्वे त्वद्धाञ्जसाद्वयम्" इत्यमरः। "कण्ठो ध्वनौ सन्निधाने ग्रीवायां

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

মদনদ্রুমে” ইতি হেমচন্দ্রঃ । “গুণ্ঠে শুক্লাদয়ঃ পুংসি গুণিলিঙ্গাস্তু তদ্বতি” ইত্যমরোক্তিপ্রামাণ্যাত্ দ্বিগুণিতসিতেত্যত্র সিতশব্দো গুণবচনঃ ।

মন্দাক্রান্তা বৃত্তম্—“মন্দাক্রান্তাম্বুধি-র-স-নগৈর্মো ভতৌ গৌ য-যুগ্মম্” ইতি লক্ষণাত্ ॥৬০॥

ইতি শ্রীহেমচন্দ্রতর্কবাগীশবিরচিতায়াং রুক্মিণীহরণটীকায়াং বিচিত্রায়াং প্রথমঃ সর্গঃ ॥০॥

———:০:———

বাঙ্গালা—যাহারা রুক্মিণীর কণ্ঠস্বর আগ্রহের সহিত শুনিত, তাহারা শুকপক্ষীর কথা, কোকিলের অস্ফুট মধুরধ্বনি এবং বীণার শব্দও নিশ্চয়ই শুনিবার আগ্রহ পোষণ করিত না। আর কুন্দকুসুমের ন্যায় শুভ্রবর্ণ দন্তগুলির প্রভায় যাহার শুভ্রবর্ণকে দ্বিগুণ করিত; রুক্মিণীর সেই হাস্য-দর্শনকারী লোকেরা আমোদকারিণী জ্যোৎস্নাও দেখিত না ॥৬০॥

——•——

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

द्वितीयः सर्गः ।

——:•:——

अथातिलोला वितनोति बाला
लावण्यलीलाललिता स्म खेलाम् ।
पश्यज्जनान् सैव चमच्चकार
स्वभावरम्यो हि शिशुस्वभावः ॥१॥

अन्वयः—अथ अतिलोला लावण्यलीलाललिता बाला खेलां वितनोति स्म । सा एव पश्यज्जनान् चमत् चकार । हि शिशुस्वभावः स्वभावरम्यः ॥१॥

अथेतः सप्तदशभिः श्लोकैः रुक्मिण्या बाल्यभावं वर्णयिष्यन् प्रस्तौति अथेति । अथ अतिलोला अतीवचञ्चला, लावण्येन कान्तिविशेषेण लीलया लोभनीयबालभावेन च, ललिता ईप्सिता हृद्येति यावत्, बाला भीष्मककन्या खेलां क्रीड़ां वितनोति स्म विशेषेण करोति स्म । सा खेलैव पश्यन्तश्च ते जनाश्चेति तान् चमत् विस्मयापन्नान् चकार । हि यस्मात्, शिशुस्वभावो बालभावः स्वभावेनैव रम्या मनोहरः ।

अत्र सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासाऽलङ्कारः, वृत्त्यनुप्रासो यमकश्चेत्येतेषां संसृष्टिः ।

"मुक्ताफलस्य छायायां तरलत्वमिवान्तरा ।
प्रतिभाति यदङ्गेषु तल्लावण्यमिहोच्यते ॥"

इत्युज्ज्वलनीलमणिः । चमदिति विस्मयार्थकमव्ययम् । तथा च—"अर्वाञ्चो यदि गद्यपद्यरचनैश्चेतश्चमत् कुर्वते" इति कर्णाटरराजमहिषी-वाक्यम् ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

অঙ্কান্তরোত্তানশয়াং বিধায়
যদা পয়ঃ পায়য়িতুং প্রসূতিঃ ।
নিনায় ভাণ্ডং তদসাবকাণ্ডে
স্বপাণিকম্পেন বিলুম্পতি স্ম ॥২॥

পশ্যজ্জনানিতি "চলত্পতাকং গৃহম্" ইত্যাদিবৎ প্রথমেকাধিকরণেঽপি ক্রিয়াপেক্ষায়ামিব সমানাধিকরণশব্দান্তরাপেক্ষায়াং শত্রৃঙ্ ।

অস্মিন্ সর্গে উপেন্দ্রবজ্রেন্দ্রবজ্রয়োর্মিলনাদুপজাতির্বৃত্তম্ ॥১॥

বাঙ্গালা—অত্যন্ত চঞ্চলা এবং লাবণ্য ও লীলার গুণে সকলেরই প্রীতির পাত্রী সেই কন্যাটী ক্রমে বিশেষভাবে বাল্যখেলা করিতে আরম্ভ করিল, সেই খেলাই দর্শনকারী লোকদিগের বিস্ময় জন্মাইতে থাকিল। কারণ, শিশুর স্বভাব স্বভাবতই মনোহর হইয়া থাকে ॥১॥

অন্বয়ঃ—যদা প্রসূতিঃ অঙ্কান্তরোত্তানশয়াং বিধায় পয়ঃ পায়য়িতুং ভাণ্ডং নিনায়, (তদা) অসৌ স্বপাণিকম্পেন তৎ অকাণ্ডে বিলুম্পতি স্ম ॥২॥

অঙ্কেতি। যদা প্রসূতির্জননী, অঙ্কান্তরে ক্রোড়মধ্যে উত্তানশয়াং তাং পৃষ্ঠস্যাধঃস্থাপনেন শয়িতাম্, বিধায় কৃত্বা, পয়ো দুগ্ধম্, পায়য়িতুম্, ভাণ্ডং দুগ্ধপাত্রম্, মুখান্তিকে নিনায়, তদা অসৌ রুক্মিণী, স্বপাণিকম্পেন নিজহস্তসঞ্চালনেন, তৎ ভাণ্ডম্, অকাণ্ডে অনবসরে, বিলুম্পতি স্ম পাতনেন ব্যর্থীচকার।

অত্র স্বভাবোক্তিরলঙ্কারশ্ছেকানুপ্রাসেন সংসৃজ্যতে ॥২॥

বাঙ্গালা—মাতা যখন রুক্মিণীকে ক্রোড়ের মধ্যে চিৎ করিয়া শোয়াইয়া তাহাকে দুগ্ধ পান করাইবার জন্য দুগ্ধের পাত্র মুখের নিকটে লইয়া যাইতেন, তখন রুক্মিণী হস্ত সঞ্চালন করিয়া সে দুগ্ধপাত্রটীকে অনবসরে ব্যর্থ করিয়া দিত (মাতার হাত হইতে ফেলাইয়া দিত) ॥২॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

पानाय नीतं नवनीतकस्य
करं मुखेऽस्या दशनैर्दशन्त्याः।
विलोक्य वक्त्रे शुचि हासशोचिः
ववर्ज मा तर्ज्जनमार्त्तिजन्यम् ॥३॥

अन्वयः—मा नवनीतकस्य पानाय मुखे नीतं करं दशनैः दशन्त्याः अस्याः वक्त्रे शुचि हासशोचिः विलोक्य आर्त्तिजन्यं तर्जनं ववर्ज ॥३॥

पनायेति। मा माता, नवनीतकस्य नवोद्धृतस्य, पानाय पान-सम्पादनाय, रुक्मिण्या मुखे नीतम् अर्पितम्, करं नवनीतयुक्तं हस्ताग्रम्, दशनैर्दन्तैः, दशन्त्या दंशं कुर्वत्याः, अस्या रुक्मिण्याः, वक्त्रे मुखे, शुचि शुभ्रम्, हासस्य शोचिः प्रभाम्, विलोक्य दृष्ट्वा, आर्त्तिजन्यं दशनपीड़या उत्पाद्यम्, तर्जनं भर्त्सनम्, ववर्ज तत्याज न चकारेत्यर्थः, हासशोभादर्शनेनैव सन्तोषोदयादिति भावः।

अत्रापि स्वभावोक्तिरलङ्कारः, तर्ज्जनवर्ज्जनं प्रति हासशोभादर्शनस्य हेतुत्वात् पदार्थहेतुकं काव्यलिङ्गञ्चानयोरङ्गाङ्गिभावेन सङ्करः; सोऽपि च छेकानुप्रासेन संसृज्यते।

"नवनीतं नवोद्धृतम्" इत्यमरः। "मा च मातरि माने च" इति शब्दरत्नावली। नवनीतकस्येति अल्पार्थे कप्रत्ययः ॥३॥

বাঙ্গালা—মাতা যখন ননী পান করাইবার জন্য রুক্মিণীর মুখের ভিতরে ননীযুক্ত হাতখানি প্রবেশ করাইয়া দিতেন; তখন রুক্মিণী দন্তদ্বারা সেই হাতে দংশন করিত; তাহাতে মাতা বেদনাও পাইতেন বটে; কিন্তু তৎকালে রুক্মিণীর মুখে নির্ম্মল হাস্যশোভা দেখিয়া আর ভৎসনা করিতে পারিতেন না ॥৩॥

CC-O. Jangamwadi Math Collection, Varaṇasi. An eGangotri Initiative

घटादि धात्रीनिहितं हितार्थं
यदा सकाशाज्जननी निनाय ।
ययौ हसन्त्याः सहसा विशङ्कं
प्रसारिपाणिरुपमातुरङ्कम् ॥४॥
उत्सङ्गसुता चुचुकं पिबन्ती
स्ववक्त्रचुम्बार्थमधःकृते सा ।
चपेटपातैरपि तत्कपोले
धिनोति धन्यां जननीं स्म कन्या ॥५॥

अन्वयः—यदा जननी सकाशात् हितार्थं धात्रीनिहितं घटादि निनाय, (तदा सा) सहसा (सती) विशङ्कं हसन्त्याः प्रसारिपाणिः उपमातुः अङ्कं ययौ ॥४॥

घटेति । यदा जननी, रुक्मिण्या एव सकाशात्, हितार्थं स्वकौतुक-रूपहितसम्पादनार्थम्, धात्र्या निहितं स्थापितम्, घटादि वस्तु निनाय ; तदा सा रुक्मिणी, हसेन हासेन सहेति सहसा सती, विशङ्कं निःशङ्कं यथा स्यात्तथा, हसन्त्याः कौतुकहासं कुर्वत्याः, प्रसारिणौ विस्तारवन्तौ पाणी हस्तौ यस्यास्तथा उपमातुः अङ्कं क्रोड़ं ययौ ।

अत्रापि पूर्ववत् स्वभावोक्तिरलङ्कारः, पूर्व्वार्द्धे छेकानुप्रासः, परार्द्धे तु अन्त्यानुप्रास इत्येतेषां संसृष्टिः ।

हस इति "स्वनहसोर्व्वा" इति हसतेरल् । प्रसारीति मत्वर्थीय इन् ॥४॥

বাঙ্গালা—ধাত্রী কৌতুক করিবার জন্য রুক্মিণীর সম্মুখে ঘট বা অন্য কোন বস্তু রাখিত ; তখন তাহার মাতা তাহার নিকট হইতে সে বস্তু লইয়া যাইতেন ; সেই সময়ে ধাত্রী সহাস্য মুখে হাত বাড়াইয়া দিত । তখন রুক্মিণীও হাস্য করিয়া যাইয়া তাহার কোলে উঠিত ॥৪॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

यदा च धात्री नहि सन्निधात्री
तदा सलीलं सलिलं निपात्य ।
मृदुन्यथाङ्गे मृदि तद्विमृद्य
करेण दत्त्वेण लिलेप दक्षा ॥६॥

अन्वयः—उत्सङ्गसुप्ता चुचुकं पिबन्ती सा कन्या स्ववक्त्रचुम्बार्थं अधःकृते तत्कपोले चपेटपातैरपि धन्यां जननीं धिनोति स्म ॥५॥

उत्सङ्गेति। उत्सङ्गे जनन्या एव क्रोड़े सुप्ता शयिता, चुचुकं स्तनाग्रं पिबन्ती, सा कन्या रुक्मिणी, स्ववक्त्रचुम्बार्थम्, अधःकृते नामिते, तस्या जनन्याः कपोले गण्डदेशे, चपेटपातैरपि, धन्यां तादृशा-नन्दानुभवात् पुण्यवतीम्, जननीम्, धिनोति प्रीणयति स्म ।

अत्र स्वभावोक्तिः, चपेटपातात् प्रीत्युत्पत्तेर्विषमालङ्कारश्च अनयो-रङ्गाङ्गिभावेन सङ्करः, सोऽपि च छेकानुप्रासेन संसृज्यते ।

"चुचुकन्तु कुचाग्रं स्यात्" इत्यमरः। धिनोतीति धिन्वधातोः "धिन्विकृण्व्योर्धिं कृचे"ति धिरादेशः ॥५॥

বাঙ্গালা—রুক্মিণী জননীর ক্রোড়ে শয়ন করিয়া তাঁহার স্তন পান করিত, সে সময়ে জননী রুক্মিণীর মুখচুম্বন করিবার নিমিত্ত নিজের মুখ অবনত করিলে, রুক্মিণী তাঁহার গণ্ডদেশে চপেটপাত করিয়াও সে ধন্যা জননীর প্রীতি উৎপাদন করিত ॥৫॥

अन्वय—अथ यदा च धात्री नहि सन्निधात्री, तदा दक्षा दक्षिण करेण सलीलं सलिलं निपात्य मृदि तत् विमृद्य (च) मृदुनि अङ्गे लिलेप च ॥६॥

यदेति। अथ यदा च, धात्री नहि सन्निधात्री आसन्ना नासीत्; तथा, दक्षा बालक्रीड़ानिपुणा रुक्मिणी, दक्षिणेन क्रीड़ापटुना, करेण हस्तेन, सलीलं चापल्यलीलासहितं यथा स्यात्तथा सलिलं घटीप्रभृति-

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

দ্বে জানুনী জাতু নিধায যান্তী
ভুবস্তলে হস্তসরোরুহে চ।
অতূতুষন্মামনুসঞ্চরন্তীং
সুপেশলং কৌশলমেব কালে॥ ॥

নিহিতং জলম্, নিপাত্য ভূমৌ বিকীর্য্য, মৃদি মৃত্তিকাযাঞ্চ, তৎ সলিলং বিমৃদ্য, মৃদ্বুদি কোমলে, অঙ্গে উদরাদৌ লিলেপ চ।

অত্রাপি স্বভাবোক্তিরলঙ্কারশ্ছেকানুপ্রাসশ্চেত্যনযোঃ সংসৃষ্টিঃ॥৫॥

বাঙ্গালা—ধাত্রী যখন নিকটে থাকিত না, তখন বালখেলানিপুণা রুক্মিণী নিপুণ হস্তদ্বারা লীলার সহিত ঘটী বা অন্য কোন পাত্রের জল ঢালিয়া এবং তাহা মাটীতে ডলিয়া নিজের কোমলাঙ্গে লেপন করিত॥৬॥

অন্বযঃ—যা ভুবস্তলে দ্বে জানুনী হস্তসরোরুহে চ নিধায যান্তী (সা) অনুসঞ্চরন্তীং মাং অতূতুষৎ। কালে কৌশলং সুপেশলমেব॥৭॥

দ্বে ইতি। জাতু কদাচিৎ, ভুবস্তলে ভূতলে, দ্বে জানুনী হস্তসরোরুহে চ পাণিপদ্মযুগলঞ্চ, নিধায সংস্থাপ্য, যান্তী চলন্তী, সা রুক্মিণী, অনুসঞ্চরন্তীং পশ্চাচ্চলন্তীম্, মাং জননীম্, অতূতুষৎ সন্তোষিতবতী। তথাহি কালে যথাসমযে, কৌশলং তত্তদ্ভাবপ্রকাশনৈপুণ্যম্, সুপেশলম্ অতিমনোহরমেব।

অত্র স্বভাবোক্তিঃ, সামান্যেন বিশেষসমর্থনরূপোঽর্থান্তরন্যাসশ্ছেকানুপ্রাসশ্চ ইত্যেতেষাং সংসৃষ্টিঃ।

"কদাচিজ্জাতু" ইতি "চারৌ দক্ষে চ পেশল" ইতি চামরঃ॥৭॥

বাঙ্গালা—রুক্মিণী ভূতলে দুইটী জানু ও দুইটী পাণিপদ্ম সংস্থাপন করিয়া চলিতে থাকিয়া পশ্চাৎ পশ্চাৎ অনুসরণকারিণী জননীকে আনন্দিত

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

अथ स्वतः सम्भविना विनैव
शिक्षां क्रमेण ध्वनिना बभूव ।
मनोज्ञवाणी शुचिशोभमाना
प्राणोपमाना निजसेवकानाम् ॥८॥

আনন্দিত করিত। কারণ, যথাকালে সেই সেই ভাব-প্রকাশন-নৈপুণ্য অত্যন্ত মনোহরই হইয়া থাকে ॥৭॥

अन्वयः—अथ शुचिशोभमाना (सा) शिक्षां विनैव क्रमेण स्वतः सम्भविना ध्वनिना मनोज्ञवाणी (सती) निजसेवकानां प्राणोपमाना बभूव ॥८॥

अथेति। अथ उक्तविधबालखेलानन्तरम्, शुचिना निर्म्मलेन वर्णेन शृङ्गारेण रसेन च शोभमाना सा रुक्मिणी, शिक्षां कस्यचिदुपदेशं विनैव, क्रमेण, स्वतः सम्भविना स्वभावत एवोत्पद्यमानेन, ध्वनिना वर्णात्मक-शब्देन, अन्यत्र तु "वस्तु वालङ्कृतिर्वापि द्विधार्थः सम्भवी स्वतः" इत्यादिभिरालङ्कारिकोक्तेन स्वभावतः सम्भवपरेण "दृष्टिं हे ! प्रति-वेशिनि !" इत्यादिदर्पणोदाहरणप्रकारेण ध्वनिना व्यञ्जनावृत्तिप्रति-पाद्यार्थेन च, मनोज्ञा वाणी वाक्यं यस्याः सा, अन्यत्र मनोज्ञा चासौ वाणी चेति सा मनोज्ञा वाणी सती, निजसेवकानां स्वशुश्रूषाकारिणां जनन्यादीनाम्, काव्यलोचनापरायणानां जनानाञ्च; प्राणोपमाना प्राणतुल्यप्रिया बभूव।

अत्र छेकानुप्रासोऽलङ्कारः। स्वतः सम्भविना वस्तुध्वनिना "दृष्टिं हे ! प्रतिवेशिनि ! क्षणमिहाप्यस्मद्गृहे दास्यसि" इत्यादिसाहित्य-दर्पणोदाहरणरूपा शृङ्गाररसयुक्ता मनोज्ञवाणी यथा काव्यज्ञानां प्राणोपमाना भवति तद्वदित्युपमालङ्कारो व्यज्यत इति वस्तुनालङ्कार-ध्वनिः।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

ধন্যাভিরন্যাভিরনন্যভাভিঃ
কন্যাভিরাকীর্ণমলা মিলিত্বা।
জালায়িতং ভূতলধূলিজালং
চিক্রীড় বালা চিকুরে কিরন্তী ॥৯॥

"শুচিগ্রীষ্মাগ্নিশৃঙ্গারেষ্বাষাঢ়ে শুক্লমন্ত্রিণি। জ্যৈষ্ঠে চ পুংসি ধবলে শুদ্ধেঽনুপহতে ত্রিষু॥" ইতি মেদিনী ॥৮॥

বাঙ্গালা—তাহার পর নির্ম্মলবর্ণশোভিতা রুক্মিণী শিক্ষাদান ব্যতীত ক্রমশঃ স্বভাবত উৎপন্নবর্ণাত্মক শব্দদ্বারা মনোহর বাক্য বলিতে থাকিয়া জননীপ্রভৃতির প্রাণতুল্য হইয়াছিল ॥৮॥

অন্বয়ঃ—ধন্যাভিঃ অনন্যভাভিঃ অন্যাভিঃ কন্যাভিঃ (সহ) মিলিত্বা বালা আকীর্ণমলা জালায়িতং ভূতলধূলিজালং চিকুরে কিরন্তী (সতী) চিক্রীড় ॥৯॥

ধন্যাভিরিতি। ধন্যাভিঃ রুক্মিণীসাহচর্য্যলাভাৎ পুণ্যবতীভিঃ, অনন্যা অভিন্নরূপা ভা কান্তির্যাসাং তাভিঃ, অন্যাভিঃ কন্যাভিঃ সহ, মিলিত্বা, বালা রুক্মিণী, আকীর্ণমলা প্রাগিতস্ততো বিক্ষিপ্তধূলিঃ, পরঞ্চ জালায়িতম্ ঊর্দ্ধং বিক্ষেপসময়ে জালবদাচরিতম্, ভূতলস্য ধূলিজালম্, চিকুরে কেশে, কিরন্তী বিক্ষিপন্তী চ সতী চিক্রীড় খেলাঞ্চকার।

অত্র স্বভাবোক্তিরলঙ্কারঃ, জালায়িতমিতি ক্যঙ্গতোপমা চানয়োরঙ্গাঙ্গিভাবেন সঙ্করঃ, সোঽপি চ বৃত্ত্যনুপ্রাসচ্ছেকানুপ্রাসাভ্যাং সংসৃজ্যতে ॥৯॥

বাঙ্গালা—রুক্মিণী নিজের ন্যায় সুন্দরী ও পুণ্যবতী অন্যান্য কন্যার সহিত মিলিত হইয়া প্রথমে ইতস্ততঃ ধূলি নিক্ষেপ করিয়া পরে জালতুল্য ভূতলের ধূলি কেশকলাপে নিক্ষেপ করিতে থাকিয়া খেলা করিত ॥৯॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

सुभाजने भोजनवस्तु किञ्चित्
सञ्चित्य माता स्म यदीक्षतेऽन्यत् ।
द्राक् पाणिना पल्लवितेन चक्रे
तत्प्रोञ्छनं वाञ्छितदर्शना सा ॥१०॥
जड़ं प्रदेहीति जनन्यमुष्याः
सम्प्रार्थनार्थावगमे समर्था ।
अन्यस्तु किं वस्तु समिच्छतीति
बुद्धौ जड़ाऽभूदजड़ोऽपि बोद्धुम् ॥११॥

अन्वयः—माता सुभाजने किञ्चित् भोजनवस्तु सञ्चित्य यदि अन्यत् ईक्षते स्म, (तदा) वाञ्छितदर्शना सा पल्लवितेन पाणिना द्राक् तत्प्रोञ्छनं चक्रे ॥१०॥

सुभाजन इति। माता, सुभाजने सुन्दरस्वर्णादिपात्रे, किञ्चित् भोजनवस्तु दुग्धादिकम्, सञ्चित्य संस्थाप्य, यदि अन्यत् वस्तु, ईक्षते पश्यति स्म, तदा वाञ्छितं सर्वैरेवाभिलषितं दर्शनं यस्याः सा, सा रुक्मिणी, पल्लवितेन प्रसारितेन, पाणिना हस्तेन, द्राक् द्रुतम्, तस्य भोजनवस्तुनः प्रोञ्छनं तत्पात्रमेव भूतले पातयित्वा वा आलोड़नं चक्रे।

अत्र छेकानुप्रासेन संसृष्टः स्वभावोक्तिरलङ्कारः।

"स्राग्झटित्यञ्जसाह्नाय द्राङ् मंक्षु सपदि द्रुते" इत्यमरः ॥१०॥

বাঙ্গালা—রুক্মিণীর জননী দুগ্ধপ্রভৃতি কোন খাদ্য বস্তু সুন্দর পাত্রে রাখিয়া যদি অন্য দিকে দৃষ্টিপাত করিতেন, তবে সেই অভীষ্টদর্শনা রুক্মিণী প্রসারিত হস্তদ্বারা সেই বস্তুর আলোড়ন করিত ॥১০॥

अन्वयः—जननी जड़ं प्रदेहि इति अमुष्याः संप्रार्थनार्थावगमे समर्था अभूत्। अन्यस्तु बुद्धौ अजड़ः अपि (सन्) किं वस्तु समिच्छति इति बोद्धुं जड़ः अभूत् ॥११॥

जड़मिति। जननी, जड़ं प्रदेहि इति अमुष्याः रुक्मिण्याः

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

कन्यामथान्यां प्रति दानमेषा
तदिष्टमिष्टं ददती शिशिक्षे।
यादृक्स्वभावा हि परे भवेयुः
तद्योग्यखेलाय चलन्ति बालाः ॥१२॥

संप्रार्थनार्थस्य याच्ञावाक्याभिधेयस्य विषयस्य अवगमे अवबोधे, समर्था अभूत्, रुक्मिण्या जलपिपासाकाले बहुशस्तादृशवाक्यश्रवणादिति भावः। अन्यस्तु जनः, बुद्धौ बुद्धिविषये, अजडोऽपि अहीनोऽपि सन्, किं वस्तु, समिच्छति रुक्मिणी प्रार्थयते, इति बोद्धुम्, जडो हीनः अक्षमोऽभूत्।

अत्र अजडस्य हेतुं विनापि जडीभवनात् किं विभावना, उत अजडत्वरूपे कारणे सत्यपि बोधरूपकार्य्याभावात् विशेषोक्तिरित्यनयोः सन्देहसङ्करोऽलङ्कारः, वृत्त्यनुप्रासच्छेकानुप्रासश्चेत्येतेषां संसृष्टिः ॥११॥

বাঙ্গালা—রুক্মিণী "জড়ং প্রদেহি" এইরূপ প্রার্থনা করিলে তাহার মাতাই তাহার অর্থ বুঝিতেন, কিন্তু অন্য বুদ্ধিমান্ লোকও রুক্মিণী কি চাহিতেছে, তাহা বুঝিতে অসমর্থ হইত ॥১১॥

अन्वयः—अथ एषा अन्यां कन्यां प्रति तदिष्टं ददती इष्टं फलं शिशिक्षे। हि परे यादृक्स्वभावाः भवेयुः, तद्योग्यखेलाय बालाः चलन्ति ॥१२॥

कन्यामिति। अथ एषा रुक्मिणी, अन्यां कन्यां प्रति, तस्याः कन्याया इष्टम् अभिलषितं वस्तु ददती सती, इष्टं स्वाभीष्टम्, दानं स्वभक्तजनेभ्यो वितरणं शिशिक्षे। हि यस्मात्, परे योग्यवयसि, यादृक्स्वभावा भवेयुः, तद्योग्यखेलाय तदुपयोगिक्रीडनाय, बालाः शिशवः, चलन्ति उद्यच्छन्ति।

अत्र शिशिक्षे इवेति भावाभिमानिनी प्रतीयमाना क्रियोत्प्रेक्षा-

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

सा मातृदत्तं वसनं वसाना
विस्मेरवक्त्रे हसितावसाना ।
तद्दर्शयामास सखीं कराभ्यां
पश्यज्जनात्यन्तसुखाकराभ्याम् ॥१३॥

लङ्कारः, सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासश्छेकानुप्रासश्चेत्येतेषां संसृष्टिः ।

खेलनं खेलः इति भावे घञ् ॥१२॥

বাঙ্গালা—রুক্মিণী অন্য কন্যাকে তাহার অভীষ্ট বস্ত্র দান করিয়া, পরবর্ত্তী কালে আপন ভক্তদিগকে তাহাদের অভীষ্ট বিতরণই যেন শিক্ষা করিত। কারণ, পরে যাদৃশস্বভাবসম্পন্ন হইবে, তদুপযোগী খেলা করিবার জন্যই বালকেরা উদ্যম করিয়া থাকে ॥১২॥

अन्वयः—सा मातृदत्तं वसनं वसाना, विस्मेरवक्त्रे हसितावसाना (च सती) पश्यज्जनात्यन्तसुखाकराभ्यां कराभ्यां सखीं तत् दर्शयामास ॥१३॥

सेति । सा रुक्मिणी, मातृदत्तं वसनं वस्त्रम्, वसना परिदधाना, विस्मेरं स्वभावत एव मन्दहास्ययुक्तं यद्वक्त्रं मुखं तत्र हसितम् आनन्दातिशयात् स्फुटहास्यम् अवसानं शेषीभूतं यस्याः सा, तादृशी च सती, पश्यतां जनानाम् अत्यन्तं यत् सुखं तत् कुरुत इति ताभ्याम्, कराभ्यां हस्ताभ्याम्, तद्वसनं दर्शयामास ।

अत्रान्त्ययमकमलङ्कारः ।

वसना इति "वस् आच्छादने" इत्यस्यानसि रूपम् । विस्मेरेति "दीपि कम्पि—" इत्यादिना स्मयते रः । अवसानामिति अवपूर्वात् स्यतेर्नन्द्यादित्वाद्युः । सुखाकराभ्यामिति सुखशब्दात् "प्रियसुखाभ्यामानुकूल्ये" इति डाच् प्रत्ययः ॥१३॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

যুঞ্জস্ব বালে! ঘনবালুকানাং
পুঞ্জেঽত্র মঞ্জুং কথয়ামি তত্ত্বাম্।
কন্যাঽসকৌ কেনচনেত্থমুক্তা
মুক্ত্বাঽঙ্গকং তত্র হঠাদুদস্থাৎ॥১৪॥
ইয়ং সপত্নী মম ভাবিনীতি
নোতিস্প্রিয়া চেৎ পুরতোঽগ্রহীষ্যৎ।
তদা তু তস্যা রসনাং বয়স্যা-
ভাবান্ন বাণী ক্কচিদাশ্রয়িষ্যৎ॥১৫॥

বাঙ্গালা—রুক্মিণী মাতৃদত্ত বস্ত্র পরিধানপূর্ব্বক স্বভাবত সহাস্যমুখে বিশেষ হাস্য প্রকাশ করিয়া দর্শনকারী লোকদিগের অত্যন্ত আনন্দজনক হস্তযুগলদ্বারা সখাকে সেই বস্ত্রখানি দেখাইত॥১৩॥

অন্বয়:—বালে! অত্র ঘনবালুকানাং পুঞ্জে যুঞ্জস্ব, তৎ ত্বাং মঞ্জুং কথয়ামি। কেনচন ইত্থম্ উক্তা অসকৌ কন্যা তত্র অঙ্গকং মুক্ত্বা হঠাৎ উদস্থাৎ॥১৪॥

যুঞ্জস্বেতি। হে বালে! অত্র ঘনবালুকানাং পুঞ্জে রাশৌ, যুঞ্জস্ব যুক্তা ভব পতেত্যর্থঃ, তৎ তদা, ত্বাম্, মঞ্জুং সুন্দরীং কথয়ামি। কেনচন কেনচিজ্জনেন, ইত্থম্ উক্তা কথিতা, অসকৌ কন্যা রুক্মিণী, তত্র ঘনবালুকানাং পুঞ্জে, অঙ্গকং ক্ষুদ্রমঙ্গং গাত্রম্, মুক্ত্বা নিক্ষিপ্য পাতয়িত্বেতি যাবৎ, হঠাৎ তৎক্ষণাদেব উদস্থাৎ উত্থিতবতী।

অত্র স্বভাবোক্তিরলঙ্কারশ্ছেকানুপ্রাসেন সংসৃজ্যতে॥১৪॥

বাঙ্গালা—"বালিকে। তুমি এই ঘন বালিরাশির উপরে যদি পড়িতে পার, তাহা হইলে তোমাকে সুন্দরী বলিব।" কোন ব্যক্তি এইরূপ বলিলে, রুক্মিণী সেই বালিরাশির উপরে পড়িয়া আবার তৎক্ষণাৎ উঠিত॥১৪॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

प्रसाधिका भूरिपदस्य साधु
स्वकर्म्मसूत्रेण जगज्जनानाम् ।
इयं यथार्था प्रकृतिः किलेति
तस्याः परः प्रत्यय एव जातः ॥१६॥

अन्वयः—इयं मम सपत्नी भाविनी इति चेत्, नीतिश्रिता वाणी पुरतः अग्रहीष्यत्, तदा तु वयस्याभावात् क्वचित् (अपि) अस्याः रसनां न आश्रयिष्यत् ॥१५॥

इयमिति। इयं रुक्मिणी, मम सपत्नी भाविनी, इति चेत्, नीतिं श्रिता नीतिश्रिता, प्राक्तनकर्म्मानुसारेण न्यूनाधिकभावेन जनवदनाधिष्ठितेत्यर्थः, वाणी सरस्वती, पुरतः अग्रतः, अग्रहीष्यत् अज्ञास्यत्; तदा तु वयस्याभावात् सखीभावात्, क्वचित् कदाचिदपि तस्या रुक्मिण्याः, रसनां जिह्वाम्, न आश्रयिष्यत्। क्रमेण रुक्मिण्या वागभिधानशक्तिराविर्भूवेति भावः।

अत्र सरस्वत्यास्तद्रसनाश्रयसम्बन्धेऽपि तदसम्बन्धोक्तेरतिशयोक्तिरलङ्कारश्छेकानुप्रासश्चेति संसृष्टिः ॥१५॥

বাঙ্গালা—"ইনি (রুক্মিণী) আমার সপত্নী হইবেন" ইহা যদি নীতিমার্গানুসারিণী সরস্বতী পূর্ব্বে বুঝিতে পারিতেন, তাহা হইলে তিনি কখনও তাহার রসনা আশ্রয় করিতেন না ॥১৫॥

অन्वयः—इयं स्वकर्मसूत्रेण जगज्जनानां भूरिपदस्य साधु प्रसाधिका यथार्था प्रकृतिः, इति किल तस्याः परः प्रत्ययः एव जातः ॥१६॥

प्रसाधिकेति। इयं रुक्मिणी, स्वकर्म्म धर्म्माधर्म्मरूपं विहितनिषिद्धात्मकं स्वकीयं कार्य्यं तदेव सूत्रं सुखदुःखयोः कारणं तेन, तदनुसारेणेत्यर्थः, जगज्जनानां भूरिपदस्य राजत्वदीनत्वादिबहुतरावस्थायाः, साधु सम्यक्, प्रसाधिका निष्पादिका, यथार्था सत्यभूता,

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

শ্রিয়া স্বয়া শ্রীরিয়মেব কন্যা
মায়িপ্রিয়েণেহ্টশমন্বমায়ি ।
তথাপি চিত্রং ন বুধোঽপ্যবোধি
সাধ্যাবিশেষাখ্যবিশেষদোষম্ ॥১৭॥

প্রকৃতিঃ সত্ত্বরজস্তমোগুণময়ী আদিকারণং মহালক্ষ্মীরিতি যাবত্, ইতি হেতোঃ, কিল সম্ভাবনায়াম্, তস্যা রুক্মিণ্যা উপরি, পর উত্তমঃ, প্রত্যয়ো লোকানাং বিশ্বাস এব জাতঃ, ক্রমশস্তদ্ভাবদর্শনাত্ মুনিজনবচনশ্রবণাচ্চেতি ভাবঃ। অন্যত্র তু স্বকর্ম্মসূত্রেণ "কর্ত্তুরীপ্সিততমং কর্ম্ম" ইত্থং কর্ম্মবিষয়কসূত্রগ্রন্থেন, ভূরিপদস্য ঘটং পটমিত্যাদিপ্রচুরপ্রয়োগস্য, সাধু সম্যক্, প্রসাধিকা নিষ্পাদিকা, যথার্থা প্রকৃতিঃ ঘটপটাদিরূপী মূলীভূতঃ শব্দঃ, ইতি হেতোঃ, তস্যাঃ প্রকৃতেঃ, পর উত্তরঃ, প্রত্যয় অমাদিবিভক্তিরেব জাতঃ।

অত্র এতত্পদাবলীরূপেণ বস্তুনা দ্বিতীয়ার্থরূপং বস্তু ব্যজ্যত ইতি বস্তুনা বস্তুধ্বনিঃ।

"দূরানাত্তোত্তমাঃ পরাঃ" ইতি "প্রত্যয়োঽধীনশপথজ্ঞানবিশ্বাসহেতুষু" ইতি চামরঃ ॥১৬॥

বাঙ্গালা—মহালক্ষ্মীরূপা এই রুক্মিণী জগতের লোকের আপন আপন কর্ম্ম অনুসারে সমীচীনভাবে রাজত্ব ও দীনত্বপ্রভৃতি বহুতর পদ সম্পাদন করেন; সুতরাং ইনি যথার্থ প্রকৃতি। এইভাবে তাঁহার উপরে লোকের বিশ্বাস জন্মিয়াছিল ॥১৬॥

অন্বয়ঃ—ইয়ং স্বয়া শ্রিয়া শ্রীঃ এব, ঈদৃশং মায়িপ্রিয়েণ অন্বমায়ি। তথাপি বুধঃ অপি (যত্) সাধ্যাবিশেষাখ্যবিশেষদোষং ন অবোধি, (তত্) চিত্রং ॥১৭॥

শ্রিয়েতি। ইয়ং রুক্মিণী, স্বয়া স্বকীয়য়া, শ্রিয়া লক্ষ্মীরূপেণ

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

क्रियागुणद्रव्यवती समस्त-
लोकेन या खेलति सर्वदैव ।
तयैव कौतूहलवान् समस्त-
लोकस्तदानीं खलु खेलति स्म ॥१८॥

कान्त्या च, श्रीः लक्ष्मीरेव, ईदृशम्, माया कृपा अस्यास्तीति मायी, स चासौ प्रियश्चेति मायिप्रियस्तेन, रुक्मिणीं प्रति दयालुना प्रियजनेनेत्यर्थः, अन्वमायि अनुमितम् । तथापि बुधो विद्वान् जनोऽपि, यत् साध्याविशेषाख्यविशेषदोषं "पर्व्वतो वह्निमान् वह्नेः" इतिवत् इयं रुक्मिणी श्रीः श्रीमत्त्वात् इति प्रयोगे हेतुसाध्ययोरभेदाख्यरूपं दोषं न अबोधि नावगच्छति स्म । तदेव चित्रमाश्चर्य्यम् ।

अत्र श्रियैति हेतुबोधकश्रीशब्दप्रतिपाद्यलक्ष्मीकान्त्योर्भेदेऽपि श्लेषेणाभेदाध्यवसायादतिशयोक्तिरलङ्कारः, बुधत्वरूपकारणे सत्यपि बोधरूपतत्फलाभावाद्विशेषोक्तिश्छेकानुप्रासश्चेत्येतेषां मिथो निरपेक्षतया संसृष्टिः ।

"श्रीर्लक्ष्मीवेशसम्पत्सु भारतीशोभयोरपि" इति त्रिकाण्डशेषः । "स्यान्माया शाम्बरी धियोः । माया दम्भे कृपायाञ्च" इति विश्वः ।

अन्वमायीति अनुपूर्व्वस्य माधातोरद्यतन्याः प्रथमपुरुषैकवचने रूपम् ॥१७॥

বাঙ্গালা—এই কন্যাটী আপন শ্রীর গুণে শ্রী-ই বটে, এইরূপে দয়ালু প্রিয়জন অনুমান করিত, তথাপি বুদ্ধিমান্ লোকও যে সাধ্যাবিশেষনামক বিশেষ দোষ বুঝিতে পারিতেন না, তাহাই আশ্চর্য্য ॥১৭॥

अन्वयः—क्रियागुणद्रव्यवती या सर्व्वदैव समस्तलोकेन खेलति, कौतूहलवान् समस्तलोकः तदानीं तयैव खलु खेलति स्म ॥१८॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

कलङ्कहीना हरिणाङ्करेखा
सुवर्णवर्णा सवितुः सवर्णा।
पुराणनिर्णीततनुर्नवीना
सा नन्दिनी बाल्यसुखैरनन्दत् ॥१९॥

क्रियेति। क्रिया लोकगृहगमननापसरणादिरूपा गुणाः दयादयः द्रव्याणि धनानि भूषणादीनि च अस्याः सन्तीति सा तथोक्ता, या लक्ष्मीरूपा रुक्मिणी, सर्वदैव समस्तलोकेन, खेलति गमनापसरण-दयाधनदानादिना क्रीड़ति, कौतूहलवान् तस्या एव क्रीड़ादिदर्शन-कौतूकवान्, समस्तलोकः तदानीम्, तयैव बालिकया रुक्मिण्या, खलु खेलति स्म।

अत्र पूर्व्वार्द्धोक्तिभङ्ग्या रुक्मिण्या गम्यलक्ष्मीरूपत्वाभिधानात् पर्य्यायोक्तमलङ्कारश्छेकानुप्रासेन संसृज्यते।

"द्रव्यं वित्तं स्वापतेयं रिक्थमिक्थं धनं वसु" इत्यमरः। क्रिया-गुणवत्त्वं समवायेन, द्रव्यवत्त्वन्तु जनकतया प्रतिपत्तव्यम् ॥१८॥

বাঙ্গালা—ক্রিয়া, গুণ ও দ্রব্যযুক্তা লক্ষ্মীরূপা যে রুক্মিণী, সর্ব্বদাই সমস্ত লোকদ্বারা খেলা করিয়া থাকেন, তাঁহাদ্বারাই তৎকালে কৌতুকী সমস্ত লোক খেলা করিত ॥১৮॥

अन्वयः—सान्वय एव श्लोकः ॥१९॥

कलङ्केति। कलङ्को लाञ्छनम् अपवादश्च, तेन हीना, हरिणाङ्क-रेखा चन्द्ररेखास्वरूपा ; सुवर्णवर्णा, सवितुः सूर्य्यस्य, सवर्णा समाना-कारवर्णा तदाख्यप्रियतमास्वरूपा ; पुराणैः श्रीमद्भागवतादिभिः निर्णीता लक्ष्मीरूपतया निरूपिता तनुः शरीरं यस्याः सा, अथ च नवीना रुक्मिणीरूपेण नवावतीर्णा ; सा नन्दिनी भीष्मककन्या,

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

रुक्म्यादिभिः पञ्चभिरञ्चितश्रीः
सहोदरैः सा सह राजकन्या।
अङ्गैर्यथा भूपतिनीतिविद्या
विद्योतते स्माथ समस्तहृद्या ॥२०॥

बाल्यसुखैः शैशवोचितसुखजनकव्यापारैः क्रीड़ादिभिः अनन्दत् आनन्दमन्वभवत्।

अत्र पूर्व्वार्द्धे अधिकारूढ़वैशिष्ट्यरूपकद्वयम्, तृतीयपादे विरोधाभासश्छेकानुप्रासो वृत्त्यनुप्रासश्च इत्येतेषां परस्परनिरपेक्षतया संसृष्टिः।

"कलङ्कोऽङ्कापवादयोः" इत्यमरः ॥१९॥

বাঙ্গালা—কলঙ্কবিহীন চন্দ্রলেখা ও স্বর্ণবর্ণা সূর্য্যের সবর্ণাস্বরূপা এবং পুরাণশাস্ত্রনিরূপিতদেহা অথ চ নবীনা সেই ভীষ্মকরাজকন্যা শৈশবোচিত ক্রীড়াসুখে আনন্দানুভব করিতে লাগিল ॥১৯॥

अन्वयः—अथ अञ्चितश्रीः समस्तहृद्या (च) सा राजकन्या रुक्म्यादिभिः पञ्चभिः सहोदरैः सह, भूपतिनीतिविद्या यथा अङ्गैः (तथा) विद्योतते स्म ॥२०॥

रुक्म्यादिभिरिति। अथ बालखेलानन्तरम्, अञ्चिता क्रमेणाधिकं लब्धा श्रीः कान्तिर्यया सा, समस्तानां सर्व्वेषामेव लोकानां हृद्या सौन्दर्य्येण स्वभावेन च प्रिया, सा राजकन्या रुक्मिणी, रुक्म्यादिभिः पञ्चभिः सहोदरैः सह, भूपतीनां राज्ञां नीतिविद्या यथा अङ्गैः सहायादिभिः पञ्चभिरवयवैः विद्योतते तथा विद्योतते स्म विरराज।

अत्र श्रौतोपमालङ्कारो वृत्त्यनुप्रासेन छेकानुप्रासेन च संसृज्यते। पञ्चाङ्गान्याह कामन्दकः—

"सहायाः साधनोपाया विभागो देशकालयोः।
विनिपातप्रतीकारः सिद्धेः पञ्चाङ्गमिष्यते॥" ॥२०॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

रुक्म्यादयः पञ्च सहोदराश्च
तां रुक्मिणीं सारतरां स्वसारम्।
स्कन्धा यथा बुद्धनिबद्धविद्यां
तथाऽनुजग्मुः प्रणयात् सदैव ॥२१॥

বাঙ্গালা—রাজনীতি যেমন সহায়প্রভৃতি পঞ্চাঙ্গের সহিত মিলিত হইয়া শোভা পায়, সেইরূপ ক্রমবর্দ্ধমানকান্তি রাজকন্যা রুক্মিণী রুক্মিপ্রভৃতি পাঁচটী সহোদরের সহিত মিলিত হইয়া শোভা পাইত ॥২০॥

अन्वयः—रुक्म्यादयः पञ्च सहोदराश्च, तां, सारतरां स्वसारं रुक्मिणीं स्कन्धाः यथा बुद्धनिबद्धविद्यां तथा प्रणयात् सदैव अनुजग्मुः ॥२१॥

रुक्म्यादय इति। रुक्म्यादयः पञ्च सहोदराश्च, ताम्, सारतराम् अतीवोत्तमाम्, स्वसारं भगिनीं रुक्मिणीम्, स्कन्धा विज्ञानवेदनासंज्ञा-संस्काररूपात्मका पञ्चावयवाः, यथा, बुद्धेन निबद्धा प्रवर्त्तिता या विद्या ताम्, तथा प्रणयात् स्नेहात् सम्बन्धादेव, सदैव अनुजग्मुः।

अत्र श्रौतोपमालङ्कारश्छेकानुप्रासेन संसृज्यते।

भीष्मकस्य पञ्च पुत्रानाह श्रीमद्भागवते—

"राजासीद्भीष्मको नाम विदर्भाधिपतिर्महान्।
तस्य पञ्चाभवन् पुत्राः कन्यैका रुचिरानना॥
रुक्म्यग्रजो रुक्मरथो रुक्मबाहुरनन्तरः।
रुक्मकेशो रुक्ममाली रुक्मिण्येषां स्वसा सती॥"

पञ्च स्कन्धा यथा सर्वदर्शनसंग्रहे—

"दुःखं संसारिणः स्कन्धास्ते च पञ्च प्रकीर्त्तिताः।
विज्ञानं वेदना संज्ञा संस्कारो रूपमेव च॥"

एषां विस्तरस्तु तत्रैवानुसन्धेयः ॥२१॥

বাঙ্গালা—বিজ্ঞানপ্রভৃতি পঞ্চস্কন্ধ যেমন বৌদ্ধবিদ্যার অনুসরণ

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

पैशुन्यशून्यं कृतपुण्यजन्यं
नैपुण्यपूर्णं चरितं सुतानाम्।
स लोकनाथो ववृधे विलोक्य
चन्द्रोदयोत्ताल इवोर्म्मिमालः॥ २॥

ततः शिशून् शिक्षयितुं समग्रान्
समग्रवर्त्ती क्षितिशिक्षितानाम्।
शास्त्राण्यभीष्टान्ययतिष्ट शिष्ट-
प्रधानभूतः किल भूतलेन्द्रः॥२३॥

করে, সেইরূপ রুক্মিপ্রভৃতি পঞ্চ সহোদরও সর্ব্বদাই স্নেহবশতঃ উত্তমাভগিনী রুক্মিণীর অনুসরণ করিতেন॥২১॥

अन्वयः—सः लोकनाथः पैशुन्यशून्यं कृतपुण्यजन्यं नैपुण्यपूर्णं (च) सुतानां चरितं विलोक्य चन्द्रोदयोत्तालः ऊर्म्मिमालः इव ववृधे॥२२॥

पैशुन्येति। स लोकनाथो राजा भीष्मकः, पैशुन्यशून्यं खलतारहितम्, कृतेन पुण्येन जन्यं जन्म यस्य तत् प्राक्तनपुण्यजनितमित्यर्थः, नैपुण्येन सर्वविषयकौशलेन पूर्णञ्च, सुताश्च सुता चेति सुताः एकशेषात् पुत्रकन्यास्तासां सुतानाम्, चरितं व्यवहृतं विलोक्य, चन्द्रोदये उत्ताल उद्वेलितः, ऊर्म्मिमालः समुद्र इव, ववृधे आनन्देन स्फीतपुरागमेन वृद्धिं प्राप्तश्च बभूव।

अत्रापि श्रौतोपमालङ्कारो वृत्त्यनुप्रास-च्छेकानुप्रासान्त्यानुप्रासैः संसृज्यते॥२२॥

বাঙ্গালা—পুত্র কয়টী ও কন্যাটীর খলতাশূন্য, প্রাক্তনপুণ্যজনিত এবং সমস্ত বিষয়ে নৈপুণ্যপূর্ণ চরিত্র দেখিয়া ভীষ্মকরাজ চন্দ্রোদয়ে উদ্বেলিত সমুদ্রের ন্যায় আনন্দে স্ফীত হইতেন॥২২॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

স দক্ষিণাত্মা দিশি দক্ষিণস্যাং
স্বস্যাঃ পুরো নব্যপুরঞ্চ কাঞ্চিৎ ।
মনোঽনুরূপাং প্রকৃতাভিরূপাং
বিনির্ম্মমে মর্ম্মবিদঃ পুরোগাম্ ॥২৪॥

অন্বয়ঃ—ততঃ ক্ষিতিশিক্ষিতানাং সমগ্রবর্ত্তী শিষ্টপ্রধানভূতঃ (চ) ভূতলেন্দ্রঃ সমগ্রান্ শিশূন্ অভীষ্টানি শাস্ত্রাণি কিল শিক্ষয়িতুং অযতিষ্ট ॥২৩॥

তত ইতি। ততস্তদনন্তরম্, ক্ষিতৌ যে শিক্ষিতাস্তেষাং ক্ষিতিশিক্ষিতানাম্, সম্যগগ্রবর্ত্তীতি সমগ্রবর্ত্তী, শিষ্টেষু শাস্ত্রনিয়মিতেষু জনেষু প্রধানভূতশ্চ, ভূতলেন্দ্রো রাজা ভীষ্মকঃ, সমগ্রান্ শিশূন্, অভীষ্টানি শাস্ত্রাণি কিল শিক্ষয়িতুম্ অযতিষ্ট যত্নমকার্ষীৎ ।

অত্র ছেকানুপ্রাসবৃত্ত্যনুপ্রাসয়োঃ সংসৃষ্টিরলঙ্কারঃ ॥২৩॥

বাঙ্গালা—তাহার পর পৃথিবীর শিক্ষিতগণের অগ্রবর্ত্তী ও শিষ্ট-লোকদিগের মধ্যে প্রধান ভীষ্মকরাজা শিশুসন্তানদিগকে অভীষ্ট শাস্ত্র শিক্ষা দিবার জন্য যত্ন করিলেন ॥২৩॥

অন্বয়ঃ—দক্ষিণাত্মা পুরোগাং মর্ম্মবিদঃ (চ) সঃ স্বস্যাঃ পুরঃ দক্ষিণস্যাং দিশি মনোঽনুরূপাং প্রকৃতাভিরূপাঞ্চ কাঞ্চিৎ নব্যপুরং বিনির্ম্মমে ॥২৪॥

অত্র রাজপুত্রাণাং শিক্ষোদ্যোগমাহ স ইতি। দক্ষিণাত্মা উদার-চেতাঃ, পুরোগাম্, মর্ম্মবিদস্তত্ত্বজ্ঞশ্চ, স ভীষ্মকো রাজা, স্বস্যাঃ পুরঃ, দক্ষিণস্যাং দিশি, মনোঽনুরূপাম্, প্রকৃতাভিরূপাং স্বভাবত এব মনো-হরাম্, কাঞ্চিৎ নব্যপুরং বিনির্ম্মমে ।

অত্র ছেকানুপ্রাসোঽলঙ্কারঃ ।

মর্ম্মাণি বেত্তীতি মর্ম্মবিদঃ নাম্যুপধত্বাৎ কঃ ॥২৪॥

বাঙ্গালা—উদারচেতা ও রাজধানীর মর্ম্মজ্ঞ ভীষ্মকরাজা আপন

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

विद्यासमारम्भदिनेऽथ तेषाम्
एकेऽप्यनेके गुरवः समीयुः।
एकोऽभवत्तत्र च वासरेशः
बभूवुरध्यापनकारिणोऽन्ये ॥२५॥

ভবন হইতে দক্ষিণদিকে অভিপ্রায়ের অনুরূপ ও স্বভাবসুন্দর একটী নূতন পুরী নির্ম্মাণ করিলেন ॥২৪॥

अन्वयः—अथ तेषां विद्यासमारम्भदिने एके अपि अनेके गुरवः समीयुः। तत्र च एकः वासरेशः अभवत्, अन्ये च अध्यापनकारिणः बभूवुः ॥२५॥

अथ कुमाराणां शिक्षोपक्रमं सूचयन्नाह विद्येति। अथ विद्यापुरीनिर्म्माणानन्तरम्, तेषां कुमाराणाम्, विद्यासमारम्भदिने, एकेऽपि गुरुत्वेनैकजातीया अपि, एके श्रेष्ठा अपि इति वा, अनेके अश्रेष्ठा इति विरोधः, अनेके बहव इति तत्समाधानम्, गुरवः, समीयुः राजयत्नेन समागताः। तत्र तेषु गुरुषु च मध्ये, एको गुरुः बृहस्पतिः, वासरेशः तद्दिनाधिपतिः अभवत् विद्यारम्भे बृहस्पतिवारस्यैव श्रेष्ठत्वादिति भावः। तथा च ज्योतिषम्—"विद्यारम्भे गुरुः श्रेष्ठो मध्यमौ भृगुभास्करौ। मरणं शनिभौमाभ्यामविद्या बुधसोमयोः॥" अन्ये च गुरवः अध्यापनकारिणः बभूवुः।

अत्र एकेऽप्यनेक इति श्लेषेण विरोधसमाधानाद्विरोधाभासोऽलङ्कारः। "गुरु गीस्पतिपित्राद्यौ" इत्यमरः ॥२५॥

বাঙ্গালা—বিদ্যাভবন নির্ম্মাণের পরে কুমারগণের বিদ্যারম্ভদিনে শ্রেষ্ঠ অনেক গুরু আসিয়াছিলেন। তাঁহাদের মধ্যে এক গুরু (বৃহস্পতি) ছিলেন সেই দিনের অধিপতি। (অর্থাৎ সেই দিনটী বৃহস্পতিবার ছিল), আর অন্য গুরুরা ছিলেন অধ্যাপনকারী ॥২৫॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

चातुर्य्यगाम्भीर्य्यगुणे धुरीणाः
शिक्षापरीक्षाधिगमेऽनवीनाः।
दिवस्पतेः प्रत्युपदेशदक्षम्
अध्यापका गीष्पतिमन्वकार्षुः ॥२६॥

स्वरानुदात्तप्रभृतीन् प्रकाश्य
ध्यायन्नुपाध्यायवरः स्फुटार्थम्।
प्रभातकाले किल तान् कुमारान्
अध्यापिपद्वेदगणं गुणाढ्यान् ॥२७॥

अन्वयः—चातुर्य्यगाम्भीर्य्यगुणे धुरीणाः शिक्षापरीक्षाधिगमे अनवीनाः अध्यापकाः दिवस्पतेः प्रत्युपदेशदक्षं गीष्पतिं अन्वकार्षुः ॥२६॥

चातुर्य्येति। चातुर्य्यं शिक्षादाननैपुण्यं गाम्भीर्य्यञ्च विद्यास्वगाधत्वं तदुभयमेव गुणास्तस्मिन्, धुरीणा धुरन्धराः, तथा शिक्षापरीक्षाया अधिगमे ग्रहणे, अनवीनाः अनव्या असकृत्तद्ग्रहणात् प्राचीना इत्यर्थः अध्यापकाः, दिवस्पतेः इन्द्रस्य, प्रत्युपदेशे शिक्षादाने दक्षं निपुणम्, गीष्पतिं वृहस्पतिम्, अन्वकार्षुः तदनुरूपप्रत्युपदेशादानादनुकृतवन्तः।

अत्र आर्थोपमालङ्कारो वृत्त्यनुप्रासच्छेकानुप्रासाभ्यां संसृज्यते ॥२६॥

বাঙ্গালা—শিক্ষাদাননৈপুণ্য ও বিদ্যার গভীরতায় ধুরন্ধর এবং শিক্ষার পরীক্ষাগ্রহণে বিশেষ অভ্যস্ত সেই অধ্যাপকগণ (কুমারগণের শিক্ষাদানকালে) ইন্দ্রের শিক্ষাদানে দক্ষ বৃহস্পতির অনুকরণ করিতেন ॥২৬॥

अन्वयः—उपाध्यायवरः स्फुटार्थं ध्यायन् उदात्तप्रभृतीन् स्वरान् प्रकाश्य प्रभातकाले गुणाढ्यान् तान् कुमारान् किल वेदगणं अध्यापिपत् ॥२७॥

अथ कुमाराणां वेदाध्यापनमाह स्वरानिति। उपाध्यायेषु वरो

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

सप्रत्ययं सप्रकृतिप्रयोगं
विभक्तियुक्तं पुरुषान्वितञ्च।
गुणाश्रितं वृद्धियुतञ्च पेठुः
सांख्योपमं व्याकरणं कुमाराः ॥२८॥

वेदाध्यापकत्वादेव प्रधानः, स्फुटार्थं वेदवाक्यानां स्पष्टमभिधेयम्, ध्यायन् चिन्तयन् चिन्तया मनसि प्रत्युपस्थापयन्नित्यर्थः, उदात्तप्रभृतीन् उदात्तानुदात्तसमाहाररूपान्, स्वरान् प्रकाश्य, प्रभातकाले दिवसप्रथम-भागे, "प्रथमे च तथा भागे वेदाभ्यासो विधीयते" इति दक्षस्मृतेः, गुणा-ढ्यान् बुद्धिमेधादिगुणसम्पन्नान्, तान् कुमारान् किल, वेदानां गणं समूहम् अध्यापिपत् अध्यापितवान्।

अत्र छेकानुप्रासोऽलङ्कारः ॥२७॥

বাঙ্গালা—প্রধান অধ্যাপকমহাশয় বেদবাক্যের স্পষ্ট অর্থ চিন্তা করিতে থাকিয়া, উদাত্তপ্রভৃতি স্বর প্রকাশ করিয়া, প্রভাতকালে বুদ্ধি মেধাদিগুণসম্পন্ন সেই কুমারগণকে বেদ পড়াইতেন ॥২৭॥

अन्वयः—कुमाराः सप्रत्ययं सप्रकृतिप्रयोगं विभक्तियुक्तं पुरुषान्वितञ्च गुणाश्रितं वृद्धियुतञ्च सांख्योपमं व्याकरणं पेठुः ॥२८॥

कुमाराणां साख्यवद्व्याकरणशिक्षामाह—सप्रत्ययमिति। कुमाराः, प्रत्ययेन सुप्तिङादिना विवेकज्ञानेन च सहेति सप्रत्ययम्, प्रकृतेः नाम-धातुप्रभृतेः सत्त्वरजस्तमसां साम्यावस्थारूपस्य प्रधानस्य च प्रयोगेण उल्लेखेन सहेति सप्रकृतिप्रयोगम्, विभक्तिभिः सुप्तिङ्भिः विभक्त्या प्रकृतिमहदादितत्त्वविभागेन च युक्तम्, पुरुषैः नामयुष्मदस्मद्योगे प्रयुज्य-मानैः प्रथममध्यमोत्तमरूपैः, पुरुषैः नित्यशुद्धबुद्धमुक्तस्वभावैश्चिन्मयैः अन्वितञ्च, गुणैः अरादिभिः सत्त्वरजस्तमोभिश्च आश्रितम्, बुद्धिभिः

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

অদ্বৈতমানন্দমুদাহরন্তীং
নিবেদয়ন্তীং রসমুখ্যতাঞ্চ।
শিশিক্ষিরে বিভ্রমবৎপ্রপঞ্চাং
বেদান্তবিদ্যামিব কাব্যবিদ্যাম্ ॥২৯॥

আরাদিভিঃ অণিমাদ্যষ্টৈশ্বর্য্যৈশ্চ যুতঞ্চ, সাংখ্যং দর্শনমেব উপমা যস্য তৎ, ব্যাকরণম্, পেঠুঃ অধীতবন্তঃ।

অত্র শ্লেষানুপ্রাণিতা আর্থী পূর্ণোপমালঙ্কারঃ।

"প্রতীয়তে যেনার্থঃ স প্রত্যয় ইতি রূঢ়িঃ।" "প্রত্যয়াৎ প্রথমং ক্রিয়ত ইতি প্রকৃতিঃ" ইতি কাতন্ত্রবৃত্তৌ দুর্গসিংহঃ। "প্রত্যয়োঽধীনশপথজ্ঞান-বিশ্বাসহেতুষু" ইতি "প্রধানং প্রকৃতিঃ স্ত্রিয়াম্" ইতি চামরঃ।

"সত্ত্বরজস্তমসাং সাম্যাবস্থা প্রকৃতিঃ, প্রকৃতের্মহান্ মহতোঽহঙ্কারঃ অহঙ্কারাৎ পঞ্চতন্মাত্রাণ্যুভয়মিন্দ্রিয়ম্, স্থূলভূতানি পুরুষ ইতি পঞ্চবিংশতির্গণঃ" "ন নিত্যশুদ্ধবুদ্ধমুক্তস্বভাবস্য তদ্যোগস্তদ্যোগাদৃতে" ইতি সাংখ্যসূত্রদ্বয়ম্, "...পুরুষবহুত্বং সিদ্ধম্..." ইতি সাংখ্যকারিকা। "সুপো বিভক্তয়স্তিঙশ্চ" "অর্ পূর্ব্বে দ্বে সন্ধ্যক্ষরে চ গুণাঃ" "আর্ উত্তরে চ বৃদ্ধিঃ" ইতি ব্যাকরণসূত্রাণি। অণিমাদ্যষ্টৈশ্বর্য্যাণি চ সাংখ্যতত্ত্ব-কৌমুদ্যাদাবনুসন্ধেয়ানি ॥২৮॥

বাঙ্গালা—বিবেকজ্ঞান, প্রকৃতি, তত্ত্ববিভাগ, পুরুষ, সত্ত্ব, রজ ও তমোগুণ এবং অণিমাদি অষ্ট ঐশ্বর্য্যসমন্বিত সাংখ্যদর্শনের ন্যায় প্রত্যয়, প্রকৃতি, বিভক্তি, পুরুষ, গুণ ও বৃদ্ধিযুক্ত ব্যাকরণ শাস্ত্র রাজকুমারেরা অধ্যয়ন করিয়াছিলেন ॥২৮॥

অন্বয়ঃ—অদ্বৈতমানন্দ উদাহরন্তীং রসমুখ্যতাঞ্চ নিবেদয়ন্তীং বিভ্রমবৎপ্রপঞ্চাং বেদান্তবিদ্যামিব কাব্যবিদ্যাং শিশিক্ষিরে (কুমারাঃ) ॥২৯॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

हितोपदेशे सततप्रवृत्तां
पानाशनादौ विहितव्यवस्थाम् ।
धर्म्मञ्च नीतिञ्च निदर्शयन्तीम्
अम्बामिवामी जगृहुः स्मृतिञ्च ॥३०॥

तेषां वेदान्तविद्याया इव काव्यविद्यायाः शिक्षामाह—अद्वैतमिति। अत्र कुमारा इत्यनुवर्त्तते। अद्वैतम् असाधारणम्, आनन्दम् आमोदम्, उदाहरन्तीं रसवत्तया प्रकाशयन्तीम्, अन्यत्र अद्वैतं सजातीय-विजातीयद्वितीयरहितम्, आनन्दं ब्रह्म, उदाहरन्तीं वदन्तीम्, रसस्य "सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः" इति लक्षणलक्षितस्य, अन्यत्र ब्रह्मणः, मुख्यतां प्राधान्यञ्च, निवेदयन्तीं बोधयन्तीम्, विभ्रमवान् शृङ्गारादिमत्तया विलासवान्, प्रपञ्चो विस्तारो यस्यास्ताम्, अन्यत्र विभ्रम-वान् विषयतया विशेषेण भ्रमवान् भ्रान्तिविषय इत्यर्थः प्रपञ्चो जगत् यस्यां ताम्, वेदान्तविद्यामिव काव्यविद्याम्, शिशिक्षिरे अधिगतवन्तः।

अत्र श्लेषानुप्राणिता श्रौती पूर्णोपमालङ्कारः।

"शान्तं शिवमद्वैतं तुरीयं मन्यन्ते न आत्मा स विज्ञेयः" "सत्यं ज्ञानमानन्दं ब्रह्म" "रसो वै सः" इति श्रुतयः। "वेदान्तो नाम उपनिषत्प्रमाणं तदुपकारीणि च शारीरकसूत्रादीनि" इति वेदान्तसारः ॥२৯॥

বাঙ্গালা—অদ্বিতীয় ব্রহ্মপ্রকাশক, ব্রহ্মের প্রাধান্যবোধক এবং জগতের ভ্রান্তিবিষয়তাজ্ঞাপক বেদান্তশাস্ত্রের ন্যায় অসাধারণ আনন্দ-প্রকাশক, রসের শ্রেষ্ঠতাবোধক ও শৃঙ্গারাদিবিলাসযুক্ত কাব্যশাস্ত্র রাজ-কুমারেরা শিক্ষা করিয়াছিলেন ॥২৯॥

अन्वयः—अमी हितोपदेशे सततप्रवृत्तां पानाशनादौ विहितव्यवस्थां धर्म्मञ्च नीतिञ्च निदर्शयन्तीं अम्बां इव स्मृतिञ्च जगृहुः ॥३०॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

अङ्गानि तेऽन्यानि च दर्शनानि
नैपुण्यवन्तः समधीतवन्तः ।
प्राप्य स्वतन्त्रा न महामनीषां
मनीषितायां विरमन्त्यधीतेः ॥३१॥

कुमाराणां स्मृतिशास्त्राधिगममाह हितोपदेश इति । अमी कुमाराः, हितोपदेशे सततप्रवृत्ताम्, नियोज्यस्नेहात् पुत्रवात्सल्याच्चेति भावः, पानाशनादौ पानभोजनादिकार्य्ये विहिता कृता व्यवस्था निर्द्देशो यया ताम्, तथा धर्म्मस्य नीतिञ्च निदर्शयन्तीं ज्ञापयन्तीम्, अम्बां मातरमिव स्मृतिं धर्म्मसंहिताञ्च, जगृहुः अधिगतवन्तः ।

अत्र अर्थश्लेषानुप्राणिता श्रौती पूर्णोपमालङ्कारः ॥३०॥

বাঙ্গালা—সর্ব্বদা হিতোপদেশে প্রবৃত্তা, পান ও ভোজনাদির ব্যবস্থাকারিণী এবং ধর্ম্ম ও নীতির শিক্ষয়িত্রী জননীর ন্যায় স্মৃতিও তাঁহারা লাভ করিয়াছিলেন ॥৩০॥

अन्वयः—नैपुण्यवन्तः ते अङ्गानि अन्यानि दर्शनानि च समधीतवन्तः । स्वतन्त्राः महामनीषां प्राप्य मनीषितायाः अधीतेः न विरमन्ति ॥३१॥

अङ्गानीति । नैपुण्यवन्तः सर्व्वेष्वेव विषयेषु दक्षताशालिनः, ते कुमाराः, अङ्गानि शिक्षाकल्पादीनि वेदाङ्गशास्त्राणि अन्यानि न्याया-दीनि दर्शनानि च, समधीतवन्तः । स्वतन्त्राः स्वाधीनाः, महामनीषां तीक्ष्णबुद्धिं प्राप्य, मनीषितायाः अभीष्टायाः, अधीतेः अध्ययनात्, न विरमन्ति न निवर्त्तन्ते ।

अत्र सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः अन्त्यानु-प्रासश्छेकानुप्रासश्चेति संसृष्टिः ।

अङ्गानि यथा—

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

चिरोपकारे विहितप्रयत्नां
स्वातिक्रमादैहिकहानिहेतुम् ।
स्वसारमेते गुरुतोऽग्रजाताम्
अनुप्रयाता इव नीतिविद्याम् ३२॥

"शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसां चितिः ।
ज्योतिषामयनञ्चैव वेदाङ्गानि वदन्ति षट् ॥"

मनस ईषिता मनीषिता "ईषिते च मनसः" इति मनसः अकारलोपः, "संयोगान्तस्य लोपः" इति सकारलोपश्च ॥३१॥

বাঙ্গালা—সমস্ত বিষয়ে নিপুণ সেই কুমারেরা বেদাঙ্গশাস্ত্র এবং অন্যান্য দর্শনশাস্ত্রও অধ্যয়ন করিয়াছিলেন। কারণ, স্বতন্ত্রলোকেরা তীক্ষ্ণবুদ্ধি পাইয়া অভীষ্ট অধ্যয়ন হইতে বিরত হন না ॥৩১॥

अन्वयः—एते गुरुतः चिरोपकारे विहितप्रयत्नां स्वातिक्रमात् ऐहिकहानिहेतुं अग्रजातां स्वसारमिव नीतिविद्यां अनुप्रयाताः ॥३२॥

चिरोपकार इति । एते कुमाराः, गुरुतः अध्यापकात् चिरन्तनस्य, चिरोपकारे, विहितप्रयत्नाम्, स्वस्या नीतिविद्यायाः स्वमुस्य अतिक्रमात् लङ्घनात्, ऐहिक्या हानेः गर्भपातादेः हेतुं कारणीभूताम्, अग्रजातां प्रागुत्पन्नां ज्येष्ठामिति यावत्, स्वसारं भगिनीमिव, नीतिविद्याम्, अनुप्रयाताः परमवगता अधीतवन्त इत्यर्थः अनुगताश्च ।

अत्र आर्थस्त्रैषानुप्राणिता श्रौती पूर्णोपमालङ्कारः ॥३२॥

বাঙ্গালা—যে চিরকালের উপকারে যত্ন করিয়া থাকে এবং যাহাকে লঙ্ঘন করিলে ইহলোকে কোন না কোন ক্ষতি হয়, পিতা হইতে প্রথম উৎপন্না (জ্যেষ্ঠা) ভগিনীর ন্যায় সেই নীতিবিদ্যা, তাঁহারা অধ্যাপকের নিকট অধ্যয়ন করিয়াছিলেন ॥৩২॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

विधौ रणानां सुविधाविधायी
प्रवीणवीरोऽप्यपरः परघ्नः ।
कालेऽनुकूले किल तान् समेतान्
शिक्षां धनुर्वेदगतामदिक्षत् ॥३३॥
तेषामथो धीरधुरन्धराणां
नवं नवं शीलयताञ्च नित्यम् ।
योद्धा च कश्चित् कृतपूर्वयुद्ध-
शिक्षापरीक्षामकरोत् सुदक्षः ३४॥

अन्वयः—रणानां विधौ सुविधाविधायी परघ्नः अपरः प्रवीणवीरः अपि अनुकूले काले किल समेतान् तान् धनुर्वेदगतां शिक्षां अदिक्षत् ॥३३॥

विधाविति। रणानां विधौ युद्धकार्य्ये, सुविधां सुष्ठु प्रकारं विदधातीति सुविधाविधायी सुकौशलशिक्षक इत्यर्थः, परान् शत्रून् हन्तीति परघ्नः, अपरः, प्रवीणवीरोऽपि, सर्वयुद्धाभिज्ञः कोऽपि शूरश्च, अनुकूले व्यायामानुगुणे काले किल, समेतान् समागतान्, तान् कुमारान् धनुर्वेदगतां शिक्षाम्, अदिक्षत् उपदिष्टवान् अवोचदिति यावत् ।

अत्र वृत्त्यनुप्रासच्छेकानुप्रासयोः संसृष्टिः ।

"विधा प्रकारे च" इति "प्रवीणे निपुणाभिज्ञ-विज्ञ-निष्णात-शिक्षिताः" इति चामरः ।

अत्र दिशधातोर्वदत्यर्थतया द्विकर्म्मकत्वात् कर्म्मद्वयम् ॥३३॥

वाङ्गाला—युद्धकार्य्ये सुकौশলশিক্ষক, শত্রুহন্তা ও প্রবীণ অপর কোনও বীর যথাসময়ে উপস্থিত সেই কুমারগণকে ধনুর্ব্বেদ শিক্ষা করাইতেন ॥৩৩॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

शस्त्रेषु शास्त्रेषु गुरूपदिष्टं
रागं किलाङ्गेषु च दासदत्तम् ।
स्नानाह्निकापूर्त्तिभृतो दधाना
वेलामतीयुश्चतुराश्चतुर्थीम् ३५॥

अन्वयः—अथो सुदक्षः कश्चित् योद्धा च धीरधुरन्धराणां नित्यं नवं नवं शीलयताञ्च तेषां कृतपूर्व्वं युद्धशिक्षापरीक्षां अकरोत् ॥३४॥

तेषामिति । अथो धनुर्वेदशिक्षानन्तरम्, सुदक्षः कश्चित् योद्धा च, धीरधुरन्धराणां बुद्धिमत्प्रधानानाम्, नित्यं प्रत्यहम्, युद्धविषये नवं नवं प्रकारम्, शीलयताम् अभ्यस्यताञ्च, तेषां कुमाराणां कृतपूर्व्वा या युद्धशिक्षा तस्याः परीक्षाम् अकरोत् ।

अत्र वृत्त्यनुप्रासोऽलङ्कारः ॥३४॥

বাঙ্গালা—ধনুর্ব্বেদশিক্ষার পরে তীক্ষ্ণবুদ্ধিগণের অগ্রগণ্য সেই কুমারেরা যুদ্ধসম্বন্ধে প্রতিদিন নূতন নূতন প্রকার অভ্যাস করিতে লাগিলেন, সেই সময়ে কোন সুদক্ষ যোদ্ধা তাঁহাদের পূর্ব্বকৃত যুদ্ধশিক্ষার পরীক্ষা করিলেন ॥৩৪॥

अन्वयः—चतुराः शस्त्रेषु शास्त्रेषु च गुरूपदिष्टं अङ्गेषु च दासदत्तं रागं दधानाः स्नानाह्निकापूर्त्तिभृतः (च सन्तः) चतुर्थीं वेलां अतीयुः किल ॥३५॥

शस्त्रेष्विति । चतुराः सर्वविषये निपुणाः कुमाराः, शस्त्रेषु शास्त्रेषु च, गुरूपदिष्टं गुरूपदेशप्रयुक्तम्, अङ्गेषु गात्रेषु च, दासदत्तं भृत्यार्पितम्, रागम् अनुरागं तैलहरिद्रादिरञ्जनद्रव्यञ्च, दधानाः धारयन्तः, स्नानाह्निकयोः आपूर्त्तिं समाप्तिं बिभ्रतीति स्नानाह्निकापूर्त्तिभृतश्च सन्तः, चतुर्थीं वेलां दिवसस्य चतुर्थं भागम्, अतीयुः अतिक्रान्तवन्तः ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

কচেষু কশ্চিৎ পরিচর্য্যমাণঃ
২ সংবাহ্যমানশ্চরণেঽপরশ্চ ।
অন্যঃ সমন্তাদপি বীজ্যমানঃ
তৃপ্তো বিশশ্রাম গতাশনায়ঃ ॥৩৬॥

অত্রানুরাগরঞ্জনদ্রব্যয়োরুভয়োরেব প্রস্তুতত্বাৎ অভিধয়া চ তয়ো রাগপদেনোক্তত্বাৎ শব্দশক্তিমূলোঽলঙ্কারশ্ছেকানুপ্রাসেন সংসৃজ্যতে ।

"রাগোঽনুরক্তৌ মাৎসর্য্যে ক্লেশাদৌ লোহিতাদিষু । গান্ধারাদৌ নৃপে রাগঃ" ইতি বিশ্বঃ ॥৩৫॥

বাঙ্গালা—সর্ব্বকার্য্যে নিপুণ কুমারেরা গুরূপদেশনিবন্ধন শস্ত্রবিদ্যা ও শাস্ত্রবিদ্যায় সর্ব্বদা অনুরক্ত থাকিয়া এবং গাত্রে ভৃত্যদত্ত রঞ্জনদ্রব্য ধারণ করিয়া স্নান ও মাধ্যাহ্নিক ক্রিয়া সমাপনে চতুর্থবেলা অতিক্রম করিতেন ॥৩৫॥

অন্বয়ঃ—গতাশনায়ঃ তৃপ্তঃ (চ) কশ্চিৎ কচেষু পরিচর্য্যমাণঃ অপরশ্চ চরণে সংবাহ্যমানঃ অন্যঃ অপি সমন্তাৎ বীজ্যমানঃ (সন্) বিশশ্রাম ॥৩৬॥

কচেষ্বিতি । গতা ভোজনেনাতীতা অশনায়া বুভুক্ষা যস্য স গতাশনায়ঃ, তৃপ্তঃ পেয়পানেন লব্ধতৃপ্তিশ্চ । ইদং বিশেষণদ্বয়ং সর্ব্বত্র যোজনীয়ম্ । কশ্চিৎ কুমারঃ, কচেষু কেশেষু, পরিচর্য্যমাণঃ কেনচিদ্ভৃত্যেন বিলোড়নাদিনা শুশ্রূষ্যমাণঃ সন্, অপরশ্চ কুমারঃ, চরণে ভৃত্যেন সংবাহ্যমানঃ সন্, অন্যোঽপি চ কুমারঃ, সমন্তাৎ সর্ব্বতঃ চামরাদিনা বীজ্যমানঃ সন্, বিশশ্রাম বিশ্রামং চকার ।

অত্র বিশশ্রাম ইত্যেকয়া ক্রিয়যা বহূনাং কর্ত্তৃতয়াভিসম্বন্ধাত্তুল্যযোগিতালঙ্কারঃ ।

"অশনায়োদন্যধনায়া বুভুক্ষাপিপাসাকাঙ্ক্ষাসু নিপাতা রূঢ়াঃ" ইত্যশনায়েতি নিপাতঃ ॥৩৬॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

আকর্ষয়ন্তঃ প্রতি ষষ্ঠবেলাং
কিঞ্চিৎ পুরাণং কিয়তীং কলাঞ্চ।
বিনোদ্যমানাঃ কথকৈঃ কথাভিঃ
মহান্তমানন্দমবাপ্নুবন্তঃ ॥৩৭॥

বাঙ্গালা—কোন কুমার পান ও ভোজন সমাপ্ত করিয়া বিশ্রাম করিতে লাগিলে, তখন কোন ভৃত্য আসিয়া তাঁহার কেশ বিলোড়ন করিত। অপর কুমার পান ও ভোজন সমাপ্তির পরে বিশ্রাম করিতে লাগিলে, কোন ভৃত্য আসিয়া তাঁহার পাদসংবাহন করিত এবং অন্য কুমার পান ও ভোজন সমাপ্তির পরে বিশ্রাম করিতে প্রবৃত্ত হইলে, ভৃত্যেরা আসিয়া তাঁহার সকল দিকে থাকিয়া বায়ু সঞ্চালন করিত ॥৩৬॥

অন্বয়ঃ—ষষ্ঠবেলাং প্রতি কিঞ্চিৎ পুরাণং কিয়তীং কলাঞ্চ আকর্ষয়ন্তঃ কথকৈঃ কথাভিঃ বিনোদ্যমানাঃ (চ) মহান্তং আনন্দং অবাপ্নুবন্তঃ ৩৭॥

আকর্ষয়ন্ত ইতি। ষষ্ঠবেলাং প্রতি দিবসস্য ষষ্ঠে ভাগে, কিঞ্চিৎ পুরাণম্, কিয়তীং কলাং নর্ত্তক্যাদীনাং নৃত্যং গানঞ্চ আকর্ষয়ন্তঃ দিনভেদেন শৃণ্বন্তঃ, কথকৈঃ ইতিহাসপুরাণব্যাখ্যাতৃভিঃ কথাভিঃ তত্তদ্ব্যাখ্যাভিঃ বিনোদ্যমানাঃ সন্তোষ্যমাণাশ্চ সন্তঃ, মহান্তমানন্দম্, অবাপ্নুবন্তো লব্ধবন্তঃ, তে কুমারা ইতি শেষঃ। "ইতিহাসপুরাণাভ্যাং ষষ্ঠঞ্চ সপ্তমং নয়েৎ" ইতি দক্ষস্মৃতিরত্র মূলম্।

অলঙ্কারঃ ছেকানুপ্রাসোঽলঙ্কারঃ ॥৩৭॥

বাঙ্গালা—রাজকুমারেরা দিনের ষষ্ঠভাগে কোন পুরাণ কিংবা কোন সঙ্গীত শ্রবণ করিতে থাকিয়া, অথবা কথকগণের কথকতায় তৃপ্তিলাভ করতঃ বিশেষ আনন্দ অনুভব করিতেন ॥৩৭॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

आकर्ण्य ते भागवतं पुराणं
स्वयञ्च ते ते जनकः स एव ।
सा च प्रसूतिर्भगिनी च सैव
नामानि तान्येव तथा निजानि ॥३८॥
तामम्बिकाया भवने प्रयान्तीं
जहार यामिं यदुनन्दनः सः ।
विज्ञाय तस्मिन्नितिहासमित्थं
ततः प्रभृत्येव विदिद्विषुस्तम् ॥३९॥ (युग्मकम्)

अन्वयः—ते भागवतं पुराणं आकर्ण्य स्वयञ्च ते ते, जनकः सः एव, प्रसूतिश्च सा, भगिनी च सैव, तथा निजानि नामानि तान्येव, सः यदुनन्दनः अम्बिकाया भवने प्रयान्तीं यामिं जहार तस्मिन् इत्थं इतिहासं विज्ञाय ततः प्रभृत्येव तं विदिद्विषुः ॥३८—३९॥

कुमाराणां शिक्षाविशिष्टिया क्रमप्राप्तां मनोऽवस्थामाह युग्मकेन आकर्ण्येति । ते कुमाराः, शुकप्रोक्तं भागवतं पुराणम् आकर्ण्य, स्वयं स्वे रुक्मिप्रभृतयश्च, ते ते भागवतोक्तरुक्मिप्रभृतय एव, जनकः पिता भीष्मकोऽपि, स भागवतोक्त एव, प्रसूतिर्माता च, सा भागवतोक्तैव, भगिनी रुक्मिणी च सा भागवतोक्तैव, निजानि नामानि तानि भागवतोक्तान्येव, स यदुनन्दनः कृष्णः, अम्बिकाया भवने प्रयान्तीं तद्वन्दनार्थं गच्छन्तीम्, यामिं भगिनीं रुक्मिणीं जहार, तस्मिन् शुकप्रोक्ते भागवते इत्थम् इतिहासं विज्ञाय, ततः प्रभृत्येव, तं यदुनन्दनं कृष्णं विदिद्विषुः । अतएव रुक्मिप्रभृतयः कृष्णमपहाय शिशुपालाय रुक्मिणीं दातुमैच्छन्निति भावः ।

"यामिः स्वसृकुलस्त्रियोः" इत्यमरः ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

ननु वृत्तान्तजन्मनः परमेव तद्ग्रन्थोत्पत्तेरवश्यम्भावात् अत्र भागवतपात्रीभूतानामेव रुक्मिप्रभृतीनां कथं भागवतश्रवणम्? न च तदानीमेव द्वैपायनेन निर्म्मितमाणस्य भागवतस्य श्रवणमुपपद्यत इति वाच्यम्, भाविरुक्मिणीहरणादीनां तन्निर्म्माणासम्भवात्। इति चेत् सत्यम्; "इतिहासपुराणाभ्यां षष्ठञ्च सप्तमं नयेत्" इति ब्रह्मणः पुत्रेण दक्षेण स्वसंहितायां पुराणोल्लेखात् "इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्। बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरिष्यति॥" इति ब्रह्मणः पुत्रेणैव कृष्णद्वैपायनप्रपितामहेन वशिष्ठेनापि स्वसंहितायां पुराणपदाभिधानात् पुराणानां पूर्वकल्पीयत्वमकामेनाप्यवश्यमङ्गीकार्य्यम्। शुकप्रोक्तं भागवतञ्च "ब्राह्मं पाद्मं वैष्णवञ्च शैवं भागवतं तथा" इत्यादिना पुराणतया परिगणितम्। अतएव हि नैषधचरिते श्रीहर्षेण— "पदैश्चतुर्भिः सुकृते स्थिरीकृते कृतेऽमुना के न तपः प्रपेदिरे" इत्यनेन प्रथमसर्गे नलस्य सत्ययुगीयत्वमभिधाय तृतीयसर्गे हंसमुखेन नलसमानकालीनदमयन्त्यन्तिके "वृद्धौ न दक्षः खलु शिशुबुद्धौ" इति कलियुगीयस्य बुद्धस्याभिधानं कृतम्। तथा तन्नवमसर्गे च नलमुखेनैव "हनूमदाद्यैर्यशसा मया पुनर्द्विषां हसैर्दूतपथः सितीकृतः" इति त्रेतायुगीयस्य हनूमत उदाहरणं प्रदर्शितम्। पूर्वकल्पीयपुराणेषु हंसेन दमयन्त्या च बुद्धस्यावगमात् नलेन च हनूमच्चरित्रप्राप्तेः सङ्गच्छते च तत्। इत्यञ्च भीष्मकपुत्राणां भागवतश्रवणमुपपद्यते कल्पान्तरजातस्य तस्य तदानीं सत्त्वात्। एवमन्यत्रापि ज्ञेयम्॥३८—३९॥

বাঙ্গালা—কুমারগণ ভাগবতপুরাণ শ্রবণ করিয়া জানিয়াছিলেন যে 'নিজেরাও সেই রুক্মিপ্রভৃতি, পিতাও সেই ভীষ্মক, মাতাও তিনি, ভগিনীও সেই রুক্মিণী, নিজেদের নামগুলিও তাহাই এবং ভগিনী রুক্মিণী অম্বিকার গৃহে যাইতেছিলেন, সেই সময়ে কৃষ্ণ তাহাকে হরণ করিয়াছিলেন'

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

দিনান্তবেলামুপলভ্য সভ্যা
মারোপমানা অপি তে কুমারাঃ।
স্বভাবমিত্রৈঃ সহ রাজপুত্রৈঃ
বিহিত্রিমং সংবিদধুঃ সমীকম্ ॥৪০॥

শ্রীমদ্ভাগবতে এইরূপ ইতিহাস জানিয়া তদবধিই কুমারেরা কৃষ্ণের প্রতি বিদ্বেষ করিতে আরম্ভ করিয়াছিলেন ॥৩৮—৩৯॥

অন্বয়ঃ—সভ্যাঃ মারোপমানা অপি তে কুমারাঃ দিনান্তবেলাং উপলভ্য স্বভাবমিত্রৈঃ রাজপুত্রৈঃ সহ বিহিত্রিমং সমীকং সংবিদধুঃ ॥৪০॥

দিনান্তেতি। সভ্যাঃ সজ্জনাঃ, মারঃ কামদেব উপমানং সৌন্দর্য্যে উপমাস্থলং যেষাং তে তাদৃশা অপি, তে কুৎসিতো মারঃ কামদেবো যেভ্যস্তে কুমারা ইতি বিরোধঃ, কুমারা রাজপুত্রা ইতি তৎসমাধানম্, দিনান্তবেলাং দিবসস্য শেষভাগম্, উপলভ্য প্রাপ্য, স্বভাবেনৈব মিত্রৈঃ ন তু ধনদানাদিনা মিত্রৈরিতি স্বভাবমিত্রৈঃ অন্যৈঃ রাজপুত্রৈঃ সহ বিধানেন নির্বৃত্তং বিহিত্রিমং কৃত্রিমম্, সমীকং যুদ্ধম্, সংবিদধুস্তক্রুঃ।

অত্র দ্বিতীয়পাদে আর্থোপমাবিরোধাভাসয়োরেকাশ্রয়ানুপ্রবেশরূপঃ সঙ্করঃ, সোঽপি পুনশ্ছেকানুপ্রাসেন সংসৃজ্যতে।

"মহাকুলকুলীনার্য্যসভ্যসজ্জনসাধবঃ" ইতি "সমীকং সাম্পরায়িকম্" ইতি চ যুদ্ধপর্য্যায়ে অমরঃ।

বিহিত্রিমমিতি "ড্বনুবন্ধাৎক্ত্রিমক্ তেন নির্বৃত্তঃ" ইতি বিপূর্বধাধাতোস্ত্রিমক্ ॥৪০॥

বাঙ্গালা—সৎস্বভাব ও কামদেবের ন্যায় রূপবান্ সেই কুমারগণ দিবসের শেষভাগে স্বভাবমিত্র অন্যান্য রাজপুত্রগণের সহিত মিলিত হইয়া কৃত্রিম যুদ্ধ করিতেন ॥৪০॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

उदीर्णवाद्यस्वनपूर्णकर्णं
प्रत्येकतालप्रतिपादपातम् ।
सज्जा निरीयुर्नृपजा जनौघै:
आरादगाराद्रणभूविभागम् ॥४१॥
कृतात्मनां श्रेणिकृता भटानां
पताकिनी साऽभ्यपतत् पुरीत: ।
तरङ्गमालेव तरङ्गवल्या:
तरङ्गिता तीव्रसमीरणेन ॥४२॥

अन्वय:—नृपजा: सज्जा: (सन्त:) जनौघै: (सह) अगारात् आरात् उदीर्ण-वाद्यस्वनपूर्णकर्णं प्रत्येकतालप्रतिपादपातं रणभूविभागं निरीयु: ॥४१॥

उदीर्णेति । नृपजा राजकुमारा:, सज्जा: सन्नद्धा: सन्त:, जनानामोघै: समूहै: सह, अगारात् राजभवनात्, आरात् किञ्चिद्दूरे, उदीर्णा आविर्भूता ये वाद्यानां स्वना ध्वनयस्तै: पूर्णौ कर्णौ यस्मिन् कर्म्मणि तद्‌यथा तथा, वाद्यस्वनानां प्रत्येकतालेषु प्रतिपादपाता: प्रत्येकचरणविन्यासा यस्मिन् कर्म्मणि तद्‌यथा तथा च रणभुवो विभागं प्रदेशविशेषम्, निरीयु: निजग्मु: ।

अत्र वृत्त्यनुप्रासच्छेकानुप्रासयो: संसृष्टि: ।

“आराद्दूरसमीपयो:” इत्यमर: ॥४१॥

বাঙ্গালা—সেই রাজপুত্রেরা যুদ্ধসজ্জায় সজ্জিত হইয়া পুরবাসি-দর্শনার্থী লোকসমূহের সহিত রাজভবন হইতে কিয়দ্দূরবর্ত্তী সমরভূমিতে নির্গত হইতেন। তৎকালে আবির্ভূত রণবাদ্যধ্বনিতে লোকের কর্ণ পূর্ণ হইয়া যাইত এবং কুমারেরা সেই বাদ্যধ্বনির তালে তালে প্রত্যেক পদক্ষেপ করিতেন ॥৪১॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

उरश्छदच्छन्नवपूंषि पुंसां
क्षणं जनस्ताम्रविभां दधन्ति।
अस्तोन्मुखाताम्रदिवाकरस्य
करस्य मध्ये न च निश्चिकाय ॥४३॥

अन्वयः—कृतात्मनां भटानां श्रेणिकृता सा पताकिनी तीव्रसमीरणेन तरङ्गिता तरङ्गवत्याः तरङ्गमाला इव पुरीतः अभ्यपतत् ॥४२॥

कृतेति। कृत आत्मा युद्धशिक्षायां यत्नो यैस्तेषां कृतात्मनाम्, भटानां योद्धृणाम्, श्रेणिकृता सा पताकिनी सेना, तीव्रसमीरणेन प्रबलवायुना, तरङ्गिता चञ्चलीकृता, तरङ्गवत्या नद्याः, तरङ्गमालेव, पुरीतः राजधानीतः, अभ्यपतत् रणाङ्गनाभिमुखमगच्छत्।

अत्र श्रौतोपमालङ्कारश्छेकानुप्रासलाटानुप्रासाभ्यां संसृज्यते।

"आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म च" इति "भटा योधाश्च योद्धारः" इति चामरः ॥४२॥

বাঙ্গালা—যত্নসহকারে যুদ্ধশিক্ষায় শিক্ষিত যোদ্ধগণের শ্রেণীবদ্ধ সেই বাহিনীটী প্রবলবায়ু সঞ্চালিত নদীর তরঙ্গশ্রেণীর ন্যায় রাজধানী হইতে রণস্থলের অভিমুখে গমন করিত ॥৪২॥

अन्वयः—जनः अस्तोन्मुखाताम्रदिवाकरस्य करस्य मध्ये ताम्रविभां दधन्ति पुंसां उरश्छदच्छन्नवपूंषि क्षणं न च निश्चिकाय ॥४३॥

उरश्छदेति। जनः, अस्तोन्मुखः अस्ताचलगमनप्रवृत्तः अतएव आताम्रः सम्यक्ताम्रवर्णो यो दिवाकरः सूर्य्यस्तस्य, करस्य किरणस्य मध्ये, ताम्रविभां ताम्रनिर्म्मितकवचधारणात ताम्रद्युतिम्, दधन्ति दधानानि, पुंसां योद्धृपुरुषाणाम्, उरश्छदैः कवचैः छन्नानि आवृतानि च तानि वपूंषि शरीराणि चेति तानि, क्षणं प्रथमदर्शनसमये, न च

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

ततः परं यां पृतना ततान
श्रेणिद्वयीं स्वाभिमुखीमखिन्ना।
बभौ तदा सा रणभूनिशाटी-
दन्तीयपङ्‌क्तिद्वितयीसमाना ॥४४॥

नैव निश्चिकाय पुंशरीरतया नैव निश्चेतुं शशाक, ताम्रसूर्य्यकर-पुंशरीरयोरुभयोरेव समानताम्रवर्णत्वात् परन्तु करचरणादिचेष्टादर्शनेन निश्चिकायेवेति भावः।

अत्र ताम्रसूर्य्यकरमध्ये ताम्रवपुषां गोपनान्मीलितं नामालङ्कारः, निश्चयाभावं प्रति तत्तत्पदार्थानां हेतुत्वात् पदार्थहेतुकं काव्य-लिङ्गञ्चेत्युभयोरङ्गाङ्गिभावेन सङ्करः, सोऽपि पुनर्वृत्त्यनुप्रासच्छेकानु-प्रासाभ्यां संसृज्यते। संसृष्टिसङ्करयोरपि पुनः संसृष्टिसङ्करौ सम्भवत इत्येतत्कविकृतसाहित्यदर्पणटीकायां द्रष्टव्यम्।

उरश्छाद्यते अनेनेति उरश्छदः। "उरश्छदः कङ्कटको जगरः कवचो-ऽस्त्रियाम्" इत्यमरः। "पुंसि संज्ञायां घः" इति घप्रत्यये "दीर्घस्योप-पदस्ये"त्यादिना ह्रस्वः ॥४३॥

বাঙ্গালা—অস্তাচলগামী সম্যক্ তাম্রবর্ণ সূর্য্যের কিরণের মধ্যে তাম্রনির্ম্মিত কবচে আবৃত তাম্রবর্ণ যোদ্ধাদের শরীরগুলি দেখিয়া তত্রত্য লোকেরা প্রথমে ক্ষণকাল পুরুষের শরীর বলিয়া নিশ্চয় করিতে পারিত না ॥৪৩॥

अन्वयः—ततः परं, अखिन्ना पृतना स्वाभिमुखीं यां श्रेणिद्वयीं ततान, सा तदा रणभूनिशाटी-दन्तीयपङ्‌क्तिद्वितयीसमाना बभौ ॥४४॥

तत इति। ततः परम्, अखिन्ना सोत्साहा, पृतना सा सेना, स्वयोरभिमुखीं स्वाभिमुखीम्, यां श्रेणिद्वयीं ततान विस्तारेण चकार,

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

वीरोत्तमैर्वैरिषु कृत्रिमेषु
प्राहारि नास्त्रं समदर्शि मात्रम् ।
विलोक्य लोकास्तत एव बिभ्युः
स्वभावसिद्धं हि भयं मृदूनाम् ॥४५॥

सा श्रेणिद्वयी, तदा, रणभूः समरभूमिः निशाटी राक्षसीवेति रणभू-निशाटी तस्या या दन्तीयपङ्क्तिद्वितयी दन्तपङ्क्तिद्वयं तत्समाना सती बभौ रराज ।

अत्र रणेत्यादौ लुप्तोपमार्थोपमयोरेकाश्रयानुप्रवेशरूपः सङ्करः वृत्त्यनुप्रासच्छेकानुप्रासश्चेत्येतेषां संसृष्टिः ।

निशायामटतीति निशाटी निशोपपदादटतेरचि नदादित्वादीप्रत्ययः ॥४४॥

বাঙ্গালা—তাহার পর উৎসাহসম্পন্না সেই সেনা আপন আপন অভিমুখে যে দুইটী শ্রেণী করিত, তাহা তখন রাক্ষসীতুল্য সেই সমরভূমির দুইটা দন্তশ্রেণীর ন্যায় প্রকাশ পাইত ॥৪৪॥

अन्वयः—वीरोत्तमैः कृत्रिमेषु वैरिषु अस्त्रं न प्राहारि मात्रं समदर्शि । लोकाः विलोक्य तत एव बिभ्युः । हि मृदूनां भयं स्वभावसिद्धं ॥४५॥

वीरोत्तमैरिति । वीरोत्तमैः, कृत्रिमेषु अयथार्थेषु, वैरिषु शत्रुषु, अस्त्रम्, न प्राहारि न प्रयुक्तम्, किन्तु मात्रं केवलं समदर्शि तदस्त्रं प्रदर्शितम् । लोकाः तत्रत्या द्रष्टारो जनाः, विलोक्य, तत एव अस्त्रप्रदर्शनादेव, बिभ्युः भीता बभूवुः । हि तथाहि, मृदूनां दुर्बलतया कोमलानां जनानाम्, अकिञ्चित्करेऽपि भयकारणे भयं स्वभावसिद्धम् ।

अत्र सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारश्छेकानुप्रासेन संसृज्यते ॥४५॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

প্লুতস্বরেণোর্দ্ধবিকস্বরেণ
কশ্চিৎ সমাহূয় বিধায় বাহম্।
স্ববাহুযুদ্ধচ্ছলমাপতন্তং
কশ্চিন্নরেন্দ্রাঙ্গজমালিলিঙ্গ ॥৪৬॥
অন্তং সমেত্য প্রহরন্তমুচ্চৈঃ
নিবার্য্য মল্লস্য নিবস্যন্ কশ্চিৎ।
দ্বিপেন্দ্রপৃষ্ঠাদবতীর্য্য তির্য্যক্
হস্তেন দধ্রে কচহস্তমস্য ॥৪৭॥

বাঙ্গালা—শ্রেষ্ঠ বীরগণ কৃত্রিম শত্রুগণের উপরে অস্ত্র প্রয়োগ করিতেন না, কেবল দেখাইতেন। তত্রত্য লোকেরা দেখিয়া তাহাতেই ভয় পাইত। কারণ, দুর্ব্বল লোকদিগের ভয়টা স্বভাবসিদ্ধ ॥৪৫॥

অন্বয়ঃ—কশ্চিৎ বাহং বিহায় ঊর্দ্ধবিকস্বরেণ প্লুতস্বরেণ স্ববাহুযুদ্ধচ্ছলং সমাহূয় আপতন্তং কশ্চিৎ নরেন্দ্রাঙ্গজং আলিলিঙ্গ ॥৪৬॥

প্লুতেতি। কশ্চিৎ অশ্বারোহী যোদ্ধা, বাহম্ অশ্বম্, বিহায় অবতরণেন পরিত্যজ্য, ঊর্দ্ধং বিকসতি প্রকাশতে ইতি ঊর্দ্ধবিকস্বরস্তেন প্লুতস্বরেণ উচ্চকণ্ঠধ্বনিবিশেষেণ, স্বস্য বাহুযুদ্ধমেব চ্ছলং যস্মিন্ কর্ম্মণি তদ্‌যথা তথা সমাহূয়, আপতন্তম্ আগচ্ছন্তম্, কশ্চিৎ নরেন্দ্রাঙ্গজং রাজপুত্রম্ আলিলিঙ্গ।

অত্র চ্ছেকানুপ্রাসোঽলঙ্কারঃ ॥৪৬॥

বাঙ্গালা—কোন অশ্বারোহী অশ্ব পরিত্যাগ করিয়া (অশ্ব হইতে নামিয়া) ঊর্দ্ধগামী উচ্চস্বরে আপন বাহুযুদ্ধচ্ছলে আহ্বান করিয়া আগমন-প্রবৃত্ত কোন রাজপুত্রকে আলিঙ্গন করিত ॥৪৬॥

৬

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

রণোত্তমাধোরণদৃশ্যমান-
হস্তীন্দ্রহস্তাৎ সহসা নিরিত্য।
তং তৎক্ষণাদ্বক্ষসি মুষ্টিপীড়ং
স্বদন্তিতুন্দস্য তলে বিবিশ্বান্ ॥৪৮॥

অন্বয়:—কশ্চিৎ অন্তং সমেত্য উচ্চৈঃ প্রহরন্তং নিবার্য্য অস্ত্রঞ্চ নিবৃশ্চ্য দ্বিপেন্দ্র-পৃষ্ঠাৎ তির্য্যক্ অবতীর্য্য হস্তেন অস্য কচহস্তং দধ্রে ॥৪৭॥

অন্তমিতি। কশ্চিদ্গজারোহী, অন্তং সমীপম্, সমেত্য আগত্য, উচ্চৈঃ ঊর্দ্ধদিশি, প্রহরন্তম্ অন্যং যোদ্ধারম্, নিবার্য্য প্রতিহারেণ নিবর্ত্ত্য, তদীয়ং অস্ত্রঞ্চ, নিবৃশ্চ্য ছিত্বা, দ্বিপেন্দ্রস্য মহাগজস্য পৃষ্ঠাৎ তির্য্যক্ অবতীর্য্য, হস্তেন করেণ, অস্য প্রহরতো যোদ্ধুঃ কচহস্তং কেশপাশং দধ্রে ধৃতবান্। মহানিপুণোঽয়ং গজারোহীতি ভাবঃ।

অত্র ছেকানুপ্রাসোঽলঙ্কারঃ।

"অন্তঃ স্বরূপে নাশেনা ন স্ত্রী শেষেঽন্তিকে ত্রিষু" ইতি মেদিনী।
"পাশঃ পক্ষশ্চ হস্তশ্চ কলাপার্থাঃ কচাৎ পরে" ইত্যমরঃ।

নিবৃশ্চ্যেতি "ব্রশ্চু ছেদনে" ইতি ব্রশ্চধাতোঃ ক্ত্বো যদি রূপম্ ॥৪৭॥

বাঙ্গালা—কোন যোদ্ধা নিকটে আসিয়া উপরের দিকে অস্ত্র প্রহার করিতে উদ্যত হইলে, কোন গজারোহী যোদ্ধা প্রতিপ্রহারে তাহাকে নিবারণ ও তাহার অস্ত্রচ্ছেদন করিয়া পার্শ্বদেশ দিয়া হস্তিপৃষ্ঠ হইতে নামিয়া হস্তদ্বারা সেই প্রহারকারীর কেশপাশ ধারণ করিত ॥৪৭॥

অন্বয়:—কশ্চিৎ রণোত্তমাধোরণদৃশ্যমানহস্তীন্দ্রহস্তাৎ সহসা নিরিত্য তৎক্ষণাৎ বক্ষসি তং মুষ্টিপীড়ং স্বদন্তিতুন্দস্য তলে বিবিশ্বান্ ॥৪৮॥

রণেতি। অত্র কশ্চিদিত্যনুবর্ত্ততে। কশ্চিদ্গজারোহী, রণে উত্তমো নিপুণঃ য আধোরণো হস্তিপকঃ তেন দৃশ্যমানস্য হস্তীন্দ্রস্য হস্তাৎ

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

तुङ्गैस्तुरङ्गैश्छलयुद्धरङ्गे
माद्यद्भिरर्द्धार्द्धपुलायिताद्यैः ।
सुखद्भिरप्यस्य रणस्य लक्ष्मीं
लक्ष्मीसगर्भैर्नियतं बुभूवे ॥४९॥

वेष्टनकारिण्याः शुण्डायाः, सहसा निरित्य निर्गत्य, तत्क्षणात्, वक्षसि, तमाधोरणम्, मुष्टिना पीड़यित्वेति मुष्टिपीड़ं स्वदन्तितुन्दस्य निजगजोदरस्य, तले अधोदेशे विविश्वान् यन्त्रचालनेन प्रविवेश ।

अत्र छेकानुप्रासोऽलङ्कारः ।

"आधोरणा हस्तिपकाः" इत्यमरः ।

मुष्टिना पीड़यित्वेति मुष्टिपीड़ं "उपपीड़रुधकर्षश्च" इति पीड़यतेर्णम् । विविश्वानिति विशधातोः क्वनुसुप्रत्यये रूपम् ॥४८॥

বাঙ্গালা—যুদ্ধনিপুণ কোনও হস্তিপক (মাহুত) দেখাইয়া দিলে কোন বিশাল হস্তী শুণ্ডদ্বারা অপর কোন হস্ত্যারোহীকে বেষ্টন করিয়া ধরিত, তখন সেই হস্ত্যারোহী হঠাৎ সেই শুণ্ডবেষ্টন হইতে নির্গত হইয়া তৎক্ষণাৎ সেই হস্তিপকের বক্ষদেশে মুষ্টিপ্রহার করিয়া যন্ত্রসঞ্চালনপূর্ব্বক আপন হস্তীর উদরের নীচে যাইয়া প্রবেশ করিত ॥৪৮॥

अन्वयः—छलयुद्धरङ्गे माद्यद्भिः तुङ्गैः तुरङ्गैः अर्द्धार्द्धपुलायिताद्यैः अस्य रणस्य लक्ष्मीं सुखद्भिरपि नियतं लक्ष्मीसगर्भैः बुभूवे ॥४९॥

तुङ्गैरिति । छलयुद्धं कलिमसमर एव रङ्गः प्रमोदव्यापारविशेषस्तस्मिन्, माद्यद्भिः मत्तीभवद्भिः, तुङ्गैरुन्नतैः, तुरङ्गैः अश्वैः, अर्द्धार्द्धपुलायितम् अश्वशास्त्रोक्ताश्वगतिविशेषः, तदाद्यैस्तत्प्रभृतिगमनैः करणैः, अस्य रणस्य लक्ष्मीं शोभां सुखद्भिरपि जनयद्भिश्च सद्भिः, नियतं ध्रुवम्, लक्ष्म्याः क्षीरोदजायाः कमलायाः सगर्भैः उच्चैःश्रवोजातीयतया सहोदरैः, बुभूवे भूतम् ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

সুপারদৃশ্বাঽপ্যতিধাবতোঽশ্বাৎ
পতন্ নিষাদী ব্যথিতঃ স্বয়ঞ্চ ।
তদীক্ষিণা স্মিতকারিণোচ্চৈঃ
অরুন্তুদোদ্‌গর্জনতর্জিতশ্চ ॥৫০॥

অত্র বাচ্যা ভাবাভিমানিনী জাত্যুৎপ্রেক্ষালঙ্কারঃ বৃত্ত্যনুপ্রাসশ্চৈকানুপ্রাসশ্চেত্যেতেষাং সংসৃষ্টিঃ ।

"শোভাসম্পত্তিপদ্মাসু লক্ষ্মীঃ শ্রীরিব দৃশ্যতে" ইতি বিশ্বঃ ।

বভূব ইতি ভাবে প্রত্যয়াৎ "ভবতেরঃ" ইত্যভ্যাসে নাকারঃ ॥৪৯॥

বাঙ্গালা—বিশাল অশ্বগণ সেই কৃত্রিম যুদ্ধরঙ্গে মত্ত হইয়া অর্দ্ধ ও অর্দ্ধপুলায়িতপ্রভৃতি গতিদ্বারা সেই যুদ্ধের শোভা প্রকাশ করিতে থাকিয়া নিশ্চয়ই লক্ষ্মীদেবীর সহোদর হইয়াছিল (উচ্চৈঃশ্রবা অশ্বের সজাতীয় হইয়াছিল) ॥৪৯॥

অন্বয়ঃ—সুপারদৃশ্বাপি নিষাদী অতিধাবতঃ অশ্বাৎ পতন্ স্বয়ং ব্যথিতশ্চ, তদীক্ষিণা স্মিতকারিণা উচ্চৈঃ অরুন্তুদোদ্‌গর্জনতর্জিতশ্চ (অভূৎ) ॥৫০॥

সুপারেতি । সুষ্ঠু পারং দৃষ্টবানিতি সুপারদৃশ্বা অশ্বারোহণে বিশেষনিপুণোঽপীত্যর্থঃ, নিষাদী কশ্চিদারোহী, অতিধাবতঃ অতিবেগেন গচ্ছতঃ অশ্বাৎ, পতন্ সন্, স্বয়ং ব্যথিতশ্চ, তদীক্ষিণা তৎপতনদর্শিনা, স্মিতকারিণা স্মিতকৈণা, উচ্চৈর্যৎ অরুন্তুদং মর্ম্মবেদনাজনকম্ উদ্‌গর্জনং তেন তর্জিতো ভর্ৎসিতশ্চ অভূৎ ।

অত্র ব্যথনতর্জনয়োঃ ক্রিয়য়োর্যৌগপদ্যাৎ সমুচ্চয়োঽলঙ্কারশ্চৈকানুপ্রাসশ্চেতি সংসৃষ্টিঃ ।

সুপারদৃশ্বেতি "দৃশেঃ ক্বনিপ্ ।" অরুন্তুদেতি "বিধ্বরুস্তিলেষু তুদঃ" ইতি তুদতেঃ খশ্ ॥৫০॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

চক্রং ভটৌ ভ্রেমতুরুদ্ভটাঙ্ঘ্রী
উত্প্লুত্য নিপ্লুত্য গদাং দধানৌ।
চক্রং রজঃ স্বস্বকরে কিরন্তৌ
ভুজাভুজি প্রাংশুরবৌ ব্যধাতাম্ ॥৫১॥

বাঙ্গালা—কোন অশ্বারোহী অশ্বারোহণে বিশেষ নিপুণ হইয়াও অত্যন্তবেগে ধাবিত অশ্ব হইতে পতিত হইয়া নিজেও ব্যথা পাইল, আবার শিক্ষকমহাশয় তাহা দেখিয়া উচ্চস্বরে মর্ম্মবেদনাদায়ক ভৎর্সনাও করিলেন ॥৫০॥

অন্বয়ঃ—গদাং দধানৌ ভটৌ উদ্ভটাঙ্ঘ্রী (সন্তৌ) উত্প্লুত্য নিপ্লুত্য চক্রং ভ্রেমতুঃ, চক্রঞ্চ স্বস্বকরে রজঃ কিরন্তৌ প্রাংশুরবৌ (চ সন্তৌ) ভুজাভুজি ব্যধাতাং ॥৫১॥

চক্রমিতি। গদাং দধানৌ ধারয়ন্তৌ, ভটৌ দ্বৌ যোদ্ধারৌ, উদ্ভটৌ উদ্ধতৌ অঙ্ঘ্রী চরণৌ যয়োস্তৌ তাদৃশৌ সন্তৌ, উত্প্লুত্য উদ্গত্য, নিপ্লুত্য নিপত্য চ, চক্রম্, ভ্রেমতুঃ রঙ্গাঙ্গনে ভ্রমণং চক্রতুঃ, চক্রঞ্চ, স্বস্বকরে, রজো ধূলিম্, কিরন্তৌ গদাং বিহায় ঘর্ম্মপিচ্ছিলতানিবৃত্তয়ে বিক্ষিপন্তৌ, প্রাংশুরুচ্চো রবো গর্জনং যয়োস্তৌ তাদৃশৌ চ সন্তৌ, ভুজাভুজি পরস্পর-বাহুপ্রহারাত্মকযুদ্ধম্, ব্যধাতাং কৃতবন্তৌ।

অত্র স্বভাবোক্তিরলঙ্কারশ্ছেকানুপ্রাসেন সংসৃজ্যতে।

ভুজাভুজীতি ভুজেন চ ভুজেন চ প্রহৃত্য যুদ্ধং বৃত্তমিতি ভুজাভুজি "তৃতীয়ান্তং সপ্তম্যন্তঞ্চ" ইত্যাদিনা বহুব্রীহৌ নিপাতঃ; অব্যয়োঽয়মিতি কেচিত্ ॥৫১॥

বাঙ্গালা—গদাধারী দুইজন যোদ্ধা উল্লম্ফন প্রলম্ফনপূর্ব্বক উদ্ধত পাদক্ষেপে কিছুকাল ভ্রমণ করিল, পরে গদা পরিত্যাগপূর্ব্বক আপন

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

স্বস্বাভিমুখ্যশ্রিতবীরমুখ্যাঃ
অবিভ্রমন্নভ্রমবৃত্তয়োঽসীন্ ।
ততঃ প্রযাতেঽপ্যরুণে রণাব্ধৌ
সরোজপুষ্পাণি সিতান্যপুষ্যন্ ॥৫২॥

আপন হস্তে ধূলি নিক্ষেপ করিয়া এবং উচ্চস্বরে গর্জন করিতে থাকিয়া ভুজাভুজি (হাতাহাতি) যুদ্ধ করিতে লাগিল ॥৫১॥

অন্বয়ঃ—অভ্রমবৃত্তয়ঃ স্বস্বাভিমুখ্য-শ্রিত-বীর-মুখ্যাঃ অসীন্ অবিভ্রমন্ । ততঃ অরুণে প্রযাতেঽপি রণাব্ধৌ সিতানি সরোজপুষ্পাণি অপুষ্যন্ ॥৫২॥

স্বেতি । ন বিদ্যতে ভ্রমবৃত্তির্ভ্রান্তির্যেষাং তে অভ্রমবৃত্তয়ঃ, যুদ্ধকালে ভ্রমে সতি বিপদবশ্যম্ভাবিনীতি ভাবঃ । স্বস্বাভিমুখ্যং নিজনিজ-সাম্মুখ্যং শ্রিতা আশ্রিতাস্তে তে বীরমুখ্যা বীরশ্রেষ্ঠাশ্চেতি তে, অসীন্ কৃপাণান্, অবিভ্রমন্ ঘূর্ণয়ন্তি স্ম । ততঃ কারণাত্, অরুণে সূর্য্যে, প্রযাতে অস্তং গতেঽপি সতি, রণাব্ধৌ যুদ্ধসমুদ্রে, সিতানি শ্বেতবর্ণানি, সরোজ-পুষ্পাণি পদ্মকুসুমানি, অপুষ্যন্ প্রাস্ফুটন্নিব । অতিদ্রুতং ঘূর্ণ্যমানানাং নির্ম্মলাসীনাং রণস্থলোর্দ্ধে বিশালশ্বেতপদ্মাকৃতিলাভাদিতি ভাবঃ ।

অত্র প্রতীয়মানা ভাবাভিমানিনী ক্রিয়োৎপ্রেক্ষালঙ্কারঃ, সূর্য্য-স্থিতিরূপহেতুং বিনাপি পদ্মবিকাশরূপকার্য্যোৎপত্তের্বিভাবনা, রণাব্ধা-বিতি নিরঙ্গং কেবলরূপকঞ্চেত্যেতেষামঙ্গাঙ্গিভাবেন সঙ্করঃ, সোঽপি পুনশ্ছেকানুপ্রাসেন সংসৃজ্যতে ॥৫২॥

বাঙ্গালা—প্রধান প্রধান বীরেরা ভ্রম শূন্য এবং পরস্পর অভিমুখবর্ত্তী হইয়া তরবারি ঘুরাইতে লাগিলেন। তাহাতে, সূর্য্য অস্তাচলে গমন করিলেও সেই রণসমুদ্রে যেন শ্বেতবর্ণ পদ্মসকল প্রস্ফুটিত হইল ॥৫২॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

वीरं गुरुं जेतुमजय्यमन्यः
जनो यथेष्टां व्यतनिष्ट चेष्टाम्।
सा निष्फलाभूच्छिशिरे लतेव
श्रेष्ठान् स्वनामैव गुरून् व्यनक्ति ॥५३॥
असौ धरित्रीपतिपञ्चपुत्रो
शिक्षां समासाद्य विशिष्य सद्यः।
सर्वोत्तमा विग्रहवित्तमाभूत्
निसर्गसिद्धो हि सतां स सर्गः ॥५४॥

अन्वयः—अन्यः जनः अजय्यं वीरं गुरुं जेतुं यथेष्टां चेष्टां व्यतनिष्ट, (किन्तु) सा शिशिरे लता इव निष्फला अभूत्। स्वनाम एव गुरून् श्रेष्ठान् व्यनक्ति ॥५३॥

वीरमिति। अन्यो जनः, अजय्यं जेतुमशक्यं वीरं गुरुं शिक्षकम्, जेतुम्, यथेष्टां पर्य्याप्तां चेष्टां व्यतनिष्ट विस्तारेणाकरोत्। किन्तु सा चेष्टा, शिशिरे शीतकाले लतेव, निष्फला अभूत् जयाभावादिति भावः। उक्तमर्थं समर्थयितुमाह श्रेष्ठानिति। स्वनामैव गुरुरिति संज्ञैव गुरून् श्रेष्ठान्, व्यनक्ति सूचयति।

अत्र सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः, श्रौतोपमा वृत्त्यनुप्रासश्चेत्येतेषां संसृष्टिः।

अजय्यमिति "स्वरादृय" इति यप्रत्यये "जिक्ष्योः शक्ये" इति अयादेशे रूपम् ॥५३॥

বাঙ্গালা—অন্য কোন লোক বীর ও অজেয় গুরুকে (শিক্ষককে) জয় করিবার জন্য যথেষ্ট চেষ্টা করিল; কিন্তু শীতকালে লতার ন্যায় তাহার সে চেষ্টা নিষ্ফল হইয়া গেল। কারণ, গুরু এই নামটাই গুরুজনের শ্রেষ্ঠতার সূচনা করিয়া থাকে ॥৫৩॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

লোকো রবৌ হ্যস্তমিতে সমস্তঃ
তেষাং প্রশক্তিং বিবিনক্তি নক্তম্ ।
নৃপাত্মজানান্ত্বজনি প্রশংসা
ন চন্দ্রিকা চন্দ্রমসং জহাতি ॥৫৫॥

অন্বয়ঃ—অসৌ ধরিত্রীপতিপঞ্চপুত্রী সদ্যঃ শিক্ষাং সমাসাদ্য (অপি) বিশিষ্য সর্ব্বোত্তমা বিগ্রহবিত্তমা অভূৎ। হি স সর্গঃ সতাং নিসর্গসিদ্ধঃ ॥৫৪॥

অসাবিতি। অসৌ, ধরিত্রীপতে রাজ্ঞঃ পঞ্চানাং পুত্রাণাং সমাহার ইতি পঞ্চপুত্রী, সদ্যঃ শিক্ষাং সমাসাদ্য প্রাপ্যাপি, বিশিষ্য স্বান্ বিশেষী-কৃত্য, সর্ব্বেভ্য উত্তমা প্রধানবীরভূতা, বিগ্রহবিত্তমা যুদ্ধাভিজ্ঞশ্রেষ্ঠা চ অভূৎ। হি তথাহি, স সর্গঃ সর্ব্বোত্তমত্বাদিসৃষ্টিঃ, সতাং বুদ্ধিমত্তাদিনা অভ্যর্হিতানাং নিসর্গেণ স্বভাবেনৈব সিদ্ধো ভবতি।

অত্রাপি পূর্ব্ববদর্থান্তরন্যাসোঽলঙ্কারশ্ছেকানুপ্রাসেন সংসৃজ্যতে ॥৫৪॥

বাঙ্গালা—ভীষ্মকরাজার সেই পাঁচটী পুত্রই সদ্য শিক্ষালাভ করিয়াও সর্ব্বোত্তম বীর ও যুদ্ধাভিজ্ঞশ্রেষ্ঠ হইয়াছিলেন। কারণ, সেইরূপ শ্রেষ্ঠতা বুদ্ধি ও মেধাপ্রভৃতি গুণবশতঃ প্রশংসনীয় লোকদিগের স্বভাবসিদ্ধ হইয়া থাকে ॥৫৪॥

অন্বয়ঃ—সমস্তঃ লোকঃ রবৌ অস্তমিতে নক্তং (চ) তেষাং প্রশক্তিং বিবিনক্তি স্ম। নৃপাত্মজানাং তু প্রশংসা অজনি। চন্দ্রিকা চন্দ্রমসং ন জহাতি ॥৫৫॥

লোক ইতি। সমস্তো লোকঃ, রবৌ সূর্য্যে অস্তমিতে সতি, নক্তং রাত্রৌ চ, তেষাং যোদ্ধৃণাম্, প্রশক্তিং সামর্থ্যং সামর্থ্যতারতম্যামিতি যাবৎ, বিবিনক্তি বিচারয়তি স্ম। নৃপাত্মজানান্তু প্রশংসা যুদ্ধ-নৈপুণ্যাতিরেকাৎ প্রশস্তিস্তুতিঃ, অজনি জাতা। তথা চ চন্দ্রিকা জ্যোৎস্না, চন্দ্রমসং চন্দ্রম্, ন জহাতি ন ত্যজতি। চন্দ্রিকা যথা চন্দ্রমসং ন জহাতি, তথা প্রশংসাপি নৃপাত্মজান্ ন জহাতি স্মেতি ভাবঃ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

पतिंवरा वीरजनैकभोग्या
योग्या रणश्रीस्तरला गुणज्ञा।
प्रस्वेदबिन्दावलिमिषेण कुन्द-
मालां समालम्बयदेतदङ्गे ॥५६॥

अत्र वैधर्म्म्येण दृष्टान्तोऽलङ्कारः, छेकानुप्रासो वृत्त्यनुप्रासश्चेत्येतेषां संसृष्टिः ॥५५॥

বাঙ্গালা—সূর্য্য অস্তাচলে গমন করিলে সমস্ত লোক যোদ্ধাদের শক্তিবিষয়ে বিবেচনা করিত, কিন্তু তাহাতে রাজপুত্রগণেরই প্রশংসা হইত। কারণ, জ্যোৎস্না চন্দ্রকে পরিত্যাগ করে না ॥৫৫॥

अन्वयः—पतिंवरा वीरजनैकभोग्या योग्या तरला गुणज्ञा (च) रणश्रीः एतदङ्गे प्रस्वेदबिन्दावलिमिषेण कुन्दमालां समालम्बयत ॥५६॥

पतिंवरेति। पतिं वृणीते इति पतिंवरा, वीरजनैकभोग्या केवलवीरजनलभ्या, योग्या, तरला अनियतत्वात् चञ्चला गुणज्ञा च, रणश्रीः युद्धविजयलक्ष्मीः, एतेषां राजपुत्राणाम्, अङ्गे गात्रे कण्ठे च, प्रस्वेदबिन्दावलेः घर्म्मबिन्दुमालाया मिषेण छलेन, कुन्दमालां कुन्दकुसुमस्रजम्, समालम्बयत वरणमाल्यतया पर्य्यधापयदिव।

अत्र राजपुत्ररणश्रियोर्लिङ्गसाम्येन नायकनायिकाव्यवहारसमारोपात् समासोक्तिरलङ्कारः, सापह्नवा भावाभिमानिनी प्रतीयमाना क्रियोत्प्रेक्षा चानयोरङ्गाङ्गिभावेन सङ्करः, सोऽपि पुनश्छेकानुप्रासेन संसृज्यते ॥५६॥

বাঙ্গালা—পতিবরণার্থিনী, কেবলবীরজনভোগ্যা, যোগ্যা, চঞ্চলা ও গুণজ্ঞা, যুদ্ধজয়লক্ষ্মী, ঘর্ম্মবিন্দুশ্রেণীচ্ছলে যেন কুমারগণের কণ্ঠদেশে কুন্দকুসুমমালা পরিধান করাইয়া দিত ॥৫৬॥

CC-O: Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

परिश्रमाम्भः शिशिरे समीरे
तेषां निराकुर्वति सर्वदेहात्।
दध्रज्जलार्द्रां पुनरुक्तिदोषं
सञ्चालयन् सेविजनो जगाम ॥५७॥
उपास्यमाना सकलैरमीभिः
प्रालेयलेशान् जहती प्रभूतान्।

अन्वयः—शिशिरे समीरे तेषां सर्वदेहात् परिश्रमाम्भः निराकुर्वति (सति) जलार्द्रां दधत् सेविजनः ताञ्च सञ्चालयन् पुनरुक्तिदोषं जगाम ॥५७॥

परिश्रमेति। शिशिरे शीतले, समीरे सान्ध्यवायौ, तेषां राजकुमाराणाम्, सर्वदेहात्, परिश्रमाम्भो घर्म्मजलम्, निराकुर्वति विलोपं नयति सति, जलार्द्रां जलार्द्रव्यजनम्, दधत् धारयन्, सेविजनो भृत्यः, ताञ्च जलार्द्रां सञ्चालयन् पुनरुक्तिदोषम्, जगाम प्राप। शिशिरसमीरणेनैव घर्म्मविन्दुविलोपनात् पुनस्तद्विलोपनार्थमेव जलार्द्राया धारणात् सञ्चालनाच्चेति भावः।

अत्र पुनरुक्तिदोषप्राप्तिं प्रति पूर्व्वार्द्धगतपदार्थहेतुरिति पदार्थहेतुकं काव्यलिङ्गमलङ्कारश्छेकानुप्रासश्चेत्यनयोः संसृष्टिः।

"प्रुविलं तालवृन्तं स्यादुत्क्षेपो व्यजनञ्च यत्। जलेनार्द्रं जलार्द्रा स्यात्" इति वैजयन्ती। "वपुर्जलार्द्रापवनैर्न निर्ववौ" इति शिशुपालवधे प्रयोगान्तरञ्च ॥५७॥

বাঙ্গালা—সন্ধ্যাকালের শীতলবায়ু আসিয়া কুমারগণের সমস্ত গাত্র হইতে ঘর্ম্মবিন্দুসকল লুপ্ত করিতে থাকিলেও ভৃত্য শীতল তালবৃন্ত ধারণ ও তাহা সঞ্চালন করিতে থাকিয়া পুনরুক্তিদোষ লাভ করিত ॥৫৭॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

स्खलत्करा भास्करसम्प्रणाशात्
पितृप्रसूस्तत्र बभूव लीना ॥५८॥
स्वरप्रवीणा अपि हीनवीणा
जगुर्नवीना युगपद्वयदेति ।
बभूव कोलाहलिकोकिलाली
व्यलीकगाना प्रकृतेन तेन ॥५९॥

अन्वयः—अमीभिः सकलैः भास्करसम्प्रणाशात् उपास्यमाना प्रभूतान् प्रालेय-लेशान् जहती स्खलत्करा पितृप्रसूः तत्र लीना बभूव ॥५८॥

उपास्येति । अमीभिः कुमारादिभिः, सकलैर्जनैः, भास्करस्य सूर्य्यस्य सम्प्रणाशात् अस्तगमनेनादर्शनात् पत्युर्मरणाच्च, उपास्यमाना आराध्यमाना आश्वासदानेन सेव्यमाना च, प्रभूतान्, प्रचुरान्, प्रालेय-लेशान् हिमबिन्दून् अश्रुबिन्दूंश्च, जहती त्यजन्ती, स्खलन् भ्रश्यन् श्लथीभवंश्च करः किरणो हस्तश्च यस्याः सा, पितृप्रसूः सायंसन्ध्या सती स्त्री च, तत्र तदानीम्, लीना अदर्शनं गता सहमरणेन लयं गता च, बभूव । सन्ध्याकालोऽतीत इत्यर्थः ।

अत्र लिङ्गसाम्येन कार्य्येण च सूर्य्यसायंसन्ध्ययोः पतिपत्नीव्यवहार-समारोपात् समासोक्तिरलङ्कारः ।

"सायंसन्ध्या पितृप्रसूः" इत्यमरः ॥५८॥

বাঙ্গালা—সূর্য্য অস্তাচলে গমন করিলেন, রাজকুমারপ্রভৃতি সকল লোক সন্ধ্যোপাসনা করিতে লাগিল, প্রচুর হিমবিন্দু পতিত হইতে থাকিল, ক্রমে সান্ধ্যরাগও তিরোহিত হইল এবং সন্ধ্যাকাল অতীত হইয়া গেল ॥৫৮॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

अनेन रूपेण कुमारवर्ग:
विद्यां गृहीत्वा गुरुवृन्दत: स:।
घृताहुतिं प्राप्य मखे शिखीव
राजप्रयुक्त: सुतरां रराज ॥६०॥

अन्वय:—हीनवीणा अपि स्वरप्रवीणा एते नवीना: युगपत् यत् जगु:, प्रक्रान्तेन तेन कोलाहलि-कोकिलाली व्यलीकगाना बभूव ॥५९॥

स्वरेति। हीनास्त्यक्ता वीणा यैस्ते हीनवीणा अपि प्रवीणा प्रकृष्टवीणा इति विरोध:, हीना ध्वनौ न्यूना वीणा येभ्यस्ते हीनवीणा:, स्वरे निषादादौ प्रवीणा निपुणा इति तत्समाधानम्, एते नवीना-स्तरुणा: कुमारा:, युगपदेकदा, यत् जगुर्गानं चक्रु:, प्रक्रान्तेन आरब्धेन, तेन गानेन, कोलाहल: जस्या अस्तीति कोलाहलिनी चासौ कोकिलाली कोकिलश्रेणी चेति कोलाहलिकोकिलाली व्यलीकं विशेषेणाप्रियं गानं यस्या: सा व्यलीकगाना बभूव। कोकिलस्वरादप्यमीषां स्वरो मधुर इत्यर्थ:।

अत्र प्रागुक्तव्याख्यानात् विरोधाभासोऽलङ्कार:, कोकिलस्वरात् कुमारगणस्वरस्याधिक्यप्रतिपादनाद्व्यतिरेक:; छेकानुप्रासश्रुत्यनुप्रास-वृत्त्यनुप्रासाश्चेत्येतेषां मिथो निरपेक्षतया संसृष्टि:।

"प्रवीणे निपुणाभिज्ञनिष्णातशिक्षिता:" इति "अलीकन्त्वप्रियेऽनृते" इति चामर: ॥५९॥

বাঙ্গালা—নিষাদপ্রভৃতি সপ্তস্বরে নিপুণ এবং বীণা অপেক্ষাও মধুরস্বরশালী যুবক রাজপুত্রেরা যে গান করিতেন, তাহা চলিতে লাগিলে, কোলাহলকারী কোকিলগণের গানও লোকের অপ্রিয় হইয়া যাইত ॥৫৯।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

सा रुक्मिणी किन्तु गुरोरगृह्णात्
वेदस्थले गोरचनाप्रकारम्।
सङ्कल्पकार्य्ये ललना प्रवृत्ता
तिलस्थले धान्यमिवास्तिपत्नी ॥ १॥

अन्वयः—राजप्रयुक्तः सः कुमारवर्गः अनेन रूपेण गुरुवृन्दतः विद्यां गृहीत्वा मखे घृताहुतिं प्राप्य शिखी इव सुतरां रराज ॥६०॥

कुमारवर्णनामुपसंहरति अनेनेति। राज्ञा प्रयुक्तो राजप्रयुक्तः, स कुमारवर्गः, अनेन रूपेण प्रकारेण, गुरुवृन्दतः शिक्षकगणात्, विद्यां गृहीत्वा, मखे यज्ञे, घृताहुतिं प्राप्य, शिखी वह्निरिव, सुतराम् अतिशयेन रराज।

अत्र श्रौतोपमालङ्कारो वृत्त्यनुप्रासच्छेकानुप्रासाभ्यां संसृज्यते ॥६०॥

বাঙ্গালা—রাজপ্রযুক্ত কুমারগণ এইভাবে শিক্ষকগণের নিকট হইতে বিদ্যালাভ করিয়া—যজ্ঞে ঘৃতের আহুতি পাইয়া অগ্নির ন্যায় অত্যন্ত শোভা (দীপ্তি) পাইতে লাগিলেন ॥৬০॥

अन्वयः—किन्तु सा रुक्मिणी सङ्कल्पकार्य्ये प्रवृत्ता, अस्तिपत्नी ललना तिलस्थले धान्यमिव वेदस्थले गोरचनाप्रकारं गुरोः अगृह्णात् ॥६१॥

सेति। किन्तु सा रुक्मिणी, सङ्कल्पकार्य्ये प्रवृत्ता, अस्ति विद्यमानः पतिर्यस्याः सा अस्तिपत्नी सधवा, ललना स्त्री, तिलस्थले धान्यमिव, वेदस्थले वेदशिक्षास्थाने, गोरचनाप्रकारं सरसवाक्यनिर्म्माणप्रणालीम्, गुरोः शिक्षकात्, अगृह्णात् अशिक्षत।

अत्र श्रौतोपमालङ्कारः।

"सावित्रीं प्रणवं यजुर्लक्ष्मीं स्त्रीशूद्रयोर्नेच्छन्ति" इति पराशरभाष्य-धृतश्रुत्या स्त्रिया वेदाध्ययननिषेधात् वेदस्थल इत्युक्तम्। "कुशतिलजल-

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

चित्रादि पित्राहितनीतिरेषा
शिल्पं शिशिक्षे समरस्थले ...
नारी च भद्रेव च शूद्रजातिः
नमःप्रयोगं प्रणवाभिधाने ॥६२॥

त्यागरूपः सङ्कल्पः शास्त्रार्थः" इत्युक्तेः स्त्रिया अपि सङ्कल्पे तिलग्रहणप्राप्तौ "न स्पृशेत् तिलदर्भांस्तु यावज्जीवति जीवति" इति तिलग्रहणनिषेधात् तिलस्थले धान्यमिवेत्यभिहितम्। अस्तीति विद्यमानार्थमव्ययम्। शब्दशक्तिप्रकाशिकायामपि "अस्तिक्षीरा नास्तिक्षीरा" इत्युदाहृतम्। अस्तिपत्नीति सपत्नी इत्यादिवत् "दत्युर्नश्च" इति नकार ईकारश्च ॥६१॥

বাঙ্গালা—সঙ্কল্পকার্য্যে প্রবৃত্তা সধবা স্ত্রী যেমন তিলস্থানে ধান্য গ্রহণ করে, তেমন রুক্মিণী গুরুর নিকট বেদশিক্ষাস্থানে মধুর বাক্যরচনা প্রণালী শিক্ষা গ্রহণ করিতেন ॥৬১॥

अन्वयः—पित्राहितनीतिः च एषा नारी च भद्रा शूद्रजातिश्च प्रणवाभिधाने नमःप्रयोगं इव समरस्थले चित्रादि शिल्पं शिशिक्षे ॥६२॥

चित्रेति। पित्रा आहिता शिक्षया स्थापिता नीतिर्यस्यां सा पित्राहितनीतिश्च, एषा रुक्मिणी, नारी सकला स्त्री च, भद्रा शिष्टा शूद्रजातिश्च, प्रणवाभिधाने सङ्कल्पादौ प्रणवप्रयोगे कर्त्तव्ये, नमः—प्रयोगमिव, समरस्थले भ्रातृगणक्रियमाणयुद्धशिक्षास्थाने, चित्रादि आलेख्यनिर्म्माणप्रभृति शिल्पम्, शिशिक्षे।

अत्र श्रौतोपमालङ्कारश्छेकानुप्रासेन संसृज्यते।

अत्राप्युक्तपराशरभाष्यधृतश्रुत्या स्त्रीशूद्रयोः प्रणवोच्चारणनिषेधात्

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

विद्या न चेत् स्यात् क्षितिपात्मजानां
सुमेधसां यत्नवताममीषाम्।
कृषीवलैः सिक्तजला सुकृष्टा
तदोप्तबीजाप्यफलोर्व्वरा स्यात्॥६३॥

प्रणवाभिधाने नमःप्रयोगमिव इत्युक्तम्। अशिष्टः शूद्रस्तु स्वेच्छाचारवशात् प्रणवमभिधत्त इति भद्रेत्युपात्तम्॥६२॥

বাঙ্গালা—স্ত্রী ও শিষ্টশূদ্র যেমন প্রণবস্থলে নম প্রয়োগ শিক্ষা করে, সেইরূপ পিতার নিকট নীতিশিক্ষায় শিক্ষিত রুক্মিণী যুদ্ধশিক্ষাস্থলে চিত্র-প্রভৃতি শিল্প শিক্ষা করিতেন॥৬২॥

অন্বয়:—सुमेधसां यत्नवतां (च) अमीषां क्षितिपात्मजानां चेत् विद्या न स्यात्, तदा कृषीवलैः सुकृष्टा उप्तबीजा सिक्तजला (च) उर्व्वरापि अफला स्यात्॥६३॥

अथ दशभिः श्लोकैः कुमाराणां कतिपयविद्यालाभमाह विद्येति। सुमेधसां शोभना मेधा येषां तेषाम्, यत्नवतां विद्यालाभे यत्नशीलानाञ्च, अमीषां क्षितिपात्मजानां राजपुत्राणाम्, चेद्यदि, विद्या न स्यात्, तदा कृषीवलैः कृषकैः, सुकृष्टा सुष्ठु कर्षणं सदीकृता, उप्तानि रोपितानि बीजानि यस्यां सा, सिक्तानि जलानि यस्यां सा च, उर्व्वरा सर्व्वशस्यजननयोग्यापि भूमिः अफला फलशून्या स्यात्। उर्व्वराया निष्फलत्वमिव तादृशानां कुमाराणां निर्व्विद्यत्वमसम्भवमेवेति भावः।

अतएवात्र असम्भवद्वस्तुसम्बन्धा निदर्शनालङ्कारः॥६३॥

বাঙ্গালা—মেধাবী ও যত্নশীল সেই কুমারগণের যদি বিদ্যা না হইত, তাহা হইলে কৃষকেরা সম্যক্ কর্ষণ, বীজরোপণ এবং জলসেচন করিলে পর উর্ব্বরা ভূমি ফলশূন্য হইত॥৬৩॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

সামাশ্রয়া নির্ম্মলবর্ণযুক্তা
বিজ্ঞাপয়ন্তী বহুবস্তুতত্ত্বম্ ।
এতৈঃ কুমারৈঃ পরিশব্দ্যমানা
মাতেব লেভেঽখিলবেদবিদ্যা ॥৬৪॥
শ্রিতান্তকোদণ্ডমহোপকারী
নিষ্পাদকঃ সন্ততমাহবস্য ।
সখা ধনুর্ব্বেদগতস্য বোধঃ
পরস্পরং তেষু বভূব তুল্যঃ ॥৬৫॥

অন্বয়ঃ—এতৈঃ কুমারৈঃ পরিশব্দ্যমানা সামাশ্রয়া নির্ম্মলবর্ণযুক্তা বহুবস্তুতত্ত্বং বিজ্ঞাপয়ন্তী (চ) মাতা ইব অখিলবেদবিদ্যা লেভে ॥৬৪॥

কুমারাণাং বেদাদিবিদ্যানিষ্পত্তিমাহ সামেতি। এতৈঃ কুমারৈঃ পরিশব্দ্যমানা অধীয়মানা, সাম তদাখ্যং বেদং সান্ত্ববাদঞ্চ আশ্রয়ত ইতি সা, নির্ম্মলৈ র্বর্ণৈরকারাদিভিঃ নির্ম্মলেন বর্ণেন দেহকান্ত্যা চ যুক্তা, বহুবস্তুতত্ত্বং বিজ্ঞাপয়ন্তী চ, মাতা ইব অখিলবেদবিদ্যা লেভে ।

অত্র শ্রৌতী পূর্ণোপমালঙ্কারঃ ॥৬৪॥

বাঙ্গালা—সেই রাজকুমারেরা গুরুর নিকট অধ্যয়ন করিয়া সামবেদ (সান্ত্বনা বাক্য) সমন্বিত, নির্ম্মলবর্ণ (অকারাদি অক্ষর, দেহকান্তি) দেহকান্তিযুক্ত এবং বহুবস্তুতত্ত্ববোধক জননীর ন্যায় সমস্ত বেদবিদ্যা লাভ করিয়াছিলেন ॥৬৪॥

অন্বয়ঃ—শ্রিতান্তকোদণ্ডমহোপকারী সন্ততং আহবস্য নিষ্পাদকশ্চ সখা ধনুর্ব্বেদগতো বোধশ্চ তেষু পরস্পরং তুল্যঃ বভূব ॥৬৫॥

শ্রিতেতি। শ্রিতঃ অবলম্বিতঃ অন্তঃ সমীপদেশো যেন স শ্রিতান্তকঃ

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

शब्दीयविद्या प्रतिहारिणीव
ज्ञानस्य सोपानमवेक्षयन्ती।
आख्यातनामप्रथिता निनाय
समस्तशास्त्रालयमध्यमेतान् ॥६६॥

दण्डेन शत्रुदमनेन महोपकारी, अन्यत्र श्रितः अवलम्बितः अन्तः समीपदेशो येन तेन सर्वदा सन्निहितेनेत्यर्थः कोदण्डेन धनुषा तत्कार्य्यसूचनेन महोपकारी, सन्ततं सर्वदा, आहवस्य युद्धस्य, निष्पादकः प्रकारज्ञापनेन साहाय्यकरणेन च सम्पादकश्च, सखा सहायः, धनुर्वेदगतो बोधो विद्या च तेषु कुमारेषु परस्परं तुल्यो बभूव।

अत्र प्रथमपादे सभङ्गश्लेषः, द्वितीयपादे चार्थश्लेषः, आर्थोपमा चेत्येतेषां मिथो निरपेक्षतया संसृष्टिः। आर्थी पूर्णोपमेति केचित्। सखिपक्षे श्रितान्तक इति बहुव्रीहौ कप्रत्ययः ॥६५॥

বাঙ্গালা—সর্ব্বদা সন্নিহিত, শত্রুদমনদ্বারা বিশেষ উপকারী এবং অশ্রান্ত যুদ্ধনিষ্পাদক, আর নিকটবর্ত্তী ধনুর কার্য্য উপদেশ করায় বিশেষ উপকারী এবং সর্ব্বদা যুদ্ধনিষ্পাদক ধনুর্ব্বেদবিদ্যা সেই কুমারগণের পরস্পর সমান হইয়াছিল ॥৬৫॥

अन्वयः—आख्यातनामप्रथिता ज्ञानस्य सोपानं अवेक्षयन्ती शब्दीयविद्या प्रतिहारिणी इव एतान् समस्तशास्त्रालयमध्यं निनाय ॥६६॥

शब्दीयेति। आख्यातेन धातुप्रकरणेन नाम्ना नामप्रकरणेन च प्रथिता प्रसिद्धा, अन्यत्र आख्यातेन पुरगतसर्वलोकोच्चारितेन नाम्ना संज्ञया प्रथिता प्रसिद्धा, ज्ञानस्य शास्त्रबोधस्य गृहस्वरूपावगमस्य च सोपानं क्रमिकोन्नतिम्, आरोहणञ्च अवेक्षयन्ती प्रदर्शयन्ती शब्दीयविद्या व्याकरणज्ञानम्, प्रतिहारिणी द्वाररक्षिका इव, एतान् कुमारान्,

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

रसोद्भुरा भावगुणप्रमुग्धा
सालङ्कृतो रीतिमती नवीना ।
अतीवचारुध्वनिभागमीषां
जग्राह कण्ठं किल काव्यविद्या ॥६७॥

समस्तशास्त्रम् आलयो गृहमिव तस्य मध्यम्, निनाय प्रापयामास । व्याकरणविद्या हि समस्तशास्त्रबोधोपाय इति भावः ।

अत्र लुप्तोपमा सङ्कीर्णा श्रौती पूर्णोपमालङ्कारः ।

"आरोहणं स्यात् सोपानम्" इत्यमरः ॥६६॥

বাঙ্গালা—প্রসিদ্ধনামসম্পন্না প্রতিহারিণী যেমন সোপান (সিঁড়ি) দেখাইতে থাকিয়া গৃহস্থগণকে গৃহমধ্যে লইয়া যায়, সেইরূপ আখ্যাত-প্রকরণ ও নামপ্রকরণদ্বারা প্রসিদ্ধব্যাকরণবিদ্যা জ্ঞানের ক্রমিক উন্নতি দেখাইতে থাকিয়া, সেই কুমারগণকে সমস্ত শাস্ত্রমধ্যে লইয়া গিয়াছিল ॥৬৬॥

अन्वयः—रसोद्भुरा भावगुणप्रमुग्धा सालङ्कृतिः रीतिमती अतीवचारुध्वनिभाक् नवीना च काव्यविद्या अमीषां कण्ठं जग्राह किल ॥६७॥

रसोद्भुरेति । रसेन शृङ्गारादिना अनुरागेण च उद्भुरा परिपूर्णा, भावैः स्थायिभावादिभिः लीलाविलासादिभिश्च गुणैः ओजःप्रभृतिभिः सौन्दर्य्यादिभिश्च प्रमुग्धा मनोहरा, अलङ्कृतिभिः उपमादिभिः कटक-कुण्डलादिभिश्चालङ्कारैः सहेति सा, रीतयो गौड़ीप्रभृतयः सद्व्यवहाराश्च अस्याः सन्तीति सा, अतीवचारुं परमरम्यं ध्वनिं व्यङ्गार्थं कण्ठस्वरञ्च भजते या सा, नवीना उभयत्रापि नूतना च, काव्यविद्या काव्यशास्त्रं तरुणी च, अमीषां कुमाराणाम्, कण्ठम्, जग्राह संबबन्ध आलिलिङ्ग च । किलेत्यैतिह्ये ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

अज्ञानतामिस्रमलं हरन्ती
विकासयन्त्याननपङ्कजानि ।
तेषां महाच्छे हृदयान्तरीक्षे
स्मृतिज्ञतार्कच्छविराविरासीत् ॥६८॥

अत्र श्लिष्टविशेषणसाम्येन लिङ्गसाम्येन च काव्यविद्यायां युवतिव्यवहारसमारोपात् समासोक्तिरलङ्कारः ॥६७॥

বাঙ্গালা—রসে পরিপূর্ণা, ভাবে ও গুণে মনোহরা, অলঙ্কারসম্পন্না, রীতিযুক্তা, অতিসুন্দরধ্বনিশালিনী এবং নবীনা কাব্যবিদ্যা, (কাব্যশাস্ত্র, যুবতী স্ত্রী) কুমারগণের কণ্ঠস্থ হইয়াছিল ॥৬৭॥

अन्वयः—अज्ञानतामिस्रं अलं हरन्ती आननपङ्कजानि विकासयन्ती (च) स्मृतिज्ञतार्कच्छविः महाच्छे तेषां हृदयान्तरीक्षे आविरासीत् ॥६८॥

अज्ञानेति। अज्ञानं सदाचाराद्यनवगमः तामिस्रम् अन्धकार इव तत्, अज्ञानमेव तामिस्रं तदिति वा, अलमत्यर्थम्, हरन्ती नाशयन्ती, आननानि पङ्कजानि पद्मानीव तानि, आननान्येव पङ्कजानि तानीति वा, विकासयन्ती च, स्मृतिज्ञता स्मृतिशास्त्रज्ञानम् अर्कच्छविः सूर्य्यद्युतिरिव सा, स्मृतिज्ञता स्मृतिशास्त्रज्ञानमेव अर्कच्छविः सूर्य्यद्युतिः सेति वा, महाच्छे अतीवनिर्म्मले, तेषां कुमाराणाम्, हृदयमन्तरीक्षमिव तस्मिन्, हृदयमेव अन्तरीक्षं तस्मिन्निति वा, आविरासीत् प्रकाशितासीत्।

अत्र साधकबाधकप्रमाणाभावादुपमारूपकयोः सन्देहसङ्करोऽलङ्कारश्छेकानुप्रासेन संसृज्यते ॥६८॥

বাঙ্গালা—অজ্ঞানান্ধকারনাশিনী এবং মুখপদ্মবিকাশিনী স্মৃতি-

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

दशाविशेषेण समाददाना
स्नेहं तमःशान्तिविधानदक्षा।
द्रष्टव्यमर्थं परिदर्शयन्ती
प्रदीपिकेवास्थित नीतिरेषु ॥६८॥

শাস্ত্রজ্ঞানস্বর্ণদ্যুতি সেই কুমারগণের অতিনির্ম্মল হৃদয়-আকাশে প্রকাশ পাইয়াছিল ॥৬৮॥

अन्वयः—दशाविशेषेण स्नेहं समाददाना तमःशान्तिविधानदक्षा द्रष्टव्य अर्थं परिदर्शयन्ती च नीतिः एषु प्रदीपिका इव अस्थित ॥६८॥

दशेति। दशाविशेषेण सङ्कटाद्यवस्थया हेतुना, स्नेहं वात्सल्यम् आत्मानं प्रति प्रभोरनुरागमित्यर्थः, समाददाना सम्यग्गृह्णती, अन्यत्र दशाविशेषेण उत्तमवर्त्तिकया, स्नेहं तैलादिकम्, समाददाना संगृह्णती, तमसः तमोगुणजनितकर्त्तव्यविषयकाज्ञानस्य, अन्यत्र अन्धकारस्य शान्तिविधाने निवृत्तिकरणे दक्षा निपुणा, द्रष्टव्यं ज्ञातव्यम्, अव-लोकितव्यञ्च, अर्थं युद्धादौ कौशलादिकं घटपटादिकञ्च विषयम्, परि-दर्शयन्ती स्वोपदेशेन बोधयन्ती स्वप्रभया ईक्षयन्ती च, नीतिः नीति-शास्त्रविद्या, एषु कुमारेषु, प्रदीपिका प्रदीप इव प्रदीपशिखेव वा, अस्थित सन्देहसमये निश्चयाय स्थितवती।

अत्र पूर्णोपमालङ्कारः। श्लेषोपमेति केचित्।

"दशावस्था दीपवर्त्त्योर्वस्त्रान्ते भूम्नि योषिति" इति मेदिनी। "स्नेहस्तैलादिकरसद्रव्ये स्यात् सौहृदेऽपि च" इति विश्वः। "तमो राहौ गुणे पापे ध्वान्ते" इति हेमचन्द्रः।

अस्थितेति "प्रतिज्ञानिर्णयप्रकाशनेषु स्था" इति निर्णयार्थे रुचादित्वात्तिष्ठतेरात्मनेपदम् ॥६८॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

स्ववंशजातान् परिचाययन्ती
दक्षान्वयोत्कीर्त्तनकारिणी च।
एतान् बभाजोपयमोपयोग्यान्
पुराणविद्या घटकावलीव ॥७०॥

बाङ্গালা—যাহা সঙ্কট অবস্থায় সকলেরই অনুরাগ আকর্ষণ করে, যাহা ভ্রমের নিবৃত্তি করিতে নিপুণ এবং যাহা জ্ঞাতব্যবিষয় জানাইয়া থাকে, দীপশিখার ন্যায় সেই নীতিবিদ্যা জ্ঞাতব্যনির্ণয় করিবার জন্য কুমারগণের হৃদয়ে অবস্থান করিত ॥৬৯॥

अन्वयः—स्ववंशजातान् परिचाययन्ती दक्षान्वयोत्कीर्त्तनकारिणी च पुराणविद्या घटकावली इव उपयमोपयोग्यान् एतान् बभाज ॥७०॥

स्ववंशेति। स्ववंशे जातानुत्पन्नान् पुरुषान् परिचाययन्ती भागवताद्यात्मना ज्ञापयन्ती, अन्यत्र स्वयोः कन्यावरयोर्वंशजातान् पुरुषान्, परिचाययन्ती कुलग्रन्थदर्शनेन ज्ञापयन्ती, दक्षस्य ब्रह्मणः पुत्रस्य दक्षप्रजापतेः अन्यत्र आदिशूरेण राज्ञा वङ्गेष्वानीतानां पञ्चानां ब्राह्मणानां मध्ये दक्षनामकस्य ब्राह्मणस्य, अन्वयोत्कीर्त्तनकारिणी वंशप्रकटनकर्त्री च, पुराणविद्या, घटकानां कन्यावरयोर्विवाह-योजकानाम्, आवली समूह इव, उपयमोपयोग्यान् विवाहयोग्यान्, एतान् कुमारान्, बभाज आश्रयति स्म।

अत्रापि पूर्णोपमालङ्कारः श्रुत्यनुप्रासेन संसृज्यते ॥७०॥

বাঙ্গালা—স্ববংশজাত পুরুষগণের পরিচয়দাতা এবং আদিশূরকর্তৃক বঙ্গদেশে আনীত পঞ্চব্রাহ্মণের মধ্যে দক্ষনামক ব্রাহ্মণের উল্লেখকারী ঘটকগণের ন্যায়, স্ববংশজাত পুরুষগণের পরিচয়দাতা এবং দক্ষপ্রজাপতির

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

विद्या च बुद्धिश्च मनोज्ञता च
सापत्न्यवैरेण परस्परं ताः।
स्वविप्रयोगे परयोगचिन्तां
कृत्वेव शश्वत् परिरेभिरे तान् ॥७१॥
उपेन्द्रः स्वसारं प्रसह्यापहर्त्ता
महस्वी मनस्वीति जानन् पुरेव।
विशेषात् समीक्ष्य स रुक्मी शिशिच्चे
दुरन्तः प्रयत्नो हि गाढ़ोद्यमानाम् ॥७२॥

বংশকীর্ত্তনকারী পুরাণশাস্ত্র বিবাহযোগ্য রাজকুমারগণকে আশ্রয় করিয়াছিল ॥৭০॥

अन्वयः—विद्या च बुद्धिश्च मनोज्ञता च ताः परस्परं सापत्न्यवैरेण स्वविप्रयोगे परयोगचिन्तां कृत्वा इव शश्वत् तान् परिरेभिरे ॥७१॥

विद्येति। विद्या च बुद्धिश्च, मनोज्ञता कान्तिश्च, ता एतास्तिस्र एव, परस्परम्, सापत्न्येन सपत्नीभावेन यद्वैरं विद्वेषस्तेन, स्वस्य आत्मनः विप्रयोगे विच्छेदकाले परयोरन्ययोः योगचिन्तां कुमारैरेव सह संयोगाशङ्कां कृत्वा इव, शश्वत् सर्व्वदेव; तान् कुमारान्, परिरेभिरे आलिलिङ्गुः आशिश्लियुरित्यर्थः।

अत्र कार्य्येण विद्याबुद्धिमनोज्ञतासु नायिकाव्यवहारसमारोपात् समासोक्तिरलङ्कारः, क्रियोत्प्रेक्षा च अनयोरङ्गाङ्गिभावेन सङ्करः।

"परिरम्भः परिष्वङ्गः संश्लेष उपगूहनम्" इत्यमरः ॥७१॥

বাঙ্গালা—বিদ্যা, বুদ্ধি ও কান্তি এই তিনটীই পরস্পর সাপত্ন্যবিদ্বেষনিবন্ধন নিজের বিচ্ছেদের সময়ে অন্য দুই জনের সংযোগ হইতে পারে এই আশঙ্কা করিয়াই যেন সর্ব্বদাই রাজকুমারগণকে আলিঙ্গন করিত ॥৭১॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

जानन् स्वयं जनमुखाच्च निशम्य सम्यक्
विद्यां ननन्द नृपतिर्निजनन्दनानाम्।
विद्या सुतेषु रजनीषु च पौर्णमासी
चैत्रेषु शस्यमपि कस्य न तोषकारि ॥७३॥

अन्वयः—महस्वी मनस्वी (च) स रुक्मी 'उपेन्द्रः प्रसह्य स्वसारं अपहर्त्ता' इति पुरा जानन् इव विशेषात् समीकं शिशिक्षे। गाढ़ोद्यमानां प्रयत्नो हि दुरन्तः ॥७२॥

उपेन्द्र इति। महस्वी तेजस्वी, मनस्वी प्रशस्तमनाश्च, स रुक्मी, उपेन्द्रः कृष्णः, प्रसह्य बलेन, स्वसारं भगिनीं रुक्मिणीम्, अपहर्त्ता अपहरिष्यति, इति पुरा पूर्व्वम्, जानन्निव, विशेषात् विद्यान्तरेभ्य आधिक्यात्, समीकं युद्धम्, शिशिक्षे गुरुभ्यः शिक्षितवान्, रुक्मिणी-हरणनिवारणार्थमिति भावः। तथा च गाढ़ोद्यमानां दृढ़ाध्यवसायानां जनानाम्, प्रयत्नो हि, दुरन्तः सर्व्वथा दुर्निवारः।

अत्र सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः, क्रियोत्प्रेक्षा, छेकानुप्रासश्चेत्येतेषां परस्परनिरपेक्षतया संसृष्टिः।

"महस्तूत्सवतेजसोः" इत्यमरः।

भुजङ्गप्रयातं वृत्तम्—"भुजङ্গপ্রযাতং यकारैश्चतुर्भिः" इति लक्षणात् ॥७२॥

বাঙ্গালা—"কৃষ্ণ বলপূর্ব্বক রুক্মিণীকে হরণ করিবেন" ইহা পূর্ব্বে জানিতে পারিয়াই যেন তেজস্বী ও প্রশস্তহৃদয় রুক্মী অন্যান্য বিদ্যা অপেক্ষা বিশেষভাবে যুদ্ধবিদ্যাই শিক্ষা করিয়াছিলেন। কারণ, দৃঢ়াধ্যবসায়ী লোকদিগের যত্নটা দুর্নিবারই হইয়া থাকে ॥৭২॥

अन्वयः—नृपतिः स्वयं निजनन्दनानां विद्यां जानन् जनमुखात् सम्यक् निशम्य च ननन्द। सुतेषु विद्या, रजनीषु च पौर्णमासी चैत्रेषु शस्यं अपि कस्य न तोषकारि (भवन्ति) ॥७३॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

राजानीतान् निजपुरममून् सर्वदीर्जन्यशून्यान्
धन्याः कन्याः परमभिमतान् वल्लभान् लेभिरे तान् ।
किन्तु क्षौणी यदि च न जड़ा सर्वथैवाभविष्यत्
राज्ञः पुत्रान् स्वयमपि तदा पाणिमग्राहयिष्यत् ॥७४॥

इति श्रीहरिदासकृतौ रुक्मिणीहरणे महाकाव्ये
विद्याग्रहणं नाम द्वितीयः सर्गः ॥०॥

जानन्निति । नृपतिर्भीष्मकः, स्वयम्, निजनन्दनानां स्वपुत्राणाम्, विद्यां जानान्, जनमुखात् सम्यक् निशम्य श्रुत्वा च, ननन्द आनन्दमनुबभूव । तथा च सुतेषु पुत्रेषु विद्या, रजनीषु रात्रिषु च, पौर्णमासी पूर्णिमा, क्षेत्रेषु शस्यभूमिषु शस्यमपि च, एतानि कस्य जनस्य, तोषकाणि सन्तोषजनकानि, न भवन्ति । अपि तु सर्वस्यैव भवन्तीत्यर्थः ।

अत्रापि पूर्ववदर्थान्तरन्यासः, प्रस्तुतायाः सुतगतविद्यायाः अप्रस्तुतयोश्च पूर्णिमाशब्दस्ययोस्तोषकत्वरूपैकधर्म्माभिसम्बन्धात्तुल्ययोगिता च, अनयोरेकाश्रयानुप्रवेशरूपः सङ्करः, सोऽपि पुनश्छेकानुप्रासेन संसृज्यते । वसन्ततिलका वृत्तम्—"उक्ता वसन्ततिलका त-भ-जा गौ गः" इति लक्षणात् ॥७३॥

বাঙ্গালা—ভীষ্মকরাজা আপন পুত্রগণের বিদ্যার বিষয় নিজে জানিয়া এবং অন্যান্যের নিকট শুনিয়া বিশেষ আনন্দিত হইয়াছিলেন। কারণ, পুত্রগত বিদ্যা, রাত্রির মধ্যে পূর্ণিমা এবং ক্ষেত্রে শস্য, এগুলি কাহার সন্তোষ উৎপাদন না করে ? ॥৭৩॥

अन्वयः—धन्याः कन्याः राजा निजपुरं आनीतान् सर्वदौर्जन्यशून्यान् परं अभिमतान् तान् एतान् वल्लभान् लेभिरे । किन्तु क्षौणी यदि च सर्वथैव जड़ा न अभविष्यत्, तदा स्वयमपि राज्ञः पुत्रान् पाणिं अग्राहयिष्यत् ॥७४॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

संक्षेपेण कुमाराणां परिणयमाह राज्ञेति। धन्याः पुण्यवत्यः, कन्याः, राजा भीष्मकेण, निजपुरम्, आनीतान्, सर्व्वदौर्ज्जन्यशून्यान्, परमत्यन्तम्, अभिमतान्, तान्, एतान् कुमारान्, वल्लभान् दयितान् पतीन्, लेभिरे प्रापुः। किन्तु, क्षौणी पृथिवी, यदि च सर्व्वथैव जड़ा अचेतना, न अभविष्यत्। तदा स्वयमपि आत्मनैव, राज्ञो भीष्मकस्य पुत्रान्, पाणिम् अग्राहयिष्यत्।

अत्र क्षौण्या पाणिग्राहणासम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्ति-रलङ्कारश्छेकानुप्रासेन संसृज्यते।

"राज्ञि राट् पार्थिवक्ष्माभृन्नृपभूपमहीक्षितः" इत्यमरः।

मन्दाक्रान्ता वृत्तम् ॥७४॥

इति श्रीहेमचन्द्रतर्कवागीशविरचितायां रुक्मिणीहरणटीकायां विचित्रायां द्वितीयः सर्गः ॥०॥

বাঙ্গালা—রাজা কুমারগণকে আপন রাজধানীতে আনয়ন করিলে, নানাদেশীয় পুণ্যবতী কন্যারা সর্ব্বদুর্জনতাশূন্য এবং অত্যন্ত অভিমত সেই কুমারগণকে পতিরূপে লাভ করিয়াছিলেন। কিন্তু পৃথিবী যদি সর্ব্বপ্রকারেই অচেতনা না হইত, তাহা হইলে নিজেই রাজপুত্রগণকে পাণিগ্রহণ করাইত ॥৭৪॥

—o—

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

तृतीयः सर्गः ।

——:०:——

वसुन्धराधीशधुरन्धरः परं
सुताभिषेकार्थमचिन्तयत् कियत् ।
स्वयं हि विज्ञो विविनक्ति शक्तितः
प्रवक्ति बन्धून् विदधात्यथो विधिम् ॥१॥

अन्वयः—परं वसुन्धराधीशधुरन्धरः सुताभिषेकार्थं कियत् अचिन्तयत् । हि विज्ञः स्वयं शक्तितः विविनक्ति, अथो बन्धून् प्रवक्ति, अथो विधिं विदधाति ॥१॥

अथ ज्येष्ठकुमारस्य रुक्मिणो यौवराज्याभिषेकं प्रस्तौति वसुन्धरेति । परं कुमाराणां परिणयानन्तरम्, वसुन्धराधीशानां भूपतीनां धुरन्धरः श्रेष्ठो भीष्मकः, सुतस्य ज्येष्ठपुत्रस्य रुक्मिणो यौवराज्ये अभिषेकार्थम्, कियदचिन्तयत् । हि यस्मात्, विज्ञो जनः, स्वयमात्मना, प्रथमं शक्तितः शक्त्यनुसारेण, विविनक्ति कर्त्तव्यं विचारयति, अथो अनन्तरम्, बन्धून् प्रवक्ति, बन्धुभिः सह तत्कर्त्तव्यं पर्य्यालोचयतीत्यर्थः, अथो ततपरम्, विधिं तदालोचितक्रियाम्, विदधाति निष्पादयति ।

अत्र सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः, छेकानुप्रासो वृत्त्यनुप्रासश्चेत्येतेषां संसृष्टिः ।

अस्मिन् सर्गे वंशस्थविलं वृत्तम्—"वदन्ति वंशस्थविलं जतौ जरौ" इति लक्षणात् ॥१॥

বাঙ্গালা—পুত্রগণের বিবাহ হইয়া গেলে পর, রাজশ্রেষ্ঠ ভীষ্মক রুক্মির যৌবরাজ্যাভিষেকের বিষয়ে কিছু চিন্তা করিলেন। কারণ,

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

सुतस्य मे नव्यवधूर्विनाऽवनीं
विराजते नापि विवाहिता हिता।
दिवो न चेच्चन्दति चन्द्रिका तदा
न विद्यते हृद्यतमा तमस्विनी ॥२॥

ऋते च राज्यान्नहि केवलाबला-
समाश्रितो राजजनो विराजते।
विना हि वादेन मनीषिमण्डलीं
न पण्डितो मण्डयति वितण्डया ॥३॥

অভিজ্ঞ লোক প্রথমে কর্ত্তব্যবিষয়ে শক্তি অনুসারে নিজে বিবেচনা করেন, পরে বন্ধুদিগকে তাহা বলেন এবং তৎপরে সেই কার্য্য সম্পাদন করিয়া থাকেন ॥১॥

অন্বয়:—अवनीं विना विवाहिता हिता नव्यवधूः अपि मे सुतस्य न विराजते। चेत् दिवः चन्द्रिका न चन्दति, तदा तमस्विनी हृद्यतमा न विद्यते ॥२॥

अथ पञ्चदशभिः श्लोकै राज्ञश्चिन्ताप्रकारमाह सुतस्येति। अवनीं भूमिं राज्यं विना; विवाहिता सञ्जातविवाहा, हिता हितैषिणी, नव्यवधूरपि, मे मम, सुतस्य ज्येष्ठपुत्रस्य रुक्मिणः, न विराजते न शोभते। राज्याभावेन महिषीत्वाभावादिति भावः। तथाहि, चेद्यदि, दिवो गगनस्य, चन्द्रिका ज्योत्स्ना, न चन्दति न दीप्यते, तदा तमस्विनी रात्रिः, हृद्यतमासौन्दर्य्येण प्रियतमा, न विद्यते न भवति।

अत्र साधर्म्म्येण दृष्टान्तोऽलङ्कारश्छेकानुप्रासेन संसृज्यते ॥२॥

বাঙ্গালা—রাজ্য ব্যতীত বিবাহিতা এবং হিতৈষিণী নবীনা বধূও আমার পুত্র রুক্মীর পক্ষে শোভা পাইতেছে না। আকাশের জ্যোৎস্না যদি প্রকাশ না পায়, তবে রাত্রি মনোহর হয় না ॥২॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

जनोऽतियोग्योऽपि न योग्यभोग्यभाक्
न कर्त्तुमिष्टं क्षमते क्षमातले ।
प्रवर्त्तमानोऽन्तरपूर्वपर्वते
विभाकरोऽप्राप्य नभो न भासते ॥४॥

अन्वयः—राज्यात् ऋते च केवलाबलासमाश्रितः राजजनः नहि विराजते । हि पण्डितः वादेन विना वितण्डया मनीषिमण्डलीं न मण्डयते ॥३॥

ऋत इति । राज्यादृते राज्यं विना च, केवलामेकाम् अबलां भार्य्यां समाश्रितः, राजजनो राजत्वयोग्यो लोकः, नहि विराजते । राज्याभावे राजत्वस्यैवाभावादिति भावः । हि तथाहि, पण्डितः, वादेन तत्त्वनिर्णायकवाक्येन विना, वितण्डया स्वपक्षस्थापकपरपक्षनिरासक-वाक्येन, मनीषिमण्डलीं विद्वत्सभाम्, तद्गतमात्मानमित्यर्थः, न मण्डयते न शोभयति ।

अत्रापि साधर्म्म्येण दृष्टान्तोऽलङ्कारः, छेकानुप्रासो वृत्त्यनुप्रास-श्चेत्येतेषां संसृष्टिः ।

वादवितण्डयोर्विस्तरस्तु न्यायदर्शने गौतमसूत्रे, "वादः प्रवदतामहम्" इति भगवद्गीतावाक्यव्याख्याने श्रीधरस्वामिटीकायाञ्च द्रष्टव्यः ॥३॥

বাঙ্গালা—রাজলোক রাজ্য ব্যতীত কেবল ভার্য্যাদ্বারা শোভা পাইতে পারেন না। কারণ পণ্ডিতলোক বাদবিচার ব্যতীত কেবল বিতণ্ডাদ্বারা পণ্ডিতসভায় নিজের শোভা জন্মাইতে সমর্থ হন না ॥৩॥

अन्वयः—अतियोग्योऽपि जनः योग्यभोग्यभाक् न (सन्) क्षमातले इष्टं कर्त्तुं न क्षमते । अन्तरपूर्वपर्वते प्रवर्त्तमानः विभाकरः नभः अप्राप्य न भासते ॥४॥

जन इति । कार्य्यमात्रे अतियोग्योऽपि जनः, योग्यं भोग्यं स्थानं भजत इति योग्यभोग्यभाक्, न सन्, क्षमातले भूतले, इष्टं वाञ्छितं

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

विहाय राज्यं किल राजसम्भवं
गुणैरनेकैरपि रीतिभिर्युतम्।
कृती विनालङ्कृतिमुत्तमां जनः
कवेर्महाकाव्यमिवावमन्यते ॥५॥

विषयम्, कर्त्तुं न क्षमते न शक्नोति, उपयुक्तक्षेत्रालाभादित्याशयः। तथा च पूर्वपर्वतस्य उदयाचलस्य अन्तरं मध्यदेश इति अन्तरपूर्वपर्वत-स्तस्मिन्, प्रवर्त्तमानस्तिष्ठन्, विभाकरः सूर्य्यः, नभो गगनम्, अप्राप्य, न भासते न दीप्यते, गगनस्यैव तन्नासनस्थानत्वादिति भावः।

अत्र विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारो वृत्त्यनुप्रास-च्छेकानुप्रासाभ्यां संसृज्यते ॥४॥

বাঙ্গালা—অতিযোগ্য লোকও যদি উপযুক্ত ক্ষেত্র না পায়, তবে সে পৃথিবীতে কোন অভীষ্টকার্য্যই করিতে সমর্থ হয় না। উদয়পর্ব্বতের অভ্যন্তরবর্ত্তী সূর্য্য আকাশে না আসিয়া প্রকাশ পাইতে পারেন না ॥৪॥

अन्वयः—कृती जनः राजसम्भवं अनेकैः गुणैः रीतिभिः (च) युतं अपि राज्यं विहाय (सन्तं) उत्तमां अलङ्कृतिं विना कवेः महाकाव्यं इव अवमन्यते ॥५॥

विहायेति। कृती लोकचरित्रज्ञाने काव्यज्ञाने च निपुणो जनः, राजसम्भवं राजपुत्रम्, अनेकैर्गुणैः शौर्य्यवीर्य्यादिभिः ओजःप्रसादा-दिभिश्च, रीतिभिः सदाचारैः गौड़ीप्रभृतिभिश्च, युतं समन्वितमपि, राज्यं विहाय, सन्तमिति शेषः, उत्तमाम्, अलङ्कृतिम् अलङ्कारं विना, कवेर्महाकाव्यमिव, अवमन्यते अवजानाति।

अत्र छेकानुप्राससंसृष्टः पूर्णोपमालङ्कारः ॥५॥

বাঙ্গালা—রাজপুত্র অনেকগুণসম্পন্ন ও সদাচারযুক্ত হইয়াও যদি

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

पिता च दद्यादुपयुक्तपुत्रके
भरं कियन्तं कमपि स्वयं वहेत् ।
तथाहि वेदः स्मृतिशास्त्रसञ्चये
स्ववाच्यशेषं बहुमर्थमार्पयत् ॥६॥
जरन्नहन्त्वास्मि जरातुरा तनुः
बलञ्च जातं च्युतिरच्युतामम् ।
धुरन्धरे कोढ़धुरा वसुन्धरा
न तत् स्थिरं स्थास्यति मे स्थिरापि सा ॥७॥

রাজ্যলাভ না করেন, তবে উত্তমালঙ্কারবিহীন কবির মহাকাব্যের ন্যায় তিনি কৃতীলোকের নিকট অবজ্ঞার পাত্র হইয়া থাকেন ॥৫॥

अन्वयः—पिता उपयुक्तपुत्रके कियन्तं भरं दद्यात् कमपि च स्वयं वहेत् । तथाहि वेदः स्मृतिशास्त्रसञ्चये स्ववाच्यशेषं बहुं अर्थं आर्पयत् ॥६॥

पितेति । किञ्चेति चार्थः, पिता, उपयुक्तपुत्रके, कियन्तं भरं कार्य्यभारम्, दद्यात्, कमपि च भरं कार्य्यभरम्, स्वयमात्मना, वहेत् । तथाहि, वेदः, स्म तिशास्त्राणां सञ्चयः समूह इति तस्मिन्, स्ववाच्यशेषं निजवक्तव्यावशिष्टम्, बहुं प्रचुरम्, अर्थं विषयम् आर्पयत् अर्पितवान् । "अप्राप्ते भास्करे कन्यां शेषभूतैस्त्रिभिर्दिनैः । अर्घ्यं दद्युरगस्त्याय गौड़देशनिवासिनः ॥" इत्यादिवदिति भावः ।

अत्रापि सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः ।

"पुत्रक" इत्यनुकम्पायां कप्रत्ययः ॥६॥

বাঙ্গালা—পিতা উপযুক্ত পুত্রের উপরে কিছু ভার দিবেন এবং কিছু নিজে বহন করিবেন। বেদ স্মৃতিশাস্ত্রের উপরে নিজবক্তব্যের অবশিষ্ট বহু বিষয় অর্পণ করিয়াছে ॥৬॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

जनेन जीर्णेन्द्रियशालिना सता
प्रजावतीं कारयितुं विशक्तिना।
धरावधानात् परिरक्षिताप्यसौ
च्छलेन वीरं परमेव गच्छति ॥८॥

अन्वयः—अहञ्च जरन् अस्मि, तनुः (च) जरातुरा, बलञ्च क्षितिरक्षणाक्षमं जातं। तत् धुरन्धरैकोढ़धुरा सा वसुन्धरा स्थिरापि मे स्थिरं न स्थास्यति ॥७॥

स्वपक्षे चिन्तामाह जरन्निति। अहञ्च जरन् वृद्धः अस्मि, तनुः शरीरञ्च जरया वार्द्धकेन आतुरा पीड़िता, बलं दैहिकी मानसिकी शक्तिश्च, क्षितिरक्षणे राज्यपालने, अक्षममशक्तं जातम्। तत्तस्मात्, धुरन्धरैः राज्यभारवहनक्षमैः जनैः एकं केवलम् ऊढ़ा धृता धूर्भारो यस्याः सा तथोक्ता, सा प्रसिद्धा, वसुन्धरा पृथिवी, स्थिरापि अचलापि, मे ममाधिकारे, स्थिरं यथा स्यात्तथा, न स्थास्यति। ममाक्षमतया शत्रुभिर्ग्रहणावश्यम्भावादिति भावः।

अत्र स्थिरत्वरूपे कारणे सत्यपि स्थिरस्थितिरूपतत्कार्य्याभावा-द्विशेषोक्तिरलङ्कारः, छेकानुप्रासो वृत्त्यनुप्रासश्चेति संसृष्टिः।

"जीनो जीर्णो जरन्नपि" इत्यमरः।

धुरेति "धुरमक्षस्य च" इति राजादित्वादत्प्रत्यये "स्त्रियामादा" इति आप्रत्ययः ॥७॥

বাঙ্গালা—আমি বৃদ্ধ হইয়াছি, আমার শরীরও জরাজীর্ণ হইয়া গিয়াছে এবং দেহ মনের শক্তিও রাজ্য রক্ষায় অক্ষম হইয়া পড়িয়াছে। সুতরাং রাজ্যভার বহনসমর্থ পুরুষেরাই কেবল যাহার ভারবহন করিয়া আসিতেছেন, সেই পৃথিবী (রাজ্য) অচলা হইয়াও আমার অধিকারে স্থিরভাবে থাকিবে না ॥৭॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

असौ पतिप्रेम नहि व्यपेक्षते
नवा स्मरत्याद्यभवां कृतज्ञताम्।
विकृष्यमाणा पुरुषैर्बलात् परैः
भवेच्च तेष्वेव मुदा वशंवदा ॥९॥

अन्वयः—जनेन जीर्णेन्द्रियशालिना प्रजावतीं कारयितुं विशक्तिना (च) सता अवधानात् परिरक्षिता अपि असौ धरा छलेन परं वीरमेव गच्छति ॥८॥

जनेनेति। जनेन, जीर्णैः स्वस्वकार्य्याक्षमैः इन्द्रियैर्नयनादिभिः शालते युज्यत इति तेन, अन्यत्र जीर्णेन्द्रियेण क्षीणमेहनेन शालत इति तेन, अतएव प्रजावतीं प्रशस्तजनयुक्तां सन्तानयुक्ताञ्च, कारयितुम्, विगता शक्तिः सामर्थ्यं यस्य तेन विशक्तिना च सता, अवधानात् चित्तैकाग्र्यात्, परिरक्षिता अपि, असौ धरा पृथिवी भार्य्या च छलेन, परमन्यम्, वीरं बलवन्तं जनमेव, गच्छति आश्रयते।

अत्र प्रजाजननशक्त्यभावं प्रति जीर्णेन्द्रियशालिनेति पदस्यार्थो हेतुरिति पदार्थहेतुकं काव्यलिङ्गमलङ्कारः, श्लिष्टविशेषणसाम्येन कार्य्य-साम्येन च धरायां स्त्रीव्यवहारसमारोपात् समासोक्तिश्चानयोरङ्गाङ्गि-भावेन सङ्करः।

"प्रजा स्यात् सन्ततौ जने" इत्यमरः।

प्रजावतीमिति पक्षे प्रशंसायां वतुः ॥८॥

বাঙ্গালা—ইন্দ্রেয়ের জীর্ণতাবশতঃ প্রজাবর্গের উন্নতিবিধানে অসমর্থ মানুষ যদি বিশেষ সাবধানতা সহকারেও রক্ষা করিতে থাকে, তথাপি এই পৃথিবী ছলপূর্ব্বক অন্য বীরের হস্তগত হইয়া যায় ॥৮॥

अन्वयः—असौ पतिप्रेम नहि व्यपेक्षते, आद्यभवां कृतज्ञतां वा न स्मरति, परैः पुरुषैः बलात् विकृष्यमाणा (सती) तेष्वेव मुदा वशंवदा भवेच्च ॥९॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

विलक्षणं रज्यति रक्षणक्षणे
विचक्षणा पण्यबधूरपि प्रिये।
इयन्तु रक्षाक्षण एव दुष्कृता
वसुन्धरासूयति हन्त पुष्णते ॥१०॥

असाविति। असौ धरा स्त्री च, पतिप्रेम राजवात्सल्यं भर्त्तृप्रणयञ्च, नहि व्यपेक्षते, आद्यभवां प्रथमजाताम्, कृतज्ञतां वा न स्मरति तत्स्मरणेन तदनुरूपं कार्य्यं न करोतीत्यर्थः। परैः पुरुषेन्द्रैः पुंभिश्च, बलात् विकृष्यमाना आकृष्यमाणा सती, तेषु परपुरुषेष्वेव, मुदा हर्षेण, वशंवदा अधीना, भवेच्च।

अत्रापि कार्य्यसाम्येन धरायां कुलटाव्यवहारसमारोपात् समासोक्तिरलङ्कारो वृत्त्यनुप्रासश्चानयोः संसृष्टिः ॥९॥

বাঙ্গালা—এই পৃথিবী পতিপ্রণয়ের অপেক্ষা রাখে না, কিংবা পূর্ব্বজাত কৃতজ্ঞতা স্মরণ করে না এবং পরপুরুষ আসিয়া বলপূর্ব্বক আকর্ষণ করিলে আনন্দ সহকারে তাহারই বশীভূত হইয়া থাকে ॥৯॥

अन्वयः—विचक्षणा पण्यबधूरपि रक्षणक्षणे प्रिये विलक्षणं रज्यति। हन्त! इयं दुष्कृता वसुन्धरातु रक्षाक्षणे एव पुष्णते असूयति ॥१०॥

विलक्षणमिति। विचक्षणा कालज्ञा, पण्यबधूर्वेश्यापि, रक्षणक्षणे रक्षासमये, प्रिये पत्यौ, विगतं लक्षणम् अननुरक्तत्वचिह्नं यस्मिन् कर्म्मणि तद्‌यथा तथा, रज्यति अनुरक्ता तिष्ठति। हन्त खेदे, इयं दुष्कृता दुःखेनायत्तीकृता, वसुन्धरा भूमिस्तु, रक्षाक्षणे रक्षणसमय एव, पुष्णते पोषणं कुर्वते जनाय, असूयति दोषाविष्कारं करोतीव, पराश्रयोद्देशादिति भावः।

अत्र पण्यबध्वपेक्षया वसुन्धराया न्यूनत्ववर्णनाद्व्यतिरेकालङ्कारः,

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

जरन्तमुद्वीक्ष्य दुरन्तशत्रवः
समीहितारः किल जेतुमेव माम् ।
गुहागतो ध्वान्तचयो दिवातने
दिवः पतङ्गं निपतन्तमिच्छति ॥११॥

प्रतीयमाना क्रियोत्प्रेक्षा चानयोरङ्गाङ्गिभावेन सङ्करः, सोऽपि पुनर्वृत्त्यनुप्रासेन संसृज्यते ।

पुष्णात इति "क्रुधद्रुहेर्ष्य"त्यादिना सम्प्रदानत्वाच्चतुर्थी ॥१०॥

বাঙ্গালা—কালজ্ঞা বেশ্যাও রক্ষা করিবার সময়ে পতির প্রতি বিশেষ অনুরক্ত থাকে ; কিন্তু দুঃখে অধিকৃত এই পৃথিবী রক্ষা করিবার সময়েই যেন রক্ষকের প্রতি অসূয়া প্রকাশ করে ॥১০॥

अन्वयः—दुरन्तशत्रवः मां जरन्तं उद्वीक्ष्य जेतुमेव समीहितारः किलः । दिवातने गुहागतः ध्वान्तचयः पतङ्गं दिवः निपतन्तं इच्छति ॥११॥

जरन्तमिति । दुरन्ता दुर्द्धर्षाश्च ते शत्रवश्चेति ते दुरन्तशत्रवः, माम्, जरन्तं वृद्धम्, उद्वीक्ष्य अवलोक्य, जेतुमेव, समीहितारः चेष्टिष्यन्ते किल । दिवातने दिवसचर्य्ये, गुहागतः पर्वतकन्दरस्थः, ध्वान्तचयः अन्धकारसमूहः, पतङ्गं सूर्य्यम्, दिवो गगनात्, निपतन्तमिच्छतीव, तस्य शत्रुरूपत्वादित्याशयः ।

अत्र दृष्टान्तालङ्कारः, प्रतीयमाना क्रियोत्प्रेक्षा चानयोरङ्गाङ्गिभावेन सङ्करः, छेकानुप्रासश्चेति समुदाये संसृष्टिः ।

"पतङ्गौ पक्षिसूर्य्यौ च" इत्यमरः ।

दिवा वर्त्तत इति दिवातनः "सायं चिरम्" इत्यादिना तनट्प्रत्ययः । स च चयस्य दिनरात्र्युभयवृत्तिकतया सङ्गच्छते ॥११॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

अतीतवान् षट्परिपन्थिमन्थनं
तथापि तेषां विषयं विशामि चेत्।
तदा क्षमेरन्न समक्षमागतं
विधुं तुदत्येव विधुन्तुदो न किम् ॥१२॥

বাঙ্গালা—দুর্দ্ধর্ষ শত্রুরা আমাকে বৃদ্ধ দেখিয়া নিশ্চয়ই জয় করিবার চেষ্টা করিবে। কারণ, দিনের বেলায় পর্ব্বতগুহাস্থিত অন্ধকারসমূহ যেন আকাশ হইতে সূর্য্যের পতন কামনা করে বলিয়া মনে হয় ॥১১॥

অন্বয়:—षट्परिपन्थिमन्थनं अतीतवान्, तथापि तेषां विषयं चेत् विशामि, तदा समक्षं आगतं (मां) न क्षमेरन्। विधुन्तुदः समक्षमागतं विधुं न किं तुदत्येव ॥१२॥

अतीतवानिति षण्णां परिपन्थिनाम् अन्तःशत्रूणां काम-क्रोध-लोभ-मोह-मद-मात्सर्य्याणाम्, मन्थनं पीड़नम्, अतीतवान् अतिक्रान्तवान्, वार्द्धकागमेन क्रमशो विषयवर्ज्जनादिति भावः। तथापि, तेषां षट्-परिपन्थिनाम्, विषयं गोचरम्, चेद्यदि, विशामि राज्यशासनार्थं प्रत्यावृत्त्य गच्छामि, तदा समक्षमागतं माम्, न क्षमेरन् ते षट्-परिपन्थिनो न वर्जयेयुरित्यर्थः। तथा च विधुन्तुदो राहुः, समक्ष-मागतं विधुं चन्द्रम्, न किम्, तुदत्येव? ग्रहणेन व्यथयत्येव? अपि तु व्यथयत्येवेति तात्पर्य्यम्।

अत्रापि साधर्म्म्येण दृष्टान्तालङ्कारश्छेकानुप्रासेन संसृज्यते।

"अभिघातिपरारातिप्रत्यर्थिपरिपन्थिनः" इति "तमस्तु राहुः स्वर्भानुः सैंहिकेयो विधुन्तुदः" इति चामरः।

विधुं तुदतीति विधुन्तुदः, "विध्वरुषोस्तुदः" इति तुदतेः खश्-प्रत्यये "अरुर्द्विषदजन्तस्य मुम्" इति मकारागमः ॥१२॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

নিমীল্য নেত্রে তুলসীতলস্থিতে
ময়ি ক্ষণং বা হরিভারতীরতে।
সমন্ততঃ সন্ততমন্তিকে পুরঃ
পুরেত্য দুঃখী সুজনো জনিষ্যতি ॥১৩॥

বাঙ্গালা—আমি বৃদ্ধতাবশতঃ ক্রমে ছয়টা অন্তঃশত্রুর উৎপীড়ন অতিক্রম করিয়াছি, তথাপি যদি পুনরায় সেগুলির গোচরীভূত হই, তবে তাহারা সমীপাগত আমাকে ক্ষমা করিবে না। কারণ, চন্দ্র সমক্ষে আসিলে রাহু তাঁহাকে গ্রাস করিয়া ব্যথিত করে না কি? ॥১২॥

অন্বয়ঃ—ময়ি ক্ষণং নেত্রে নিমীল্য তুলসীতলস্থিতে হরিভারতীরতে বা (সতি) পুরা সুজনঃ সমন্ততঃ পুরঃ (চ) অন্তিকে এত্য সন্ততং (এব) দুঃখী জনিষ্যতি ॥১৩॥

নিমীল্যেতি। ময়ি ক্ষণম্, নেত্রে নিমীল্য, তুলসীতলস্থিতে হরিধ্যান-পরায়ণে ইত্যর্থঃ। ক্ষণং হরিভারতীরতে হরিকথাসংসক্তে বা সতি, পুরা আগামিনি কালে, সুজনঃ, সমন্ততঃ সর্ব্বাসু দিক্ষু, পুরঃ অগ্রতশ্চ, অন্তিকে এত্য আগত্য, সন্ততং সর্ব্বদৈব, দুঃখী, জনিষ্যতি ভবিষ্যতি, বিষয়ান্তরনিবিষ্টচিত্তস্য মম সকাশাৎ, লব্ধব্যার্থালাভাদিতি ভাবঃ।

অত্র ছেকানুপ্রাসবৃত্ত্যনুপ্রাসয়োঃ সংসৃষ্টিরলঙ্কারঃ।

"নিকটাগামিকে পুরা" ইত্যমরঃ।

জনিষ্যতীতি "জন জননে" ইত্যস্য রূপম্ ॥১৩॥

বাঙ্গালা—পরবর্ত্তীকালে আমি নয়ন মুদ্রিত করিয়া ক্ষণকাল তুলসীবৃক্ষের তলে থাকিলে, কিংবা হরিকথায় আসক্ত রহিলে, সজ্জনেরা আমার সকল দিকে কিংবা সম্মুখে নিকটে আসিয়া, (আমার নিকট লব্ধব্যবিষয় লাভ করিতে না পারায়) সর্ব্বদাই দুঃখিত হইবেন ॥১৩॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

अधीतविद्या कुमतौ न विद्यते
न कृष्णपक्षे हरिणाङ्कवर्द्धनम्।
गतं वयो न प्रतिवर्त्तते पुनः
न चापि वृद्धे पुन ऋद्धिवासना॥१४॥
न मोहितो वासनयानया पुनः
भवाम्यभव्यस्य भवस्य नश्यतः।
समस्तमस्ताचललीनमौलिना
मरीचिमन्वेति विरोचनो न च॥१५॥

अन्वयः—अधीतविद्या कुमतौ न विद्यते, हरिणाङ्कवर्द्धनं कृष्णपक्षे न (भवति)। गतं वयः पुनर्न प्रतिवर्त्तते। वृद्धे चापि पुनः ऋद्धिवासना न (युज्यते)॥१४॥

अधीतेति। अधीतविद्या, कुमतौ दुर्मेधसि जने, न विद्यते न तिष्ठति; हरिणाङ्कस्य चन्द्रस्य वर्द्धनं वृद्धिः, कृष्णपक्षे, न भवति। गतम् अतीतं वयश्च, पुनर्न प्रतिवर्त्तते, वृद्धे चापि जने, पुनः ऋद्धिवासना सम्पत्तिलालसा, न युज्यते इति शेषः।

अत्र त्रय एव दृष्टान्तालङ्काराः, छेकानुप्रासेति संसृष्टिः॥१४॥

বাঙ্গালা—মেধাশূন্যলোকে অধীতবিদ্যা থাকে না, কৃষ্ণপক্ষে চন্দ্রের বৃদ্ধি হয় না, অতীত বয়স আবার ফিরিয়া আসে না এবং বৃদ্ধলোকের পুনরায় সমৃদ্ধি কামনা সঙ্গত হয় না॥১৪॥

अन्वयः—अभव्यस्य नश्यतः (च) भवस्य अनया वासनया पुनः मोहितः न भवामि। विरोचनः अस्ताचललीनमौलिना समस्तं मरीचिं न च अन्वेति॥१५॥

नेति। अभव्यस्य अमङ्गलरूपस्य, नश्यतश्च, भवस्य संसारस्य, अनया विषयसम्बन्धिन्या, वासनया कामनया, पुनर्मोहितो न भवामि। तद्यथाहि,

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

इहास्मि साम्भोनिधिमेदिनीश्विता
सुते च राज्ञि प्रभवामि तत्पिता ।
तदेव राज्यं वितरामि सूनवे
निजोन्नतिं साधु सुधीर्जहाति न ॥१६॥

विरोचनः सूर्य्यः, अस्ताचले लीनः प्रविष्टो यो मौलिः शिरोभागस्तेन, समस्तम्, मरीचिं किरणम्, न च नैव अन्वेति पूर्ववद्गृह्णाति । ममापि तथैव चरमावस्थायामवस्थानमिति भावः ।

अत्रापि पूर्ववद्दृष्टान्तोऽलङ्कारः, वृत्त्यनुप्रासश्छेकानुप्रासश्चेति संसृष्टिः ।

"भावुकं भविकं भव्यं कुशलं क्षेममस्त्रियाम्" इत्यमरः । "भवः संसारसम्प्राप्तिश्रेयःशङ्करजन्मसु" इति विश्वः ॥१५॥

বাঙ্গালা—অমঙ্গলময় ও বিনশ্বর সংসারের এই বাসনায় আর মোহিত হইব না । কারণ, সূর্য্য অস্তাচলপ্রবিষ্ট মস্তকদ্বারা পূর্ব্বের ন্যায় আর সমস্ত কিরণ গ্রহণ করেন না ॥১৫॥

अन्वयः—इह साम्भोनिधिमेदिनीश्विता अस्मि, सुते राज्ञि च तत्पिता प्रभवामि । तदेव सूनवे राज्यं वितरामि । सुधीः निजोन्नतिं साधु न जहाति ॥१६॥

स्वचिन्तामुपसंहरति इहेति । इह इदानीम्, अम्भोनिधिभिः समुद्रैः सहेति साम्भोनिधिर्या मेदिनी पृथिवी तस्या ईश्विता पतिरस्मि, सुते पुत्रे, राज्ञि राजनि सति च, तस्य राज्ञः पिता, ततोऽपि महागौरवास्पदमित्यर्थः, प्रभवामि । तत्तस्मादेव हेतोः सूनवे पुत्राय रुक्मिणे, राज्यं वितरामि ददामि । तथाहि सुधीः सुबुद्धिर्जनः, निजोन्नतिम्, साधु सम्यक्, न जहाति न त्यजति । उपायासत्त्वे तु असम्यक् जहात्येवेति भावः ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

स मन्त्रयन्नित्थमथान्तरात्मना
न्यवीविदत् स्वञ्च निमन्त्र्य मन्त्रिणम् ।
समुद्रयोः सम्मुखवाहिनोरिव
तरङ्गवृन्दं सुखमैधतानयोः ॥१७॥

अत्र सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः, छेकानु-प्रासश्चेत्यनयो संसृष्टिः ।

"ईश्वरः पतिरीशिता" इत्यमरः ॥१६॥

বাঙ্গালা—আমি এখন সসাগরা পৃথিবীর অধীশ্বর আছি, আর পুত্র রাজা হইলে তাহার পিতা হইব, অতএব পুত্রকে রাজ্য দান করিব। কারণ, বুদ্ধিমান্ লোক নিজেরসম্যক্ পরিত্যাগ করেন না ॥১৬॥

अन्वयः—अथ स अन्तरात्मना इत्थं मन्त्रयन् च मन्त्रिणं निमन्त्र्य स्वं न्यवीविदत् । सम्मुखवाहिनोः समुद्रयोः तरङ्गवृन्दमिव अनयोः सुखं ऐधत ॥१७॥

स इति । अथ अनन्तरम्, स भीष्मकः, अन्तरात्मना मनसा, इत्थं पूर्वोक्तप्रकारम्, मन्त्रयन् पर्य्यालोचयंश्च सन्, मन्त्रिणम्, निमन्त्र्य आहूय, स्वं प्रागुक्तं निजमभिप्रायम्, न्यवीविदत् विज्ञापितवान् । तदा च सम्मुखे वहतो जलगतिवैचित्र्यादावर्त्तसन्निधानाद्वा प्रसरत इति तयोः समुद्रयोः, तरङ्गवृन्दमिव अनयो राजमन्त्रिणोः, सुखम् आनन्दः, ऐधत अवर्द्धत ।

अत्र छेकानुप्राससंसृष्ट्या श्रौतोपमालङ्कारः ॥१७॥

বাঙ্গালা—তদনন্তর রাজা ভীষ্মক মনে মনে এইরূপ পর্য্যালোচনা করিতে থাকিয়া মন্ত্রীকে ডাকিয়া নিজের অভিপ্রায় জানাইলেন। তখন পরস্পর সম্মুখবর্ত্তী দুইটা সমুদ্রের তরঙ্গসমূহের ন্যায় রাজা ও মন্ত্রী দুই জনেরই আনন্দ বৃদ্ধি পাইল ॥১৭॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

तदैव दैवेन तयोश्च यत्नतः
सुताभिषेको द्रुतभावुकोऽभवत्।
जलेऽनुकूले पवने च पृष्ठगे
तरिप्रयाणे न भवेद्विलम्बनम् ॥१८॥
समुद्यतोरिङ्गितमात्रतस्तयोः
जनाः समीयुर्बहवो विधित्सवः।
कटाक्षमात्रेण करोति यत् प्रभुः
न तद्दरिद्रस्य हृदोऽपि गोचरः ॥१९॥

अन्वयः—तदैव दैवेन तयोः यत्नतश्च सुताभिषेकः द्रुतभावुकः अभवत्। जले अनुकूले पवने च पृष्ठगे सति तरिप्रयाणे विलम्बनं न भवेत् ॥१८॥

तदेति। तदैव मन्त्रिणः सम्मतिकाल एव, दैवेन सुखादृष्टेन, तयो राजमन्त्रिणोः, यत्नतश्च, सुतस्य राजपुत्रस्य रुक्मिणो यौवराज्ये अभिषेकः, द्रुतं भवतीति द्रुतभावुकः शीघ्रभावी, अभवत्। तथाहि जले, अनुकूले पुरोवाहिनि, पवने वायौ च, पृष्ठतः सम्मुखगामिनि सति, तरिप्रयाणे नौकाया गमने, विलम्बनम् अधिककालक्षेपः न भवेत्।

अत्र वैधर्म्येण दृष्टान्तोऽलङ्कारश्छेकानुप्रासेन संसृज्यते।

द्रुतभावुक इति "स्म-कम" इत्यादिना भवतेरुकञ् ॥१८॥

বাঙ্গালা—সেই সময় হইতেই দৈব এবং রাজা ও মন্ত্রীর যত্নে রাজপুত্রের রাজ্যাভিষেক সত্বর সম্ভবপর হইল। কারণ, জল অনুকূল ও বায়ু পৃষ্ঠগামী হইলে, নৌকার গমনে বিলম্ব হয় না ॥১৮॥

अन्वयः—बहवो जनाः समुद्यतोः तयोः इङ्गितमात्रतः विधित्सवः (सन्तः) समीयुः। प्रभुः कटाक्षमात्रेण यत् करोति, तत् दरिद्रस्य हृदोऽपि गोचरो न (स्यात्) ॥१९॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

विधत्स्व कर्म्म त्वमदस्त्वमप्यदः
इति प्रदिष्टा परिवारसंहतिः।
शिरस्यथाज्ञामपि मानसे मुदं
मुखे विकासञ्च समाप्नुवदेकदा ॥२०॥

समुद्यतोरिति। बहवो जनाः, समुद्यतो रुक्मिराज्याभिषेकार्थं सम्यक् उद्यमं कुर्वतोः, तयो राजमन्त्रिणोः, इङ्गितमात्रतः केवलनयनभङ्गित एव, विधित्सवः कार्य्यजातं विधातुमिच्छवः सन्तः, समीयुः तत्राजग्मुः। तथा च प्रभुर्धनस्वामी जनः, कटाक्षमात्रेण केवलनयनेङ्गितेन, यत्, करोति कर्त्तुं शक्नोति, तत् दरिद्रस्य, हृदो मनसोऽपि गोचरो विषयो न स्यात्।

अत्र सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः ॥१९॥

বাঙ্গালা—রাজা ও মন্ত্রী রাজপুত্রের রাজ্যাভিষেকের জন্য উদ্যত হইলে, তাঁহাদের ইঙ্গিতমাত্রই বহুলোক স্বস্বকার্য্য করিবার ইচ্ছায় সে স্থানে উপস্থিত হইল। কারণ, প্রভাবশালী লোক কেবল নয়নের ইঙ্গিতে যে কার্য্য করিতে পারেন, তাহা দরিদ্রলোকের মনের গোচরও হয় না ॥১৯॥

अन्वयः—अथ त्वं अदः त्वमपि अदः कर्म्म विधत्स्व इति प्रदिष्टा परिवासंहतिः शिरसि आज्ञां मानसे मुदं मुखे विकासञ्च एकदा अपि समाप्नुवत् ॥२०॥

विधत्स्वेति। अथ त्वम्, अद इदम्, तीर्थजलानयनं कर्म्म, विधत्स्व कुरु, त्वमपि अद इदम्, तीर्थमृत्तिकाहरणं कर्म्म विधत्स्व, इति प्रदिष्टा राज्ञा आदिष्टा, परिवारसंहतिः भृत्यगणः, शिरसि आज्ञाम् उक्तं राजादेशम्, मानसे हृदये, मुदमानन्दम्, मुखे विकासं हर्ष-प्रफुल्लताञ्च, एकदा अपि युगपदेव, समाप्नुवत् प्राप्नोत्।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

কলেবরৈ স্বচ্ছপরিচ্ছদচ্ছলাৎ
বিভৃত্য ভৃত্যালিরিবামদদ্যুতিম্।
বিড়ম্বয়ন্তী দিবিষত্তরঙ্গিণীং
সমন্ততস্তীর্থজলার্থমভ্যগাৎ ॥২১॥

অত্র সমাস্বদিত্যেকয়া ক্রিয়য়া আজ্ঞাদীনাং কর্ম্মতয়াভিসম্বন্ধাত্তুল্যযোগিতালঙ্কারশ্ছেকানুপ্রাসেন সংসৃজ্যতে।

সমাস্বদিতি "অস্ব গতিস্রবণযোঃ" ইত্যস্বধাতোর্ল্লঙ্যন্যাং রূপম্ ॥২০॥

বাঙ্গালা—'তুমি এই কার্য্য কর এবং তুমি ঐ কার্য্য কর' এইভাবে রাজা আদেশ করিলে, ভৃত্যগণ মস্তকে উক্ত রাজাদেশ, মনে আনন্দ এবং মুখে হর্ষপ্রফুল্লতা, এইগুলি একদাই ধারণ করিয়াছিল ॥২০॥

অন্বয়ঃ—ভৃত্যালিঃ স্বচ্ছপরিচ্ছদচ্ছলাৎ কলেবরৈ আমদদ্যুতিং বিভৃত্যেব দিবিষত্তরঙ্গিণীং বিড়ম্বয়ন্তী (সতী) তীর্থজলার্থং সমন্ততঃ অভ্যগাৎ ॥২১॥

কলেবর ইতি। ভৃত্যানামালিঃ শ্রেণী, স্বচ্ছানাং নির্ম্মলানাং পরিচ্ছদানাং বস্ত্রাদীনাং ছলাৎ, কলেবরৈ দেহে, আমদদ্যুতিং মনোগতহর্ষপ্রভাম্, বিভৃত্যেব ধারয়িত্বেব, দিবিষদাং দেবানাং তরঙ্গিণীং নদীং মন্দাকিনীম্, বিড়ম্বয়ন্তী আত্মনঃ শুভ্রতাসাম্যাৎ অনুকুর্ব্বতী সতী, তীর্থজলার্থম্, সমন্ততঃ সর্ব্বাসু দিক্ষু অভ্যগাৎ।

অত্র সাপহ্নবা ক্রিয়োৎপ্রেক্ষা আর্থোপমা চানয়োরঙ্গাঙ্গিভাবেন সঙ্করঃ, সোঽপি পুনর্ব্বৃত্ত্যনুপ্রাসাভ্যাং সংসৃজ্যতে ॥২১॥

বাঙ্গালা—ভৃত্যেরা শ্রেণীবদ্ধ হইয়া নির্ম্মল পরিচ্ছদের ছলে দেহে যেন আনন্দের প্রভা ধারণ করিয়া (পথে) স্বর্গগঙ্গার অনুসরণ করিতে থাকিয়া তীর্থজল আনয়ন করিবার জন্য সকল দিকে গমন করিল ॥২১॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

युतास्तदैकैकदिशं त्रयस्त्रयः
प्रवव्रजुः श्रेणिकृताः प्रजाव्रजाः।
शतत्रयाङ्कानिव तानलोकयन्
जनास्त्रयस्त्रिंशदधिश्रितान् पथि ॥२२॥
सितोपलैर्निर्म्मितहर्म्म्यपङ्क्तयः
विचित्रचित्रैर्बहुलैरलङ्कृताः।

अन्वयः—तदा युताः त्रयः त्रयः श्रेणिकृताः प्रजाव्रजाः एकैकदिशं प्रवव्रजुः। जनाः पथि तान् त्रयस्त्रिंशदधिश्रितान् शतत्रयाङ्कानिव अलोकयन् ॥२२॥

युता इति। तदा, युताः परस्परं मिलिताः, त्रयस्त्रयः, अश्रेणयः श्रेणयः कृता इति श्रेणिकृताः समसूत्रपातेन स्थिता इत्यर्थः, प्रजाव्रजा भृत्यजनसमूहाः, एकैकदिशम्, प्रवव्रजुः तीर्थजलाद्यानयनार्थं प्रतस्थिरे। जनाः, पथि, तान्, त्रयस्त्रिंशत् तदङ्कानित्यर्थः अधिश्रितान् आश्रितान्, शतत्रयस्य अङ्कानिव, पत्रारूढ़शतत्रयसंख्याक्षराणीव, अलोकयन् अपश्यन्।

अत्र छेकानुप्रासससंसृष्टा श्रौतोपमालङ्कारः।

"समूह-निवह-व्यूह-सन्दोह-विसर-व्रजाः" इत्यमरः।

श्रेणिकृता इति श्रेण्यादयश्चार्थवृत्तयः कृतादिभिः" इति समासः ॥२२॥

বাঙ্গালা—তৎকালে তিন তিন জন ভৃত্য শ্রেণীবদ্ধভাবে মিলিত হইয়া এক এক দিকে গমন করিয়াছিল; সুতরাং পথে তত্রত্য লোকেরা তাহাদিগকে (পত্রে লিখিত ৩৩৩) তিন শত তেত্রিশ অঙ্কের ন্যায় দেখিতেছিল ॥২২॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

पतत्पताकाभिरनेककान्तिभिः
कराञ्चलैराजुहुवुर्जनानिव ॥२३॥
वनावनीसद्मनि पद्मिनीजनः
विनिर्ममे सुन्दरकुन्दमालिकाम् ।
मुहुर्नितान्तं निजदन्तसन्ततिम्
अनाविलादर्शतले ददर्श च ॥२४॥

अन्वयः—बहुलैः विचित्रचित्रैः अलङ्कृताः सितोपलैर्निर्म्मितहर्म्म्यपङ्क्तयः अनेककान्तिभिः कराञ्चलैः जनान् आजुहुवुरिव ॥२३॥

अभिषेकोत्सवसज्जामाह श्लोकजातेन सितेति। बहुलैः, विचित्रचित्रैर्नानाविधालेख्यैः, अलङ्कृताः शोभिताः, सितोपलैः शुभ्रप्रस्तरैः, निर्म्मिताश्च ता हर्म्म्यपङ्क्तयो धनिभवनश्रेणयश्चेति ताः, अनेका विविधाः कान्तयः शोभा यासां ताभिः, पततां क्षमतया इतस्ततः प्रसरतां कराणामिव ध्वजानामित्यर्थः, पताकाभिः कराञ्चलैः हस्ताङ्गुलिभिः, जनान् आजुहुवुः आहूतवत्य इव ।

अत्र वाच्या भावाभिमानिनी क्रियोत्प्रेचालङ्कारश्छेकानुप्रासेन संसृज्यते ॥२३॥

বাঙ্গালা—নানাবিধ বহুতর চিত্রে পরিশোভিত ও শুভ্র প্রস্তর-নির্ম্মিত ধনিভবনগুলি বহুশোভায় শোভিত ও ক্ষুদ্র ক্ষুদ্র ধ্বজের উপরে নিবদ্ধ হস্তাঙ্গুলিতুল্য পতাকাদ্বারা লোকদিগকে যেন আহ্বান করিতে লাগিল ॥২৩॥

अन्वयः—पद्मिनीजनः वनावनीसद्मनि सुन्दरकुन्दमालिकां विनिर्ममे, अनाविलादर्शतले मुहुः नितान्तं निजदन्तसन्ततिं ददर्श च ॥२४॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

पुराङ्गनेषु प्रसृताङ्गनागणाः
अशूशुधन् याः किल शोधनीभृतः ।
द्विषां नु ता मूर्द्धसु धूलयो लयं
ययुर्यतोऽमी दमिता इव स्थिताः ॥२५॥

वनेति। पद्मिनी स्त्रीविशेषश्चासौ जनश्चेति पद्मिनीजनः, उत्तमयुवतिजन इत्यर्थः, वनावन्याम् उद्यानभूमौ यत् सद्म गृहं तत्र स्थित्वेति शेषः, सुन्दराणां कुन्दानां कुसुमानां मालिकां स्रजम्, विनिर्म्ममे जग्रन्थ। अनाविलं स्वच्छं यत् आदर्शतलं दर्पणोपरितनदेशस्तत्र, मुहुर्वारं वारम्, नितान्तं सातिशयम्, निजानां दन्तानां सन्ततिं श्रेणीम्, ददर्श च, कुन्ददन्तयोर्मध्ये कतरत् सुन्दरमिति पर्य्यवेक्षणार्थमिति भावः।

अतएवात्र पर्य्यायोक्तमलङ्कारः, निर्म्माणादर्शनयोः क्रिययोर्यौगपद्यात् क्रियासमुच्चयश्चानयोरङ्गाङ्गिभावेन सङ्करः, सोऽपि पुनश्छेकानुप्रासवृत्त्यनुप्रासाभ्यां संसृज्यते ॥२४॥

বাঙ্গালা—পদ্মিনী যুবতিরা উদ্যানভূমিতে সুন্দর সুন্দর কুন্দপুষ্পের মালা গাঁথিতে লাগিল এবং বার বার বিশেষ আগ্রহসহকারে নির্ম্মল দর্পণে নিজেদের দন্তশ্রেণী দেখিতে থাকিল ॥২৪॥

अन्वयः—शोधनीभृतः प्रसृताङ्गनागणाः पुराङ्गनेषु याः किल अशूशुधन्, धूलयः द्विषां मूर्द्धसु लयं ययुः नु। यतः अमी दमिताः इव स्थिताः ॥२५॥

पुरेति। शोधनीभृतः सम्मार्जनीधारिण्यः, प्रसृता विस्तृता बहुलाश्च ते अङ्गनागणा योषित्समूहाश्चेति ते, पुरस्य भीष्मकराजधान्या अङ्गनेषु चत्वरेषु, याः किल धूलिः, अशूशुधन् शोधितवत्यः, सम्मार्जनेन दूरीकृतवत्य इत्यर्थः, ता धूलयः, द्विषां भीष्मकशत्रूणाम्, मूर्द्धसु मस्तकेषु

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

সুবর্ণদণ্ডেষু সুবর্ণমণ্ডিতাঃ
পুরি পতাকাঃ পুরবশ্চকম্পিরে।
লঘুস্বভাবাশ্চপলাশ্চ সংস্থিতাঃ
প্রযান্তি জাতু স্থিরতাং স্থিরেঽপিন ॥২৬॥

ত্বয় বিলীনভাবেনাবস্থানম্, যযুর্নু প্রাপুঃ কিম্। যতঃ, অমী দ্বিষঃ, দমিতা অবনতমস্তকা ইব, স্থিতাঃ, তদ্ধূলিভারাদিতি ভাবঃ।

অত্র নুশব্দস্য শঙ্কার্থবোধকত্বাদ্বাচ্যা ভাবাভিমানিনী ক্রিয়োৎপ্রেক্ষালঙ্কারঃ, ছেকানুপ্রাসো বৃত্ত্যনুপ্রাসশ্চেতি সংসৃষ্টিঃ।

"সম্মার্জনী শোধনী স্যাৎ" ইত্যমরঃ ॥২৫॥

বাঙ্গালা—সম্মার্জনীধারিণী রমণীরা রাজধানীর চত্বরে (উঠানে) সম্মার্জন করিয়া করিয়া যে সকল ধূলি অপসারিত করিতেছিল, সেই সকল ধূলি যাইয়া ভীষ্মকরাজার শত্রুগণের মস্তকে লুক্কায়িতভাবে অবস্থান করিতেছিল কি? যেহেতু সেই শত্রুরা (ভারবশতই যেন) অবনতমস্তকে রহিয়াছিল ॥২৫॥

অন্বয়ঃ—পুরি সুবর্ণদণ্ডেষু সুবর্ণমণ্ডিতাঃ পুরবঃ পতাকাঃ চকম্পিরে। লঘুস্বভাবাঃ চপলাশ্চ স্থিরে সংস্থিতা অপি জাতু স্থিরতাং ন প্রযান্তি ॥২৬॥

সুবর্ণেতি। পুরি ভীষ্মকরাজধান্যাম্, সুবর্ণদণ্ডেষু স্বর্ণধ্বজেষু, সুবর্ণমণ্ডিতাঃ সুন্দরবর্ণশোভিতাঃ, পুরবঃ প্রচুরাঃ, পতাকা বৈজয়ন্ত্যঃ, চকম্পিরে বায়ুবেগেন আন্দোলিতা বভূবুঃ। লঘুস্বভাবাঃ স্বভাবত এব ভারশূন্যাঃ, চপলাঃ স্বভাবত এব চঞ্চলাশ্চ পদার্থাঃ, স্থিরে অচলে পদার্থে, সংস্থিতা অবস্থিতা অপি, জাতু কদাচিদপি, স্থিরতাম্, ন প্রযান্তি ন প্রাপ্নুবন্তি। পতাকানাং স্বভাবত এব লঘুত্বাৎ চপলত্বাচ্চ কম্পনমিত্যাশয়ঃ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

धनुर्भटानां परितो रणं यथा
पथो मुखस्योपरि तोरणं बभौ।
विहङ्गिनिमाः स्मात्र खगा नदन्ति न
कृताश्च वृक्षच्छदनेन दन्तिनः ॥२७॥

अत्र सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारश्छेकानुप्रासश्चेति संसृष्टिः।

"पुरुहं पुरु भूयिष्ठम्" इति "कदाचिज्जातु" इति चामरः। पूर्वं क्षुद्राः पताका इह तु बहव्य इति न पुनरुक्तिदोषः ॥२६॥

বাঙ্গালা—সেই রাজধানীতে স্বর্ণদণ্ডনিবদ্ধ ও সুন্দরবর্ণশোভিত বহুতর পতাকা আন্দোলিত হইতে থাকিল। কারণ, স্বভাবতঃ লঘু (হাল্‌কা) ও চঞ্চল পদার্থ সকল স্থিরপদার্থে থাকিয়াও কথনই স্থিরত্ব প্রাপ্ত হয় না ॥২৬॥

अन्वयः—यथा रणं परितः भटानां धनुः, (तथा) पथः मुखस्य उपरि तोरणं बभौ। अत्र विहङ्गिनिमाः खगाः वृक्षच्छदनेन कृता दन्तिनश्च न नदन्ति स्म ॥२७॥

धनुरिति। यथा, रणं परितः समरस्थलस्य सर्वत्र, भटानां योद्धृणाम्, धनुः अर्द्धगोलाकारं कार्म्मुकं भाति; तथा, पथो राजभवनप्रवेशमार्गस्य, मुखस्य सम्मुखदेशस्य, उपरि तोरणम्, अर्द्धगोलाकारं पुरद्वारम्, बभौ। अत्र तोरणोपरि विहङ्गिनिमा विधानेन निर्वृत्ताः कृत्रिमाः, खगाः पक्षिणः, वृक्षाणां छदनेन पत्रसमूहेन, कृता द्वारोभयपार्श्वे निर्म्मिताः, दन्तिनो गजाश्च, न नदन्ति स्म न शब्दायन्ते स्म।

अत्र पूर्वार्द्धे श्रौतोपमा मध्ययमकञ्च, उत्तरार्द्धं तु नदन्तीत्येकया क्रियया खगदन्तिनोः कर्त्तृतयाभिसम्बन्धात्तुल्ययोगिता अन्त्ययमकञ्च, इत्येतेषां परस्परनिरपेक्षतया संसृष्टिः।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

অমন্দসিন্দূরবিসুন্দরীকৃত-
বিশালকুম্ভা গজরাজরাজয়ঃ ।
দিনান্তসন্ধ্যারুণরাগরঞ্জিতাং
সমন্ববর্ত্তন্ত বলাহকাবলীম্ ॥২৮॥

"ভটা যোধাশ্চ যোদ্ধারঃ," "তোরণোঽস্ত্রী বহির্দ্বারম্," "পত্রং পলাশং ছদনম্" ইত্যাদি চামরঃ ।

রণমিতি "তসোভয়াভিঃ পরিসর্বৈঃ" ইতি পরিতঃশব্দযোগে দ্বিতীয়া । বিহিনিভা ইতি বিপূর্ব্বধাঞ্ধাতোঃ "ড্বুনুবন্ধাক্ত্রিমক্ তেন নির্ব্বৃত্তেঃ" ইতি ক্রিমক্প্রত্যয়ঃ ॥২৭॥

বাঙ্গালা—রণস্থলের সর্ব্বত্র যোদ্ধাদের ধনু যেমন শোভা পায়, সেইরূপ রাজভবনপ্রবেশপথের সম্মুখে তোরণ শোভা পাইতেছিল। আর সেই তোরণের উপরে কৃত্রিম পক্ষিগণ এবং তোরণের উভয়পার্শ্বে বৃক্ষপত্রনির্ম্মিত হস্তিগণ শব্দ করিতেছিল না ॥২৭॥

অন্বয়ঃ—অমন্দসিন্দূর-বিসুন্দরীকৃত-বিশাল-কুম্ভাঃ গজরাজরাজয়ঃ দিনান্ত-সন্ধ্যারুণরাগ-রঞ্জিতাং বলাহকাবলীং সমন্ববর্ত্তন্ত ॥২৮॥

অমন্দেতি। অমন্দেন অনল্পেন সিন্দূরেণ বিসুন্দরীকৃতা বিশিষ্ট-মনোহরীকৃতা বিশালাঃ কুম্ভাঃ যাসাং তাঃ, গজরাজানাং করীন্দ্রাণাং রাজয়ঃ শ্রেণয়ঃ, দিনান্তসন্ধ্যায়াঃ সায়ংসন্ধ্যায়া অরুণেন রাগেণ বর্ণেন রঞ্জিতাম্, বলাহকাবলীং মেঘশ্রেণিম্, সমন্ববর্ত্তন্ত সম্যক্ অন্বকুর্বন্ ।

অত্র আর্থীপমালঙ্কারঃ, বৃত্ত্যনুপ্রাসচ্ছেকানুপ্রাসয়োশ্চৈতেষাং সংসৃষ্টিঃ ॥২৮॥

বাঙ্গালা—প্রচুর সিন্দূরদ্বারা যেগুলির বিশাল কুম্ভ সকল বিশেষ সুন্দর করা হইয়াছিল, সেই বৃহৎ হস্তিগণ সায়ংসন্ধ্যারাগে রঞ্জিত মেঘশ্রেণীর অনুকরণ করিতেছিল ॥২৮॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

तुरङ्गमा यत्र तरङ्गतां गताः
जलप्रवाहा निवहा नृणां पुनः।
सुधाभसौधा जलयानसञ्चयाः
तरङ्गिणी सा किमभूत् पुरी परा ॥ ,९॥
नटैश्चमत्कारिणि नाटमन्दिरे
सहायनीकृत्य नटीः पटीयसीः।
तिरस्करिण्यावलिरञ्चिता च सा
दिदृक्षमाणांस्तरुणानवारुणत् ॥३०॥

अन्वयः—यत्र तुरङ्गमाः तरङ्गतां गताः नृणां निवहाः पुनः जलप्रवाहाः सुधाभसौधाः (च) जलयानसञ्चयाः, सा पुरी किं परा तरङ्गिनी अभूत् ॥२९॥

तुरङ्गमा इति। यत्र पुर्य्याम्, तुरङ्गमा अश्वाः, तरङ्गताम् उत्पतन-साम्यात् वीचित्वं गताः प्राप्ताः, नृणां मानुषाणाम्, निवहाः समूहाः, पुनः, जलप्रवाहाः, सुधाभाः सुधावत् शुभ्रवर्णाश्च ते सौधा राजभवनानि चेति ते च, जलयानसञ्चयाः शुभ्रवर्णपोतसमूहाः आसन्, सा पुरी भीष्मकराजधानी, किम्, परा अन्या, तरङ्गिणी नदीस्वरूपा, अभूत् आसीत्।

अत्र साङ्गं रूपकमलङ्कारः, पूर्व्ववदनुप्रासौ चेति संसृष्टिः।

"सौधोऽस्त्री राजसदनम्" इत्यमरः ॥२९॥

বাঙ্গালা—যে রাজধানীতে অশ্বগণ ছিল—তরঙ্গস্বরূপ, আবার লোকসমূহ ছিল—জলপ্রবাহস্বরূপ এবং সুধার ন্যায় শুভ্রবর্ণ রাজভবনগুলি ছিল—শুভ্রবর্ণ পোতসমূহস্বরূপ, সেই রাজধানীটা কি অপর নদীস্বরূপ হয় নাই? ॥২৯॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

निमन्त्रिता मन्त्रिभिरेत्य भूभृतः
निजप्रभाभिः समभासयन् सभाम् ।
तदीयतेजोविजितः प्रभाकरः
महावितानेन तिरस्कृतः स्थितः ॥३१॥

अन्वयः—चमत्कारिणि नाटमन्दिरे नटैः पटीयसीः नटीः सहायनीकृत्य (या) तिरस्करिण्यावलिः उच्छ्रिता, सा दिदृक्षमाणान् तरुणान् अवारयत् ॥३०॥

नटैरिति । चमत्कारिणि सौन्दर्य्येण विस्मयजनके, नाटमन्दिरे नृत्यशालायाम्, नटैः, पटीयसीर्नृत्यादिनिपुणा नटीः, सहायनीकृत्य सहचरीः कृत्वा, या तिरस्करिण्यावलिः यवनिकाश्रेणी, उच्छ्रिता उद्धृत्य बद्धा, सा, दिदृक्षमाणान् अभिनयं द्रष्टुमिच्छतः, तरुणान् युवकान्, अवारयत् वैचित्र्यातिरेकात् गमनान्निवारयत् । तरुणानामेव नटी-नैपुण्यदर्शनादावौत्सुक्यातिरेकात् तरुणपदमुपात्तम् ।

अत्र छेकानुप्रासवृत्त्यनुप्रासयोः संसृष्टिरलङ्कारः ।

"यवनिका स्यात्तिरस्करिणी च सा" इत्यमरः ॥३०॥

বাঙ্গালা—নটেরা নৃত্যগীতাদিনিপুণ নটীগণকে সহচর করিয়া চমৎকার নাটমন্দিরের মধ্যে যে যবনিকা- (সিন) গুলি উপরে বন্ধন করিয়াছিল, সেগুলি অভিনয়দর্শনার্থী যুবকদিগকে অবরুদ্ধ রাখিয়া-ছিল ॥৩০॥

अन्वयः—निमन्त्रिता भूभृतः मन्त्रिभिः (सह) एत्य निजप्रभाभिः सभां सम-भासयन् । प्रभाकरः तदीयतेजोविजितः, (अतएव) महावितानेन तिरस्कृत (सन् इव) स्थितः ॥३१॥

निमन्त्रिता इति । निमन्त्रिता भीष्मकेणाहूताः, भूभृतो राजानः, मन्त्रिभिः सह, एत्य आगत्य, निजप्रभाभिः स्वकीयभूषणादिदीप्तिभिः,

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

विपश्चितः पश्चिमतः प्रतिष्ठिताः
अहर्म्मुखे पूर्व्वमुखाश्च भूभृतः ।
विरेजुरेके तु यमादिसञ्चयात्
न तादृगन्ये यमवश्यवर्त्तिनः ॥३२॥

सभाम्, समभासयन् प्रकाशयन् । प्रभाकरः सूर्य्यः, तदीयैस्तेजोभिर्भूभृत-प्रभाभिर्विजितः, अतएव महावितानेन विशालचन्द्रातपेन, तिरस्कृत आवृतः सन्निव स्थितः । अन्योऽपि परेण विजितः सुतरामपमानाद्-भित्याद्यावृतस्तिष्ठति ।

अत्र सूर्य्यस्य विजितत्वासम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्ति-रलङ्कारः, प्रतीयमाना क्रियोत्प्रेक्षा चानयोरङ्गाङ्गिभावेन सङ्करः, सोऽपि पुनश्छेकानुप्रासवृत्त्यनुप्रासाभ्यां संसृज्यते ॥३१॥

বাঙ্গালা—নিমন্ত্রিত রাজারা মন্ত্রিগণের সহিত আসিয়া আপন আপন বসনভূষণের প্রভায় সেই সভাটীতে উদ্ভাসিত করিয়াছিলেন। সূর্য্য তাঁহাদের তেজে পরাজিত হওয়ায় বিশাল চন্দ্রাতপে আবৃত হইয়াই যেন রহিয়াছিলেন ॥৩১॥

अन्वयः—अहर्म्मुखे विपश्चितः पश्चिमतः भूभृतः पूर्वमुखाः प्रतिष्ठिताः एके यमादिसंचयात् विरेजुः, यमवश्यवर्त्तिनः अन्ये तु तादृक् न ॥३२॥

विपश्चित इति । अहर्म्मुखे प्रत्यूषकाले, विशेषेण परिचिन्वन्ति शास्त्राण्यवगच्छन्तीति विपश्चितः पण्डिताः, पश्चिमतः पश्चिमाभिमुखाः, भूभृतो राजानश्च, पूर्वमुखाः, प्रतिष्ठिता राजानुचरैश्च स्थापिताः, एके विपश्चितः, यमादीनां यम-नियमादियोगाङ्गानां संजयात् आयत्ती-करणात्, विरेजुः शुशुभिरे, यमवश्यवर्त्तिनः कृतान्ताधीनाः, अन्ये राजानस्तु, तादृक् न शुशुभिरे ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

পরঃ পরাস্তো বিদুষাপরেণ যঃ
স জোষমাস্তে স্ম বিনম্রমস্তকঃ।
নিজৈর্মহাজন্য ইবাহতং জনং
নৃপা বিচেষ্টং তমমী অমংসত ॥২২॥

অত্র বিপশ্চিদপেক্ষয়া ভূভৃতাং ন্যূনতাবর্ণনাদ্ব্যতিরেকালঙ্কার-স্ছেকানুপ্রাসেন সংসৃজ্যতে ॥২২॥

বাঙ্গালা—সেই প্রভাতকালে পণ্ডিতগণ পশ্চিম মুখ হইয়া বসিলেন, রাজারা পূর্ব্বমুখ হইয়া থাকিলেন, ইহার মধ্যে পণ্ডিতগণ যম-নিয়মাদি আয়ত্ত করায় বিশেষ শোভা পাইতে লাগিলেন; কিন্তু যমের বশীভূত রাজগণ সেরূপ শোভা পাইতে থাকিলেন না ॥৩২॥

অন্বয়ঃ—যঃ পরঃ অপরেণ বিদুষা পরাস্তঃ স বিনম্রমস্তকঃ (সন্) জোষং আস্তে স্ম। অমী নৃপাঃ মহাজন্যে নিজৈঃ আহতং জনমিব তং বিচেষ্টং অমংসত ॥২২॥

পর ইতি। যঃ পর উত্তমো বিদ্বান্, অপরেণ অন্যেন, বিদুষা, পরাস্তঃ শাস্ত্রতর্কে পরাভূতঃ, স উত্তমো বিদ্বান্, বিনম্রমস্তকঃ তৎপরাজয়াপমানেনাবনতশিরাঃ সন্, জোষং নীরবং যথা স্যাত্তথা, আস্তে উপবিশতি স্ম। তদা অমী নৃপাঃ, মহাজন্যে মহাযুদ্ধে, নিজৈঃ সৈন্যৈঃ, আহতং জনমিব, তং পরং বিদ্বাংসম্, বিচেষ্টং নিষ্পন্দম্, অমংসত সম্ভাবিতবন্তঃ।

অত্র শ্রৌতোপমালঙ্কারো বৃত্ত্যনুপ্রাসেন ছেকানুপ্রাসেন চ সংসৃজ্যতে।

"যুদ্ধমায়োধনং জন্যম্" ইত্যমরঃ ॥২২॥

বাঙ্গালা—সেই সভায় যিনি প্রধান বিদ্বান্ ছিলেন,, তিনি শাস্ত্রীয় তর্কে অন্য বিদ্বানের নিকট পরাজিত হইয়া নীরবে ও অবনতমস্তকে অবস্থান করিতেছিলেন। তখন সভাস্থিত রাজারা মনে করিলেন যে,

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

महीक्षितो वीक्ष्य विदां विचारणं
सुविस्मिता: सस्मितमूचुरीदृशम्।
जयत्यदो मानपणं विचारणं
रणो हि न: प्राणपण: सुदारुण:॥ ४॥

महাযুদ্ধে আপন সৈন্যকর্তৃক আহত ব্যক্তির ন্যায় ইনি নিশ্চেষ্ট রহিয়াছেন ॥৩৩॥

अन्वय:—महीक्षितो विदां विचारणं वीक्ष्य सुविस्मिता: (सन्त:) सस्मितं ईदृशं ऊचु:। अदो मानपणं विचारणं जयति। न: रण: हि प्राणपण: सुदारुण: ॥२४॥

महीति। महीक्षितो राजान:, विदां विदुषां ब्राह्मणानाम्, विचारणं शास्त्रीयतर्कम्, वीक्ष्य अवलोक्य, सुविस्मिता: सन्त:, सस्मितं सेषद्धासम्, ईदृशम् ऊचु:। अद इदम्, मानो जये गौरवं पराजये अपमानश्च पणो यत्र तत्, विचारणम्, जयति रणापेक्षया उत्कर्षेण वर्त्तते, मानपणत्वादित्याशय:। न: अस्माकं क्षत्रियाणाम्, रणो युद्धं हि, प्राणा एव पणो यत्र तादृश:, अतएव सुदारुण: अतीवभयावह:, ब्राह्मणानां जातीयकार्य्यापेक्षया क्षत्रियाणां जातीयकार्य्यं नितान्तमेव निकृष्टमिति भाव:।

अतएवात्र पदार्थहेतुकं काव्यलिङ्गद्वयम्, व्यतिरेकश्चेत्येतेषामङ्गाङ्गिभावेन सङ्कर:, सोऽपि पुनश्छेकानुप्रासवृत्त्यनुप्रासाभ्यां संसृज्यते ॥३४॥

বাঙ্গালা—সভাস্থিত রাজারা ব্রাহ্মণপণ্ডিতগণের বিচার দেখিয়া অত্যন্ত বিস্মিত হইয়া মৃদু হাস্যসহকারে এইরূপ বলিতেছিলেন—"এই, বিচারই শ্রেষ্ঠ; কেন না, ইহার পণ মান, আর আমাদের যুদ্ধ অতিদারুণ; কারণ, তাহাতে পণ প্রাণ". ॥৩৪॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

इतोऽन्तरे राजकृतं सभाजनं
अतोषयत् सर्वमिमं सभा-जनम् ।
कृतं नृणां योग्यजनेन माननं
करोति फुल्लाब्जसमानमाननम् ॥३५॥
शिशिक्षिरे यत् कुटिलेक्षणा चिरं
गणाङ्गनास्तस्य फलं तदाप्नुवन् ।
विहाय येनैकसदःसदो बुधान्
महीक्षितस्त्वक्षसिरे समीक्षितुम् ॥३६॥

अन्वयः—इतः अन्तरे राजकृतं सभाजनं इमं सर्वं सभा जनं-अतोषयत् । योग्यजनेन कृतं माननं नृणां आननं फुल्लाब्जसमानं करोति ॥३५॥

इत इति । इत अन्तरे अस्मिन्नवसरे, राज्ञा भीष्मकेण कृतं राजकृतम्, सभाजनं विनयोक्तिभिः संवर्द्धना, इमं प्रस्तुतम्, सभा-जनं सभ्यलोकम् अतोषयत् । पदगौरवादिना योग्यजनेन कृतम्, माननं गौरवास्पदीकरणं कर्त्तृ, नृणां मनुष्याणाम्, आननं मुखम्, फुल्लं प्रस्फुटितं यत् अब्जं पद्मं तस्य समानं करोति । आनन्दातिशयोदयेन मुखविकाशादिति भावः ।

अत्र सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः, आर्थोपमा, अन्त्ययमकञ्चेत्येतेषां संसृष्टिः ॥३५॥

বাঙ্গালা—সেই সময়ে ভীষ্মকরাজা সবিনয় সংবর্দ্ধনা করিলে, সভাস্থ সমস্ত লোকই সন্তুষ্ট হইল। কারণ, যোগ্যলোকে সম্মান করিলে তাহা মুখমণ্ডলকে প্রস্ফুটিত পদ্মের তুল্য করিয়া থাকে ॥৩৫॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

निनाय नेत्रं नवनायिकागणः
विदां विचाराश्रवणे त्वसभ्यता।
विधूनितं लिप्सु मनो मनोभुवा
महाविपत्तिर्युवभूभृतामभूत् ॥३७॥

अन्वयः—गणाङ्गनाः चिरं यत् कुटिलेक्षणं शिशिक्षिरे, तस्य फलं तदा आप्नुवन्। येन एकसदःसदः बुधान् विधाय महीचितः समीक्षितुं चचमिरे ॥३६॥

शिशिक्षिर इति। गणाङ्गना वारवनिताः, चिरम्, यत् कुटिलेक्षणं वक्रदृष्टिम्, शिशिक्षिरे कुट्टिनीगुरोः शिक्षितवत्यः। तस्य फलम्, तदा आप्नुवन् अलभन्त। येन हेतुना, एकस्मिन् सदसि सीदन्ति वर्त्तन्त इति एकसदःसदः एकसभास्थान्, बुधान् पण्डितान्, विहाय महीक्षितो नृपतीन्, समीक्षितुं द्रष्टुम्, चचमिरे शेकुः। चिरशिक्षावशादेव वेश्यानां तादृशनैपुण्यमिति भावः।

अत्र कार्य्येण कारणसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः, वृत्त्यनुप्रासश्छेकानुप्रासश्चेति संसृष्टिः।

चचमिरे इति "खमु सहने" इति खम्धातोः परोक्षायां रूपम् ॥३६॥

বাঙ্গালা—বেশ্যারা দীর্ঘকাল ধরিয়া যে বক্রদৃষ্টি শিক্ষা করিয়াছিল, তাহার ফল সেই সময় পাইয়াছিল। যেহেতু তাহারা একই সভায় অবস্থিত ব্রাহ্মণপণ্ডিতগণকে পরিত্যাগ করিয়া রাজগণকে দেখিতে সমর্থ হইয়াছিল ॥৩৬॥

अन्वयः—नवनायिकागणः नेत्रं निनाय, विदां विचाराश्रवणे तु असभ्यता (स्यात्)। लिप्सु मनः मनोभुवा विधूनितं। युवभूभृतां महाविपत्तिः अभूत् ॥३७॥

निनायेति। नवनातिकागणो वारतरुणीसमूहः, नेत्रम्, निनाय वेशभूषादिसौन्दर्य्यातिरेकादाचकर्ष, विदां विदुषाम्, विचारस्य शास्त्रीय-

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

তদৈকদৈকঃ করিণাং করোপরি
পরশ্চ তীর্থাগতদূতসঞ্চিতঃ ।
নবাঙ্গনানামুরসীতরঃ পুনঃ
অলম্ভি কুম্ভস্ত্রিবিধো জনৈশ্চয়ৈঃ ॥৩৮॥

তর্কস্য শ্রবণে তত্তরুণীদর্শনে ব্যাপৃতত্বাৎ শ্রবণাভিনয়াভাবে তু অসভ্যতা স্যাৎ। কিঞ্চ, তত্তরুণীজনলোভি মনঃ, মনোভুবা কামেন, বিধূনিতং চঞ্চলীকৃতঞ্চ। অতএব, যুবানশ্চ তে ভূভৃতো রাজানশ্চেতি তেষাম্, মহাবিপত্তিরতীবাকুলতা, অভূৎ। সর্বদিগ্‌রক্ষণস্য দুষ্করত্বাদিত্যাশয়ঃ।

অত্র মহাবিপত্তিং প্রতি কারণত্রয়োপন্যাসাৎ সমুচ্চয়োঽলঙ্কারঃ, প্রথমপাদে বৃত্ত্যনুপ্রাসঃ, তৃতীয়পাদে মনো মনোভুবেত্যত্র লাটানুপ্রাসশ্চেত্যেতেষাং সংসৃষ্টিঃ ॥৩৭॥

বাঙ্গালা—নবীন রমণীগণ নয়ন আকর্ষণ ক'রিতেছিল, পণ্ডিতগণের বিচার না শুনিলে অসভ্যতা হইবার সম্ভাবনা ছিল, লোভী মন কামাবেশে বিচলিত হইতেছিল; সুতরাং যুবক রাজগণের তৎকালে গুরুতর বিপদ উপস্থিত হইয়াছিল ॥৩৭॥

অন্বয়ঃ—একঃ করিণাং করোপরি, পরশ্চ তীর্থাগতদূতসঞ্চিতঃ, ইতরঃ পুনঃ নবাঙ্গনানাং উরসি (ইতি) ত্রিবিধঃ কুম্ভঃ তদা একদা (এব) জনৈশ্চয়ৈঃ অলম্ভি ॥৩৮॥

তদেতি। একঃ কুম্ভঃ, করিণাং হস্তিনাম্, করোপরি শুণ্ডোপরিদেশে অতিষ্ঠৎ। পরঃ অন্যঃ কুম্ভশ্চ, তীর্থেভ্য আগতৈর্দূতৈঃ সঞ্চিতঃ আহৃতঃ স্থিতঃ, ইতরঃ অপরঃ পুনঃ কুম্ভঃ, নবাঙ্গনানাং বারতরুণীনাম্, উরসি বক্ষসি আসীৎ। ইতি ত্রিবিধঃ কুম্ভঃ, তদা, একদৈব, জনানাম্ ঈক্ষণৈর্দৃষ্টিভিঃ, অলম্ভি প্রাপ্তঃ। হস্তিশুণ্ডোপরি অস্থিমাংসস্তূপরূপঃ কুম্ভঃ,

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

सहाङ्कुशेन प्रथमे च कुङ्कुमः
बभौ द्वितीये च जलं सपल्लवम्।
पटस्तृतीये सह लोकलोचनैः
न कोऽपि कुम्भः किल शून्यतामगात् ॥३९॥

~~~

अभिषेकसम्पादनाय दूतानीतस्तीर्थजलपूर्णः स्वर्णकलसमूहः, वसनान्वितो वारवनितास्तनसमूहश्चेति त्रिविधानेव कुम्भान् तदानीमेकदैव जनो दृष्टवानित्यर्थः।

अत्र करिकरोपरिस्थितनवाङ्गनोरःस्थितयोश्च मांसस्तूपयोः कुम्भत्वा-सम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिरलङ्कारश्छेकानुप्रासवृत्त्यनुप्रासाभ्यां संसृज्यते ॥३८॥

বাঙ্গালা—তৎকালে হস্তিগণের শুণ্ডের উপরে একপ্রকার কুম্ভ ছিল, তীর্থ হইতে আগত দূতগণ তীর্থজলপূর্ণ অন্য প্রকার কুম্ভ আনিয়া রাখিয়াছিল, আর বারবনিতাগণের বক্ষঃস্থলে অন্যবিধ কুম্ভ রহিয়াছিল; সুতরাং তত্রত্য লোকেরা তখন এক সময়েই ত্রিবিধ কুম্ভ দেখিতে-ছিল ॥৩৮॥

अन्वयः—प्रथमे च अङ्कुशेन सह कुङ्कुमः, द्वितीये च सपल्लवं जलं, तृतीये च लोकलोचनैः सह पटः बभौ। कोऽपि कुम्भः किल शून्यतां न अगात् ॥३९॥

सहेति। प्रथमे पूर्वश्लोके प्रथमोक्ते करिकुम्भे च, अङ्कुशेन करिताड़नास्त्रेण सह, कुङ्कुमो लोहितवर्णो द्रव्यविशेषो बभौ। द्वितीये च तीर्थागतदूतसञ्चितकुम्भे, पल्लवेन सहेति सपल्लवं जलं बभौ; तृतीये च नवाङ्गनानां कुचकुम्भे लोकलोचनैः सह पटे वस्त्रं बभौ। अतएव प्रागुक्तानां त्रयाणां कुम्भानां मध्ये कोऽपि कुम्भः किल शून्यतां न अगात् न प्रापत्।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative
~~~

करीन्द्रकुम्भो ननु नित्यनीरसः
क्षणोत्पतिष्णुश्च रसश्चराहृते ।
रसश्चिरस्थः कुचकुम्भ एव यत्
स आदरात्तद्घनवाससावृतः ॥४०॥

अत्र शून्यताप्राप्त्यभावं प्रति पूर्ववाक्यार्थानां हेतुत्वात् वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः, बभावित्येकया क्रियया कुङ्कुमादीनां त्रयाणां कर्त्तृतयाभिसम्बन्धात्तुल्ययोगिता च, अनयोरेकाश्रयानुप्रवेशरूपः सङ्करः, वृत्त्यनुप्रासश्छेकानुप्रासश्चेति समुदाये संसृष्टिः ॥३९॥

বাঙ্গালা—পূর্ব্বশ্লোকোক্ত ত্রিবিধ কুম্ভের মধ্যে প্রথমকুম্ভে অঙ্কুশের সহিত কুঙ্কুম প্রকাশ পাইতেছিল, দ্বিতীয়কুম্ভে পল্লব ও জল ছিল এবং তৃতীয়কুম্ভে লোকলোচনের সহিত বস্ত্র রহিয়াছিল ; সুতরাং কোন কুম্ভই শূন্য ছিল না ॥৩৯॥

अन्वयः—करीन्द्रकुम्भो ननु नित्यनीरसः, चराहृते च क्षणोत्पतिष्णुः रसः, (किन्तु) कुचकुम्भ एव यत् चिरस्थो रसः, तत् स आदरात् घनवाससा आवृतः (अभूत्) ॥४०॥

करीति । नन्विति मुमूषुसम्बोधने अवधारणे वा । प्रथमः करीन्द्रकुम्भः नित्यनीरसः अस्थिमांसमयत्वात् सर्वदैव अपरद्वयसदृशरसशून्यः ; चरेदूतेराहृते आनीते द्वितीये च कुम्भे क्षणेन उत्पतिष्णुर्बहिर्गमनशीलरसो जलं वर्त्तते, किन्तु तृतीये कुचकुम्भ एव यद्यस्मात् चिरं दीर्घकालं यौवनं यावदित्यर्थः तिष्ठतीति चिरस्थ ; रसो दुग्धं जन्यतया शृङ्गारश्च विद्यते ; तत्तस्मात्, स कुचकुम्भः आदरात् घनवाससा निविड़वस्त्रेण आवृतः अभूत् । अन्यदप्युत्कृष्टं वस्तु वस्त्रादीनाव्रियते ।

अत्र प्रथमोक्तकुम्भद्वयापेक्षया तृतीयकुम्भस्य आधिक्यप्रतिपादनाद्व्यतिरेकोऽलङ्कारः ।

"शृङ्गारादौ विषे वीर्य्ये गुणे रागे द्रवे रसः" इत्यमरः ॥४०॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

क्रियच्चलच्चेलतिरोहितस्तन-
सरोजषण्डौ न विरेजतुस्तदा।
निजार्द्धचन्द्राङ्कितवक्त्रचन्द्रमाः
मृगीदृशां येन सभामभासयत् ॥४१॥
गुणैः स्वतुल्यो भवितेष भूपतिः
मनोभवः पूर्वमितीव भावयन्।
दृगाशुग-भ्रूयुगकार्म्मुकग्रहां
चमूं रमाणामसृजज्जिगीषया ॥४२॥ नो.

বাঙ্গালা—হস্তীর কুম্ভ সর্ব্বদাই নীরস, দূতগণকর্ত্তৃক আনীত কুম্ভের রস (জল) ক্ষণকালমধ্যেই বাহির হইয়া যায়, কিন্তু কুচকুম্ভের রস যেহেতু চিরস্থায়ী, সেই হেতু তাহা নিবিড় বস্ত্রদ্বারা আবৃত রাখিয়াছিল ॥৪০॥

अन्वयः—क्रियच्चलच्चेल-तिरोहित-स्तन सरोजषण्डौ तदा न विरेजतुः। येन मृगीदृशां निजार्द्धचन्द्राङ्कितवक्त्रचन्द्रमाः सभां अभासयत् ॥४१॥

क्रियदिति। क्रियच्चलता वायुवेगेन किञ्चिच्चञ्चलीभवता चेलेन वसनेन तिरोहितौ आवृतौ स्तनाविव सरोजषण्डौ पद्मकोरकौ, तदा न विरेजतुः विकाशेन न शुशुभाते। येन हेतुना, मृगीदृशां हरिणी-नयनानां तरुणीनाम्, निजं स्वकीयम्, अर्द्धचन्द्राङ्कितम् अर्द्धचन्द्राकारा-लङ्कारेण चिह्नितं वक्त्रं मुखमेव चन्द्रमाश्चन्द्र इति स तथोक्तः, सभाम्, अभासयत् प्राकाशयत्। चन्द्रे प्रकाशमाने पद्मकलिका न स्फुटतीति भावः।

अत्र निरङ्ग केवलरूपकद्वयं छेकानुप्रासो वृत्त्यनुप्रासश्चेति संसृष्टिः ॥४१॥

বাঙ্গালা—অল্প-চঞ্চল-বসনাবৃত তরুণীগণের স্তনদ্বয়রূপ পদ্মকলিকা দুইটী তখন প্রকাশ পায় নাই। যেহেতু তাহাদের অর্দ্ধচন্দ্রভূষণাঙ্কিত মুখরূপ চন্দ্র সভাটীকে আলোকিত করিতেছিল ॥৪১॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

(कुलकारम्भः)

विलम्बिनीलोपलनिर्म्मितस्रजां
सुधासितं चारुरुचा चकासतम्।
विशालनीलोत्पलसङ्कुलं जलं
विडम्बयन्तं सुरनिम्नगागतम् ॥४३॥

अन्वयः—एष भूपतिः गुणैः स्वतुल्यः भविता इति पूर्वं भावयन्निव मनोभवः दृगाशुग भ्रूयुग-कार्म्मुक-ग्रहां रमाणां चमूं जिगीषया अहिनोत् ॥४२॥

गुणैरिति। एष भूपतिः रुक्मी, गुणैः शौर्य्यसौन्दर्य्यादिभिः स्वतुल्यः आत्मसमानो भविता इति पूर्व्वं भावयन् चिन्तयन्निव मनोभवः कामदेवः, दृशौ चक्षुषी एव आशुगौ बाणौ भ्रूयुगमेव कार्म्मुकं गृह्णातीति तां रमाणां नवाङ्गनानां चमूं सेनाम्, जिगीषया रुक्मिणमेव जेतुमिच्छया, अहिणात् प्रेरयत्। राजान्तरस्य स्वतुल्यीभवनसम्भावनायाम् अपरोऽपि राजा जिगीषया सेनां प्रेरयतीति भावः।

अत्र वाच्या मात्राभिमानिनी क्रियोत्प्रेक्षालङ्कारः, निरङ्गं केवल-रूपकद्वयञ्चेत्येतेषामङ्गाङ्गिभावेन सङ्करः, पूर्व्ववदनुप्रासद्वयञ्चेति समुदाये संसृष्टिः।

"रमः कान्ते रक्ताशोके मन्मथे च रमा स्त्रियाम्" इति हेमचन्द्रः।
ग्रहेति पचादित्वादच् ॥४२॥

বাঙ্গালা—এই রাজপুত্র শৌর্য্য ও সৌন্দর্য্যপ্রভৃতি গুণদ্বারা আমার তুল্য হইবেন ইহা পূর্ব্বে ভাবিয়াই যেন কামদেব—দৃষ্টিরূপ বাণ ও ভ্রূযুগলরূপ কার্ম্মুকধারিণী রমণীসেনা জয় করিবার জন্য প্রেরণ করিয়াছিলেন ॥৪২॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

नवप्रवालावलिकान्तकान्तिभि:
विमिश्रितश्वेतमरीचिरञ्जितम् ।
विसारिभिर्गैरिकराशिरश्मिभि:
चितञ्च कैलासमिवाचलं चलम् ॥४४॥

अन्वय:—सुधासितं, विलम्बि-नीलोपल-निर्म्मित-स्रजां चारुरुचा चकासतं; (अतएव) सुरनिम्नगागतं विशाल-नीलोत्पल-सङ्कुलं जलं विडम्बयन्तं, नवप्रवालावलि-कान्त-कान्तिभि: विमिश्रित-श्वेत-मरीचि-रञ्जित, (अतएव) चलं विसारिभि: गैरिक-

अथाष्टभि: श्लोकै: कुलकेनाभिषेकमञ्चं वर्णयति विलम्बीति। सुधासितं चूर्णलेपवत् शुभ्रवर्णम्, विलम्बिन्य: सर्पलाङ्गूलवत् लम्बमाना: या नीलोपलैर्मरकतमणिभि: निर्म्मिता स्रजो मालास्तासाम्, चारुरुचा मनोहरप्रभया चकासतं दीप्यमानम्; अतएव सुरनिम्नगागतं गङ्गानदीस्थितं विशालैर्नीलोत्पलै: सङ्कुलं व्याप्तं जलम्, विलम्बयन्तम् अनुकुर्वन्तम्। अत्र लुप्तोपमार्थोपमयोरङ्गाङ्गिभावेन सङ्कर:, छेकानु-प्रासवृत्त्यनुप्रासश्चेति समुदाये संसृष्टि:॥ नवप्रवालावलि: नूतन-विद्रुमश्रेण्या: कान्तकान्तिभि: सुन्दरदीप्तिभि: विमिश्रिता या श्वेत-मरीचय: मञ्चस्यैव शुभ्रकिरणास्ताभि: रञ्जितम्। अतएव चलं प्रबल-भूमिकम्पेन चञ्चलम्, विसारिभि: समन्ताद्गामिभि: गैरिकराशिरश्मिभि:

বাঙ্গালা—শ্রমজীবী ভৃত্যেরা রাজকুমার রুক্মীর যৌবরাজ্যে অভিষেকের জন্য স্ফটিকনির্ম্মিত, উজ্জ্বলদীপ্তিশালী, একখানি মঞ্চ (চৌকী) আনয়ন করিয়া সভ্যগণের সন্নিধানে মস্তক হইতে ভূতলে স্থাপন করিল, তৎক্ষণাৎ তত্রত্য লোকদিগের দৃষ্টি তাহার উপরে পতিত হইল। সেই মঞ্চখানি চূর্ণলেপের ন্যায় শুভ্রবর্ণ ছিল এবং ঝুলান মরকত-মণিমালার সুন্দর কিরণে দীপ্তি পাইতেছিল; সুতরাং সেই মঞ্চখানি

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

পদে পদে হীরকখণ্ডমণ্ডিতং
পদে লতাং কাঞ্চনজাঞ্চ বিভ্রতম্।
শিরোধৃতেন্দুপ্রতিবিম্বমম্বুনঃ
প্রবাহমদ্রেরিব হৈমপাতিনম্ ॥৪৫॥
উপেতমেকৈকজনস্য পশ্যতঃ
প্রগৃহ্য বিম্বং স্বয়মত্যনাবিলম্।
স্বযোগ্যতাঽভাবমবেক্ষ্য তৎক্ষণাৎ
ত্যজন্তমঙ্কায় নিজান্তরাদিব ॥৪৬॥

রাশি-রশ্মিভিঃ চিতঞ্চ কৈলাসং অচলমিব (স্থিতং), পদে পদে হীরকখণ্ডমণ্ডিতং, পদে চ কাঞ্চনজাং লতাং বিভ্রতং, (অতএব) শিরোধৃতেন্দুপ্রতিবিম্বং অদ্রেঃ হৈমপাতিনং অম্বুনঃ প্রবাহমিব (স্থিতং) স্বয়মত্যনাবিলং, (অতএব) পশ্যতঃ একৈকজনস্য

রক্তবর্ণধাতুবিশেষকিরণৈশ্চ, চিতং ব্যাপ্তম্, কৈলাসম্ অচলং পর্বতমিব স্থিতম্। অত্র শ্রৌতোপমালঙ্কারঃ, পূর্ববদনুপ্রাসাভ্যাং সংসৃজ্যতে॥ পদে পদে স্থানে স্থানে হীরকখণ্ডৈঃ মণ্ডিতং শোভিতম্, পদে চ পাদচতুষ্টয়ে চ কাঞ্চনজাং স্বর্ণনির্ম্মিতাং লতাম্, বিভ্রতং ধারয়ন্তম্। ততশ্চ শিরসি উপরিভাগে ধৃতম্ ইন্দোশ্চন্দ্রস্য প্রতিবিম্বং যেন তম্, অদ্রেঃ পর্বতাৎ, হেম্নি স্বর্ণে পাতিনং পতনশীলম্, অম্বুনো জলস্য প্রবাহমিব স্থিতম্। অত্র ছেকানুপ্রাসেন সংসৃষ্টঃ শ্রৌতোপমালঙ্কারঃ॥ স্বয়ম্, অত্যনাবিলম্

যেন বহুতর নীলোৎপলযুক্ত গঙ্গাজলের অনুকরণ করিতেছিল॥ নূতন প্রবালমালার সুন্দর প্রভার সহিত সম্মিলিত শুভ্র কিরণে সেই মঞ্চখানি রঞ্জিত ছিল, অতএব গৈরিক-(রক্তবর্ণ ধাতুবিশেষ) রাশির রশ্মিতে পরিব্যাপ্ত কৈলাসপর্ব্বতের ন্যায় চলিতেছিল॥ সেই মঞ্চখানি স্থানে স্থানে সন্নিবেশিত হীরকখণ্ডে শোভিত ছিল এবং তাহার পাদচতুষ্টয়ে

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

अहं भविष्यन् भविनो भुवः प्रभोः
पदादधःस्थो जनमूर्द्धभिर्धृतः।
नृपास्तदूर्द्ध्वा द्विजभिन्नजन्मिषु
नृणामिदं भावयितुं शिरःस्थितम् ॥४८॥

विम्बं प्रगृह्य तत्क्षणात् स्वयोग्यताऽभावमवेक्ष्य निजान्तरात् अञ्जाय त्यजन्तमिव उपेतं, अहं भविनो भुवः प्रभोः पदात् अधःस्थो भविष्यन् (अपि) जनमूर्द्धभिः धृतः (अस्मि), तत् द्विजभिन्नजन्मिषु नृपाः ऊर्द्ध्वाः, इदं (लोकान्) भावयितुं (इव) नृणां शिरःस्थितं, अतीवनिर्म्मलम्, अतएव पश्यतः एकैकजनस्य, विम्बं प्रतिविम्बं प्रगृह्य आत्मन्याधाय, तत्क्षणात् स्वयोग्यताभावम् स्वस्मिन्नात्मनि, आरोहणे योग्यताया अभावम्, अवेक्ष्य दृष्ट्वा, निजान्तरात् आत्ममध्यात्, अञ्जाय द्रुतम्, त्यजन्तमिव, उपेतम् उपस्थितम्। अत्र वाच्या भावाभिमानिनी क्रियोत्प्रेक्षालङ्कारः॥ अहं मञ्चः, भविनो भविष्यतः, भुवः प्रभोर्भूपालस्य, पदात् चरणात्, अधःस्थः पादपीठतया तलस्थो भविष्यन्नपि, जनानां वाहकभृत्यानां मूर्द्धभिर्मस्तकैर्धृतः अस्मि, तत्तस्मात्, द्विजभिन्नजन्मिषु ब्राह्मणेतरप्राणिषु मध्ये नृपाः राजानः, ऊर्द्ध्वा उच्चा, इदं लोकान् भावयितुं चिन्तयितुमिव नृणां वाहकजनानां शिरःसु (পায়া চারিটীতে) স্বর্ণলতা ঝুলিতেছিল; সুতরাং উপরিভাগে চন্দ্রের প্রতিবিম্বধারী পর্ব্বত হইতে স্বর্ণময় প্রস্তরে পতনশীল জলপ্রবাহের ন্যায় সেই পায়াগুলিকে দেখা যাইতেছিল॥ মঞ্চখানি অত্যন্ত নির্ম্মল ছিল, সুতরাং দর্শনার্থী এক একটী লোকের প্রতিবিম্ব গ্রহণ করিয়া করিয়া তৎক্ষণাৎ তাহাদের যোগ্যতার অভাব দেখিয়া সেই মঞ্চখানি আপনার মধ্য হইতে দ্রুত সেই প্রতিবিম্বগুলিকে ত্যাগ করিতে করিতে যেন আসিতেছিল। আমি ভাবী রাজার চরণতলবর্ত্তী হইব, তথাপি

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

प्रसह्य संगृह्य विवस्वतः स्वतः
समानतीव्रं प्रतिविम्बमम्बरात्।
द्वितीयमादित्यमुदित्य दीप्तिभिः
विकासयन्तं सकलां सभामिव ॥४८॥

चलत्यसौ किं धवलाचलः क्वचित्
तरत्ययं वा तरणिर्धरातले।
नृपस्य मूर्त्ता किमु कीर्त्तिरीदृशं
प्रकल्पयन्तं जनताविकल्पनम् ॥४९॥

अम्बरात् समानतीव्रं विवस्वतः प्रतिविम्बं स्वतः प्रसह्य संगृह्य उदित्य द्वितीयं आदित्यमिव दीप्तिभिः सकलां सभां विकासयन्तं, असौ किं धवलाचलः क्वचित् चलति? अयं तरणिर्वा धरातले तरति? किमु (वा) नृपस्य मूर्त्ता कीर्त्तिः? ईदृशं जनता-स्थितं शिरःस्थितम्। अत्र वाच्या भावाभिमानिनी क्रियोत्प्रेक्षा-लङ्कारः, भविन इति "भविष्यति गम्यादयः" इति भवतेरिन्प्रत्ययान्तो निपातः॥ अम्बरात् आकाशात्, समानतीव्रं सूर्य्यतुल्यप्रखरं विवस्वतः सूर्य्यस्य प्रतिविम्बम्, स्वतः स्वयमेव प्रसह्य बलेन, संगृह्य आदाय, उदित्य सभान्तिकमुपेत्य, द्वितीयम् आदित्यं सूर्य्यमिव दीप्तिभिर्द्युतिभिः, सकलां सभाम्, विकासयन्तम् उद्भासयन्तम्। अत्र वाच्या भावाभि-मानिनी द्रव्योत्प्रेक्षालङ्कारः, वृत्त्यनुप्रासच्छेकानुप्रासाभ्यां संसृज्यते। "प्रसह्य तु हठार्थकम्" इत्यमरः॥ असौ किम्, धवलाचलः कैलास-

এখন মানুষেরা আমাকে মাথায় ধরিয়াছে; অতএব ব্রাহ্মণভিন্ন প্রাণি-গণের মধ্যে ক্ষত্রিয়ই উচ্চ ইহা লোকদিগকে চিন্তা করাইবার জন্যই যেন সেই মঞ্চখানি ভৃত্যগণের মস্তকে রহিয়াছিল॥ আকাশ হইতে সূর্য্যের তুল্য প্রখর সূর্য্যের প্রতিবিম্বকে বলপূর্ব্বক নিজেই গ্রহণ করিয়া

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

पुराणराजस्य चिरस्य वत्सला
सविस्मया सभ्यविभक्तभूभृताम्।
प्रजासमाजस्य च भक्तिपूर्विका
त्रिधेव दृष्टिर्युगपत् पपात ताम् ॥५२॥
ततोऽनुगा काचन वामलोचना
शिवानुभावा शिविकाधिरोहिणी।

ন্যায় সেই সভাটী নিস্তব্ধ হইল এবং সে সভার দৃষ্টি কেবল রুক্মীর উপরে পড়িল ॥৫১॥

अन्वयः—पुराणराजस्य चिरस्य वत्सला, सभ्यविभक्तभूभृतां सविस्मया, प्रजासमाजस्य च भक्तिपूर्विका, (इति) त्रिधा दृष्टिरेव युगपत् तां पपात ॥५२॥

पुराणेति। पुराणराजस्य प्राचीननृपस्य भीष्मकस्य, चिरस्य चिरादवधि, वत्सला सस्नेहा, सभ्येषु विभक्ता राजपर्य्यायेण निरूपिता ये भूभृतो राजानस्तेषाम्, सविस्मया वेशभूषादिसौन्दर्य्यातिशयादाश्चर्य्यान्विता, प्रजासमाजस्य राज्यस्थलोकसमूहस्य च, भक्तिपूर्विका अनुरक्तिप्रयुक्ता इति, त्रिधा वात्सल्य-विस्मय-भक्तिप्रयुक्तत्वात् त्रिविधा दृष्टिरेव युगपत् एकदा, तां रुक्मिणीम्, पपात जगाम।

अत्र एकस्या एव दृष्टेः वात्सल्यप्रयुक्तत्वादिभेदेन अनेकधोल्लेखात् उल्लेखो नामालङ्कारः, छेकानुप्रासो वृत्त्यनुप्रासश्चेति संसृष्टिः।

पुराणश्चासौ राजा चेति समासे "राजाहःसखिभ्यष्टच्" इति राजादित्वादत्प्रत्यये पुराणराजेति रूपम् ॥५२॥

বাঙ্গালা—প্রাচীন রাজার চিরকালের সস্নেহ দৃষ্টি, সদস্যরাজগণের সবিস্ময় দৃষ্টি এবং প্রজাগণের সভক্তি দৃষ্টি—এই ত্রিবিধ দৃষ্টিই তৎকালে একদা রুক্মীর উপরে পতিত হইয়াছিল ॥৫২॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

नरेन्द्रजश्चाहरतां सतां मनो
गिरीशगौरीपुरुरूपगौरवैः ॥५३॥
कुलीनशालीनतया नताञ्च तां
विलोक्य लोकश्चकमे न कश्चन ।
गुणे सकामा किल लौकिके नृणाम्
अलौकिके भक्तिमती मतिः पुनः ॥५४॥

अन्वयः—ततः अनुगा शिवानुभावा शिविकाधिरोहिणी काचन वामलोचना नरेन्द्रजश्च गिरीशगौरीपुरुरूपगौरवैः सतां मनः अहरतां ॥५३॥

तत इति। ततो रुक्मिण्या निर्गमनानन्तरम्, अनुगा तत्पश्चाद्गामिनी, शिवानुभावा शिवो मङ्गलमयः अनुभावः प्रभावो यस्याः सा, शिविकां नरवाह्ययानविशेषम् अधिरोहतीति सा, काचन काचित् वामलोचना अङ्गना, नरेन्द्रजो राजपुत्रः रुक्मी च, गिरीशगौर्य्योः शिवपार्वत्योरिव यानि पुरुरूपगौरवाणि प्रभूतसौन्दर्य्यसम्मानास्तैः, सतां तत्र विद्यमानानां जनानां मनः, अहरताम्।

अत्राहरतामित्येकया क्रियया वामलोचनानरेन्द्रजयोः प्रस्तुतयोरेव कर्त्तृतयाभिसम्बन्धात्तुल्ययोगितालङ्कारः, लुप्तोपमा चेत्यनयोरङ्गाङ्गिभावेन सङ्करः, सोऽपि पुनश्छेकानुप्रासवृत्त्यनुप्रासाभ्यां संसृज्यते।

"सत्ये साधौ विद्यमाने पूजितेऽभ्यर्च्चिते च सत्" इत्यमरः ॥५३॥

বাঙ্গালা—তাহার পর সুলক্ষণা শিবিকারোহণে পশ্চাদ্গামিনী কোন তরুণী এবং রাজপুত্র রুক্মী, শিব ও পার্ব্বতীর ন্যায় প্রচুর সৌন্দর্য্য ও গৌরবদ্বারা তত্রত্য লোকদিগের চিত্ত আকর্ষণ করিতে লাগিলেন ॥৫৩॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

नवाभिषेकाय च कायजीविनः
स्फुटद्युतिं स्फाटिकमुत्तमाङ्गतः।
अतिष्ठिपन्लोकविलोचनैः सह
सभासदां कञ्चनमञ्चमन्तिके ॥५०॥
(कुलकं समाप्तम्)

विकल्पनं प्रकल्पयन्तं, कायजीविनः उत्तमाङ्गतः स्फुटद्युतिं स्फाटिकं कञ्चन मञ्चं सभासदां अन्तिके नवाभिषेकाय लोकविलोचनैः सह अतिष्ठिपन् ॥४३—५०॥

पर्वतः, क्वचित् कुत्रचित्, चलति गच्छति? अयं तरणिः सूर्यो वा धरातले भूमौ, तरति देशाद्देशान्तरं गच्छति? किमु वा, नृपस्य राज्ञो भीष्मकस्य, मूर्त्ता मूर्त्तिमती, कीर्त्तिः, ईदृशम्, जनतायाः विकल्पनं विविधकल्पनाम्, प्रकल्पयन्तम् उत्पादयन्तम्। अत्र त्रय एव शुद्ध-सन्देहालङ्काराः, छेकानुप्रासश्चेति संसृष्टिः। "यशसि धवलता" इत्यालङ्कारिकवचनप्रामाण्यात् "नृपस्य मूर्त्ता किमु कीर्त्ति"रित्युक्तम्। जनतेति "ग्रामजने"त्यादिना समूहार्थे तप्रत्ययः॥ कायजीविनः शारीरपरिश्रमेण जीविकानिर्व्वाहका भृत्याः, उत्तमाङ्गतः मस्तकेभ्यः, स्फुटा समन्तात् प्रकाशमाना द्युतिर्यस्य तम्, स्फाटिकं स्फटिकनिर्म्मितम्, कञ्चन कञ्चित्, मञ्चम्, सभासदामन्तिके, नवाभिषेकाय रुक्मिणो यौवराज्याभिषेकार्थम्, लोकानां तत्रत्यजानां विलोचनैर्दृष्टिभिः सह, अतिष्ठिपन् स्थापितवन्तः। अत्र लोकविलोचनैः सहेति सहोक्ति-रलङ्कारश्छेकानुप्रासवृत्त्यनुप्रासश्चेति संसृष्टिः। अतिष्ठिपन्निति इनन्तस्य तिष्ठतेरद्यतन्याः प्रथमपुरुषबहुवचने रूपम् ॥४३—५०॥

উপস্থিত হইয়া সেই মঞ্চখানি দ্বিতীয় সূর্য্যের ন্যায় আপন দীপ্তিদ্বারা

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

জনৈ রথান্তঃপুরতঃ পুরসরৈঃ
সমৈঃ সমং রুক্মিণি নিঃসৃতে সৃতৌ।
সভা নিতষ্টম্ভ তদা তদেকদৃক্
নিশীথিনীশে তটিনীব নির্যতি ॥৫১॥

সমস্ত সভাকে প্রকাশ করিতেছিল॥ ঐটা কি কৈলাসপর্ব্বত কোথায়ও চলিয়া যাইতেছে? কিংবা সূর্য্য ভূতলে বিচরণ করিতেছে? অথবা রাজার কীর্ত্তি মূর্ত্তিমতী হইয়া প্রকাশ পাইতেছে? এইরূপে সেই মঞ্চখানি লোকের বিবিধ কল্পনার সৃষ্টি করিতেছিল॥৪৩—৫০॥

অন্বয়ঃ—অথ রুক্মিণি অন্তঃপুরতঃ সমৈঃ পুরঃসরৈঃ জনৈঃ সমং সৃতৌ নিঃসৃতে (সতি), তদা নিশীথিনীশে নির্যতি তটিনী ইব তদেকদৃক্ সভা নিতষ্টম্ভ ॥৫১॥

জনৈরিতি। অথ মঞ্চানয়নানন্তরম্, রুক্মিণি রুক্মিনামকে জ্যেষ্ঠরাজপুত্রে, অন্তপুরতঃ, সমৈঃ বয়োভূষণাদিনা সমানৈঃ, পুরঃসরৈরগ্রগামিভিশ্চ, জনৈঃ, সমং সহ, সৃতৌ পথি, নিঃসৃতে নির্গতে সতি, তদা, নিশীথিনীশে চন্দ্রে, নির্যতি নির্গচ্ছতি সতি, তটিনী নদীব, তদেকদৃক্ তস্মিন্ রুক্মিণি একা কেবলা দৃক্ দৃষ্টির্যস্যাঃ সা সভা, নিতষ্টম্ভ স্তব্ধা বভূব। বিস্ময়াদৌৎসুক্যাচ্চেতি ভাবঃ।

অত্র ছেকানুপ্রাসসংসৃষ্টা শ্রৌতোপমালঙ্কারঃ।

"অয়নং বর্ত্ম-মার্গাধ্ব পন্থানঃ পদবী সৃতিঃ" ইত্যমরঃ।

নিতষ্টম্ভেতি নিপূর্বস্য স্তম্ভেঃ পরোক্ষায়াম্, নির্যতীতি চ নিপূর্বস্য ইণ্‌ধাতোঃ শন্তঙী রূপম্ ॥৫১॥

বাঙ্গালা—তদনন্তর রুক্মী, সমবয়স্ক ও অগ্রগামী কুমারগণের সহিত অন্তঃপুর হইতে পথে নির্গত হইলে, চন্দ্র উদয় পাইতে থাকিলে, নদীর

CC-O. Jangamwadi Math Collection; Varanasi. An eGangotri Initiative

क्षितिप्रदेशादुपदेशतो गुरोः
विषेकमञ्चोत्थितमात्मभूप्रभम्।
उपेत्य लेप्तुं परिलुप्तधीर्वधूः
सुगन्धिभिर्लोलतात्वमभ्यगात् ॥५६॥

अतएव सुमेरुतुल्यः, स नृपनन्दनो ज्येष्ठराजपुत्रः, तदा, 'रुक्मी' इति सान्वयं यौगिकार्थं सहितम्, नाम संज्ञाम्, दधार धारयामास। रुक्मं स्वर्णमस्यास्तीति रुक्मी व्युत्पत्तेरिति भावः।

अत्र उक्तविधसान्वयं नामधारणं प्रति पूर्वार्द्धगतपदार्था हेतव इति पदार्थहेतुकं काव्यलिङ्गमलङ्कारः, आर्थोपमा चानयोरङ्गाङ्गिभावेन सङ्करः ॥५६॥

বাঙ্গালা—দিক্‌পালগণের অংশবাহী, বসুর অবলম্বন, সুবর্ণযুক্ত, উন্নতদেহ এবং পৃথিবীপালক জ্যেষ্ঠ রাজপুত্র 'রুক্মী' এইরূপ যে নাম ধারণ করিয়াছিলেন, তাহা যোগার্থযুক্তই হইয়াছিল ॥৫৬॥

अन्वयः—वधूः गुरोः उपदेशतः क्षितिप्रदेशात् विषेकमञ्चोत्थितं आत्मभूप्रभं सुगन्धिभिः लेप्तुं उपेत्य परिलुप्तधीः (सती) लोलतात्वं अभ्यगात् ॥५७॥

क्षितीति वधूः काचिद्वारवनिता, गुरोराचार्यस्य, उपदेशत उपदेशात्, क्षितिप्रदेशात् भूतलात्, विषेकमञ्चे अभिषेकपर्य्यङ्के उत्थितम् आत्मभूप्रभं कामदेवतुल्यं रुक्मिणम्, सुगन्धिभिः चन्दनादिभिर्द्रव्यैः, लेप्तुम्, उपेत्य गत्वा, परिलुप्तधीः कामाविर्भावात् नष्टकर्त्तव्यबुद्धिः सती, लोलतात्वं चञ्चललताखारूप्यं कम्पमित्यर्थः, अभ्यगात् प्रापत्।

अत्र आत्मभूप्रभमिति लुप्तोपमा, लोललतात्वमिति निरङ्गं केवलरूपकम्, पूर्व्ववदनुप्रासो चेत्येतेषां परस्परनिरपेक्षतया संसृष्टिः ॥५७॥

বাঙ্গালা—কামদেবতুল্য মনোহরমূর্ত্তি রাজকুমার রুক্মী আচার্য্যের

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

নৃপাত্মজস্যাঙ্গবিলেপনে তদা
তদীয়লাবণ্যরুচীসরোঽন্তরে ।
নবাঙ্গনানাং কুচকোরকঃ করঃ
মুখঞ্চ পুষ্পাণ্যুদজানি পুস্ফুটুঃ ॥৫৮॥

উপদেশ অনুসারে ভূতল হইতে সেই মঞ্চের উপর উঠিলে, কোনও বার-বনিতা তাঁহার অঙ্গে সুগন্ধি দ্রব্য লেপন করিতে যাইয়া নষ্টবুদ্ধি হইয়া চঞ্চল লতার ন্যায় কাঁপিতে লাগিল ॥৫৭॥

অন্বয়ঃ—তদা নৃপাত্মজস্য অঙ্গবিলেপনে তদীয়লাবণ্যরুচীসরোঽন্তরে নবাঙ্গনানাং কুচকোরকঃ করঃ মুখঞ্চ (এতানি) উদজানি পুষ্পাণি পুস্ফুটুঃ ॥৫৮॥

নৃপেতি। তদা, নৃপাত্মজস্য রাজপুত্রস্য রুক্মিণঃ, অঙ্গবিলেপনে সুগন্ধিদ্রব্যৈরঙ্গলেপনে তদীয়ে কুমারসম্বন্ধিন্যৌ যে লাবণ্যরুচী লাবণ্যপ্রভে তে এব সরো জলাশয়স্তস্য অন্তরে মধ্যে, নবাঙ্গনানাং বারতরুণীনাম্, কুচস্তনঃ কোরকঃ কলিকেব স কুচকোরকঃ, করঃ পাণিঃ, মুখং বদনঞ্চ, এতানি ত্রীণি, উদজানি জলজানি, পুষ্পাণি পদ্মানীত্যর্থঃ, পুস্ফুটুঃ বিকসন্তি স্ম।

অত্র লাবণ্যরুচ্যোঃ সরস্ত্বারোপঃ কুচাদৌ পদ্মত্বারোপে নিমিত্তমিতি পরম্পরিতরূপকমলঙ্কারঃ, "মুখং তব কুরঙ্গাক্ষি! সরোজমিতি নান্যথা" ইতি দর্পণোদাহরণ ইব দ্বিতীয়ার্দ্ধে সমাসাভাবেঽপি রূপকপ্রসক্তে-রবশ্যম্ভাবাত্, ছেকানুপ্রাসবৃত্ত্যনুপ্রাসৌ চেতি সংসৃষ্টিঃ।

"কলিকা কোরকঃ পুমান্" ইত্যমরঃ।

উদজানীতি "উদকস্যোদঃ" ইত্যাদিনা উদকশব্দস্য উদাদেশঃ ॥৫৮॥

বাঙ্গালা—রাজকুমার রুক্মীর অঙ্গে সুগন্ধি দ্রব্য লেপন করিবার

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

उपेत्य पर्य्यङ्कमथार्य्यमप्रभम्
अलङ्कृतो मेरुमरीचिरञ्जितः ।
अगात् स यद्देवपदाभिधेयतां
न तत्र चित्रं नरदेवजन्मनः ॥५५॥

अन्वयः—कश्चन लोकस्य कुलीनशालीनतया नतां तां विलोक्य न चकमे । नृणां मतिः किल लौकिके गुणे सकामा, अलौकिके पुनर्गुणे भक्तिमती (भवति) ॥५४॥

कुलीनेति कश्चन लोकस्य कश्चिदपि जनः, कुलीनस्य सत्कुल-जातजनस्य या शालीनता लज्जाशीलता तया, नताम् अवनतमस्तकाम्, तां रुक्मिपत्नीम्, विलोक्य, न चकमे न कामयामास । उक्तमर्थं समर्थयितुमाह गुणे इति । नृणां मतिः किल, लौकिके लोकानां स्वभावजाते, गुणे सौन्दर्य्यादौ, सकामा कामाकुला भवति, अलौकिके असाधारणे, पुनर्गुणे लज्जाविनयादौ, भक्तिमती गौरवसम्पन्ना भवति ।

अत्र सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः, स च च्छेकानुप्रासवृत्त्यनुप्रासाभ्यां संसृज्यते ॥५४॥

বাঙ্গালা—তৎকালে রুক্মীর পত্নী সৎকুলজাতজনোচিত লজ্জাবশতঃ মস্তক অবনত করিয়া রহিয়াছিলেন, সুতরাং তত্রত্য কোন লোকই তাঁহাকে দেখিয়া কামাকুল হয় নাই। কারণ, লোকের মন লৌকিক গুণেই কামাকুল হইয়া থাকে ; কিন্তু অলৌকিক গুণে ভক্তিই করে ॥৫৪॥

अन्वयः—अथ अलङ्कृतः मेरुमरीचिरञ्जितः सः अर्य्यमप्रभं पर्य्यङ्कं उपेत्य यत् देवपदाभिधेयतां अगात्, तत्र नरदेवजन्मनः चित्रं न ॥५५॥

उपेत्येति । अथ, अलङ्कृतः स्वर्णाद्यलङ्कारैर्भूषितः, अतएव, मेरुरिव सुमेरुपर्वत इव, मरीचिभिः स्वर्णकिरणैः रञ्जितः, स रुक्मी, अर्य्यमप्रभं सूर्य्यवदुज्ज्वलम्, पर्य्यङ्कं पूर्वानीतं स्फटिकमञ्चम्, उपेत्य

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

दिगीश्वरांशान् वसुसंश्रयो वहन्
सुवर्णवानुच्चतमो धराधरः।
सुमेरुतुल्यो नृपनन्दनस्तदा
दधार रुक्मीति स नाम सान्वयम् ॥५६॥

गत्वा, यत्; देवपदस्य देवेतिशब्दस्य अभिधेयतां वाच्यताम्, अगात् राजत्वलाभोपक्रमात् प्रापत्, "राजा भट्टारको देव" इत्यमरप्रामाण्यादिति भावः। तत्र देवपदाभिधेयतायाम्, नरदेवात् राज्ञो भीष्मकात् जन्म यस्य तस्य रुक्मिणः पत्ते, चित्रं किमप्याश्चर्य्यं नासीत्; देवोत्पन्नस्य देवत्वस्यैवौचित्याशयः।

अत्र चित्राभावं प्रति नरदेवजन्मन इति पदस्यार्थो हेतुरिति पदार्थहेतुकं काव्यलिङ्गमलङ्कारः, छेकानुप्रासश्चेत्यनयो संसृष्टिः ॥५५॥

বাঙ্গালা—স্বর্ণালঙ্কারে অলঙ্কৃত এবং সুমেরুপর্ব্বতের ন্যায় স্বর্ণকিরণে রঞ্জিত রাজকুমার রুক্মী সূর্য্যের ন্যায় উজ্জ্বল সেই স্ফটিকমঞ্চের নিকট যাইয়া যে দেবসংজ্ঞা লাভ করিয়াছিলেন, নরদেব অর্থাৎ রাজা হইতে উৎপন্ন সেই রুক্মীর পক্ষে তাহাতে কোনও আশ্চর্য্য ছিল না ॥৫৫॥

अन्वयः—दिगीश्वरांशान् वहन् वसुसंश्रयः सुवर्णवान् उच्चतमः धराधरः (अतएव) सुमेरुतुल्यः स नृपनन्दनः तदा 'रुक्मी' इति सान्वयं नाम दधार ॥५६॥

दिगिति। दिगीश्वरांशान् इन्द्रादिदिक्पालांशान्, वहन्, "अष्टानां लोकपालानां मात्राभिर्निर्म्मितो नृपः" इति स्मरणादिति भावः; अन्यत्र दिगीश्वरांशान् दिक्पालभोग्यदेशान् वहन्, वसून् अष्टौ वसुदेवान् वसूनि धनानि च संश्रयते इति सः, सुवर्णवान् शोभनो वर्णोऽस्यास्तीति सः, अन्यत्र तु स्वर्णयुक्तः, उच्चतमः अतीवोन्नतदेहः, धराधरो भूपालः,

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

जहार साऽच्चीपि रसप्रतानिनी
प्रतानिनी पुष्पवतीव षट्पदान्।
न को जनः पश्यति हीनबालतां
न वा लतां काङ्क्षति को मधुव्रतः॥६२॥

कुमारेति। कुमारस्य रुक्मिणो वामे वामपार्श्वे, सा, नववामलोचना नवीनाङ्गना रुक्मिपत्नी, सहस्रदृशां बहुतरलोकलोचनानां गोचरतां विषयत्वम्, जगाम प्राप; बहव एव लोकाः सौन्दर्य्यातिरेकात्तां दद्दृशुरित्यर्थः। लोकः, उत्सुकः उत्कण्ठितः सन्नेव, सलीलां सविलासाम्, पुष्पिणीं पुष्पवतीञ्च, लताम्, ललनां योषितञ्च, अवश्यं ध्रुवमेव उत्पश्यति अवलोकते।

अत्र सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः, प्रस्तुताया ललनाया अप्रस्तुताया लतायाश्च उत्पश्यतीत्येकया क्रियया कर्म्मतयाभिसम्बन्धाद्दीपकञ्चानयोरङ्गाङ्गिभावेन सङ्करः, सोऽपि पुनश्छेकानुप्रासवृत्त्यनुप्रासाभ्यां संसृज्यते।

"स्त्रियः सुमनसः पुष्पम्" इति "स्यादृजः पुष्पमार्त्तवम्" इति चामरः॥६१॥

বাঙ্গালা—রুক্মীর বামপার্শ্ববর্ত্তিনী সেই নবাঙ্গনা সহস্র লোকের দৃষ্টির বিষয় হইয়াছিলেন। কারণ, মানুষ উৎকণ্ঠিত হইয়াই সলীলা ও পুষ্পবতী লতা ও রমণীকে অবশ্যই দেখিয়া থাকে॥৬১॥

अन्वयः—पुष्पवती प्रतानिनी षट्पदानिव रसप्रतानिनी सा अचीपि जहार। को जनः हीनबालतां न पश्यति:, को मधुव्रतो वा लतां न काङ्क्षति॥६२॥

जहारेति। पुष्पवती कुसुमशालिनी, प्रतानिनी शाखापल्लवादिविस्तारवती लता, षट्पदान् भ्रमरानिव, रसप्रतानिनी जनकतया

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

ततोऽबला बाललतातिकोमला
यदा धराया उददीधरद्घटम् ।
विलोक्य लोकाः कलसत्रयं तदा
प्रशङ्किरे तां बलवद्बलान्विताम् ॥६३॥

शृङ्गाररसविस्तारवती, सा कुमारवधूः, अक्षीणि लोकलोचनानि, जहार आचकर्ष । तथा च को जनः, हीना परित्यक्ता बालता बाल्यं वयो यया तां युवतिमित्यर्थः, न पश्यति अपि तु सर्व एव पश्यत्येवेत्यर्थः । को मधुव्रतो भ्रमरो वा, लताम्, न काङ्क्षति नाभिलषति अपि तु सर्व एव काङ्क्षतीति तात्पर्य्यम् ।

अत्र पूर्वार्द्धे श्रौतोपमा, तृतीयपादे कारणेन कार्य्यसमर्थनरूपोऽर्थान्तरन्यासः, द्वितीयार्द्धे दृष्टान्तश्च, श्लोकसमुदाये अन्त्यावयमकञ्चेति संसृष्टिः ।

"लता प्रतानिनी वीरुत्" इत्याद्यमरः ॥६२॥

বাঙ্গালা—শাখাপুষ্পসমন্বিতা লতা যেমন ভ্রমরগণকে আকর্ষণ করে, সেইরূপ রসবিস্তারশালিনী সেই কুমারবধূ লোকের দৃষ্টি আকর্ষণ করিতে লাগিলেন॥ কারণ, কোন্ মানুষ তরুণী রমণীকে দর্শন না করে এবং কোন্ ভ্রমরই বা লতার অভিলাষ না করে ? ॥৬২॥

अन्वयः—ततः बाललतातिकोमला अबला यदा धराया घटं उददीधरत्, तदा लोकाः कलसत्रयं विलोक्य तां बलवद्बलान्वितां प्रशङ्किरे ॥६३॥

तत इति । ततः अनुलेपनानन्तरम्, बाललता नववल्लीव अतिकोमला काचिदबला वारवनिता, यदा, धराया भूतलात्, घटम् अभिषेककुम्भम्, उददीधरत् स्नपनार्थमुत्तोलितवती, तदा, लोकाः, कलसत्रयं द्वौ स्तनकलसौ एकश्चाभिषेककलस इति त्रीन् कलसान्,

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

परिप्रलिप्ते ललितानुलेपने
नवा मरीची रुरुचे विसारिणी।
असह्यवेगा नु पतिंवरेन्दिरा
तनूं विषेकात् समपूरयत् पुरः ॥৫৯॥
गुरूपदिष्टोऽपि बधूविलेपने
परं व्यलम्बिष्ट नितम्बिनीगणः।

সময়ে তাঁহার লাবণ্য ও প্রভারূপ সরোবরের মধ্যে বারতরুণীগণের কলিকা-তুল্য স্তন, হস্ত ও মুখরূপ তিনটী পদ্ম প্রকাশ পাইতেছিল ॥৫৮॥

अन्वयः—ललितानुलेपने परिप्रलिप्ते (सति) विसारिणी नवा मरीची रुरुचे। असह्यवेगा पतिंवरा इन्दिरा विषेकात् पुरः (एव) तनूं समपूरयत् नु ॥৫৯॥

परीति। ललितानुलेपने मनोहरानुलेपनद्रव्ये चन्दनादौ, परिप्रलिप्ते कुमारस्य सर्वेष्वङ्गेषु अर्पिते सति, विसारिणी सर्वदिग्गामिनी नवा अपूर्वा, मरीची कुमारस्य कान्तिः, रुरुचे दिदीपे। अत्रोत्प्रेक्षते असह्येति। असह्यो वेगो वर्णावेगो यस्याः सा, पतिं वृणीत इति पतिंवरा, इन्दिरा लक्ष्मीः, विषेकात् अभिषेकात्, पुरः पूर्वमेव, तनूं रुक्मिदेहम्, समपूरयत् नु? आत्मना परिपूरितवती किम्?।

अत्र वाच्या भावाभिमानिनी क्रियोत्प्रेक्षालङ्कारः, छेकानुप्रासेन संसृज्यते ॥৫৯॥

বাঙ্গালা—রাজকুমার রুক্মীর সমস্ত অঙ্গে মনোহর অনুলেপন দ্রব্য মাখাইয়া দিলে, তাঁহার দেহের অপূর্ব্ব প্রভা সকল দিকে প্রকাশ পাইল; সুতরাং পতিবরণার্থিনী অসহ্যবেশশালিনী লক্ষ্মী কি অভিষেকের পূর্ব্বেই তাঁহার দেহ পূর্ণ করিয়াছিলেন? ॥৫৯॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

भृशं कराकर्षमृते वियुक्ततां
प्रयात्ययस्कान्तमणेरयः कथम् ॥६०॥
कुमारवामे नववामलोचना
सहस्रदृग्गोचरतां जगाम सा ।
लतां सलीलां ललनाश्च पुष्पिणीम्
अवश्यमुत्पश्यति लोक उत्सुकः ॥६१॥

अन्वयः—नितम्बिनीगणः गुरूपदिष्टः (सन्) अपि वधूविलिपने परं व्यलम्बिष्ट। अयः भृशं कराकर्षं ऋते कथं अयस्कान्तमणेः वियुक्ततां प्रयाति ॥६०॥

गुर्विति। नितम्बिनीनां वारवनितानां गणः, गुरुणा आचार्य्येण उपदिष्टः सन्नपि, वध्वा रुक्मिपत्न्या विलिपने, परमत्यन्तं व्यलम्बिष्ट विलम्बं कृतवान्; रुक्मिगात्रतो हस्तानयने विलम्बादिति भावः। तत्र हेतुमाह भृशमिति। अयो लौहं कर्त्तृ, भृशं सातिशयम्, करेण आकर्षम् आकर्षणम्, ऋते विना, कथम्, अयस्कान्तमणेः सकाशात्, वियुक्ततां विश्लेषम्, प्रयाति प्राप्नोति। नितम्बिनीगणस्य हस्तः खलु अयस्कान्तमणावय इव रुक्मिगात्रे भृशं संसक्त इत्याशयः।

अत्र साधर्म्येण दृष्टान्तोऽलङ्कारश्छेकानुप्रासेन संसृज्यते ॥६०॥

বাঙ্গালা—ক্রমে আচার্য্য কুমারবধূর অঙ্গে সুগন্ধি দ্রব্য লেপনের উপদেশ করিলেও, বারবনিতারা তাহাতে গুরুতর বিলম্ব করিল। কারণ, হস্তদ্বারা গুরুতর আকর্ষণ না করিলে, লৌহ চুম্বকপ্রস্তর হইতে বিশ্লিষ্ট হইবে কেন ॥৬০॥

अन्वयः—कुमारवामे सा नववामलोचना सहस्रदृग्गोचरतां जगाम। लोकः उत्सुकः (सन्) सलीलां पुष्पिणीश्च लतां ललनाश्च अवश्यमुत्पश्यति ॥६१॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

तमावसानं वसनं बभूवतुः
ग्रहीतुकामे युगपद्वधूश्रियौ।
अपत्रपिष्णुः प्रथमा न सुस्थिरा
पराऽस्थिरा विग्रहमग्रहीत् समम् ॥६६॥

च, तत् रुक्मिणो राज्याभिषेचनम्, निशम्य लोकमुखादाकर्ण्य, विवर्णा उद्वेगेन मलिनमुखी, दीना कातरा च सती, अक्षिजलेन भाविपतिविनाशशङ्कया अश्रुजलेन, मेदिनीं भूमिम्, असिचत्।

अत्र रिपुवरवर्णिन्या अक्षिजलेन मेदिनीसेचनासम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिरलङ्कारः, असिचदित्येकया क्रियया तौ मेदिनीमित्युभयोः कर्म्मतयाभिसम्बन्धात्तुल्ययोगिता चेत्युभयोरङ्गाङ्गिभावेन सङ्करः, सोऽपि च छेकानुप्रासेन संसृज्यते।

"शृङ्गारः शुचिरुज्ज्वलः" इत्यमरः।

असिचदिति अद्यतन्या दौ "अण् असु-वचि" इत्यादिना अणि रूपम् ॥६५॥

বাঙ্গালা—তদনন্তর কোন পবিত্র ব্রাহ্মণ অভিষেকমন্ত্রপাঠপূর্ব্বক পাপনাশক জলদ্বারা সেই শৃঙ্গা প্রিয় কুমারদম্পতিকে অভিষিক্ত করিলেন। তাহা শুনিয়া শত্রুপক্ষের স্ত্রীলোকগণ উদ্বেগে মলিনবদন ও কাতরচিত্ত হইয়া নয়নজলদ্বারা ভূতল সিক্ত করিল ॥৬৫॥

अन्वयः—वधूश्रियौ युगपत् (एव) वसनं आवसानं तं ग्रहीतुकामे बभूवतुः। (किन्तु) अपत्रपिष्णुः सुस्थिरा च प्रथमा विग्रहं न अग्रहीत्, अस्थिरा परा तु समं (एव) विग्रहं अग्रहीत् ॥६६॥

तमिति। वधूः रुक्मिभार्य्या श्रीर्लक्ष्मीश्चेति ते वधूश्रियौ, युगपत् एकदैव, वसनं युवराजोचितं वस्त्रम्, आवसानम् अभिषेकात् परं

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

धृतः किरीटी मणिरत्नभास्वरः
विधुः शिवस्येव शिरस्यमुष्य यः ।
अपाहरत् स प्रतिविम्बकैतवात्
सदःस्थितानां प्रभुतां महीभृताम् ॥६७॥

परिदधानम्, तं रुक्मिणम्, ग्रहीतुं सौन्दर्य्यातिरेकादालिङ्गितुं कामो ययोस्ते, बभूवतुः । किन्तु, अपत्रपिष्णुर्लज्जाशीला, सुस्थिरा धैर्य्यशालिनी च, प्रथमा वधूः, विग्रहं रुक्मिशरीरम्, न अग्रहीत् ; अस्थिरा चञ्चलेत्युपलक्षणं निर्लज्जा च, परा श्रीस्तु, समं वसनपरिधानसमकालमेव, विग्रहं रुक्मिशरीरम्, अग्रहीत् । युवराजोचितवस्त्रपरिधानात् परं रुक्मिणः परमैव शोभा सञ्जातेति निष्कर्षः ।

अत्र बभूवतुरित्येकया क्रियया वधूश्रियोः कर्त्तृतयाभिसम्बन्धात्तुल्ययोगिता, वधूपक्षे ग्रहणाभावं प्रति अपेत्यादिपदद्वयार्थस्य श्रीपक्षे ग्रहणं प्रति च सुस्थिरेति पदार्थस्य हेतुत्वात् पदार्थहेतुकं काव्यलिङ्गद्वयं श्रियां स्त्रीव्यवहारसमारोपात् समासोक्तिश्चेत्येतेषामङ्गाङ्गिभावेन सङ्करः, सोऽपि च छेकानुप्रासेन संसृज्यते ।

आवसानमिति "वस आच्छादने" इत्यस्यानशि रूपम् । अपत्रपिष्णुरिति अपपूर्वस्य त्रपधातोः "भ्राज्यलंकृञ्" इत्यादिना इष्णुच् ॥६६॥

বাঙ্গালা—অভিষেকের পরে রুক্মী বস্ত্র পরিধান করিতে লাগিলে, বধূ ও শ্রী এক সময়েই তাঁহাকে আলিঙ্গন করিবার ইচ্ছা করিয়াছিলেন ; কিন্তু লজ্জাশীলা ও ধৈর্য্যশালিনী বধূ তাহা পারিলেন না ; আর নির্লজ্জা ও চঞ্চলা শ্রী বস্ত্র পরিধান করিবার সময়েই রুক্মীর শরীর ধারণ করিয়াছিলেন ॥৬৬॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

प्रसन्नपर्य्यङ्कनिषण्णदम्पती
विलोकयन् स्नापयतोऽङ्गनाजनान् ।
हराद्रिरूढ़ौ व्रततीवनस्पती
प्रवर्षुकां वारिदपङ्क्तिमस्मरत् ॥६४॥

विलोक्य, ताम्, अबलाम्, बलवद्बलान्विताम् अत्यन्तशक्तियुक्ताम्, शशङ्किरे सम्भावितवन्तः, युगपत् कलसत्रयधारणादित्याशयः ।

अत्र बाललतातिकोमलेति लुप्तोपमा, "कथमुपरि कलापिनः कलाप" इति दर्पणोदाहरणवत् स्तनद्वये कलसद्वयात्वाध्यवसायाद्भेदे अभेदाध्यवसायेमूलातिशयोक्तिः, अबलापि बलवद्बलान्वितेति विरोधाभासः, छेकानुप्रासो वृत्त्यनुप्रासश्चेति संसृष्टिः ।

"बलवत् सुष्ठु, किमुत स्वत्यतीव च निर्भरे" इत्यमरः ।

उददीधरदिति इनन्तधृधातोरद्यतन्यां रूपम् ॥६३॥

বাঙ্গালা—তাহার পর অত্যন্ত কোমলাঙ্গী কোন বারবনিতা যখন ভূতল হইতে জলপূর্ণ কুম্ভ উত্তোলন করিল, তখন তত্রত্য লোকসকল ঐ বারবনিতাকে একদা তিনটী কলস বহন করিতে দেখিয়া তাহাকে অত্যন্ত বলবতী বলিয়া মনে করিল ॥৬৩॥

अन्वयः—प्रसन्न-पर्य्यङ्क-निषण्ण दम्पती स्नापयतः अङ्गनाजनान् विलोकयन् (जनः) हराद्रिरूढ़ौ व्रततीवनस्पती प्रवर्षुकां वारिदपङ्क्तिं अस्मरत् ॥६४॥

प्रसन्नेति । प्रसन्ने निर्म्मले पर्य्यङ्के प्रागुक्तमञ्चे निषण्णौ स्थितौ यौ दम्पती भार्य्यापती तौ भार्य्यासहितं रुक्मिणमित्यर्थः, स्नापयतः अभिषिञ्चतः, अङ्गनाजनान् वारवनिताः, विलोकयन् जनः, हराद्रिः शुभ्रकैलासपर्वतस्तत्र रूढ़ौ उत्पन्नौ, व्रततीवनस्पती परस्परसंश्लिष्ट-

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

समन्त्रकैः पापनिवारिवारिभिः
शुचिप्रियौ तावसिचद्द्विजः शुचिः ।
रिपोर्विवर्णा वरवर्णिनी च तत्
निशम्य दीनाऽश्रुजलेन मेदिनीम् ॥६५॥

लताद्रुमौ, प्रवर्षुकां वारिणा वर्षन्तीम्, वारिदपङ्क्तिं मेघमालाम्, अस्मरत् सादृश्यातिशयात् स्मृतवान् ।

अतएवात्र स्मरणालङ्कारो वृत्त्यनुप्रासेन संसृज्यते ।

"वनस्पतिर्द्रुमात्रे" इत्यमरः ।

स्नापयत इति "ग्लास्नावनुवमश्च" इति विकल्पाधिकारात् पक्षे न ह्रस्वः, प्रवर्षुकामिति "स्मृ-कम—" इत्यादिना वृषधातोरुकञ्, तस्य च निष्ठादित्वात् व्रततीवनस्पती इति कर्म्मणि न षष्ठी ॥६४॥

বাঙ্গালা—ক্রমে রুক্মী ও তাঁহার ভার্য্যা সেই নির্ম্মল মঞ্চে অধিষ্ঠান করিলে, বারবনিতারা তাঁহাদিগকে স্নান করাইতে লাগিল, তাহা দেখিয়া তত্রত্য লোকেরা কৈলাসপর্ব্বতসঞ্জাত পরস্পর সংশ্লিষ্ট লতা ও বৃক্ষের উপরে বর্ষাকারিণী মেঘমালাকে স্মরণ করিতে লাগিল ॥৬৪॥

अन्वयः—शुचिः द्विजः समन्त्रकैः पापनिवारिवारिभिः शुचिप्रियौ असिचत् ; रिपोः वरवर्णिनी च तत् निशम्य विवर्णा दीना च (सती) अश्रुजलेन मेदिनीं असिचत् ॥६५॥

अथ वारवनिता लिप्तगन्धद्रव्यप्रक्षालनार्थं स्नापयन्ति स्म, वैधस्नपनन्तु कुत इत्याह समन्त्रकैरिति । शुचिः स्नानादिना पवित्रीभूतः, द्विजः कश्चिद्ब्राह्मणः, समन्त्रकैर्मन्त्रपाठसहितैः, पापनिवारिभिः पापनाशकजलैः, शुचिः शृङ्गारः प्रियो ययोस्तौ पूर्णयौवनादिति भावः ; तौ दम्पती, असिचत् अभिषिक्तवान्, रिपोः शत्रुपक्षस्य, वरवर्णिनी अङ्गना

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

धृते किरीटेऽथ वधूशिरस्यपि
सुयोजिते चाभरणेऽखिले तयोः।
प्रलब्धवान् सभ्यविदग्धमुग्धयो-
र्गणः पुनर्ज्ञानमिदं तदा द्विधा ॥६८॥

अन्वयः—शिवस्य शिरसि विधुरिव अमुष्य शिरसि मणिरत्नभास्वरः यः किरीटः धृतः, सः प्रतिविम्बकैतवात् सदःस्थितानां महीभृतां प्रभुतां अपाहरत् (इव) ॥६७॥

धृत इति। शिवस्य, शिरसि, विधुश्चन्द्र इव, अमुष्य रुक्मिणः शिरसि, मणिरत्नैर्भास्वर उज्ज्वलः, यः, किरीटो मुकुटम्, धृतो धारणेनावस्थितः; स किरीटः, प्रतिविम्बकैतवात् महीभृतामेव प्रतिविम्बग्रहणच्छलात्, सदःस्थितानां सभायां विद्यमानानाम्, महीभृतां राज्ञाम्, प्रभुता-माधिपत्यम्, अपाहरदगृह्णादिव।

अत्र शिवस्य विधुरिवेति श्रौतोपमा, द्वितीयार्द्धे सापह्नवा प्रतीयमाना क्रियोत्प्रेक्षा, छेकानुप्रासो वृत्त्यनुप्रासश्चेत्येतेषां मिथो निरपेक्षतया संसृष्टिः ॥६७॥

বাঙ্গালা—শিবের মস্তকে চন্দ্রের ন্যায় রুক্মীর মস্তকে মণিরত্নে উজ্জ্বল যে কিরীট সমর্পিত হইল, তাহা প্রতিবিম্বচ্ছলে সভাস্থিত রাজগণের আধিপত্যই যেন গ্রহণ করিল ॥৬৭॥

अन्वयः—अथ वधूशिरसि अपि किरीटे धृते अखिले आभरणे च तयोः सुयोजिते (सति) सभ्यविदग्धमुग्धयोर्गणः तदा इदं पुनः द्विधा ज्ञानं प्रलब्धवान् ॥६८॥

धृत इति। अथ रुक्मिणः किरीटधारणानन्तरम्, वध्वा रुक्मि-महिष्या शिरस्यपि, किरीटे, धृते धारणेनावस्थिते, अखिले सकले, आभरणे अलङ्कारे च, तयो रुक्मितन्महिष्योः, सुयोजिते सुष्ठु परिधापिते

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

पतिंवरां निर्म्मलमालधारिणीं
श्रियं समेतां बुबुधे वधूं बुधः ।
अबोधि मुग्धश्च पुनश्च रुक्मिणं
वरं वरीतुं किमितीयमिच्छति ॥६९॥

सति, सभ्यौ च तौ विदग्धमुग्धौ पण्डितसुन्दरौ चेति तयोः, गणः समूहः, तदा, इदं वक्ष्यमाणम्, पुनर्द्विधा द्विप्रकारम्, ज्ञानम्, प्रलब्धवान् ।

अत्र छेकानुप्रासोऽलङ्कारः ॥६८॥

বাঙ্গালা—তদনন্তর মহিষীর মস্তকেও মুকুট সমর্পিত হইলে এবং তাঁহাদের দুই জনেরই অঙ্গে সমস্ত অলঙ্কার পরিধান করাইয়া দিলে, তখন সভাস্থিত পণ্ডিতগণ ও সুন্দর পুরুষগণ এই প্রকার জ্ঞান লাভ করিলেন ॥৬৮॥

अन्वयः—बुधः वधूं पतिंवरां समेतां निर्म्मलमालधारिणीं श्रियं बुबुधे । मुग्धश्च इयं पुनश्च रुक्मिणं वरं वरीतुं किं इच्छति अबोधि ॥६९॥

पतिमिति । बुध्यत इति बुधो बुद्धिमान् जनः, वधूं रुक्मिमहिषीम्, पतिं वृणीत इति पतिंवरा ताम्, समेतां समागताम्, निर्म्मलां मालां बिभर्त्तीति निर्म्मलमालधारिणी ताम्, श्रियं साक्षाल्लक्ष्मीम्, बुबुधे मेने ; मालाधारित्वादलौकिकसौन्दर्य्याच्चेति भावः । मुग्धो मूढश्च, द्विःपति-वरणसम्भावनाम्मूढत्वमित्यभिप्रायः । इयं तरुणी, पुनश्च पुनरपि, रुक्मिणम्, वरम्, वरीतुम्, किम्, इच्छति, इति अबोधि सम्भावितवान् ; मालाधारणादित्याशयः ।

अत्र एकस्या वध्वा अनेकधोल्लेखात् रूपकोत्प्रेक्षायोगाच्च उल्लेखो नामालङ्कारः, वृत्त्यनुप्रासच्छेकानुप्रासाभ्यां संसृज्यते ।

पतिंवरेति "नाम्नि तृभृ—" इत्यादिना खप्रत्यये "ह्रस्वारुषोर्म्मोऽन्तः"

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

वपुर्म्महालङ्करणेन किङ्करैः
अलङ्कृतं रुक्‍ममुखेन रुक्मिणः।
महीपतेर्न्नन्दनकान्तिनन्दिनः
शुभान्नवीनात् समशूशुभन्मुखम् ॥७०॥

इति मकारागमः। मालभारिणीति "याकारौ स्त्रीकृतौ ह्रस्वः क्वचित्" इति मालाशब्दस्य ह्रस्वान्तता। वरीतुमिति "वृदृ वृ ञ्ोऽपि—" इत्यादिना इटो दीर्घत्वम् ॥६९॥

বাঙ্গালা—স্বয়ং লক্ষ্মীদেবী পতিবরণ করিবার জন্যই যেন নির্ম্মল মালা লইয়া আসিয়াছেন ইহা রুক্মিমহিষীর সম্বন্ধে বুদ্ধিমান্ লোকেরা মনে করিলেন; আর নির্ব্বোধ লোকেরা মনে করিল যে, 'এই তরুণী কি আবারও পতিবরণ করিবার ইচ্ছা করিতেছে?' ॥৬৯॥

अन्वयः—किङ्करैः रुक्‍ममुखेन महालङ्करणेन रुक्मिणः वपुः अलङ्कृतं, (तत्र) नवीनात् शुभात् नन्दनकान्तिनन्दिनः महीपतेः मुखं समशूशुभत् ॥७०॥

वपुरिति। किङ्करैर्भृत्यैः, रुक्‍ममुखेन स्वर्णालङ्कारादिना, महालङ्करणेन प्रशस्तभूषणेन, रुक्मिणो वपुः शरीरम्, अलङ्कृतं शोभितम्, तच्चालङ्करणम्, नवीनात् नूतनात्, शुभात् पुत्रस्य यौवराज्याभिषेकरूपात् मङ्गलव्यापारात्, नन्दनस्य पुत्रस्य कान्त्या शोभया नन्दति आनन्दमनुभवतीति तस्य, महीपते राज्ञो भीष्मकस्य, मुखं वदनमण्डलम्, समशूशुभत् सम्यक्शोभितवत्। अहो! महदाश्चर्य्यमेतदिति भावः।

अत्र कारणीभूतमलङ्करणं युवराजे, तत्कार्य्यभूतं मुखशोभनन्तु राजनि भीष्मक इति कार्य्यकारणयोर्भिन्नदेशवर्त्तित्वादसङ्गतिर्नामालङ्कारः पूर्ववदनुप्रासाभ्यां संसृज्यते ॥७०॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

জরন্ যদা সন্ততবত্সবত্সলঃ
ভুবঃ প্রদানং কৃতবান্ কৃতী নৃপঃ।
মহামহীভারভরাদিবাপতত্
তদা পদাগ্রেঽস্য কুমারমস্তকম্ ॥৭১॥

বাঙ্গালা—ভৃত্যেরা স্বর্ণালঙ্কারপ্রভৃতি উত্তম অলঙ্কারদ্বারা রুক্মীর শরীরটী অলঙ্কৃত করিয়াছিল; কিন্তু তাহা পুত্রের সৌন্দর্য্যদর্শনে আনন্দিতচিত্ত রাজা ভীষ্মকের মুখমণ্ডলকে নূতন মাঙ্গলিক ব্যাপারনিবন্ধন শোভিত করিল ॥৭০॥

অন্বয়ঃ—যদা সন্ততঃ-বত্স-বত্সলঃ কৃতী (চ) জরন্ নৃপঃ ভুবঃ প্রদানং কৃতবান্; তদা কুমারমস্তকং মহামহীভারভরাদিব অস্য পদাগ্রে অপতত্ ॥৭১॥

জরন্নিতি। যদা, সন্ততং সর্বদা বত্সে পুত্রাদৌ বত্সলঃ স্নেহশীলঃ, কৃতী সর্বকার্য্যনিপুণশ্চ, জরন্ বৃদ্ধঃ, নৃপো ভীষ্মকঃ, ভুবো রাজস্য প্রদানং রুক্মিণে সমর্পণম্, কৃতবান্; তদা, কুমারস্য যুবরাজস্য রুক্মিণো মস্তকম্, মহান্ যো মহ্যা রাজ্যস্য ভারস্তস্য ভরাদ্বিন্যাসাদিব, অস্য নৃপস্য ভীষ্মকস্য, পদাগ্রে চরণসম্মুখে, অপতত্; রুক্মী ভীষ্মকপদে নমস্কারেত্যর্থঃ।

অত্র মহামহীভারভরাদিবেতি হেতূত্প্রেক্ষালঙ্কারঃ বৃত্ত্যনুপ্রাসশ্ছেকানুপ্রাসশ্চেতি সংসৃষ্টিঃ।

"বর্ষীয়ান্ দশমী জ্যায়ান্ জীনো জীর্ণো জরন্নপি" ইত্যমরঃ।
"বত্সঃ স্নিগ্ধে চ পুত্রে চ" ইতি হেমচন্দ্রঃ ॥৭১॥

বাঙ্গালা—সর্ব্বদা পুত্রবৎসল ও সর্ব্বকার্য্যে নিপুণ রাজা ভীষ্মক যখন যুবরাজ রুক্মীর হস্তে রাজ্য সমর্পণ করিলেন, তখন বিশাল পৃথিবীর ভারেই যেন রুক্মীর মস্তকটী ভীষ্মকের চরণসম্মুখে পতিত হইল ॥৭১॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

प्रकाशिताशीर्मुखजन्मनां मुखात्
रहोगतस्त्रैणकुलादुलुध्वनिः ।
जयध्वनिः स्वस्तिवचश्च सर्वतः
नरेन्द्रवर्गादुदतिष्ठदेकदा ॥७२॥

स्वनः स तौर्य्यत्रिकनिस्वनैः सह
समुच्चरन्नुच्चतरस्तदाऽभितः ।
रमाप्रदाने पवनेन विद्रुत-
समुद्रकल्लोलरवानवाहसत् ॥७३॥

अन्वयः—मुखजन्मनां मुखात् प्रकाशिता आशीः, रहोगतस्त्रैणकुलात् उलुध्वनिः, सर्वतः जयध्वनिः, नरेन्द्रवर्गात् स्वस्तिवचश्च एकदा उदतिष्ठत् ॥७२॥

प्रकाशितेति । मुखाद्ब्रह्मणो वदनाज्जन्म येषां ते मुखजन्मानो ब्राह्मणास्तेषाम्, मुखात्, प्रकाशिता निर्गता, आशीराशीर्वादः, रहोगतं निर्जनस्थितं पटान्तरालगतमित्यर्थः यत् स्त्रैणकुलं स्त्रीसमूहस्तस्मात्, उलुध्वनिः, सर्वत उक्तेतरेभ्यः सर्वेभ्यो जनेभ्यः, जयध्वनिः, नरेन्द्रवर्गात् राजसमूहात्, स्वस्तिवचः शुभमस्त्विति वाक्यञ्च, एकदा, उदतिष्ठत् ।

अत्र उदतिष्ठदित्येकया क्रियया आशीरादीनां कर्त्तृतयाभिसम्बन्धात् तुल्ययोगितालङ्कारः प्रथमपादगतलाटानुप्रासेन संसृज्यते ॥७२॥

বাঙ্গালা—ব্রাহ্মণগণের মুখ হইতে নির্গত আশীর্ব্বাদ, অন্তরালস্থিত নারীগণ হইতে উলুধ্বনি, অন্য সকল ব্যক্তি হইতে জয়ধ্বনি এবং রাজগণ হইতে স্বস্তিবাক্য এক সময়ই উত্থিত হইল ॥৭২॥

अन्वयः—तदा उच्चतरः स स्वनः तौर्य्यत्रिकनिस्वनैः सह अभितः समुच्चरन् (सन्) रमाप्रदाने पवनेन विद्रुतसमुद्रकल्लोलरवान् अवाहसत् ॥७३॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

প্রসূনবৃষ্টির্নিপপাত রুক্মিণ:
জনালিহস্তাৎ কিল যা তনূপরি ।
বিনি:সৃতা ভীষ্মকপাণিপল্লবাৎ
হিরণ্যবৃষ্টির্যুগপজ্জিগায় তাম্ ॥৭৪॥

স্বন ইতি । তদা, উচ্চতর:, স স্বনো মিলিতশব্দ:, তৌর্য্যত্রিকস্য নৃত্যগীতবাদ্যানাং নিস্বনৈ: শব্দৈ: সহ, অভিত: সর্বত:, সমুচ্চরন্ বিচরন্ সন্, রমায়া লক্ষ্মীদেব্যা:, প্রদানে নারায়ণায় প্রদানকালে, পবনেন বায়ুনা, বিদ্রুতস্য উদ্বেলিতস্য সমুদ্রস্য কল্লোলরবান্ মহাতরঙ্গশব্দান্, অবাহসৎ উপহসিতবান্ ।

অত্রাবহাসেন সাদৃশ্যসূচনাদার্থোপমালঙ্কার:, ছেকানুপ্রাসো বৃত্ত্যনুপ্রাসশ্চেতি সংসৃষ্টি: ।

"তৌর্য্যত্রিকং নৃত্যগীতবাদ্যম্" ইত্যমর: ॥৭৩॥

বাঙ্গালা—সেই উচ্চতর শব্দ নৃত্য, গীত ও বাদ্যের শব্দের সহিত সকল দিকে বিচরণ করিতে থাকিয়া নারায়ণের হস্তে লক্ষ্মীদেবীকে সম্প্রদান করিবার সময়ে বায়ুসঞ্চালিত সমুদ্রের মহাতরঙ্গের শব্দকে উপহাস করিতেছিল ॥৭৩॥

অন্বয়:—জনালিহস্তাৎ যা প্রসূনবৃষ্টি: রুক্মিণ: তনূপরি নিপপাত কিল, ভীষ্মকপাণিপল্লবাৎ যুগপৎ বিনি:সৃতা হিরণ্যবৃষ্টি: তাং জিগায় ॥৭৪॥

প্রসূনেতি । জনালিহস্তাল্লোকসমূহকরাৎ, যা প্রসূনবৃষ্টি: পুষ্পবৃষ্টি:, রুক্মিণো যুবরাজস্য তনো: শরীরস্যোপরি, নিপপাত কিল ; ভীষ্মকস্য পাণিপল্লবাৎ, যুগপদেকদৈব, বিনি:সৃতা বিনির্গতা হিরণ্যানাং সুবর্ণানাং বৃষ্টি:, তাং প্রসূনবৃষ্টিম্, জিগায় জিতবতী ; অতিরেকাদিত্যাশয়: ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

प्रतर्पयन्तो हृदयं दयार्थिनः
स्तुतीरितैर्बन्दिजना ववन्दिरे ।
वसुप्रभूणां वसुधातले हि न
स्तुतेरभावो भवतीह कर्हिचित् ॥७५॥
अमुं किमु श्रीश्वपलाश्रिता नवा
सरस्वतीतीव परीचितुं स्वयम् ।

अतएवात्र प्रसूनवृष्ट्यपेक्षया हिरण्यवृष्टेराधिक्यवर्णनाद्व्यतिरेकालङ्कारः ॥७४॥

বাঙ্গালা—লোকসমূহের হস্ত হইতে যে পুষ্পবৃষ্টি রুক্মীর দেহের উপরে পতিত হইল ; রাজা ভীষ্মকের হস্তপল্লব হইতে নির্গত স্বর্ণ বৃষ্টি সেই পুষ্পবৃষ্টিকে জয় করিল ॥৭৪॥

अन्वयः—दयार्थिनः बन्दिजनाः स्तुतीरितैः हृदयं प्रतर्पयन्तः ववन्दिरे । इह वसुधातले हि कर्हिचित् वसुप्रभूणां स्तुतेः अभावः न भवति ॥७५॥

प्रतर्पयन्त इति । दयार्थिनो युवराजस्यैव कृपाभिलाषिणः, बन्दिजनाः स्तुतिपाठकाः, स्तुतीरितैः प्रशंसावाक्यैः, हृदयं युवराजस्य मनः, प्रतर्पयन्तः सन्तोषयन्तः सन्तः, ववन्दिरे युवराजं सिषेविरे । इह वसुधातले हि, कर्हिचित्, वसुप्रभूणां धनस्वामिनाम्, स्तुतेः प्रशंसायाः अभावो न भवति, प्रायेण सर्वैरेव तस्याः करणादिति भावः ।

अत्र सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारश्छेकानुप्रासेन संसृज्यते ॥७५॥

বাঙ্গালা—দয়াভিলাষী স্তুতিপাঠকেরা স্তুতিবাক্যে যুবরাজ রুক্মীর হৃদয় সন্তুষ্ট করিতে থাকিয়া তাঁহার বন্দনা করিতে লাগিল। কারণ, এই পৃথিবীতে কোন সময়ই ধনিগণের স্তুতিবাক্যের অভাব হয় না ॥৭৫॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

मुखे मुनीनाममनाक् प्रशंसतां
स्वतः सपत्नीगतमत्सरादगात् ॥७६॥
नृपः पुराणः करमेकधाऽनयत्
परं कुमारोऽप्यपरं ग्रहीष्यति ।
अहो दरिद्रस्य विपत् पदे पदे
पुरोऽस्मरन् जानपदा जना इति ॥७७॥

अन्वयः—चपला श्रीः अमुं आश्रिता किमु न वा इति स्वयं परीक्षितुमिव सरस्वती स्वतः अमनाक् प्रशंसतां मुनीनां मुखे सपत्नीगतमत्सरात् अगात् ॥७६॥

अमुमिति । चपला चञ्चला, श्रीर्लक्ष्मीः, अमुं युवराजं रुक्मिणम्, आश्रिता किमु न वा, इति, स्वयमात्मना, परीक्षितुमिव, सरस्वती वाग्देवी, स्वत आत्मन एव प्रेरणया, अमनागनल्पं यथा स्यात्तथा, प्रशंसतां मुनीनां मुखे, सपत्नीगतो यो मत्सरो विद्वेषस्तस्मात्, अगादगमत् । अन्योऽपि समीपमुपेत्यैव परीक्षते ।

अत्र परीक्षितुमिवेति फलोत्प्रेक्षालङ्कारश्छेकानुप्रासश्चेति संसृष्टिः । "किञ्चिदीषन्मनागल्पे" इति "मत्सरोऽन्यशुभद्वेषे" इति चामरः ॥७६॥

বাঙ্গালা—চঞ্চলা লক্ষ্মী আসিয়া ইঁহাকে আশ্রয় করিয়াছেন কি না ইহা পরীক্ষা করিবার জন্যই যেন সরস্বতী অত্যন্ত প্রশংসাকারী মুনিগণের সপত্নীগত বিদ্বেষনিবন্ধন আসিয়াছিলেন ॥৭৬॥

अन्वयः—पुराणः नृपः एकधा करं अनयत्, परं कुमारः अपि अपरं ग्रहीष्यति । अहो दरिद्रस्य पदे पदे विपत् इति जानपदाः जनाः पुरः अस्मरन् ॥७७॥

नृप इति । पुराणः प्राचीनः, नृपो भीष्मकः, एकधा एकप्रकारं राजग्राह्यमित्यर्थः, करं भागधेयम्, अनयत् अग्रहीत्, परमितोऽनन्तरम्,

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

ततश्च दीना नृपदानतोषिताः
तयोस्तृतीयं प्रभुमीषुरीदृशम्।
ग्रहेण दुःखञ्च सुखञ्च दानतः
इयं गतिर्जागतिकी हि सर्वतः ॥७८॥

कुमारो युवराजोऽपि, अपरं युवराजग्राह्यं करम्, ग्रहीष्यति। अहो इति विषादे, दरिद्रस्य पदे पदे विपत्, इति, जानपदा देशवासिनो जनाः, पुरा पूर्वम्, अस्मरन् अमादमन्यन्त।

अत्र कार्य्येण कारणसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः, वृत्त्यनुप्रासच्छेकानुप्रासश्चेति संसृष्टिः ॥७७॥

বাঙ্গালা—প্রাচীন রাজা এক প্রকার কর (খাজনা) লইতেন, এখন আবার যুবরাজ অন্য প্রকার কর লইবেন। হায়! দরিদ্রের পদে পদেই বিপদ হইয়া থাকে; দেশবাসী প্রজারা প্রথমে এইরূপ মনে করিয়াছিল ॥৭৭॥

अन्वयः—ततश्च दीनाः नृपदानतोषिताः (सन्तः) तयोः तृतीयं ईदृशं प्रभुं ईषुः। ग्रहेण च दुःखं दानतश्च सुखं (स्यात्) इयं हि सर्वतः जागतिकी गतिः ॥७८॥

तत इति। ततश्च पूर्व्वविधस्मरणानन्तरञ्च, दीना दरिद्रा जनाः, नृपस्य भीष्मकस्य दानेन तोषिताः सन्तः, तयोर्भीष्मकरुक्मिणोस्तृतीयम्, ईदृशं दातारमेव, प्रभुं राजानम्, ईषुरभिलषितवन्तः, एतस्माद्द्वयादिव तस्मात्तृतीयादपि ईदृशलाभावश्यम्भावादिति भावः। ग्रहेण आत्मनः सकाशादन्यकर्त्तृकग्रहणेन च, दुःखं स्यात्, अतएव पूर्व्वश्लोके दुःखमुक्तमित्याशयः। आत्मनि दानतश्च सुखं स्यात्, इयं हि, सर्वतः सर्वत्र, जगत इयं जागतिकी जगद्वासिनां सर्व्वेषामेवेत्यर्थः, गतिरवस्था भवति।

अत्र तृतीयस्य प्रभोरिच्छाया असम्बन्धेऽपि तत्सम्बन्धोक्ता रतिशयोक्ति-

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

অনুত্তমান্নৈঃ পরিপূরিতোদরাঃ
মহোত্তমান্নাশননিষ্ফলোদ্যমাঃ ।
পরং ব্যষীদন্নবিবেকিনো জনাঃ
অসাবধানস্য সুখেঽপি দুঃখিতা ॥৭৯॥

রলঙ্কারঃ, সামান্যেন বিশেষসমর্থনরূপোঽর্থান্তরন্যাসশ্চৈকানুপ্রাসশ্চেত্যেতেষাং মিথো নিরপেক্ষতয়া সংসৃষ্টিঃ ॥৭৮॥

বাঙ্গালা—তাহার পর দরিদ্র লোকেরা রাজার দানে সন্তুষ্ট হইয়া তাঁহাদের তৃতীয় এইরূপ আর একটী রাজা কামনা করিতে লাগিল। কারণ, নিজের নিকট হইতে কেহ কোন বস্তু লইলে দুঃখ হয়, আর নিজেকে দান করিলে সুখ হইয়া থাকে, ইহাই ত জগদ্বাসী লোকের মনের গতি ॥৭৮॥

অন্বয়ঃ—অবিবেকিনঃ জনাঃ অনুত্তমান্নৈঃ পরিপূরিতোদরাঃ (অতএব) মহোত্তমান্নাশন-নিষ্ফলোদ্যমাঃ (সন্তঃ) পরং ব্যষীদন্। অসাবধানস্য সুখে অপি দুঃখিতা (ভবতি) ॥৭৯॥

অনুত্তমেতি। অবিবেকিনো বিবেচনশূন্যা জনাঃ, অনুত্তমান্নৈঃ প্রথমদত্তৈর্নিকৃষ্টখাদ্যৈঃ শাকাদিভিরেব, পরিপূরিতানি উদরাণি যৈস্তে, অতএব, মহোত্তমান্নানামনন্তরদত্তানামুৎকৃষ্টখাদ্যানাং যূপাদীনাম্ অশনে ভক্ষণে নিষ্ফল উদ্যমো যেষাং তে তাদৃশাঃ সন্তঃ, পরমত্যন্তম্, ব্যষীদন্ বিষণ্ণা অভবন্। তথাহি, অসাবধানস্য পূর্বাপরকর্ত্তব্যাবধানরহিতস্য জনস্য, সুখেঽপি সুখস্থানেঽপি, দুঃখিতা ভবতি।

অত্র দ্বিতীয়পাদার্থং প্রতি প্রথমপাদগতপদার্থো হেতুরিতি পদার্থহেতুকং কাব্যলিঙ্গমলঙ্কারঃ, সামান্যেন বিশেষসমর্থনাদর্থান্তরন্যাসশ্চানয়োঃ পরস্পরনিরপেক্ষতয়া সংসৃষ্টিঃ ॥৭৯॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

गृहे गृहे नाट्यसमीक्षणक्षणाः
अनेकदुःखप्रभृता जना अपि ।
भवाद्विमुक्तानिव योगिनस्तदा
प्रमेनिरे स्वान् सुखितान् चिरादिव ॥८०॥
गृहप्रयाणि धरणीभृतां गणाः
कुमारपाणावुपहारमर्पयन् ।

বাঙ্গালা—বিবেচনাশূন্য লোকেরা প্রথমেই নিকৃষ্ট খাদ্যদ্বারা উদর পরিপূর্ণ করিয়া ফেলিয়াছিল ; সুতরাং পরে আর উৎকৃষ্ট খাদ্য খাইতে পারিল না ; অতএব তাহারা তখন অত্যন্ত বিষণ্ণ হইয়া পড়িল। কারণ, অসাবধান লোকের সুখ, সম্ভাবনাস্থলেও দুঃখ আসিয়া উপস্থিত হয় ॥৭৯॥

अन्वयः—अनेकदुःखप्रभृता जना अपि गृहे गृहे नाट्यसमीक्षणक्षणाः (सन्तः) योगिनः भवात् विमुक्तान् इव तदा स्वान् चिरात् सुखितानिव प्रमेनिरे ॥८०॥

गृह इति । अनेकैर्दुःखैः प्रभृता परिपूर्णा, जना अपि, गृहे गृहे नाट्यसमीक्षणेन नटकार्य्याभिनयदर्शनेन क्षण उत्सव आनन्दो येषां ते तादृशाः सन्तः, योगिनो जनाः, भवात् संसारात्, विमुक्तान् स्वानिव, तदा, स्वान् आत्मनः, चिरात्, सुखितान् सञ्जातसुखानिव, प्रमेनिरे ।

अत्र श्रौतीपमाच्छेकानुप्रासयोः संसृष्टिरलङ्कारः ।

"निर्व्यापारस्थितौ कालविशेषोत्सवयोः क्षणः" इत्यमरः ॥८०॥

বাঙ্গালা—যোগীরা যেমন সংসারমুক্ত আপনাদিগকে চিরসুখী বলিয়া মনে করেন, সেইরূপ অনেক দুঃখে পরিপূর্ণ লোকেরাও গৃহে গৃহে অভিনয় করিয়া আনন্দিত হইয়া আপনাদিগকে চিরসুখী বলিয়া মনে করিতে লাগিল ॥৮০॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

पुरातनाय प्रभवे निजां निजां
शिरःप्रणामेन ददाविवोच्चताम् ॥८१॥
अधना धनानि च भुवं भुवोऽर्थिनः
क्षुधिताः सुधाबहुविधान्नमाप्नुवन्।
अवनीपतावभिनवे हि रुक्मिणि
कमलालयेव निखिलालयाऽभवत् ॥८२॥

अन्वयः—धरणीभृतां गणः, गृहप्रयाणे कुमारपाणौ उपहारं अर्पयन् शिरःप्रणामेन पुरातनाय प्रभवे निजां उच्चतां ददौ इव ॥८१॥

गृह इति। धरणीभृतां गणः राज्ञां समूहः, गृहप्रयाणे स्वस्वभवनगमनसमये, कुमारस्य युवराजस्य रुक्मिणः पाणौ हस्ते, उपहारम्, अर्पयन् वितरन्, शिरसां प्रणामेन अवनमनेन, पुरातनाय प्राचीनाय, प्रभवे राज्ञे भीष्मकाय, निजां निजाम् उच्चताम्, ददाविव। उच्चानां शिरसाम् अवनमनेन तदुच्चतात्यागसूचनादिति भावः।

अत्र भावाभिमानिनी वाच्या क्रियोत्प्रेक्षालङ्कारः ॥८१॥

বাঙ্গালা—রাজগণ আপন আপন ভবনে যাইবার সময়ে যুবরাজ রুক্মীর হস্তে উপহার সমর্পণ করিয়া (নজর দিয়া) মস্তক অবনমন করায় প্রাচীন রাজা ভীষ্মককে যেন আপন আপন উচ্চতা দান করিলেন ॥৮১॥

अन्वयः—अधना धनानि, भुवोऽर्थिनः भुवं, क्षुधिताश्च सुधा-बहुविधान्नं आप्नुवन्। रुक्मिणि अभिनवे अवनीपतौ (सति) हि कमलालया निखिलालया इव अभवत् ॥८२॥

अधना इति। अधना दरिद्राः, धनानि, भुवोऽर्थिनो भूमियाचकाः भुवं भूमिम्, क्षुधिताः क्षुधार्त्ताश्च जनाः, सुधावदमृतमिव बहुविधान्नम्, आप्नुवन् अलभन्त। रुक्मिणि भीष्मकज्येष्ठपुत्रे, अभिनवे, अवनीपतौ

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

स्वराज्ये सुप्राज्ये तनयमभिषिञ्चन्नरपतिः
न लेभेऽन्तः शान्तिं समुचितसुतादानरहितः।
स्थितो यः संसारे यतिलषितधर्म्मं स्पृहयति
मरुस्थाने तृष्णाङ् मृगयति स मुग्धः किल जलम् ॥८३॥

इति श्रीहरिदासकृतौ रुक्मिणीहरणे महाकाव्ये
रुक्मिराज्याभिषेको नाम तृतीयः सर्गः ॥०॥

ता. २२-९-२०५७ नैमे सम्पूर्णः

युवराजे सति हि, कमलालया लक्ष्मीः, निखिलं सर्व्वं भवनमेव आलय आश्रयो यस्याः सा तादृशी इव अभवत्।

अत्र आप्नुवन्नित्येकया क्रियया अधनादीनां कर्त्तृतया धनादीनाञ्च कर्म्मतयाभिसम्बन्धात्तुल्ययोगितालङ्कारः, कार्य्येण कारणसमर्थनादर्थान्तरन्यासः, वाच्या गुणोत्प्रेक्षा चेत्येतेषामङ्गाङ्गिभावेन सङ्करः, सोऽपि पुनर्व्वृत्त्यनुप्रासेन संसृज्यते।

मञ्जुभाषिणी वृत्तम्—"सजसा जगौ च यदि मञ्जुभाषिणी" इति लक्षणात् ॥८२॥

বাঙ্গালা—নির্ধনেরা ধন, ভূমিপ্রার্থীরা ভূমি এবং ক্ষুধার্ত্তেরা অমৃতের ন্যায় বহুবিধ খাদ্য লাভ করিল; সুতরাং রুক্মী নূতন রাজা হইলে লক্ষ্মী যেন সকল গৃহে অধিষ্ঠিত হইলেন ॥৮২॥

अन्वयः—नरपतिः सुप्राज्ये स्वराज्ये तनयं अभिषिञ्चन् (अपि) समुचित-सुता-दान-रहितः (इति) अन्तः शान्तिं न लेभे। यः संसारे स्थितः (सन्) यति-लषित-धर्म्मं स्पृहयति, स मुग्धः तृष्णाक् (सन्) मरुस्थाने जलं मृगयति किल ॥८३॥

स्वराज्य इति। नरपतिर्भीष्मकः, सुप्राज्ये अतिप्रचुरे अतिविशाले इत्यर्थः, स्वराज्ये, तनयं पुत्रं रुक्मिणम्, अभिषिञ्चन्नपि, समुचिता विवाहयोग्या या सुता रुक्मिणी तस्या दानेन पात्रसात्करणेन रहित

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

आसीत्। अतएव, अन्तर्मनसि, शान्तिं न लेभे। तथा च, यो जनः, संसारे गार्हस्थ्ये, स्थितः सन्, यतिभिर्जितेन्द्रियैः सन्न्यासिभिः लषितः अभीष्टो यो धर्म्मः शान्त्यादिगुणस्तम्, स्पृहयति लब्धुमिच्छति। स मुग्धो मूढ़ो जनः, तृष्णक् पिपासार्त्तः सन्, मरुस्थाने मरुभूमौ, जलम्, मृगयति अन्विष्यति किल। मरुभूमौ जलमिव संसारे शान्तिर्नास्तीति भावः।

अत्र शान्तिलाभाभावं प्रति समुचित-सुता-दान-रहित इति पदस्यार्थो हेतुरिति पदार्थहेतुकं काव्यलिङ्गमलङ्कारः, परार्द्धे तु असम्भवद्वस्तुसम्बन्धा निदर्शना, छेकानुप्रासश्चेत्येतेषां मिथो निरपेक्षतया संसृष्टिः।

"प्रभूतं प्रचुरं प्राज्यम्" इत्याद्यमरः। मुग्धः सुन्दरमूढ़योः" इति विश्वः।

शिखरिणी वृत्तम्—"रसै रुद्रैश्छिन्ना य-म-न-स-भ-लाग: शिखरिणी" इति लक्षणात् ॥८३॥

इति श्रीहेमचन्द्रतर्कवागीशविरचितायां रुक्मिणीहरणटीकायां विचित्रायां तृतीयः सर्गः ॥०॥

—०—

বাঙ্গালা—ভীষ্মকরাজা নিজের বিশাল রাজ্যে পুত্রকে অভিষিক্ত করিয়াও বিবাহযোগ্যা কন্যা রুক্মিণীকে যোগ্যপাত্রে দান করিতে না পারায় মনে শান্তি পাইতে লাগিলেন না। কারণ, যে লোক সংসারে থাকিয়া সন্ন্যাসীর শান্তি লাভ করিবার কামনা করে, সেই মূঢ় লোক পিপাসার্ত্ত হইয়া মরুভূমিতে জল অন্বেষণ করে ॥৮৩॥

—০—

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

चतुर्थः सर्गः ।

——:o:——

विषयस्य नृपश्चिरं रसान्
रसयंस्तद्विरतौ रतिं दधे ।
स्वदितान्ननिवारितक्षुधः
सुलभा सापि सुधा मुधायते ॥१॥

~~~~~~

अन्वयः—नृपः चिरं विषयस्य रसान् रसयन् तद्विरतौ रतिं दधे। स्वदितान्न-निवारित क्षुधः सुलभा सा सुधा अपि मुधायते ॥१॥

विषयस्येति। नृपो भीष्मकः, चिरम्, विषयस्य भोग्यपदार्थस्य स्रक्चन्दनवनितादेः, रसान् स्वादान्, रसयन् अनुभवन्, तस्य अनुभवस्य विरतौ समाप्तौ, रतिमनुरागम्, दधे क्रमेण धारयामास। क्रमिक-तदनुभवेच्छावृद्धेः शान्त्यभावादिति भावः। तथा च, स्वदितेन भुक्तेन अन्नेन निवारिता क्षत् क्षुधा यस्य तस्य तादृशस्य जनस्य, सुलभा सा प्रसिद्धा, सुधा अमृतमपि, मुधायते मुधेवाचरति वृथा भवतीत्यर्थः। क्षुधा सत्त्वे निकृष्टमप्यन्नं रोचते, तदसत्त्वे तु सुधापि मुधा स्यादितिवत्, चिरविषयभोगेन नृपस्य पुनस्तद्भोगविराग एव जात इत्याशयः।

अत्र सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारश्छेकानुप्रासो वृत्त्यनुप्रासश्चेत्येतेषां संसृष्टिः।

"रस आस्वादने" इति चौरादिको रसधातुः।

अस्मिन् सर्गे सुन्दरी नाम वृत्तम्—"अयुजोर्यदि सौ जगौ युजोः सभरालगौ यदि सुन्दरी तदा" इति लक्षणात् ॥१॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative
~~~~~~

পরিচিন্তয়তশ্চিতশ্চিরং
বিষয়স্তস্য সুখায়তে স্ম ন।
অধিকং দ্যুমণৌ সমুদ্যতি
ন কিয়দ্দীপয়তে হি দীপিকা ॥২॥
সহ বাসনয়া ভুবঃ প্রভোঃ
তনুরাসীৎ ক্রমশস্তথা কৃশা।
বহতোঽপি চিরং ধরাধুরাং
তনুভারোঽপি সুদুঃসহো যথা ॥৩॥

বাঙ্গালা—ভীষ্মক চিরকাল বিষয়ভোগের রস অনুভব করিয়া, ক্রমশঃ তাহার সমাপ্তিবিষয়ে মনোনিবেশ করিলেন। কারণ, অন্ন ভক্ষণ করায় যাহার ক্ষুধা নিবৃত্তি পাইয়া যায়, তাহার নিকট অনায়াসলভ্য অমৃতও কোন কাজে লাগে না ॥১॥

অন্বয়ঃ—বিষয়ঃ চিরং চিতং পরিচিন্তয়তঃ তস্য ন সুখায়তে স্ম। হি দ্যুমণৌ অধিকং সমুদ্যতি (সতি) দীপিকা কিয়ৎ ন দীপয়তে ॥২॥

পরীতি। বিষয়ো বিষয়ভোগঃ, চিরং দীর্ঘকালম্, চিতং পরমাত্মানম্, পরিচিন্তয়তঃ সর্বথা ধ্যায়তঃ, তস্য ভীষ্মকস্য, ন সুখায়তে স্ম ন সুখং বেদয়তে স্ম। হি তথাহি, দ্যুমণৌ সূর্য্যে, অধিকং সমুদ্যতি উদয়মানে সতি, দীপিকা ক্ষুদ্রো দীপঃ, কিয়দপি বস্তু, ন দীপয়তে ন প্রকাশয়তি।

অত্র দৃষ্টান্তোঽলঙ্কারঃ, পূর্ববদনুপ্রাসৌ চেতি সংসৃষ্টিঃ ॥২॥

বাঙ্গালা—ক্রমে ভীষ্মক অধ্যাত্মচিন্তায় মগ্ন থাকিলে, বিষয়ভোগ তাঁহার সুখ উৎপাদন করিতে লাগিল না। কারণ, সূর্য্য অধিক পরিমাণে প্রকাশ পাইলে, ক্ষুদ্র দীপ কিছুই প্রকাশ করে না ॥২॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

নিজপূর্ব্বদশাঽবসানতঃ
সকলস্নেহবিহীনতাবশাৎ।
সমকোচি শনৈর্মুমুক্ষতো
নৃপতের্দীপশিখেব বাসনা ॥৪॥

অন্বয়ঃ—ভুবঃ প্রভোঃ বাসনয়া সহ তনুঃ ক্রমশঃ তথা কৃশা আসীৎ। যথা চিরং ধরাধুরাং বহতোঽপি তনুভারোঽপি সুদুঃসহঃ অভবৎ ॥৩॥

সহেতি। ভুবঃ প্রভোর্ভীষ্মকস্য, বাসনয়া বিষয়ভোগেচ্ছয়া সহ, তনুঃ শরীরম্, ক্রমশঃ, তথা কৃশা, আসীৎ। যথা, চিরম্, ধরাধুরাং পৃথিবীভারম্, বহতো ধারয়তোঽপি তস্য, তনোঃ শরীরস্য ভারোঽপি, সুদুঃসহ অভবৎ।

অত্র সহোক্তিরলঙ্কারঃ।

ধরাধুরামিতি ধরায়া ধূঃ ধরাধুরা তাম্ "ধুরনক্ষস্য চ" ইতি রাজাদিত্বাদতৃপ্রত্যয়ে "স্ত্রিয়ামাদা" ইত্যাপ্রত্যয়ঃ ॥৩॥

বাঙ্গালা—রাজা ভীষ্মকের বিষয়ভোগেচ্ছার সহিতই তাঁহার শরীর ক্রমশঃ সেইরূপ কৃশ হইল, যাহাতে তিনি চিরকাল পৃথিবীর ভার বহন করিলেও তৎকালে তাঁহার দেহের ভার বহন করাও অতিদুষ্কর হইয়াছিল ॥৩॥

অন্বয়ঃ—মুমুক্ষতঃ নৃপতেঃ বাসনা দীপশিখেব নিজপূর্ব্বদশাবসানতঃ সকলস্নেহবিহীনতাবশাৎ (চ) শনৈঃ সমকোচি ॥৪॥

নিজেতি। মুমুক্ষতো মুক্তিমিচ্ছতঃ, নৃপতের্ভীষ্মকস্য, বাসনা বিষয়ভোগেচ্ছা, দীপশিখেব, নিজা স্বকীয়া যা পূর্ব্বদশা বিষয়াসক্তাবস্থা বর্ত্তিশ্চ তস্যা অবসানতঃ বৈরাগ্যাদ্দাহাচ্চ অবসানেন, সকলেষু পুত্রাদি-

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

क्षणमप्यनपास्तसन्निधि-
मतिहृद्यामनुरागिणीं चिरम् ।
परिहाय नृपो नृपश्रियं
समुदासे स मुदा शनैः शनैः ॥५॥

परिजनेषु यः स्नेहो वात्सल्यं सकलस्नेहः समस्ततैलञ्च तस्य विहीनता-वशात् वैराग्येण दाहेन च साहित्याद्धेतोः, शनैर्मन्दं मन्दम्, समकोचि क्षीणा अभूत् ।

अत्र श्रौती पूर्णोपमालङ्कारः ।

"दशावस्था दीपवर्त्त्योर्विस्रान्ते भूम्नि योषिति" इति मेदिनी । "स्नेहस्तैलादिकरस-द्रव्ये स्यात् सौहृदेऽपि च" इति विश्वः ॥४॥

বাঙ্গালা—ভীষ্মকরাজা তখন মুক্তি কামনা করিতেছিলেন ; সুতরাং তাঁহার পূর্ব্ব অবস্থার অবসান ঘটিয়াছিল এবং সমস্ত পরিজনের উপরের বাৎসল্যও তিরোহিত হইয়াছিল ; অতএব তাঁহার বিষয়ভোগের ইচ্ছা দীপশিখার ন্যায় ধীরে ধীরে ক্ষীণা হইতে লাগিল ॥৪॥

अन्वयः—स नृपः क्षणं अपि अनपास्तसन्निधिं अतिहृद्यां चिरं अनुरागिणीं नृपश्रियं परिहाय मुदा शनैः शनैः (विषयान्) समुदासे ॥५॥

क्षणमिति । स नृपो भीष्मकः, क्षणमपि, न अपास्तो न परित्यक्तः सन्निधिः सामीप्यं यया ताम्, अतिहृद्याम् अतिशयेन प्रियाम्, चिरम्, विषयतासम्बन्धेन अनुरागः अस्या अस्तीति ताम्, अनुरागपालीमित्यर्थः, नृपश्रियं राजलक्ष्मीम्, परिहाय परित्यज्य, मुदा आनन्देनैव, शनैः शनैर्मन्दं मन्दम्, समुदासे विषयान् सम्यक् परितत्याज ।

अत्र लिङ्गसाम्येन नृपनृपश्रियोर्नायकनायिकाव्यवहारसमारोपात् समासोक्तिरलङ्कारः, समुदा-समुदेति यमकेन संसृज्यते ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

हृदि सत्त्वगुणेन भूपतेः
उषसीवाधिकृते विवस्वता।
अतिनिर्म्मलतेजसाश्रिते
परिनिःशेषमपासरत्तमः ॥६॥

"समुदासे" इति समुत्पूर्ब्बकस्य "असु क्षेपणे" इत्यस्धातोः "उपसर्गाद्स्यत्यूह्योर्वा" इति रुचादित्वात् परोक्षायां आत्मनेपदप्रथमैकवचने रूपम् ॥५॥

বাঙ্গালা—ভীষ্মকরাজা সর্ব্বদা সন্নিহিতা, অতিমনোহরা ও অনুরাগের পাত্রী রাজলক্ষ্মীকে পরিত্যাগ করিয়া, আনন্দের সহিতই ধীরে ধীরে সমস্ত বিষয় পরিত্যাগ করিলেন ॥৫॥

अन्वयः—विवस्वता उषसि इव सत्त्वगुणेन भूपतेः हृदि अधिकृते अतिनिर्म्मलतेजसा आश्रिते (च सति) परिनिःशेषं तमः अपासरत् ॥६॥

हृदीति। विवस्वता सूर्य्येण, उषसि प्रभातकाल इव, सत्त्वगुणेन, भूपतेर्भीष्मकस्य, हृदि चित्ते, अधिकृते सति, अतिनिर्म्मलतेजसा सौरेण चिन्मयेन च, आश्रिते च सति, परिनिःशेषं समस्तम्, तमः तमोगुणजनितमोहः अन्धकारश्च, अपासरत्तिरोहितमभवत्।

अत्र पूर्णोपमालङ्कारः ॥६॥

বাঙ্গালা—প্রভাতকালে সূর্য্য উদয় পাইলে তাঁহার নির্ম্মল তেজে যেমন সমস্ত অন্ধকার তিরোহিত হয়, তেমন ভীষ্মকরাজার চিত্ত সত্ত্বগুণে অধিকৃত হইলে অতিনির্ম্মল ব্রহ্মতেজে তাঁহার সমস্ত মোহ তিরোহিত হইল ॥৬॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

पवनेन परिष्कृतेऽथवा
विमलज्ञानविकाशनेन च।
लघुना रजसा तदास्पदं
प्रतिपेदे नृपतेर्न मानसे ॥७॥
विफलाद्भवनाद्वनाश्रमं
स्पृहयामास नृपो रहःप्रियः।
अपि कर्म्मणि दर्शनेऽशने
भविता यत् फलमेव केवलम् ॥८॥

अन्वयः—अथवा पवनेन (इव) विमलज्ञानविकाशनेन परिष्कृते च नृपतेः मानसे तदा लघुना (अपि) रजसा आस्पदं न प्रतिपेदे ॥७॥

भीष्मकस्य रजोगुणोऽपि निवृत्त इत्याह पवनेनेति। अथवा, पवनेन वायुना इव, विमलज्ञानस्य शुद्धसात्त्विकज्ञानस्य विकाशनेन प्रकाशेन च, परिष्कृते निर्म्मलीकृते, नृपतेर्भीष्मकस्य, मानसे चित्ते, चत्वर इवेति भावः। तदा, लघुना अल्पेनापि, रजसा रजोगुणेन धूल्या च, आस्पदं प्रतिष्ठा, न प्रतिपेदे न लेभे।

अत्रापि पूर्णोपमालङ्कारः ॥७॥

বাঙ্গালা—এবং বায়ু পরিষ্কৃত প্রাঙ্গণে যেমন ধূলি প্রতিষ্ঠা লাভ করিতে পারে না, তেমন নির্ম্মলজ্ঞানপরিষ্কৃত ভীষ্মকের চিত্তে তখন অল্প রজোগুণও প্রতিষ্ঠা লাভ করিতে পারে নাই ॥৭॥

अन्वयः—रहःप्रियः नृपः विफलात् भवनात् वनाश्रयं स्पृहयामास। यत् (तत्र) कर्म्मणि दर्शने अशने अपि केवलं फलमेव भविता ॥८॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

तनयाप्रतिपादनावधि
गृहमेधीभवितुं प्रभावुकैः।
स्वजनैर्बहुधा प्रबोधितः
बहुविघ्ना हि सतां सती क्रिया ॥९॥

विफलादिति। क्रमःप्रियो निर्जनदेशप्रियः, नृपो भीष्मकः, विफलात् तत्त्वज्ञानलाभसम्भावनाशून्यात्, भवनाद्गृहाश्रमात्, वनाश्रमं वानप्रस्थाश्रमम्, स्पृहयामास गन्तुमियेष। यद्यस्मात्, तत्र वनाश्रमे, कर्म्मणि श्रवणमननादौ, फलं तत्त्वज्ञानलाभः, महापुरुषाणां दर्शने, फलं पुण्यप्राप्तिः, अशनेऽपि भोजने च, फलं पनसाम्रादिफलप्राप्तिः, केवलम्, भविता।

अत्र शब्दश्लेषच्छेकानुप्रासयोः संसृष्टिरलङ्कारः।

"शस्ये हेतुकृते फलम्" इत्यमरः ॥८॥

বাঙ্গালা—ক্রমে নির্জনপ্রিয় ভীষ্মকরাজা বিফল গৃহস্থাশ্রম হইতে বানপ্রস্থাশ্রমে যাইবার ইচ্ছা করিলেন। যেহেতু, সে আশ্রমে কার্য্যে, দর্শনে ও ভোজনে কেবল ফলই হইবে ॥৮॥

अन्वयः—प्रभावुकैः स्वजनैः तनयाप्रतिपादनावधि गृहमेधीभवितुं बहुधा प्रबोधितः, सतां सती क्रिया हि बहुविघ्ना ॥९॥

तनयेति। प्रभावुकैर्माङ्गलिकस्वभावैः स्वजनैः, तनयायाः कन्यया रुक्मिण्याः, प्रतिपादनावधि दानपर्य्यन्तम्, गृहमेधीभवितुं गृहस्थभावेन स्थातुम्, बहुधा, प्रबोधितो भीष्मको ज्ञापितः। हि तथाहि, सतां सज्जनानाम्, सती क्रिया अभ्यर्हितं कार्य्यम्, बहवो विघ्ना यस्यां सा तादृशी भवति।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

রুরুচে রুচিরস্ত নৈব তত্
বচনং প্রত্যুত ভীতিমাবহত্।
নহি সত্পথগামুকো জনো
গতকান্তারমুপৈতি বুদ্ধিমান্ ॥১০॥

অত্র সামান্যেন বিশেষসমর্থনরূপোঽর্থান্তরন্যাসোঽলঙ্কারঃ, ছেকানুপ্রাসো বৃত্ত্যনুপ্রাসশ্চেত্যেতেষাং সংসৃষ্টিঃ।

প্রভাবুবৈরিতি "সৃক্কমগম—" ইত্যাদিনা তাচ্ছিল্যে উকঞ্ ॥৯॥

বাঙ্গালা—তৎকালে মঙ্গলার্থী স্বজনেরা যাইয়া রুক্মিণীর বিবাহ পর্য্যন্ত গৃহস্থ থাকিবার জন্য ভীষ্মকরাজাকে বহু প্রকারে উপদেশ দিয়াছিল। কারণ, সজ্জনের সৎকার্য্যে বহুতর বিঘ্নই হইয়া থাকে ॥৯॥

অন্বয়ঃ—রুচিরম্ অপি তত্ বচনং নৈব রুরুচে, প্রত্যুত ভীতিং আবহত্। সত্পথগামুকঃ বুদ্ধিমান্ জনঃ গতকান্তারং নহি উপৈতি ॥১০॥

রুরুচ ইতি। রুচিরম্ সুন্দরমপি, তত্ স্বজনবচনম্, নৈব রুরুচে ভীষ্মকস্য রুচিং ন খলু জনয়ামাস। প্রত্যুত বৈপরীত্যেন, ভীতিম্ অশান্তিভয়মেব, আবহত্ অজনয়ত্। তথাহি, সত্পথং গন্তুং শীলমস্যেতি সত্পথগামুকঃ, বুদ্ধিমান্ জনঃ, নির্বোধস্তু স হিতনৈরপেক্ষ্যেণৈব পরবাক্যং শৃণোতীতি ভাবঃ। গতকান্তারম্ অতীতদুর্গমপথম্, নহি উপৈতি পুনর্ন গচ্ছতি।

অত্র সামান্যেন বিশেষসমর্থনরূপোঽর্থান্তরন্যাসোঽলঙ্কারশ্ছেকানুপ্রাসেন সংসৃজ্যতে।

"মহারণ্যে দুর্গপথে কান্তারঃ পুংনপুংসকম্" ইত্যমরঃ ॥১০॥

বাঙ্গালা—স্বজনবর্গের সেই সকল বাক্য শ্রুতিমধুর হইলেও তাহাতে ভীষ্মকরাজার অভিরুচি হইল না; বরং তাঁহার ভয়ই জন্মাইল।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

बलवत् प्रतिकूलगामिनि
मनसि प्राज्यजवे च वारिणि।
वचसश्च तरेश्च नोदने
ननु कर्त्तुः श्रम एव केवलम् ॥११॥
विमुखं नियतं विजानती
जनता नान्वरुधज्जनेश्वरम्।

কারণ, সৎপথগামী বুদ্ধিমান্ লোক (কেবল পরের কথায়) অতিক্রান্ত দুর্গমপথে পুনরায় যান না ॥১০॥

अन्वयः—बलवत् प्रतिकूलगामिनि प्राज्यजवे च मनसि वारिणि च वचसश्च तरेश्च नोदने ननु कर्त्तुः केवलं श्रम एव (भवति) ॥११॥

ननु कथं तद्वचनं न रुरुच इत्याह बलवदिति। बलवदत्यन्तम्, प्रतिकूलं विपरीतदिशं गच्छतीति तस्मिन्, प्राज्यः प्रभूतो जवो वेगो यस्य तस्मिन्, मनसि, वारिणि जले च, वचसः अभिमतवाक्यस्य च, तरेर्नौकायाश्च, नोदने प्रेरणे, अभिधाने चालने चेत्यर्थः, नन्वित्यवधारणे शिष्यसम्बोधने वा, कर्त्तुर्वक्तुश्चालयतुश्च, केवलं श्रम एव, भवति। तदाभिमुख्याभावादग्रसरत्वासम्भवात् चेत्याशयः।

अत्र प्रस्तुतस्य वचसः अप्रस्तुतायाः तरेश्च नोदनरूपैकधर्म्माभिसम्बन्धाद्दीपकमलङ्कारः क्रमेणोभयाभिधानाद्यथासंख्यमलङ्कारश्चेत्यनयोरेकाश्रयानुप्रवेशरूपः सङ्करः।

"बलवत् सुष्ठु, किमुत स्वत्यतीव च निर्भरे" इत्यमरः ॥११॥

বাঙ্গালা—অত্যন্তপ্রতিকূলগামী ও গুরুতরবেগশালী মনে ও জলে বাক্য ও নৌকা চালাইতে গেলে বক্তা ও চালয়িতার কেবল পরিশ্রমই হইয়া থাকে ॥১১॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

ভবতীহ কথা বৃথৈব চেৎ
ননু তূষ্ণীম্ভবনং তদোচিতম্ ॥১২॥
যততে চ সতীং ক্রিয়াং পরং
পরিরোদ্ধুং ন বিশুদ্ধবুদ্ধিমান্।
বিনিবেশয়িতুং বনেষু যৎ
অবনীশং তমুপাদিশৎ সুধীঃ ॥১৩॥

অন্বয়ঃ—জনতা জনেশ্বরং নিয়তং বিমুখং বিজানতী (সতী) ন অন্বরুধৎ। ইহ চেৎ কথা বৃথৈব ভবতি, তদা তূষ্ণীম্ভবনং ননু উচিতং ॥১২॥

বিমুখমিতি। জনতা অপরজনসমূহঃ, জনেশ্বরং রাজানং ভীষ্মকম্, নিয়তং ধ্রুবমেব, বিমুখং গার্হস্থ্যাশ্রমপরাঙ্মুখং বিজানতী বিশেষি-যাবগচ্ছন্তী সতী, ন অন্বরুধৎ গার্হস্থ্যার্থং অনুরোধং ন কৃতবতী। তথাহি, ইহ চেদ্যদি, কথা বাক্যম্, বৃথা নিষ্ফলমেব ভবতি। তদা, তূষ্ণীম্ভবনং ননু নীরবত্বমেব, উচিতম্।

অত্র সামান্যেন বিশেষসমর্থনরূপোঽর্থান্তরন্যাসোঽলঙ্কারো বৃত্ত্যনু-প্রাসেন সংসৃজ্যতে।

জনতেতি "গ্রামজনে"ত্যাদিনা সমূহার্থে তপ্রত্যয়ঃ ॥১২॥

বাঙ্গালা—রাজা গৃহস্থাশ্রমের প্রতি নিশ্চয়ই পরাঙ্মুখ হইয়াছেন ইহা বিশেষরূপে জানিয়া, অন্যান্য লোক সে বিষয়ে আর তাঁহাকে অনুরোধ করিল না। কারণ, কথা যদি নিষ্ফলই হয়, তবে সেখানে নীরব থাকাই উচিত ॥১২॥

অন্বয়ঃ—বিশুদ্ধবুদ্ধিমান্ (জনঃ) পরং সতীং ক্রিয়াং পরিরোদ্ধুং ন যততে চ। যৎ সুধীঃ তং অবনীশং বনেষু বিনিবেশয়িতুং উপাদিশৎ ॥১৩॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

अथ सारथिना पुरस्कृतं
क्षितिनाथानुमतेन तत्क्षणम्।
गहने गमनाय वार्द्धक-
विकलाङ्गः स रथाङ्गमाश्रयत् ॥१४॥

यतत इति। विशुद्धबुद्धिमान् खलतादिदोषशून्यबुद्धिशाली जनः, परम् अन्यं जनम्, सतीं क्रियां सत्कार्य्यम्, परिरोद्धुं निवारयितुं न यतते च। यद्यस्मात्, सुधीः सुबुद्धिर्जनः, तमवनीशं राजानं भीष्मकम्, वनेषु तपोवनेषु, विनिवेशयितुं प्रेषयितुमेव, उपादिशत् पुत्रादीन् उपदिष्टवान्।

अत्र विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारश्छेकानुप्रासो वृत्त्यनुप्रासश्चेति संसृष्टिः।

रुधधातोर्द्विकर्म्मकत्वात् परं सतीं क्रियामित्युभयोरपि कर्म्मत्वम्। ननु "न कर्म्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेदर्थप्रतिपत्तिकरः" इत्यनुशासनविरोधात् कथं विशुद्धबुद्धिमानित्यत्र मत्वर्थीयो मतुः विशुद्धा बुद्धिर्यस्येति बहुव्रीहिणैव तदर्थप्रतिपत्तिसिद्धेरिति चेन्न, अत्र प्रशंसायां मत्वर्थीयप्रत्ययात् बहुव्रीहिणा च प्रशंसार्थस्य वक्तुमशक्यत्वात् अतएव हि बहुव्रीहिश्चेदर्थप्रतिपत्तिकर इत्यभिधानात् नीलोत्पलवत् सर इति गोपीनाथेनोदाहृतत्वाच्च। मुनिभेदेन वनभेदात् वनेष्विति बहुवचनम् ॥१३॥

বাঙ্গালা—বিশুদ্ধবুদ্ধিযুক্ত মানুষ অন্যের সৎকার্য্যের বাধা দিতে যত্ন করেন না। যেহেতু, সদবুদ্ধিসম্পন্ন জনগণ ভীষ্মকরাজাকে তপোবনে প্রেরণ করিবারই উপদেশ দিয়াছিলেন ॥১৩॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

अपरो न बभूव भूपतेः
सहचारी विपिनप्रवेशने ।
विरहार्त्तजनस्य केवलं
जललोलाविललोचनावली ॥१५॥

अन्वयः—अथ वार्द्धकविकलाङ्गः सः गहने गमनाय क्षितिनाथानुमतेन सारथिना तत्क्षणं पुरस्कृतं शताङ्गं आश्रयत् ॥१४॥

अथेति। अथ वार्द्धकेन जरया विकलानि स्वस्वकार्य्यापटूनि अङ्गानि यस्य सः, अतएव पद्भ्यां गमनौचित्येऽपि रथाश्रयणमिति भावः, स भीष्मकः, गहने तपोवने, गमनाय, क्षितिनाथेन तदानीन्तनेन राज्ञा रुक्मिणा, अनुमतेन आदिष्टेन सारथिना, तत्क्षणं तस्मिन्नेव क्षणे, पुरस्कृतं सम्मुखमानीतम्, शताङ्गं रथम्, आश्रयत् आरोहत्।

अत्र शताङ्गाश्रयं प्रति वार्द्धकविकलाङ्गपदस्यार्थो हेतुरिति पदार्थहेतुकं काव्यलिङ्गमलङ्कारः पूर्ववदनुप्रासाभ्यां संसृज्यते।

"शताङ्गः स्यन्दनो रथः" इत्यमरः ॥१४॥

বাঙ্গালা—তদনন্তর যুবরাজ রুক্মীর আদেশ অনুসারে সারথি সেই সময়েই একখানি রথ আনিয়া সম্মুখে উপস্থাপিত করিল; তখন জরাবিকলাঙ্গ ভীষ্মকরাজা তপোবনে যাইবার জন্য সেই রথে আরোহণ করিলেন ॥১৪॥

अन्वयः—अपरः विपिनप्रवेशने भूपतेः सहचारी न बभूव। (किन्तु) केवलं विरहार्त्तजनस्य जललोलाविललोचनावली (सहचारिणी बभूव) ॥१५॥

अपर इति। अपरः अन्यो जनः, विपिनप्रवेशने तपोवनगमने, भूपतेर्भीष्मकस्य, सहचारी न बभूव। किन्तु केवलम्, विरहेण भीष्मकस्य विच्छेदेन आर्त्तः पीड़ितो यो जनस्तस्य, जलेन अश्रुणा लोलानां

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

विषयं विजहद्यतो ययौ
नृपतिः पातितपातकाहितः।
तत एव पुरौकसां दृशः
विषयीचक्रुरमुं नहीर्ष्यया ॥१६॥

चञ्चलानाम् आविलानामप्रसन्नानाञ्च लोचनानां चक्षुषाम् आवली श्रेणिरिव सहचारिणी बभूवेति लिङ्गव्यत्ययेनानुवृत्तिः।

अत्र च्छेकानुप्रासवृत्त्यनुप्रासयोः संसृष्टिरलङ्कारः ॥१५॥

বাঙ্গালা—ভীষ্মকরাজার তপোবন-গমনের সময় অন্য কোন লোকই তাঁহার সহচর হয় নাই। তবে তাঁহার বিরহদুঃখে দুঃখিত লোকদিগের অশ্রুপ্লাবিত নয়নগুলি কেবল সহচর হইয়াছিল ॥১৫॥

अन्वयः—पातितपातकाहितः नृपतिः यतः विषयं विजहत् (सन्) ययौ। तत एव पुरौकसां दृशः ईर्ष्यया (इव) अमुं नहि विषयीचक्रुः ॥१६॥

विषयमिति। पातिताश्चान्द्रायणादिना युद्धेन च विनाशिताः पातकानि पापानि अहिताः शत्रवश्च येन स तादृशः, नृपतिर्भीष्मकः, यतो यस्माद्धेतोः, विषयं स्रक्चन्दनवनितादिभोग्यपदार्थम्, विजहत् वैराग्येण परित्यजन् सन् ययौ तपोवनं प्रति प्रतस्थे। तत एव हेतोः, पुरं राजधान्येव ओकः आश्रयो येषां तेषां पुरोवासिनामित्यर्थः, दृशो नयनानि, ईर्ष्यया इव, अमुं नृपतिम्, नहि विषयीचक्रुः न खलु गोचरीकृतवत्यः। परित्यज्यमानो हि परित्यजन्तमपि परित्यजतीति भावः। तपोवनाय गच्छन् राजा पुरोवासिनां दृष्टिविषयमतिचक्रामेति निष्कर्षः।

अत्र ईर्ष्ययेवेति इवशब्दाभावात् प्रतीयमाना हेतूत्प्रेक्षालङ्कारश्छेकानुप्रासेन संसृज्यते ॥१६॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

(কুলকারম্ভঃ)

শ্রুতিচারুতরশ্রুতিস্বনৈঃ
অপি সাম্নামবিগীতগীতিভিঃ ।
বহুহব্যজধূমসংস্রবৈঃ
অতিদূরাদপি সূচিতাশ্রমে ॥১৭॥
অবশিষ্টকুশান্ সমশ্নতা
মৃদু শৃঙ্গৈর্লিখতা জটান্তরম্ ।

বাঙ্গালা—পাপনাশক ও শত্রুহন্তা ভীষ্মকরাজা যেহেতু বিষয় পরিত্যাগ করিয়া তপোবনের দিকে গমন করিতে লাগিলেন; সেই হেতুই পুরোবাসিগণের দৃষ্টি ঈর্ষ্যা বশতই যেন তাঁহাকে আর বিষয় করিল না ॥১৬॥

অন্বয়ঃ—শ্রুতিচারুতরশ্রুতিস্বনৈঃ সাম্নাং অবিগীতগীতিভিঃ বহুহব্যজধূম-সংস্রবৈঃ অপি অতিদূরাৎ অপি সূচিতাশ্রমে, অবশিষ্টকুশান্ সমশ্নতা শৃঙ্গৈঃ স্বয়মাগত-

অথ পঞ্চভিঃ শ্লোকৈঃ কুলকেন তপোবনং বর্ণয়ন্ ভীষ্মকস্য রথাদবতরণমাহ শ্রুতীতি। শ্রুতিচারুতয়া শ্রবণমধুরা যে শ্রুতিস্বনাঃ সামেতরবেদধ্বনয়স্তৈঃ, সাম্নাম্, অবিগীতগীতিভিঃ অনিন্দিতগানৈঃ, বহবো হব্যজা হবনীয়দ্রব্যদাহজাতা যে ধূমাস্তেষাং সংস্রবৈঃ ঊর্দ্ধ্বগামিনিভিঃ ধারাভিরপি চ, অতিদূরাদপি সূচিতা বিদ্যমানতয়া জ্ঞাপিতা আশ্রমা যস্য তস্মিন্। অত্র সূচিতা ইত্যেকয়া শ্রুতিস্বনাদীনাং কর্ত্তৃতয়াভিসম্বন্ধাত্তুল্যযোগিতালঙ্কারঃ ॥ অবশিষ্টকুশান্ হোমাদ্যবশিষ্ট-

বাঙ্গালা—ক্রমে ভীষ্মকরাজা তপোবনে উপস্থিত হইয়া রথমধ্য হইতে অবতরণ করিলেন; তখন বেগবান্ আনন্দাশ্রুজলে তাঁহার বক্ষঃস্থল প্রক্ষালিত হইতে লাগিল এবং রাজার বিরহে সারথির গুরুতর

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

स्वयमागतशान्तिसेविनां
यतिनामेणगणेन शोभिते ॥१८॥
ज्वलितानलनिःसृतान् मुनेः
गुड़धानानथ देवसात्कृतान्।
अदताध्युषिते महौतुना
बत पारावतपोतकैः सह ॥१९॥

शान्तिसेविनां यतिनां जटान्तरं मृदु लिखता च एणगणेन शोभिते, देवसात्कृतान् मुनेः ज्वलितानलनिःसृतान् गुड़धानान् पारावतपोतकैः सह बत अदता महौतुना अध्युषिते, दर्भान्, समश्नता खादता, षट्कैर्विषाणैः, स्वयमात्मना अनाहूतानैव आगताः शिष्टालापाद्यर्थं सुपस्थिताश्च तं शान्तिसेविनः निरुत्पात-भावसम्पन्नाश्चेति ते तथोक्तास्तेषाम्। एतेनापरिचितेष्वपि एणगणस्य विश्वाससूचनादाश्रमस्य निरुपद्रवत्वातिशयः सूचितः। यतिनां जितेन्द्रि-याणां सन्न्यासिनाम्, जटान्तरम्, मृदु मन्दम्, लिखता कण्डूयता च, एणगणेन हरिणसमूहेन शोभिते। अत्र स्वभावोक्तिरलङ्कारः॥ देव-सात्कृतान् अग्न्यावर्पणेन देवेभ्यो निवेदितान्, मुनेः, ज्वलितानलात् दीप्यमानहोमाग्नितो निःसृतान् यदृच्छया निर्गतान्, गुड़धानान् गुड़ेन मिश्रितान् लाजान्, पारावतपोतकैः कपोतशावकैः सह, बत हर्षेण, अदता भक्षयता, महौतुना विशालविड़ालेन, अध्युषिते अधिष्ठिते। महाविड़ालस्य पारावतपोतकसाहित्याभिधानेनाश्रमस्य हिंसाराहित्यं ध्वनितम्। अत्र स्वभावोक्तिच्छेकानुप्रासयोः संसृष्टिरलङ्कारः। "बता-मन्त्रणसन्तोषखेदानुक्रोशविस्मये" इति मेदिनी। "ओतुर्विड़ालो मार्जारो

দুঃখ উপস্থিত হইল॥ শ্রুতিমধুর বেদধ্বনি, মনোহর সামগান এবং গগনোত্থিত প্রচুর ধূমের ধারাতে অতিদূর হইতেও সে তপোবনের

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

মুনিবালককৃষ্টকেশর-
মৃদুকণ্ডূয়নমুদ্রিতেক্ষণৈঃ ।
অপি কেশরিভির্বিনিশ্চলৈঃ
পরিবিশ্বস্ততমীকৃতান্তরে ॥২০॥
পরিহার্হিতসারথিরথ
রথমধ্যাদ্ভুবনেশ্বরো বনে ।

বিষদংশক আখুভুক্” ইত্যমরঃ ॥ মুনিবালকৈঃ কৃষ্টা আকৃষ্টাঃ কেশরা যেষাং তে চ তে মুনিবালকানামেব যানি মৃদুকণ্ডূয়নানি তৈর্মুদ্রিতানি ঈক্ষণানি নয়নানি যৈস্তে চেতি তৈঃ, বিনিশ্চলৈর্নিষ্পন্দৈঃ, কেশরিভিঃ সিংহৈরপি, পরিবিশ্বস্ততমীকৃতং সমন্তাদতিশয়েন বিশ্বাসাস্পদীকৃতম্ অন্তরং মধ্যদেশো যস্য তস্মিন্। তাদৃশৈরপি সিংহৈঃ মুনিবালকানামপ্যকিঞ্চিৎকরত্বাদিতি ভাবঃ। অত্র স্বভাবোক্তিরলঙ্কারঃ ॥ বনে উক্তবিধতপোবনে, ভুবনেশ্বরো রাজা ভীষ্মকঃ, রযবত্যা বেগশালিন্যা,

আশ্রমগুলি সূচিত হইতেছিল ॥ শান্তিসেবী সন্ন্যাসীরা বিভিন্ন তপোবন হইতে আপনা আপনি উপস্থিত হইয়াছিলেন, তখন কোন কোন হরিণ শৃঙ্গদ্বারা মৃদু মৃদু ভাবে তাঁহাদের জটা কণ্ডূয়ন করিতেছিল এবং কতকগুলি হরিণ হোমের অবশিষ্ট কুশ ভক্ষণ করিতেছিল। এহেন হরিণগণে তপোবন শোভা পাইতেছিল ॥ মুনিরা প্রজ্বলিত হোমাগ্নিতে গুড়মিশ্রিত খই নিক্ষেপপূর্ব্বক তাহা দেবগণকে নিবেদন করিয়াছিলেন, তাহার অনেক খই আগুনের বাহিরে আসিয়া পড়িয়াছিল। তপোবনের বড় বড় বিড়াল কপোতশাবকগণের সহিত মিলিত হইয়া আনন্দসহকারে তাহা ভক্ষণ করিতেছিল ॥ স্থানে স্থানে সিংহ বসিয়া

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

वततार दृगम्बुधारया
रयवत्या विमलीकृतान्तरः ॥२१॥
(कुलकं समाप्तम्)

मुनयो नयपारगा नृपम्
अथ संवर्द्धयितुं तमाययुः।
नवदर्शनमेकधर्म्मिणां
न खलु प्रीणयते हि कं जनम् ॥२२॥

डी. जी. ...
...
"मा" को अर्पण,
१५-७-७४

मुनिबालकक्लिष्टकेशरमृदुकण्डूयनमुद्रितेक्षणैः विनिश्चलैः केशरिभिः अपि परिविश्वस्ततमीकृतान्तरे, वने, भुवनेश्वरः रयवत्या दृगम्बुधारया विमलीकृतान्तरः (सन्) विरहार्द्दितसारथिः रथमध्यात् वततार ॥१७—२१॥

दृगम्बुधारया तपोवनप्राप्त्यानन्दात् निर्गताश्रुस्रोतसा, विमलीकृतं प्रक्षालितम् अन्तरं वक्षोमध्यदेशो यस्य स तादृशः सन्, विरहेण भाविराजविच्छेदेन अर्द्दितः पीड़ितः सारथिर्यस्य तस्मात्, रथमध्यात्, वततार अवतीर्णवान्। अत्र वृत्त्यनुप्रासच्छेकानुप्रासयोः संसृष्टिरलङ्कारः। "रंहस्तरसी तु रयः स्यदः। जवः" इत्यमरः। वततारेति "वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः" इति अवशब्दस्याकारलोपः ॥१७—२१॥

বা শয়ন করিয়া রহিয়াছিল, তখন মুনিবালকেরা যাইয়া কোন কোন সিংহের জটা ধরিয়া টানিতেছিল এবং মৃদু মৃদু ভাবে কোন কোন সিংহের গাত্র কণ্ডূয়ন করিতেছিল, তাহাতে সেই সকল সিংহ নয়ন মুদ্রিত করিয়া রহিয়াছিল, ইহাতে সেই তপোবনের অভ্যন্তরদেশগুলি বিশেষ বিশ্বস্ত ছিল ॥১৭—২১॥

अन्वयः—अथ नयपारगाः मुनयः तं नृपं संवर्द्धयितुं आययुः। हि एकधर्म्मिणां नवदर्शनं कं जनं न खलु प्रीणयति ॥२२॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

अभिवादयता दयालुना
लुनता स्वप्रभया भयं भुवः ।
दृढ़भक्तिसमार्द्रया दृशा
ददृशे योगिगणो युयुक्षुणा ॥२३॥

मुनय इति । अथ भीष्मकस्य रथादवतरणानन्तरम्, नयपारगाः सर्वनीतिनिपुणाः, अतएव नवागतराजसंवर्द्धनायागमनमिति भावः । मुनयः, तं नृपं भीष्मकम्, संवर्द्धयितुम् अभ्यर्थनादिना गौरवासदीकर्त्तुम्, आययुः । हि तथाहि, एक एव धर्म्मो व्यवसायो येषां तेषाम्, तवदर्शनं नूतनावलोकनं कर्त्तृ, कं जनम्, न खलु प्रीणयति न सन्तोषयति, अपि तु सर्वमेव प्रीणयति इत्यर्थः । अतएव युयुक्षुं भीष्मकं संवर्द्धयितुमाययुरित्याशयः ।

अत्र सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारश्छेकानुप्रासश्चेति संसृष्टिः ॥२२॥

বাঙ্গালা—তদনন্তর সমস্ত নীতিনিপুণ মুনিগণ ভীষ্মকরাজার সংবর্দ্ধনা করিবার জন্য তাঁহার নিকট আগমন করিলেন। কারণ, এক ব্যবসায়ী-দিগের নূতন দর্শন কোন্ ব্যক্তিকে সন্তুষ্ট না করে ? ॥২২॥

अन्वयः—दयालुना स्वप्रभया भुवः भयं लुनता युयुक्षुणा (नृपेण) अभिवादयता (सता) दृढ़भक्तिसमार्द्रया दृशा योगिगणो ददृशे ॥२३॥

अभीति । दयालुना, स्वप्रभया निजतेजसा, भुवः पृथिव्या भयम्, लुनता छिन्दता नाशयतेत्यर्थः । युयुक्षुणा योक्तुमिच्छुना योगशिक्षार्थिनेति यावत्, नृपेण अभिवादयता मुनीनामभिवादनं कुर्वता, सता, दृढ़भक्त्या समार्द्रया, दृशा दृष्ट्या, योगिगणो ददृशे ।

अत्र छेकानुप्रासवृत्त्यनुप्रासयोः संसृष्टिरलङ्कारः ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

परिशोधितपङ्कसङ्कुलः
श्रुतपातञ्जलजातधीजलैः।
उपलैरिव मार्जितो मणि-
र्मुनिरेकः शुशुभे शुभप्रभः ॥२४॥

"दृष्टभक्तिर्भवान्याः" "शङ्करे दृढ़भक्तिस्तम्" इत्यादिवत् अत्रापि भक्तिशब्दस्य भावप्रत्ययान्ततया पूरण्यादित्वाभावान्न पुंवद्भाव-निषेधः ॥२३॥

বাঙ্গালা—দয়ালু, আপন তেজে পৃথিবীর ভয়হারী ও যোগশিক্ষার্থী ভীষ্মকরাজা অভিবাদন করিতে প্রবৃত্ত হইয়া, দৃঢ়ভক্তি কোমলনয়নদ্বারা যোগিগণকে দর্শন করিলেন ॥২৩॥

अन्वयः—श्रुतपातञ्जलजातधीजलैः परिशोधितपङ्कसङ्कुलः उपलैः मार्जितः मणिः इव शुभप्रभः एकः मुनिः शुशुभे ॥२४॥

अथाष्टभिः श्लोकैः संक्षेपेण मुनीन् वर्णयति परीति। श्रुतमधीतं यत् पातञ्जलं पतञ्जलिकृतं योगदर्शनं तस्माज्जाता धियो ज्ञानान्येव जलानि तैः, परिशोधितं प्रक्षालितं पङ्काः पापान्येव पङ्काः कर्द्दमास्तेषां सङ्कुलं समूहो यस्य सः, उपलैः प्रस्तरैर्मार्जितो मणिरिव, शुभा उज्ज्वला प्रभा यस्य स तादृशश्च, एको शुशुभे।

अत्र पूर्वार्द्धे तादृशधीषु जलत्वारोपः पापेषु कर्द्दमत्वारोपे निमित्तं पङ्कशब्दश्च श्लिष्ट इति श्लिष्टपरम्परितरूपकमलङ्कारः, तृतीयपादे श्रौतोपमा च्छेकानुप्रासश्चेत्येतेषां मिथो नैरपेक्ष्यात् संसृष्टिः।

"अस्त्री पङ्कं पुमान् पाप्मा पापम्" इत्यादि "पङ्कोऽस्त्री सादकर्द्दमौ" इति चामरः ॥२४॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

পরিশীলনয়া নিরন্তরং
বিধৃতঃ কেনচিদীদৃশং যমঃ ।
শমনঃ শমশালিনো যথা
সুচিরং তস্য সুদূরগোঽভবত্ ॥২৫॥

বাঙ্গালা—পাতঞ্জলদর্শন অধ্যয়ন করায় উৎপন্ন জ্ঞানরূপ জলদ্বারা যিনি পাপরূপ কর্দ্দম প্রক্ষালন করিয়াছিলেন এবং প্রস্তরমার্জিত মণির ন্যায় যাহার উজ্জ্বল প্রভা প্রকাশ পাইতেছিল, সেইরূপ একজন মুনি সেখানে শোভা পাইতেছিলেন ॥২৪॥

অন্বয়ঃ—কেনচিত্ নিরন্তরং পরিশীলনয়া যমঃ ঈদৃশং বিধৃতঃ, যথা শমনঃ শমশালিনঃ তস্য সুচিরং সুদূরগঃ অভবত্ ॥২৫॥

পরীতি। কেনচিন্মুনিনা, নিরন্তর পরিশীলনয়া অভ্যাসেন, যমঃ অষ্টানাং যোগাঙ্গানাং মধ্যে যমো নাম প্রথমমঙ্গং শমনশ্চ, ঈদৃশং বিধৃত আয়ত্তীকৃতঃ, যথা, শমনো যমঃ, শমশালিনঃ অন্তরিন্দ্রিয়নিগ্রহযুক্তস্য, তস্য মুনেঃ, সুচিরং সুদূরগঃ সুদূরবর্ত্তী অভবত্ । যোগাভ্যাসেন দীর্ঘজীবনাবশ্যম্ভাবাদিতি ভাবঃ ।

অত্র যমো বিধৃতোঽপি সুদূরগোঽভবদিতি বিরোধঃ, যমো যোগাঙ্গবিশেষ ইতি চ তত্সমাধানমিতি বিরোধাভাসোঽলঙ্কারশ্ছেকানুপ্রাসশ্চেতুভয়োঃ সংসৃষ্টিঃ ।

"অহিংসা সত্যাস্তেয়ব্রহ্মচর্য্যাপরিগ্রহা যমাঃ" ইতি পাতঞ্জলসূত্রম্ ॥২৫॥

বাঙ্গালা—কোন মুনি নিরন্তর অভ্যাসদ্বারা যমকে (যমনামক যোগাঙ্গকে, যমরাজকে) এমন ভাবে আয়ত্ত করিয়াছিলেন যে, যম

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

मलिनं वसनं कृशं वपुः
शिथिलं चर्म्म जटाश्च धारयन्।
परिभूषितभूपतेरपि
बहुतेजोभिरदीपि कश्चन ॥२६॥

गिरयाऽप्यनिवार्य्यवीर्य्यया
पिशुनान् दण्डयितुं चमोऽपि सन्।
अवलम्बनसम्बलं पथि
दृढ़दण्डं दधदेकपाणिना ॥२७॥

(যমনামক যোগাঙ্গ, যমরাজ) দীর্ঘকালের জন্য অন্তরিন্দ্রিয়নিগ্রহশালী সেই মুনির অতিদূরবর্ত্তী হইয়াছিলেন ॥২৫॥

অন্বয়:—কশ্চন মলিনং বসনং কৃশং বপুঃ শিথিলং চর্ম্ম জটাশ্চ ধারয়ন্, (সন্ অপি) বহুতেজোভিঃ পরিভূষিতভূপতেঃ অপি অদীপি ॥২৬॥

মলিনমিতি। কশ্চন মুনিঃ, মলিনং বসনম্, কৃশং বপুঃ শরীরম্, শিথিলং চর্ম্ম, জটাশ্চ, ধারয়ন্ সন্নপি, বহুতেজোভিঃ তপোনিবন্ধন-নয়নাদিপ্রচুরদীপ্তিভিঃ, পরিভূষিতো নানালঙ্কারৈরলঙ্কৃতঃ যো ভূপতী রাজা ততোঽপি, অদীপি উজ্জ্বলোঽভূত্।

অত্র ধারয়ন্নিত্যেকয়া ক্রিয়য়া বসনাদীনাং কর্ম্মতয়াভিসম্বন্ধাত্ তুল্যযোগিতালঙ্কারো বৃত্ত্যনুপ্রাসেন সংসৃজ্যতে ॥২৬॥

বাঙ্গালা—কোন মুনি মলিন বস্ত্র, কৃশ শরীর, শিথিল চর্ম্ম এবং জটা ধারণ করিয়াও নিজের প্রচুর তেজে, নানা অলঙ্কারে অলঙ্কৃত রাজা অপেক্ষাও দীপ্তি পাইতেছিলেন ॥২৬॥

অন্বয়:—নর্দিকসংশ্রয়ঃ বরুণঃ অপি যস্য জলাত্ সভয়ঃ (সন্) পলায়তে (তাদৃশঃ) কশ্চন অনিবার্য্যবীর্য্যয়া গিরয়া অপি পিশুনান্ দণ্ডয়িতুং ক্ষমঃ সন্ অপি এক-

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

वरुणोऽपि जलैकसंश्रयः
सभयो यस्य जलात् पलायते ।
अपरे च करे कमण्डलुं
तमुपादाय बभौ च कश्चन ॥२८॥ (युग्मकम्)

पाणिना पथि अवलम्बनसम्बलं दृढ़दण्डं दधत्, अपरे च करे तं कमण्डलुं उपादाय बभौ ॥२७—२८॥

द्वाभ्यां युग्मकेन कञ्चिद्वर्णयति गिरयेति । जलमेव एकः संश्रय आश्रयो यस्य स तथोक्तो वरुणोऽपि, यस्य मुनेः, जलात् अभिशापजल-निक्षेपात्; सभयः सन्, पलायते, तादृशः कश्चन मुनिः, अनिवार्य्यं वीर्य्यं शक्तिर्यस्यास्तया, गिरया अभिशापवाचापि, पिशुनान् दुर्ज्जनान् दण्डयितुम्, क्षमः समर्थः सन्नपि, एकपाणिना दक्षिणहस्तेन, पथि, अवलम्बनस्य सम्बलं सहायभूतम्, दृढ़दण्डम्, दधत् धारयन्, अपरे वामे च, करे हस्ते, तं प्रसिद्धम्, कमण्डलुं जलपात्रविशेषम्, उपादाय गृहीत्वा, बभौ रराज ।

अत्र पूर्वश्लोके छेकानुप्रासोऽलङ्कारः, द्वितीयश्लोके च जलैक-संश्रयोऽपि जलात् पलायत इति विरोधात् शापजलनिक्षेपात् पलायत इति च तत्समाधानाद्विरोधाभासोऽलङ्कारो वृत्त्यनुप्रासश्चानयोः संसृष्टिः ।

गिरयेति "वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः । टापञ्चापि हलन्तानां क्षुधा-वाचा-निशा-गिरा" ॥२७—२८॥

বাঙ্গালা—একমাত্র জলনিবাসী বরুণও যাঁহার শাপজল নিক্ষেপের ভয়ে পলায়ন করেন, সেইরূপ কোন মুনি প্রবলশক্তিশালী বাক্যদ্বারা দুর্জন-গণের দণ্ড দান করিতে সমর্থ হইয়াও দক্ষিণ হস্তে পথে অবলম্বনের সম্বল একখানা যষ্টি ধারণ করিয়া, অপর হস্তে একটী কমণ্ডলু লইয়া অবস্থান করিতেছিলেন ॥২৭—২৮॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

सरसीव सरोजमुज्ज्वलं
मिलितैर्नूतनभानुभानुभिः।
नयनं गुरुगर्त्तगर्भगं
रुरुचे कस्य च योगजैर्महैः ॥२९॥
चिकुरास्तनुरोमराशयः
पृथुलश्मश्रुचयाश्च कस्यचित्।
मनसा सह सत्त्वसङ्गिना
सुचिराद्बभ्रुरतीव शुभ्रताम् ॥३०॥

अन्वयः—कस्य च गुरुगर्त्तगर्भगं नयनं योगजैः महैः मिलितैः नूतनभानुभानुभिः सरसि उज्ज्वलं सरोजं इव रुरुचे ॥२९॥

सरसीति। कस्य च कस्यापि मुनेः, गुरुगर्त्तगर्भगं गभीररन्ध्राभ्यन्तरस्थं नयनम्, योगजैर्महैस्तेजोभिः, मिलितैः सरोजेनैव सह संयुक्तैः, नूतनभानोर्नवोदितसूर्य्यस्य भानुभिः किरणैः, सरसि जलाशये, उज्ज्वलं सरोजं पद्ममिव, रुरुचे दिदीपे।

अत्र श्रौतोपमालङ्कारः, वृत्त्यनुप्रासश्छेकानुप्रासश्चेत्येषां संसृष्टिः। "महस्तूत्सवतेजसोः" इत्यमरः ॥२९॥

বাঙ্গালা—নবোদিত সূর্য্যকিরণের সহিত সংযুক্ত উজ্জ্বল পদ্ম যেমন সরোবরে শোভা পায়, সেইরূপ কোন মুনির গভীর গর্ত্তগত নয়ন যোগ-তেজে শোভা পাইতেছিল ॥২৯॥

अन्वयः—कस्यचित् चिकुराः तनुरोमराशयः पृथुलश्मश्रुचयाः च सत्त्वसङ्गिना मनसा सह सुचिरात् अतीव शुभ्रतां बभ्रुः ॥३०॥

चिकुरा इति। कस्यचिन्मुनेः, चिकुराः केशाः, तनोः शरीरस्य

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

परमां तनुतां तनूरगात्
न युधो वस्तु च किञ्चिदास्त चेत् ।
अचलापरिचालनच्चयौ
प्रशशाकेव तथापि कश्चन ॥२१॥

रोमराशयः, पृथला दीर्घाः श्मश्रुचया मुखलोमसमूहाश्च, सत्त्वसङ्गिना सत्त्वगुणसंसर्गिणा मनसा सह, सुचिरादतिदीर्घकालादवधि, अतीव-शुभ्रतां धवलतां निर्म्मलताञ्च, बभ्रुर्धारयामासुः ।

अत्र बभ्रुरित्येकया क्रियया चिकुरादीनां कर्त्तृतयाभिसम्बन्धात्तुल्ययोगितालङ्कारः, सहोक्तिश्चेत्यनयोरङ्गाङ्गिभावेन सङ्करः, सोऽपि पुनः पूर्ववदनुप्रासाभ्यां संसृज्यते ॥३०॥

বাঙ্গালা—কোন মুনির কেশকলাপ, দেহের লোমসমূহ এবং দীর্ঘ শ্মশ্রু সকল (দাড়িগুলি) সত্ত্বগুণসম্পন্ন মনের সহিত অতিদীর্ঘকাল হইতেই শুভ্রতা ধারণ করিতেছিল ॥৩০॥

अन्वयः—तनूः परमां तनुतां अगात् किञ्चित् युधः वस्तु च न आस्त, चेत् तथापि कश्चन अचलापरिचालनच्चयौ (कर्त्तुं) प्रशशाक इव ॥२१॥

परमामिति । तनूः शरीरम्, परमां तनुतां तपोऽनुष्ठानेनातीव-कृशताम्, अगात् प्रापत् । किञ्चित् किमपि, युधो युद्धस्य, वस्तु शस्त्र-प्रभृतिपदार्थः, न आस्त न आसीत्, चेद्यदि, तथापि, कश्चन कश्चि-न्मुनिः, अचलायाः पृथिव्याः परिचालनच्चयौ, कर्त्तुं प्रशशाकेव ; तपःप्रभावादिति भावः ।

अत्र क्रियोत्प्रेक्षालङ्कारस्छेकानुप्रासेन संसृज्यते ।

आस्तेति "आस उपवेशने" इत्यस्य ह्यस्तन्यां प्रयोगः ॥२१॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

অথ তে মুনয়োঽনয়ন্ নৃপং
গুরুসংসারগৃহে তমোবৃতে।
পরিদর্শয়িতুং তপোভুবং
পরতত্ত্বং হিতবাক্যদীপকৈঃ ॥৩২॥

গগনাদথ হংসমণ্ডলান্
বততারোত্তমরাজহংসবৎ।
পরিতঃ প্রভয়া প্রভাসয়ন্
মনুজর্ষীনমরর্ষিনারদঃ ॥৩ ॥

বাঙ্গালা—শরীর অত্যন্ত কৃশ ছিল এবং যদিও যুদ্ধের কোন বস্তু ছিল না; তথাপি কোন মুনি যেন তপস্যার প্রভাবে পৃথিবীর পরিচালন ও ধ্বংস করিতে সমর্থ হইতেন ॥৩১॥

অন্বয়ঃ—অথ তে মুনয়ঃ হিতবাক্যদীপকৈঃ তমোবৃতে গুরুসংসারগৃহে পরতত্ত্বং পরিদর্শয়িতুং নৃপং তপোভুবং অনয়ন্ ॥৩২॥

অথেতি। অথ রাজস্তপাবনপ্রাপ্তেরনন্তরম্, তে মুনয়ঃ, হিতবাক্যান্যেব দীপকাঃ প্রদীপাস্তৈঃ, তমঃ অজ্ঞানমেব তমঃ অন্ধকারস্তেন বৃতে আবৃতে গুরুর্মহান্ সংসারো জগদেব গৃহং তস্মিন্, পরং পরমং তত্ত্বং ব্রহ্মৈব তত্ত্বং বস্তু তৎ, পরিদর্শয়িতুং সাক্ষাৎ কারয়িতুম্, নৃপং ভীষ্মকম্, তপোভুবং তপস্যাদেশং তপোবনমিতি যাবৎ; অনয়ন্।

অত্র শ্লিষ্টং সাঙ্গং রূপকমলঙ্কারস্তচ্ছেকানুপ্রাসেন সংসৃজ্যতে।

নয়তের্দ্বিকর্ম্মকত্বাৎ কর্ম্মদ্বয়ম্ ॥৩২॥

বাঙ্গালা—তাহার পর সেই মুনিরা হিতোপদেশরূপ প্রদীপদ্বারা অজ্ঞান-অন্ধকারাবৃত বিশাল সংসাররূপ গৃহমধ্যে পরম বস্তু দেখাইবার জন্য ভীষ্মকরাজাকে তপোবনে লইয়া গেলেন ॥৩২॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

गतमुक्तिपदोऽपि जीवितो
धृतदेहोऽपि विदेहबोधवान्।
श्लथदण्डकुलालचक्रवत्
चिरसंस्कारवशेन यद्भ्रमिः ॥३४॥

अन्वयः—अथ अमरर्षिः नारदः हंसमण्डलान् उत्तमराजहंसवत् प्रभया परितः मनुजर्षीन् प्रभासयन् गगनात् ववतार ॥३३॥

गगनादिति। अथ भीष्मकस्य तपोवनप्रवेशानन्तरम्, अमरर्षि-नारदः, हंसानां मण्डलान् समूहान्, उत्तमराजहंस इवेति उत्तम-राजहंसवत्, प्रथमा आत्मदीप्त्या, परितः सर्वतः, मनुजर्षीन् प्रभासयन् प्रद्योतयन्, गगनादाकाशात्, ववतार अवततार।

अत्र श्रौतोपमालङ्कारश्छेकानुप्रासश्चेत्यनयोः संसृष्टिः।

उत्तमराजहंसवदिति "वसूनि तोयं घनवद्व्यकारीत्" इत्यादिवत् सापेक्षेऽपि वतिप्रत्ययः। ववतारेति "वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः" इत्यवशब्दस्याकारलोपः ॥३३॥

বাঙ্গালা—তদনন্তর উত্তম রাজহংস যেমন আপন প্রভাদ্বারা হংস-গণকে উদ্ভাসিত করিতে করিতে আকাশ হইতে ভূতলে অবতীর্ণ হয়, তেমন দেবর্ষি নারদ আপন প্রভাদ্বারা সকল দিকে নরর্ষিগণকে উদ্ভাসিত করিতে করিতে আকাশ হইতে ভূতলে অবতীর্ণ হইলেন ॥৩৩॥

अन्वयः—गतमुक्तिपदः अपि जीवितः धृतदेहः अपि विदेहबोधवान् श्लथदण्ड-कुलालचक्रवत् चिरसंस्कारवशेन यद्भ्रमिः ॥३४॥

गतेति। गतं प्राप्तं मुक्तिपदं येन स तादृशोऽपि, जीवितः शरीरि-जीववान्; तथा, धृतदेहोऽपि, विदेहबोधवान् विदेहकैवल्यज्ञानवान्, श्लथ उत्तोलनेन विश्लिष्टो दण्डो तस्य तच्च तत् कुलालचक्रं कुम्भकार-

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

तपनि क्तनित्यसंयमात्
भुवनज्ञानसमन्वितः सदा।
स सुरर्षितया नरर्षिभिः
अनुभूतः क्रियमाणसंयमैः ॥३५॥

चक्रस्येति तद्दिव, चिरं यः संस्कारः भावनाख्यो वेगाख्यश्च गुणविशेषः तद्वशेन, यस्य द्वारदस्य, भ्रमिः जगत्यां विचरणं भ्रमणञ्चासीत्।

अत्र विरोधाभासस्योतोपमयोः परस्परनिरपेक्षतया संसृष्टिः ॥३४॥

বাঙ্গালা—যিনি মুক্ত হইয়াও জীবদেহধারী, আর দেহ ধারণ করিয়াও বিদেহকৈবল্যজ্ঞানী এবং দণ্ড তুলিয়া লইলেও কুম্ভকারের চক্রের ন্যায় পূর্ব্বসংস্কারবশতঃ যাঁহার ভ্রমণ হইত ॥৩৪॥

অন্বয়ঃ—क्रियमाणसंयमैः नरर्षिभिः तपनि क्तनित्यसंयमात् सदा भुवनज्ञान-समन्वितः सः सुरर्षितया अनुभूतः ॥३५॥

तपन इति। क्रियमाणः संयमः धारणाध्यानसमाधिरूपं चरम-योगाङ्गत्रयं यैस्तैः, नरर्षिभिः, तपनि सूर्य्ये, क्तो य उक्तरूपो नित्यसंयमस्तस्मात्, सदा, भुवनज्ञानसमन्वितः तपनस्पृष्टसमस्तजगज्ज्ञान-सम्पन्नः, स आगन्तुको मुनिः, सुरर्षितया देवर्षिनारदत्वेन, अनुभूतः अवगतः।

"त्रयमेकत्र संयमः" इति "सूर्य्ये संयमात् भुवनज्ञानम्" इति च योगसूत्रम् ॥३५॥

বাঙ্গালা—তত্রত্য মুনিরা ধ্যান করিয়া বুঝিতে পারিলেন যে, সূর্য্যে সংযম (ধারণা, ধ্যান ও সমাধি) করায় সর্ব্বদা জগতের সমস্ত পদার্থ জ্ঞান-সম্পন্ন স্বয়ং দেবর্ষি নারদ—ইনি ॥৩৫॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

ददिरे पदवारि हारिणे
निजदृष्ट्या मुनये यदेनसाम्।
मनुजर्षिमनोगतं मलं
परिधौतं किल तेन तत्क्षणात् ॥३६॥
पदरेणुरपि प्रयात्यहो
भुवने यस्य न चार्घयोग्यताम्।
अतियोग्यमिमे व्यधिस्रणन्
मुनयेऽर्घं विनयेन तस्मकै ॥३७॥

अन्वय:—निजदृष्ट्या एनसां हारिणे मुनये यत् पदवारि ददिरे, तेन किल तत्क्षणात् मनुजर्षिमनोगतं मलं परिधौतं ॥३६॥

ददिर इति। निजदृष्ट्या आत्मनो दर्शनदानेनैव, एनसां पापानाम्, हारिणे नाशकाय, मुनये नारदाय, यत्, पदवारि पादप्रक्षालनजलम्, ददिरे तत्रत्या मुनयः समर्पयामासुः ; तेन किल पदवारिणा, तत्क्षणात् मनुजर्षीणां मुनीनां मनोगतम्, मलं रागद्वेषादिकम्, परिधौतम् अपसारितम्। देवर्षेर्दर्शनस्यैव फलमेतदिति भावः।

अत्र कारणीभूतं वारि नारदे, तत्कार्य्यभूतो मलनाशस्तु तत्रत्य-मुनिमनःस्विति कार्य्यकारणयोर्भिन्नदेशत्वादसङ्गतिर्नामालङ्कारः, वृत्त्यनुप्रासश्चेत्यनयोः संसृष्टिः ॥३६॥

বাঙ্গালা—যিনি আপন দর্শনদানমাত্রেই পাপ নাশ করিতেন, সেই দেবর্ষি নারদকে তত্রত্য মুনিরা যে পাদপ্রক্ষালনের জল দিয়াছিলেন, সেই জলেই তৎক্ষণাৎ তাঁহাদের মনের মল প্রক্ষালন করিয়াছিল ॥৩৬॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

प्रणमन्ति जनाश्चिराय यान्
अथ तेऽपि प्रणमन्ति नारदम् ।
अनमस्यतयेति वीक्ष्य तं
निरणैषुः पशुविष्किरा अपि ॥३८॥

अन्वयः—अहो यस्य पदरेणुः अपि भुवने अर्घयोग्यतां न च प्रयाति । इमे विनयेन तस्मकै मुनये अतियोग्यं अर्घं व्यश्रिश्रणन् ॥३७॥

पदेति । अहो आश्चर्यं । यस्य, पदरेणुश्चरणधूलिरपि, भुवने, अर्घस्य मूल्यस्य योग्यताम्, न च नैव प्रयाति प्राप्नोति, असाधारणोन्नति हेतुत्वादिति भावः । इमे नरर्षयः, विनयेन, तस्मकै तस्मै, मुनये नारदाय, अतियोग्यम्, अर्घं पूजोपचारम्, व्यश्रिश्रणन् अदुः ।

अत्रान्येषामुपकरणानां का कथा पदरेणुरपीत्यर्थे विरोधः श्लेषेणोक्त-विधार्थकरणाच्च तत्समाधानमिति विरोधाभासोऽलङ्कारश्छेकानुप्रासेन संसृज्यते ।

"मूल्ये पूजाविधावर्घः" इत्यमरः ।

तस्मकै इति सर्वनामत्वादक्प्रत्ययः ॥३७॥

বাঙ্গালা—কি আশ্চর্য্য ! জগতে যাঁহার পদধূলিও অর্ঘের (মূল্যের) যোগ্যতা প্রাপ্ত না হয়, তপোবনের মুনিরা বিনয়সহকারে সেই নারদ-মুনিকে অতিযোগ্য অর্ঘ (পূজার উপচার) দান করিলেন ॥৩৭॥

अन्वयः—अथ जनाः चिराय यान् प्रणमन्ति ते अपि नारदं प्रणमन्ति ; इति वीक्ष्य पशुविष्किराः अपि तं अनमस्यतया निरणैषुः ॥३८॥

प्रणमन्तीति । अथ अर्घदानानन्तरम्, जनाः, चिराय यान् प्रणमन्ति, ते तपोवनमुनयोऽपि नारदं प्रणमन्ति । इति वीक्ष्य दृष्ट्वा,

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

कथमत्र समागतो भवान्
इति तावत् परिपृच्छ्य मामलम् ।
गणविच्युतनीरशीकरः
प्रचलन् प्रस्रवणी हि युज्यते ॥३९॥

पशवो हरिणादयश्च विष्किराः पक्षिणः शुकादयश्चेति ते अपि, तं नारदम्, अनमस्यतया नमस्कारायोग्यतया इति विरोधः, न विद्यते नमस्यो यस्मात्तस्य भावस्तया इति तत्समाधानम् । निरणैषुर्निर्णीतवन्तः । सर्वनिर्णयक्षममुनिप्रणामसाक्षचर्य्यात् तत्रत्यानां पशुपक्षिणामपि तादृशनिर्णयकरणयोग्यत्वमित्याशयः ।

अत्रापि विरोधाभासोऽलङ्कारः । उद्देश्यप्रतिनिर्द्देश्यविषयत्वात् प्रणमन्तीत्यस्य द्विरुक्तावपि न कथितपदतादोषः ।

"पतत्रि-पत्रि-पतग-वि-विष्किर-पतत्रयः" इत्यमरः ।

विष्किरेति "विष्किरो विकिरे" इति निपातः ॥३८॥

বাঙ্গালা—তদনন্তর, সমস্ত লোক চিরকাল যাঁহাদিগকে নমস্কার করিয়া থাকে, তপোবনের সেই মুনিরাই নারদকে প্রণাম করিতেছেন, ইহা দেখিয়া তত্রত্য পশুপক্ষীরাও দেবর্ষি নারদকে সর্ব্বপ্রধান নমস্য বলিয়া নিশ্চয় করিল ॥৩৮॥

अन्वयः—भवान् अत्र कथं समागतः इति तावत् मां परिपृच्छ्य अलं । हि गणविच्युतनीरशीकरः प्रचलन् (सन्) प्रस्रवणी युज्यते ॥३९॥

सविनयां नारदोक्तिमनुवदति कथमिति । भवान् नारदः, अत्र तपोवने कथं समागतः, इति तावत् मां परिपृच्छ्य अलम्, यूयं न परिपृच्छयेत्यर्थः । हि यस्मात्, गणात् स्वसदृशनीरशीकरसमूहाद्विच्युतश्चासौ नीरशीकरो जलविन्दुश्चेति स तथोक्तः, प्रचलन् निःसरन्

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

प्रथमं प्रथते स्म नारदः
मुनिरेषां कुतुकं निवर्त्तयन् ।
स विदन् वदते हि यः पुनः
अनभिव्यक्तपराशयं विदन् ॥४०॥

সন্, প্রস্রবণী জলস্রোতসি, যুজ্যতে মিলিতো ভবতি। তথা চ বিশ্লিষ্ট একো জলবিন্দুর্যথা প্রচলন্ জলস্রোতসি মিলিতো ভবতি, তথাহমপি স্বদেশীয়-ঋষিগণাদ্বিশ্লিষ্টো ভবদ্ভিঃ সহ মিলিতো ভবিতুমাগত ইতি ভাবঃ।

অতএবাত্র দৃষ্টান্তোঽলঙ্কারঃ ॥৩৯॥

বাঙ্গালা—"আপনি এখানে আসিলেন কেন" এইরূপ আপনারা আমার নিকট প্রশ্ন করিবেন না। কারণ, অন্যান্য জলবিন্দু হইতে বিশ্লিষ্ট একটী জলবিন্দু চলিতে থাকিয়া জলস্রোতেই মিলিত হইয়া যায় ॥৩৯॥

অন্বয়ঃ—নারদঃ মুনিঃ এষাং কুতুকং নিবর্ত্তয়ন্ প্রথমং প্রথতে স্ম। যঃ পুনঃ অনভিব্যক্তপরাশয়ং বিদন্ বদতে স বিদন্ ॥৪০॥

প্রথমমিতি। নারদো মুনিঃ, এষাং তপোবনমুনীনাম্, কুতুকং নিজাগমনকৌতুকম্, নিবর্ত্তয়ন্ নিবারয়ন্, প্রথমম্, প্রথতে, ব্রবীতি স্ম। তথা চ, যো জনঃ পুনঃ, অনভিব্যক্তো ন প্রকাশিতঃ যঃ পরস্য আশয়োঽভিপ্রায়স্তম্, বিদন্ আত্মনৈব বুধ্যমানঃ সন্, বদতে তং পরাশয়ং ব্রবীতি, স জন এব বিদন্ বিদ্বান্। অত্রাপি নারদো মুনীনামুক্তবিধমাশয়ং জানন্নেব পূর্ব্বোক্তং শ্লোকমাহ স্মেতি ভাবঃ।

অত্র সামান্যেন বিশেষসমর্থনরূপোঽর্থান্তরন্যাসোঽলঙ্কারো বৃত্ত্যনুপ্রাসচ্ছেকানুপ্রাসশ্চেত্যেতেষাং সংসৃষ্টিঃ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

प्रतिपादयतां भुवः शुभं
शुभपृच्छा भवतामनर्थिका ।
सविधे हि तमस्तमोनुदः
प्रतरीतुं नहि जातु दृश्यते ॥४१॥

प्रथत इति "प्रथ प्रख्याने" इत्यस्य रूपम् । वदत इति चौरादिको वदधातुरात्मनेपदी ४०॥

বাঙ্গালা—নারদমুনি তপোবনবাসী মুনিগণের কৌতূহল নিবৃত্তি করিবার জন্য প্রথমে ঐ কথা বলিয়াছিলেন। কারণ, যিনি পরের অপ্রকাশিত অভিপ্রায় বুঝিয়া কথা বলিতে পারেন, তিনিই বিদ্বান্ ॥৪০॥

अन्वयः—भुवः शुभं प्रतिपादयतां भवतां शुभपृच्छा अनर्थिका । हि तमः जातु तमोनुदः सविधे प्रतरीतुं न दृश्यते ॥४१॥

प्रतीति । भुवः पृथिव्या एव, शुभं मङ्गलम्, प्रतिपादयतां तपसा सर्वोपकारचिकीर्षया च विदधतां भवताम्, शुभपृच्छा मङ्गलजिज्ञासा अनर्थिका निष्प्रयोजना, सर्वशुभसम्पादकानामात्मशुभसम्पादनस्य सुतरां सिद्धत्वादिति भावः । हि तथाहि, तमोऽन्धकारः, जातु कदाचिदपि, तमोनुदः अन्धकारनाशकस्य सूर्य्यस्य, सविधे समीपे, प्रतरीतुमाविर्भवितुं नहि दृश्यते । शुभविधानि अशुभनाशनस्यावश्यम्भावेन शुभविधायिनामशुभाविर्भावस्य सर्वथैवासम्भवादित्याशयः ।

अत्र वैधर्म्म्येण दृष्टान्तोऽलङ्कारः, शुभपृच्छाया आनर्थक्यं प्रति प्रथमपादगतपदार्थो हेतुरिति पदार्थहेतुकं काव्यलिङ्गम्, तमस्तमोनुद इति लाटानुप्रासश्चेत्येतेषां मिथो नैरपेक्ष्यात् संसृष्टिः ।

"चन्द्राग्न्यर्कास्तमोनुदः" इत्यमरः ।

तमोनुदतीति क्विप् ॥४१॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

परिशीलयतां तपःक्रियां
दुरितं दूरमुपैति वः स्वयम्।
सुघनापि घनावली क्षयं
दिवि वाते परिवाति गच्छति ॥४२॥
मुनितां श्रयितुं तपोवने
समयोऽयं नृप! सत्यमस्ति ते।
अरिपुर्विषयः परं वयः
ननु योग्यस्य सुतस्तवाधुना ॥४ ॥

বাঙ্গালা—মহর্ষিগণ! আপনারা জগতের মঙ্গল সম্পাদন করিয়া থাকেন; সুতরাং আমাদের মঙ্গল জিজ্ঞাসা করা নিষ্প্রয়োজন কারণ, অন্ধকারনাশক সূর্য্যের নিকটে অন্ধকারের আবির্ভাব দেখা যায় না ॥৪১॥

অন্বয়:—দুরিতং তপঃক্রিয়াং পরিশীলয়তাং ব স্বয়ং (এব) দুরং উপৈতি। দিবি সুঘনা অপি ঘনাবলী বাতে পরিবাতি (সতি), স্বয়মেব) ক্ষয়ং গচ্ছতি ॥৪২॥

পাপনাশপৃচ্ছাপ্যনর্থিকেত্যাহ পরীতি। দুরিতং পাপং কর্ত্তৃ, তপঃ-ক্রিয়াং তপস্যাং পরিশীলয়তাং পৌনঃপুন্যেন কুর্বতাম্, বো যুষ্মাকম্, স্বয়মেব দূরমুপৈতি গচ্ছতি। দিবি আকাশে, সুঘনাপি অতিনিবিড়াপি ঘনাবলী মেঘমালা, বাতে বায়ৌ, পরিবাতি প্রাবল্যেন বহতি সতি স্বয়মেব, ক্ষয়ং নাশম্, গচ্ছতি প্রাপ্নোতি।

অত্র একস্যৈব নাশগমনস্য উপৈতি গচ্ছতীতি ধাতুভেদাদিনা পৃথঙ্-নির্দ্দেশাৎ প্রতিবস্তূপমালঙ্কারশ্ছেকানুপ্রাসেন সংসৃজ্যতে ॥৪২॥

বাঙ্গালা—আপনারা নিরন্তর তপস্যা করিতেছেন; অতএব পাপও নিজেই দূরে যাইয়া থাকে। কারণ, আকাশে প্রবল বায়ু বহিত হইতে লাগিলে, অতিনিবিড় মেঘমালাও বিনাশ প্রাপ্ত হয় ॥৪২॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

नृप ! किन्तु सुदन्तुरा क्रिया
पुनरेका परिशिष्यते तव ।
अयि ! भूतपतिं विनाऽवनौ
न भवेत् कस्य जनस्य विस्मृतिः ॥४४॥

अन्वयः—हे नृप ! तपोवने मुनितां अयितुं अयं ते समयः इति सत्यं अस्ति। अधुना तव विषय अरिपुः वयः परं सुतश्च योग्यः ननु ॥४३॥

इत्थं मुनीनाभाष्येदानीं भीष्मकमाभाषते मुनितामिति। हे नृप ! भीष्मक ! तपोवने, मुनितां मुनित्वम्, अयितुमवलम्बितुम्, अयं ते तव समय आगतः ; इति सत्यमस्ति वर्त्तते। येन हि, अधुना, तव विषयो देशो राज्यमिति यावत् ; अरिपुः शत्रुशून्यः, वयः, परं चरमम्, सुतः पुत्रश्च योग्यः, नन्वित्यवधारणे ।

अत्र पूर्वार्द्धगतमर्थं प्रति परार्द्धगतवाक्यार्था हेतव इति वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः, उक्तार्थहेतुत्रयोपन्यासात् समुच्चयश्चेत्यनयोरङ्गाङ्गिभावेन सङ्करः, सोऽपि पुनस्तृतीयपादगतवृत्त्यनुप्रासेन संसृज्यते ॥४३॥

बाङ्गाला—রাজা! তপোবনে আসিয়া আপনার মুনি হওয়ায় এ-ই সময়, সত্য বটে। কারণ, বর্ত্তমান সময়ে আপনার রাজ্য নিষ্কণ্টক, বয়স প্রাচীন এবং পুত্রও যোগ্য হইয়াছে ॥৪৩॥

अन्वयः—किन्तु हे नृप ! एका पुनः तव सुदन्तुरा क्रिया परिशिष्यते । अयि ! भूतपतिं विना अवनौ कस्य जनस्य विस्मृतिः न भवेत ॥४४॥

नृपेति। किन्तु हे नृप ! एका पुनस्तव, सुदन्तुरा अतिविषमा ; क्रिया कार्य्यम्, परिशिष्यते अवशिष्टा वर्त्तते। तत् किमेतद्विस्मृतेरालधिक्कारः कर्त्तव्य इत्याह अयीति। अयि राजन् ! भूतपतिं महादेवं विना, अवनौ पृथिव्याम्, कस्य जनस्य विस्मृतिर्न भवेत्, अपि

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

पतिसादक्षता तवालये
तनया शैशवसीम्नि वर्त्तते।
तृषिताय जनैर्यथा जलं
युवतिर्यूने इह प्रदीयते ॥४५॥

तु सर्वस्यैव भवेदित्यर्थः। ततश्च तद्विस्मरणादात्मधिक्कारो न कर्त्तव्य इति भावः।

अत्र च्छेकानुप्रासोऽलङ्कारः।

"दन्तुरं वाच्यवद्विद्यात् विषमोन्नतदन्तयोः" इति विश्वः ॥४४॥

বাঙ্গালা—কিন্তু রাজা! একটা অতিগুরুতর কার্য্য আপনার অবশিষ্ট রহিয়াছে। তবে নরনাথ! জগতে একমাত্র মহাদেব ব্যতীত অন্য কোন্ ব্যক্তির বিস্মরণ না হয়? ॥৪৪॥

अन्वयः—तव आलये पतिसात् अक्षता तनया शैशवसीम्नि वर्त्तते। इह यथा जनैः तृषिताय जलं (तथा) यूने युवतिः प्रदीयते ॥४५॥

अथ का नाम सुदन्तुरा क्रिया अवशिष्यत इत्याह—पतिसादिति। हे राजन्! तव आलये भवने, पतिसात् अक्षता वराय असम्प्रदत्ता, तनया कन्या, शैशवसीम्नि बाल्यकालचरमसीमायाम्, यौवनारम्भकाल इत्यर्थः; वर्त्तते। इह जगति, यथा जनैः, तृषिताय तृष्णार्त्ताय, जलम्, तथा यूने तरुणाय, युवतिः प्रदीयते। कन्यासम्प्रदानक्रियैव तवावशिष्यत इति भावः।

अत्र श्रौतोपमालङ्कारः श्रुत्यनुप्रासश्चेत्यनयोः संसृष्टिः ॥४५॥

বাঙ্গালা—রাজা! আপনার ঘরে অদত্তা কন্যা শৈশবের সীমায় আসিয়া রহিয়াছে; অথ চ এই জগতে মানুষ তৃষ্ণার্ত্ত লোককে যেমন জল দান করে, তেমন যুবককে যুবতি কন্যা দান করিয়া থাকে ॥৪৫॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

तनुजाञ्च रुजामृणक्रियां
परिवर्द्धिष्णुमतीवदारुणाम् ।
सुधियः समये प्रदाय तत्
चिरशान्तिं किल यान्ति सुस्थिराः ॥४६॥
दशवर्षगता सुता गृहे
जठरे दारुणदुःखदा क्षुधा ।

अन्वयः—तत् सुधियः परिवर्द्धिष्णुं अतीवदारुणां तनुजां रुजां ऋणक्रियां च समये प्रदाय सुस्थिराः (सन्तः) चिरशान्तिं यान्ति किल ॥४६॥

तनुजामिति । तत्तस्मात्, सुधियो बुद्धिमन्तो जनाः, परिवर्द्धिष्णुं क्रमेण वृद्धिशीलाम्, तत एव च अतीवदारुणां नितान्तभीषणाम्, तनुजां कन्याम्, रुजां रोगम्, ऋणक्रियाञ्च, समये निर्द्धारितकाले प्रदाय समर्प्य अवखण्ड्य औषधादिना विनाश्येत्यर्थः, परिशोध्य च, सुस्थिराः निरुपद्रवाः सन्तः, चिरशान्तिम्, यान्ति प्राप्नुवन्ति किल ।

अत्र प्रदाय इत्येकया क्रियया प्रस्तुतायास्तनुजायाः अप्रस्तुतयो रुजाऋणक्रिययोश्चाभिसम्बन्धाद्दीपकमलङ्कारः, प्रदायेति तनुजाऋण-क्रियापक्षे दाधातो रुजापक्षे च "दो अवखण्डने" इति दोधातोः क्त्वाप्रत्यये रूपमिति प्रकृतिश्लेषः, वृत्त्यनुप्रासच्छेकानुप्रासश्चेति संसृष्टिः ॥४६॥

বাঙ্গালা—অতএব, ক্রমবর্দ্ধিষ্ণু ও অত্যন্তভীষণ কন্যাকে যথা সময়ে দান করিয়া, রোগের উপশম জন্মাইয়া এবং ঋণ পরিশোধ করিয়া, বুদ্ধিমান্ লোকেরা নিরুপদ্রব হইয়া চিরকালের জন্য শান্তি লাভ করেন ॥৪৬॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

अनयोः प्रथमैव दुःसहा
घटतेऽन्नं परितो हि नो वरः ॥४७॥
तनयां तरुणीं विलोकयन्
अददद्यः खलु नोन्मनायते।
क्षमते समुपेक्ष्य स स्थिरः
शयितुं स्वे शिखिनः शिखां गृहे ॥४८॥

अन्वयः—गृहे दशवर्षं गता सुता, जठरे (च) दारुणदुःखदा क्षुधा, अनयोः प्रथमा एव दुःसहा। परितः हि अन्नं घटते, वरः नो ॥४७॥

अप्रस्तुते तज्जाऽऽरुण्यक्रिये परिहाय प्रस्तुतायाः कथाया अतिदारुणत्वं सूचयन्नाह दशेति। गृहे, दशवर्षाणि गता अतिक्रान्ता; सुता कन्या, जठरे उदरे च, दारुणदुःखदा क्षुधा वर्त्तत इति शेषः। अनयोः कन्या-क्षुधयोर्मध्ये, प्रथमा क्रमवर्द्धमाना कन्यैव दुःसहा। येन हि, परितः सर्वतो हि सर्वत्रैव, अन्नं क्षुधानिवर्त्तकं खाद्यम्, घटते प्राप्तियोग्यं भवति, किन्तु वरः पात्रम्, नो न घटते, सर्वथा योग्यवरस्यातिदुर्लभत्वा-दिति भावः।

अत्र दुःसहत्वं प्रति चतुर्थपादगतवाक्यार्थो हेतुरिति वाक्यार्थ-हेतुकं काव्यलिङ्गमलङ्कारः ॥४७॥

বাঙ্গালা—ঘরে দশমবর্ষের অধিক বয়স্কা কন্যা, আর উদরে দারুণ দুঃখজনক ক্ষুধা, এই দু'য়ের প্রথমাই (উক্তবিধ কন্যাই) অত্যন্ত দুঃসহ। কারণ, সর্ব্বত্রই খাদ্য পাওয়া যায়, কিন্তু যোগ্য পাত্র সর্ব্বত্র পাওয়া যায় না ॥৪৭॥

अन्वयः—यः खलु तनयां तरुणीं विलोकयन् अददत्, न उन्मनायते, स स्वे गृहे शिखिनः शिखां समुपेक्ष्य (अपि) स्थिरः (सन्) शयितुं क्षमते ॥४८॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

अथवा दहनो दहत्यहो
क्षितिपैकं गृहमैहिकं नृणाम्।
पितरौ ससहोदरौ दहेत्
विषमा पुष्पवती तु कन्यका ॥४९॥

तनयामिति। यो जनः खलु, तनयां तरुणीं विलोकयन्नपि, अददत् तां पात्रसादकुर्वन् न उन्मनायते अस्थिरचित्तो न भवति; स जनः स्वे स्वकीये गृहे, शिखिनो वह्नेः, शिखां ज्वालाम्, समुपेक्ष्य दृष्ट्वापि, स्थिरः अविचलितचित्तः सन्, शयितुं निद्रातुं क्षमते शक्नोति। वह्निशिखेव क्रमवर्द्धमाना कन्या समुपेक्षिता सती दहतीति भावः।

अतएवात्र 'असम्भवद्वस्तुसम्बन्धा निदर्शनालङ्कारश्छेकानुप्रासेन संसृज्यते ॥४८॥

বাঙ্গালা—যে লোক কন্যাকে যুবতি দেখিয়াও তাহাকে সম্প্রদান না করিয়া অস্থিরচিত্ত না হয়, (সুস্থচিত্ত থাকে), সেই লোক আপন গৃহে প্রজ্বলিত অগ্নিশিখা দেখিয়াও স্থির হইয়া নিদ্রা যাইতে পারে ॥৪৮॥

अन्वयः—अथवा अहो क्षितिप! दहनः नृणां एकं ऐहिकं गृहं दहति। पुष्पवती विषमा कन्यका तु ससहोदरौ पितरौ दहेत् ॥४९॥

अथवेति। अथवा, अहो क्षितिप! हे राजन्! दहनो वह्निः, नृणाम्, एकं केवलम् ऐहिकम् एतत्कालसम्बन्धि गृहं दहति; पुष्पवती ऋतुमती अतएव विषमा दारुणा कन्यका तु, सहोदरेण सहेति ससहोदरौ पितरौ मातापितरौ, दहेत् नरके पातयेत्। "माता चैव पिता चैव ज्येष्ठभ्राता तथैव च। त्रयस्ते नरकं यान्ति दृष्ट्वा कन्यां रजस्वलाम् ॥" इति स्मृतेरिति भावः।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

न समां मनुतां मनुष्यप !
व्रततीं पुष्पवतीञ्च कन्यकाम्।
प्रथमोन्नतिहेतुरर्चनात्
अपराधोगतिमिव यच्छति ॥५०॥

अत्र दहनात् कन्याया भीषणतायामाधिक्यवर्णनाद्व्यतिरेकोऽलङ्कार-श्छेकानुप्रासश्चेति संसृष्टिः।

"स्याद्रजः पुष्पमार्त्तवम्" इत्यमरः ॥४९॥

বাঙ্গালা—অথবা রাজা! অগ্নি মানুষের কেবল ইহলোকের গৃহ দগ্ধ করে, কিন্তু ঋতুমতী ভীষণা কন্যা সহোদরের সহিত পিতা ও মাতাকে দগ্ধ করিয়া থাকে ॥৪৯॥

अन्वयः—हे मनुष्यप ! पुष्पवतीं व्रततीं कन्यकाञ्च समां न मनुतां। प्रथमा अर्चनात् उन्नतिहेतुः अपरा अधोगतिं एव यच्छति ॥५०॥

नेति। हे मनुष्यप ! नरपाल ! पुष्पवतीं कुसुमशालिनीम् ऋतु-मतीञ्च, व्रततीं लतां कन्यकाञ्च, समां तुल्याम्, न मनुतां भवान् न बुध्यताम्। प्रथमा व्रतती, अर्चनात् स्वपुष्पद्वारा देवार्चनाप्रयोजक-त्वात्, नराणामुन्नतिहेतुः, अपरा पुष्पवती कन्यका, अधोगतिमिव, यच्छति ददाति।

अत्र कन्यापेक्षया व्रतत्या आधिक्यवर्णनाद्व्यतिरेकोऽलङ्कारश्छेकानु-प्रासो वृत्त्यनुप्रासश्चेति संसृष्टिः।

"वल्ली तु व्रततिर्लता" इत्यमरः ॥५०॥

বাঙ্গালা—নরনাথ! আপনি পুষ্পবতী লতা ও কন্যাকে সমান বলিয়া মনে করিবেন না। কারণ, পুষ্পবতী লতা, পুষ্পদ্বারা দেবার্চ্চনা সম্পাদন করে বলিয়া মানুষের উন্নতির কারণ হয়, কিন্তু পুষ্পবতী কন্যা অধোগতিই দান করে ॥৫০॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

इतरस्य समस्तवस्तुनः
घटते पात्रमहो समन्ततः।
तनयाप्रतिपादने परं
भुवनेष्वेकमपीह दुर्लभम् ॥५१॥

भव भूमिपते! स्थिरान्तरः
तदिमां योग्यजनेन योजयन्।
अतिशान्तिकरी हि धर्म्मिणां
परनिक्षेपसमर्पणक्रिया ॥५२॥

अन्वयः—अहो! इतरस्य समस्तवस्तुनः पात्र, समन्ततः घटते। परं इह भुवनेषु तनयाप्रतिपादने एकं अपि पात्रं दुर्लभं ॥५१॥

इतरस्येति। अहो इति विषादे। इतरस्य अपरस्य, समस्तवस्तुनः, पात्रं प्रतिपादनक्षेत्रीभूता व्यक्तिः, समन्ततः सर्वास्वेव दिक्षु, घटते सुलभं भवति; परं किन्तु इह भुवनेषु, तनयाप्रतिपादने, कन्यादाने, एकमपि पात्रं दुर्लभम्। अभीष्टसर्वगुणसम्पन्नस्य पात्रस्य नितान्तविरलत्वादित्याशयः ॥५१॥

বাঙ্গালা—হায়! অন্য সমস্ত বস্তু সম্প্রদানের পাত্র অনায়াসে সকল দিকেই পাওয়া যায়; কিন্তু এই ত্রিভুবনে কন্যা সম্প্রদানে একটী পাত্র পাওয়াও অতিদুষ্কর ॥৫১॥

अन्वयः—(हे) भूमिपते! तत् इमां योग्यजनेन योजयन् (सन्) स्थिरान्तरः भव। हि परनिक्षेपसमर्पणक्रिया धर्म्मिणां अतिशान्तिकरी ॥५२॥

भवेति। हे भूमिपते! तत्तस्मात्, इमां तव तनयाम्, योग्यजनेन उपयुक्तपात्रेण सह, योजयन् सन्, स्थिरान्तरः सुस्थचित्तो भव। हि

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

इति देवमुनौ मनस्विनं
मनुजेन्द्रं विरते निगद्य तम्।
नयविद्विनयेन नारदं
तमनूचानमिदं नृपोऽवदत् ॥५३॥

तथाहि, परस्य यो निक्षेपः स्वस्मिन् न्यासीभूतं द्रव्यं तस्य समर्पणक्रिया तस्मै परस्मै स्वामिन एव प्रत्यर्पणव्यापारः, धर्म्मिणां धार्म्मिकपुरुषाणाम्, अतिशान्तिकरी भवति। कन्या खलु निक्षेपद्रव्यतुल्येति भावः।

अत्र साधर्म्म्येण दृष्टान्तोऽलङ्कारः ॥५२॥

বাঙ্গালা—অতএব রাজা! আপনি আপনার এই কন্যাটীকে উপযুক্ত পাত্রের সহিত সম্মিলিত করাইয়া দিয়া সুস্থচিত্ত হউন। কারণ, পরের গচ্ছিত দ্রব্য প্রত্যর্পণ করা ধার্ম্মিক লোকদিগের পক্ষে অত্যন্ত শান্তিজনক ॥৫২॥

अन्वयः—देवमुनौ मनस्विनं तं मनुजेन्द्रं इति निगद्य विरते (सति) नयवित् नृपः विनयेन तं अनूचानं नारदं इदं अवदत् ॥५३॥

इतीति। देवमुनौ नारदे, मनस्विनं प्रशस्तमनसं तं मनुजेन्द्रं राजानं भीष्मकम्, इति पूर्वोक्तप्रकारम्, निगद्य उक्त्वा, विरते सति; नयवित् नीतिज्ञः, नृपो भीष्मकः, विनयेन नम्रभावेन, ताम् अनूचानम् अधीतसाङ्गवेदं नारदम्, इदं वक्ष्यमाणम्, अवदत्।

अत्र वृत्त्यनुप्रासच्छेकानुप्रासयोः संसृष्टिरलङ्कारः।

अनूचानमिति अनूपूर्वाद्वचेः कानप्रत्ययः, तस्य च परोक्षावद्भावाद्-द्विर्वचने रूपम्।

"अनूचानः प्रवचने साङ्गेऽधीती गुरोस्तु यः" इत्यमरः ॥५३॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

ভগবন্! ভুবনে ভবাদৃশাং
বচনং শাস্ত্রতয়ৈব বিশ্রুতম্।
অবধীরয়িতুং সুধীরধীঃ
তদিদং নোৎসহতে হতোঽপি সন্ ॥৫৪॥
ভবতাং বচসামনুত্তরা-
দবহেলা কথনাচ্চ ধৃষ্টতা।
কথনং তদমুষ্য সৃষ্যতাং
চততি হ্যুত্তরতাং ন দক্ষিণঃ ॥৫৫॥

বাঙ্গালা—দেবর্ষি নারদ, সেই প্রশস্তহৃদয় ভীষ্মকরাজাকে এই সকল কথা বলিয়া বিরত হইলে, নীতিজ্ঞ ভীষ্মকরাজা বিনয়সহকারে সাঙ্গবেদবিদ্ নারদকে এই কথা বলিলেন—॥৫৩॥

অন্বয়ঃ—(হে) ভগবন্! ভবাদৃশাং বচনং ভুবনে শাস্ত্রতয়া এব বিশ্রুত। তত্ সুধীরধীঃ হতঃ সন্ অপি ইদং অবধীরয়িতুং ন উৎসহতে ॥৫৪॥

ভগবন্নিতি। হে ভগবন্! মাহাত্ম্যবন্! ভবাদৃশাং ত্রিকালজ্ঞানাং মহর্ষীণাম্, বচনম্, ভুবনে জগতি, শাস্ত্রতয়া শাস্ত্ররূপেণৈব, বিশ্রুতং প্রথিতম্; তত্তস্মাত্, সুধীরধীঃ ধর্ম্মে সুস্থিরবুদ্ধির্জনঃ, কেনাপি হতঃ সন্নপি, ইদং ভবাদৃশাং বচনম্, অবধীরয়িতুম্ অবজ্ঞাতুম্, নোৎসহতে ন শক্নোতি। "যঃ শাস্ত্রবিধিমুৎসৃজ্য বর্ত্ততে কামচারতঃ" ইত্যাদিস্মৃত্যা প্রত্যবায়োৎপত্তেরিতি ভাবঃ।

অত্র বৃত্ত্যনুপ্রাসচ্ছেকানুপ্রাসয়োঃ সংসৃষ্টিরলঙ্কারঃ ॥৫৪॥

বাঙ্গালা—"ভগবন্! আপনাদের ন্যায় মহর্ষিদের বাক্য জগতে শাস্ত্ররূপেই প্রসিদ্ধ রহিয়াছে। অতএব, ধর্ম্মে স্থিরবুদ্ধি মানুষ নিহত হইতে থাকিয়াও তাহা অবজ্ঞা করিতে সমর্থ হয় না ॥৫৪॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

विषयाद्विरतेः परं जनः
प्रचिकीर्षन् परलोकगां क्रियाम् ।
अतरङ्गतरङ्गिणीजले
विफलाशो भविताप्लवार्थिवत् ॥५६॥

अन्वयः—भवतां वचसां अनुत्तरात् अवहेला, कथनात् च धृष्टता (भवति) ; तत् अमुष्य कथनं मृष्यतां । हि दक्षिणः उत्तरतां न चतते ॥५५॥

भवतामिति । भवतां महर्षीणाम्, वचसां वाक्यानाम्, अनुत्तरात् उत्तरादानात्, अवहेला अवज्ञा, कथनादुत्तरवचनाच्च, धृष्टता प्रगल्भता भवति ; तत्तथापि, अमुष्य जनस्य ममेत्यर्थः, कथनमुत्तरकरणम्, तन्निबन्धनधृष्टतापराध इति तात्पर्य्यम्, मृष्यतां भवता क्षम्यताम् । हि तथाहि, दक्षिण उदारचेता जनः, उत्तरतां वामतां प्रतिकूलतामिति यावत् ; न चतते न प्रार्थयति कर्त्तुं नेच्छतीत्यर्थः ।

अत्र सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारश्छेकानुप्रासेन संसृज्यते ॥५५॥

বাঙ্গালা—আপনাদের বাক্যের উত্তর না দিলে অবজ্ঞা করা হয়, আবার উত্তর দিলে প্রগল্‌ভতা প্রকাশ পায়, তথাপি এই ব্যক্তির উত্তর করার অপরাধ আপনি ক্ষমা করুন। কারণ, দক্ষিণ (উদারচেতা লোক) উত্তরতা (প্রতিকূলতা) করিতে ইচ্ছা করেন না ॥৫৫॥

अन्वयः—जनः विषयात् विरतेः परं परलोकगां क्रियां प्रचिकीर्षन् (सन्) अतरङ्गतरङ्गिणीजले आप्लवार्थिवत् विफलाशः भविता ॥५६॥

विषयादिति । जनः, विषयात् सांसारिककार्य्यात्, विरतेः समाप्त्या विरामात्, परमनन्तरम्, परलोकगां परलोकगामिनीं पारलौकिकफलजनिकामित्यर्थः, क्रियां धर्म्मानुष्ठानादिकार्य्यम्, प्रचिकीर्षन् प्रकर्षेण

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

প্রগণয্য য ীহ শ্রেষয়েৎ
জলবালূর্বিয়তশ্চ তারকাঃ ।
নিপুণোऽপি তথাপি মানবঃ
নহি সংসারকৃতেঃ কলামপি ॥৫৭॥

কর্তুমিচ্ছন্ সন্, ন বিদ্যন্তে তরঙ্গা যস্মিন্ তদতরঙ্গং তরঙ্গিণ্যা নদ্যা যজ্জলং তত্র, বায়ুসঞ্চালনসময় ইত্যভিপ্রায়ঃ ; আপ্লবার্থিবৎ স্নানার্থী জন ইব, বিফলা আশা ধর্ম্মানুষ্ঠানাশংসা স্নানাশংসা চ যস্য স তাদৃশঃ, ভবিতা ভবিষ্যতি। বায়ৌ প্রবাতে নদ্যাস্তরঙ্গাভাবস্যেব, সাংসারিককার্য্যসমাপ্তেঃ সর্বথৈবাসম্ভবাদিতি ভাবঃ ।

অত্র শ্রৌতীপমালঙ্কারস্ছেকানুপ্রাসস্ত্বভয়োঃ সংসৃষ্টিঃ ॥৫৬॥

বাঙ্গালা—প্রবল বায়ু বহিবার সময়ে যে লোক তরঙ্গশূন্য নদীর জলে স্নান করিবার ইচ্ছা করে, তাহার যেমন সে আশা নিষ্ফল হইয়া যায় ; সেইরূপ যে লোক, সাংসারিক কার্য্য শেষ হইবার পরে ধর্ম্মানুষ্ঠান করিবার ইচ্ছা করে, তাহার যে আশাও নিষ্ফল হইয়া যায় ॥৫৬॥

অন্বয়ঃ—ইহ জলবালূঃ বিয়তঃ তারকাঃ চ প্রগণয্য যদি শ্রেষয়েৎ অপি, তথাপি নিপুণঃ মানবঃ অপি সংসারকৃতেঃ কলাং অপি নহি শ্রেষয়েৎ ॥৫৭॥

সংসারকার্য্যস্যাপরিশ্রেষত্বমাহ প্রগণয্যেতি। ইহ জগতি, জলবালূঃ জলস্থা বালুকাঃ, বিয়তো গগনস্য, তারকা নক্ষত্রাণি চ, প্রগণয্য প্রকর্ষেণ গণয়িত্বা, যদি শ্রেষয়েৎ কশ্চিৎ সমাপয়িতুং শক্নুয়াদপি ; তথাপি, নিপুণো গণনাদক্ষঃ, মানবোऽপি, সংসারকৃতেঃ সাংসারিককার্য্য-সমূহস্য, কলাং ষোড়শভাগৈকভাগমপি, নহি শ্রেষয়েৎ গণনয়া সমাপয়িতুং নৈব শক্নুয়াৎ ; অশ্রেষত্বাদেবেত্যাশয়ঃ ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

अतिशिष्टजनः स्वचेष्टया
विषयान्तं नहि गन्तुमीश्वरः।
चिरवाहनयापि नाम्बुधिं
तरिमारुह्य तरीतुमर्हति ॥५८॥

अत्र "उभौ यदि व्योम्नि पृथक् प्रवाहौ" इत्यादिवत् जलवालू-वियत्तारकागणनासम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिरलङ्कारः ॥५७॥

বাঙ্গালা—কোন লোক জলের বালি এবং আকাশের নক্ষত্র গণনা করিয়া যদি শেষ করিতে পারেও; তথাপি গণনানিপুণ মানুষও সাংসারিক কার্য্যের ষোলভাগের একভাগও গণনা করিয়া শেষ করিতে পারে না ॥৫৭॥

अन्वयः—अतिशिष्टजन (अपि) स्वचेष्टया विषयान्तं गन्तुं ईश्वरः नहि (भवति)। तरिं आरुह्य चिरं वाहनया अपि अम्बुधिं तरीतुं न अर्हति ॥५८॥

उक्तमेवार्थं भङ्ग्यन्तरेण पुनराह अतीति। अतिशिष्टजनः सर्वथा शास्त्रानुसारी लोकोऽपि, शास्त्रानुसारेण सर्वकार्य्यकारिणः पूर्णस्वास्थ्य-दीर्घायुषोर्लाभादिति भावः। स्वचेष्टया, ईश्वरेच्छया तु शक्नोत्येवे-त्याशयः। विषयान्तं सांसारिककार्य्यशेषम्, गन्तुं प्राप्तुम्, ईश्वरः समर्थः, नहि भवति। तथाहि, तरिं साधारणनौकाम्, आरुह्य, चिरं वाहनया चालनयापि, अम्बुधिं समुद्रम्, तरीतुमतिक्रमितुं नार्हति न शक्नोति।

अत्र पूर्वार्द्धपरार्द्धवाक्यार्थयोः साम्यप्रतीतेः ईश्वर अर्हतीति पृथङ्-निर्देशाच्च प्रतिवस्तूपमालङ्कारश्छेकानुप्रासेन संसृज्यते ॥५८॥

বাঙ্গালা—অতিশিষ্ট লোকও আপন চেষ্টায় সাংসারিক কার্য্যের শেষ করিতে সমর্থ হন না। মানুষ সাধারণ নৌকায় আরোহণ করিয়া চিরকাল বাহিয়াও সমুদ্র অতিক্রম করিতে পারে না ॥৫৮॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

गृहकार्य्यसमापनेच्छया
तदकार्षं न तु शेषमाप्तवान्।
ज्वलितं व्यजनेन पावकं
ननु निर्वापयितुं हि कः क्षमः ॥५८॥
पितृराज्यमजय्यविक्रमः
सकलाङ्गं परितो विलोकयन्।
स्वकराकलितं यथा फलम्
अशिषं साध्व्यु दयानुपप्लवम् ॥६०॥

अन्वयः—(अहं) गृहकार्य्यसमापनेच्छया तत् अकार्षं, न तु शेषं आप्तवान्। हि ननु कः व्यजनेन ज्वलितं पावकं निर्वापयितुं क्षमः (स्यात्) ॥५८॥

उक्तार्थं खल्वात्मनिदर्शनमेवाह गृहेति। अहं गृहकार्य्यसमापनेच्छया, तद्‌गृहकार्य्यम् अकार्षम्, किन्तु, तस्य शेषं न आप्तवान् कर्त्तुं नाशकम्। हि तथाहि, ननु हे देवर्षे! कः पुरुषः, व्यजनेन तालवृन्तवायुना, ज्वलितं पावकमग्निम्, निर्वापयितुं क्षमः शक्तः स्यात्; अपि तु कोऽपि न, तेन तु तद्वृद्धिरेवेत्यर्थः। सांसारिकं कार्य्यमप्येवमेवेति भावः।

अत्र साधर्म्म्येण दृष्टान्तोऽलङ्कारः ॥५८॥

বাঙ্গালা—আমি সাংসারিক কার্য্য শেষ করিবার ইচ্ছায় তাহা করিয়াছি, কিন্তু তাহার শেষ পাই নাই। কারণ, কোন্ মানুষ তালবৃন্ত-বায়ুদ্বারা প্রজ্বলিত অগ্নিকে নির্ব্বাপণ করিতে সমর্থ হয়? ॥৫৯॥

अन्वयः—अजय्यविक्रमः (अहं) परितः सकलाङ्गं पितृराज्यं स्वकराकलितं फलं यथा (तथा) विलोकयन् साध्व्यु दयानुपप्लवं अशिषं ॥६०॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

तनयाय नयैकचक्षुषे
स्थिरराज्यं वितरन् समुज्ज्वलम् ।
कृतकृत्यतया व्यरंसिषं
परिभुक्तस्य कुतो बुभुक्षुता ॥६१॥

पिबतीति । जेतुमशक्यः अजय्यो विक्रमो यस्य स अजय्यविक्रमः अहम्, परितः सर्वतः, सकलानि अङ्गानि सन्धिविग्रहादीनि यस्य तत्, सकलाङ्गं पितृराज्यम्, स्वकरेण निजपाणिना आकलितं धृतं फलं यथा, तथा विलोकयन्, अभ्युदयेन उन्नत्या अनुपप्लवेन उपद्रवराहित्येन च सहेति साभ्युदयानुपप्लवं यथा स्यात्तथा अशिषं शासितवान् ।

अत्र श्रौतोपमालङ्कारः ।

"सन्धिर्ना विग्रहो यानमासनं द्वैधमाश्रयः । राज्याङ्गानि…" इत्यमरः ।

अजय्येति जयतेः "स्वरादुयः" इति यप्रत्यये गुणे च "जिह्योः शक्ये" इति स्वरवद्भावेन अयादेशः ॥६०॥

বাঙ্গালা—অজেয়বিক্রমশালী আমি, স্বহস্তধৃত ফলের ন্যায় সর্ব্বাঙ্গসম্পন্ন পৈতৃকরাজ্যের সকল দিক্ পর্য্যবেক্ষণ করিতে থাকিয়া উন্নতি ও অনুপদ্রবতার সহিত তাহা শাসন করিয়া আসিয়াছি ॥৬০॥

अन्वयः—(अहं) नयैकचक्षुषे तनयाय समुज्ज्वलं स्थिरराज्यं वितरन् (सन्) कृतकृत्यतया व्यरंसिषं । परिभुक्तस्य कुतः बुभुक्षुता (स्यात्) ॥६१॥

तनयायेति । अहम्, नयो नीतिज्ञानमेव एकं मुख्यं चक्षुर्यस्य तस्मै तनयाय रुक्मिणे, समुज्ज्वलं सर्वविधेनाभ्युदयेनातीवशोभितम्, स्थिरराज्यम्, वितरन् समर्पयन् सन्, कृतकृत्यतया हेतुना, व्यरंसिषं

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

সুতপুত্রবিবাহদর্শনং
তনয়াদানমশেষমীদৃশম্।
অননুষ্ঠিতকার্য্যমস্তি মে
নহি শক্যা করণীয়শেষিতা ॥৬২॥

বিষয়াদ্বিরতবানস্মি। তথাহি, পরিভুক্তস্য যথেষ্টং ভোজ্যং ভুক্তবতো জনস্য, কুতঃ বুভুক্ষুতা ভোক্তুমিচ্ছুতা স্যাৎ, অপি তু কুতোঽপি নেত্যর্থঃ।

অত্র সামান্যেন বিশেষসমর্থনরূপোঽর্থান্তরন্যাসোঽলঙ্কারশ্ছেকানুপ্রাসেন সংসৃজ্যতে।

পপরিভুক্তস্যেতি ভুজের্ভাবে ক্তপ্রত্যয়ন্তাদস্ত্যর্থে অর্শ আদিত্বাৎ, "বনায় পীতপ্রতিবদ্ধবৎসাম্" ইত্যাদিবৎ ॥৬১॥

বাঙ্গালা—নীতিজ্ঞানরূপ বিশিষ্ট নয়নসম্পন্ন পুত্র রুক্মীর হস্তে সমুজ্জ্বল ও স্থির রাজ্য সমর্পণ করিয়া, কৃতকার্য্যতাবশতঃ বিষয়কার্য্য হইতে বিরত হইয়াছি। সম্পূর্ণরূপে ভুক্ত লোকের কি করিয়া পুনরায় ভোজনের ইচ্ছা হইতে পারে? ॥৬১॥

অন্বয়ঃ—তনয়াদানং সুতপুত্রবিবাহদর্শনং (চ) ঈদৃশং অশেষং মে অননুষ্ঠিতকার্য্যং অস্তি। করণীয়শেষিতা নহি শক্যা ॥৬২॥

সুতেতি। প্রথমং তনয়ায়া রুক্মিণ্যা দানম্, পরঞ্চ সুতস্য পুত্রস্য পুত্রঃ পৌত্রস্তস্য বিবাহদর্শনঞ্চ, ঈদৃশমশেষম্, মে অননুষ্ঠিতকার্য্যম্ অসম্পাদিতং কর্ম্ম অস্তি। তথাহি, করণীয়ানাং কর্ত্তব্যকর্ম্মণাং শেষিতা অবশেষকরণম্, নহি শক্যা ন খলু জনানাং শক্তিসাধ্যা; তেষামনন্তত্বাদিত্যাশয়ঃ।

অত্র কারণেন কার্য্যসমর্থনরূপোঽর্থান্তরন্যাসোঽলঙ্কারঃ ॥৬২॥

বাঙ্গালা—কন্যা সম্প্রদান ও পৌত্রের বিবাহদর্শন এইরূপ অশেষ-

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

जननावधि संयमी भवान्
नहि संसाररसं समन्वभूत्।
अतएव तु मां वदत्यदो
न धनी वेत्ति हि दीनवेदनाम् ॥६२॥
सुहृदः सहृदं न हृष्यति
मम पुत्रया भुवि पात्रमत्र यत्।

কার্য্য আমার অনহুষ্ঠিত রহিয়াছে। কারণ, কর্ত্তব্যের শেষ করা মানুষের শক্তিসাধ্য নহে ॥৬২॥

अन्वयः—जननावधि संयमी भवान् संसाररसं नहि समन्वभूत्, अतएव तु मां अदः वदति। हि धनी दीनवेदनां न वेत्ति ॥६२॥

जननेति। जननावधि संयमी पूर्वसुकृतिवशात् योग्यकाले संयमी धारणादिमान् इन्द्रियनिग्रहवान् वा भवान्, संसाररसं सांसारिकावस्थाम्, नहि समन्वभूत् न सम्यगनुभूतवान्; कदाचित् संसारिसंसर्गेण कथञ्चिदनुभूतवानेवेति भावः। अतएव तु माम्, अदः इदम्, वदति पुनः संसारीभवितुमुपदिशति। हि तथाहि, धनी जनः, दीनस्य दरिद्रस्य जनस्य वेदनां दारिद्र्यदुःखम्, न वेत्ति न जानाति।

अत्र संसाररसानुभवाभावं प्रति संयमिपदार्थस्य हेतुत्वात् पदार्थहेतुकं काव्यलिङ्गमलङ्कारः, सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासश्छेकानुप्रासश्चेत्येतेषां मिथो निरपेक्षतया संसृष्टिः ॥६२॥

বাঙ্গালা—দেবর্ষি! আপনি জন্মাবধি সংযমী; সুতরাং সংসারের রস সম্যক্ অনুভব করেন নাই; এই জন্যই আমাকে এইরূপ বলিতেছেন। দেখুন, ধনী লোক দরিদ্র লোকের দুঃখ বোঝে না ॥৬৩॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

বরমাহুরযোগ্যযোগতঃ
চিরকৌমারমহো মহাধিয়ঃ ॥৬৪॥
অথ ভূপমুবাদ নারদো
রদদীপ্তো দ্বিরদেন্দ্রভাস্বরঃ।
সতি কর্ম্মণি ধর্ম্মকারণে
মহলিপ্সোর্মহতো মহাগ্রহঃ ॥৬৫॥

অন্বয়ঃ—সুদৃশঃ মম পুত্র্যাঃ সদৃশং পাত্রং অত্র ভুবি যৎ নহি দৃশ্যতে। অহো! মহাধিয়ঃ অযোগ্যযোগতঃ চিরকৌমারং বরং আহুঃ ॥৬৪॥

সুদৃশ ইতি। শোভনে দৃশৌ চক্ষুষী যস্যাস্তস্যাঃ সুদৃশঃ, মম পুত্র্যাঃ কন্যায়া রুক্মিণ্যাঃ, সদৃশং যোগ্যম্, পাত্রম্, অত্র ভুবি যন্নহি দৃশ্যতে, তত এব বিষয়াদ্বরং বিষমিতি ভাবঃ। অথ যস্মৈ কস্মৈচিৎ কন্যা দীয়তামিত্যাহ বরমিতি। অহো দেবর্ষে! মহাধিয়ঃ প্রশস্তবুদ্ধয়ো জনাঃ, অযোগ্যয়োঃ কন্যাবরয়োর্যোগতঃ সংযোজনাৎ, চিরকৌমারং চিরকালীনামবিবাহিতাবস্থামেব বরমীষৎপ্রিয়ম্, আহুর্ব্রুবন্তি।

অত্র সামান্যেন বিশেষসমর্থনরূপোঽর্থান্তরন্যাসোঽলঙ্কারঃ, বৃত্ত্যনুপ্রাসশ্ছেকানুপ্রাসশ্চেত্যেতেষাং সংসৃষ্টিঃ ॥৬৪॥

বাঙ্গালা—দেবর্ষি! এই পৃথিবীতে আমার সুলোচনা কন্যার উপযুক্ত পাত্রই যে দেখিতে পাইতেছি না। বুদ্ধিমান্ লোকেরা বলেন, "অযোগ্য বর-কন্যার যোগ করা অপেক্ষা বরং তাহাদের চিরকৌমারই ভাল" ॥৬৪॥

অন্বয়ঃ—অথ দ্বিরদেন্দ্রভাস্বরঃ নারদঃ রদদীপ্তঃ (সন্) ভূপং উবাদ। ধর্ম্মকারণে সতি কর্ম্মণি মহলিপ্সোঃ মহতঃ মহাগ্রহঃ (ভবতি) ॥৬৫॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

इममर्थमुरीकरिष्यति
कमलेशस्तव नास्ति संशयः।
जलधिः प्रजहाति जाह्नवीं
समुपेतामतिदूरतः किमु ? ॥८४॥

বাঙ্গালা—নরনাথ! মানুষ শ্রদ্ধাপূর্ব্বক যাঁহাকে জলবিন্দুমাত্রও দান করিয়া উৎকর্ষ লাভ করে, আপনি তাঁহার হস্তে কন্যা দান করিয়া ইহলোকে এবং পরলোকে উৎকর্ষ লাভ করুন ॥৮৩॥

अन्वयः—कमलेशः तव इमं अर्थं उरीकरिष्यति संशयः न अस्ति। जलधिः अतिदूरतः समुपेतां जाह्नवीं किमु प्रजहाति ॥८४॥

ननु कृष्णचन्द्रो यदि मत्कन्यां न ग्रहीष्यतीत्याकाङ्क्षायां स्ववक्तव्यमुपसंहरन्नाह इममिति। कमलेशो लक्ष्मीपतिः कृष्णः, तव इममर्थम्, उरीकरिष्यति अङ्गीकरिष्यति; तव कन्यां ग्रहीष्यतीत्यर्थः। अत्र संशयो नास्ति। तथा च, जलधिः समुद्रः, अतिदूरतो हिमालयात्, समुपेतामागताम्, जाह्नवीं गङ्गाम्, किमु प्रजहाति परित्यजति, अपि तु कथमपि नेत्यर्थः।

अत्र वैधर्म्येण दृष्टान्तोऽलङ्कारः, तथा जलधिजाह्नव्योर्लिङ्गसाम्येन नायकनायिकाव्यवहारसमारोपात् समासोक्तिश्चानयोरङ्गाङ्गिभावेन सङ्करः, सोऽपि च वृत्त्यनुप्रासेन संसृज्यते ॥८४॥

বাঙ্গালা—মহারাজ! কৃষ্ণ অবশ্যই আপনার এই বিষয় স্বীকার করিবেন। কারণ, সমুদ্র অতিদূর হইতে আগত গঙ্গাকে পরিত্যাগ করে কি ?” ॥৮৪॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

इति सुनीतिकथां कथयन्मुनिः
स विरराम रमापतिभक्तिमान् ।
क्षितिपतिस्तु भवेज्जगतीपतिः
स्वतनुजापतिरित्यगमन्मुदम् ॥८५॥

पदसरोजरजोऽथ रजोहरं
प्रणमनार्थनते मुनिमूर्द्धनि ।
स वितरन् स्वसमागमगामुकीं
सुमुदमन्तरधान्मुनिरादधत् ॥८६॥

अन्वयः—रमापतिभक्तिमान् सः मुनिः इति सुनीतिकथां कथयन् विरराम । क्षितिपतिः तु जगतीपतिः स्वतनुजापतिः भवेत् इति मुदं अगमत् ॥८५॥

इतीति । रमापतौ कृष्णे भक्तिमान्, स मुनिर्नारदः, इति पूर्वोक्त-प्रकारेण, सुनीत्याः कथा सुष्ठु न्यायस्य वाक्यमिति सा ताम्, कथयन् विरराम । क्षितिपतिर्भीष्मकस्तु, जगतीपतिः कृष्णः, स्वतनुजाया रुक्मिण्याः पतिर्भवेत्, इति हेतोः, मुदमानन्दम्, अगमत् प्रापत् ।

अत्र छेकानुप्रासोऽलङ्कारः ।

अस्मिन् परस्मिंश्च श्लोके द्रुतविलम्बितं नाम वृत्तम्—"द्रुतविलम्बित-माह नभौ भरौ" इति लक्षणात् ॥८५॥

বাঙ্গালা—দেবর্ষি নারদ এইরূপ ন্যায়সঙ্গত কথা বলিয়া বিরত হইলেন। আর জগৎপতি কৃষ্ণ আপন কন্যার পতি হইবেন, ইহা ভাবিয়া ভীষ্মকরাজা বিশেষ আনন্দ লাভ করিলেন ॥৮৫॥

अन्वयः—अथ सः मुनिः प्रणमनार्थनते मुनिमूर्द्धनि रजोहरं पदसरोजरजः वितरन् स्वसमागमगामुकीं सुमुदं आदधत् (सन्) अन्तरधात् ॥८६॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

प्रकामकमनीयतां प्रवितरीतुकाम: सुतां
मुरारिकरपल्लवे लिविमसौ नृपो लेखयन्।
ससर्ज्ज निजसूनवे नवनृपाय यामञ्जसा
सुतोद्वहननाटके भवति सा स्म प्रस्तावना ॥८७॥

इति श्रीहरिदासकृतौ रुक्मिणीहरणे
महाकाव्ये चतुर्थ: सर्ग: ॥०॥

पदेति। अथ भीष्मकस्यानन्दलाभानन्तरम्, स मुनिर्देवर्षिर्नारद:, प्रणमनार्थं प्रणामाय नतं अवनतीकृतं, मुनेः राजर्षेर्भीष्मकस्य मूर्द्धनि मस्तके, रजोहरं रजोगुणजनितदु:खनाशकम्, पदसरोजस्य आत्मन: पादपद्मस्य रजो धूलिम्, वितरन् ददान:, स्वस्य आत्मन: समागमेन उपस्थित्या गामुकीमागमनशीलाम्, सुमुदं महा आनन्दम्, आदधत् जनयंश्च सन्, अन्तरधात् अन्तर्हितोऽभूत्।

अत्र वृत्त्यनुप्रासच्छेकानुप्रासयो: संसृष्टिरलङ्कार:।

गामुकीति गमधातो: "स्मृ-कम-गम—" इत्यादिना उकञि नदादित्वादीप्रत्यय: ॥८६॥

বাঙ্গালা—তদনন্তর ভীষ্মকরাজা দেবর্ষি নারদকে নমস্কার করিবার জন্য মস্তক অবনত করিলে, দেবর্ষি নারদ দুঃখনাশক আপন পাদপদ্মের ধূলি সমর্পণ করিয়া, নিজের আগমননিবন্ধন ভীষ্মকরাজার বিশেষ আনন্দ জন্মাইয়া অন্তর্হিত হইলেন ॥৮৬॥

अन्वय:—असौ नृप: मुरारिकरपल्लवे प्रकामकनीयतां सुतां प्रवितरीतुकाम: (सन्) अञ्जसा यां लिविं लेखयन् नवनृपाय निजसूनवे ससर्ज, सा सुतोद्वहननाटके प्रस्तावना भवति स्म ॥८७॥

भाविसर्गं सूचयन् रुक्मिणीविवाहप्रस्तावमाह—प्रकामेति। असौ

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

नृपो भीष्मकः, मुरारेः कृष्णस्य करपल्लवे, प्रकामा पर्य्याप्ता कमनीयता कान्तिर्यस्यास्ताम्, सुतां रुक्मिणीम्, प्रवितरीतुकामः सम्प्रदातुमिच्छन् सन्, अञ्जसा द्रुतम्, यां लिविं लिपिम्, लेखयन् केनचिन्मुनिकुमारेणेति शेषः। नवनृपाय नूतनभूपालीभूताय, निजसूनवे आत्मपुत्राय रुक्मिणे ससर्ज प्रेषयामास ; सा लिविः, सुतायाः कन्याया रुक्मिण्या उद्वहनं विवाह एव नाटकम् आमोदजनकतया रूपकविशेषस्तस्मिन्, प्रस्तावना आमुखरूपा, भवति स्म ; प्रस्तुतविषयस्य प्रथमप्रवर्त्तकत्वादित्याशयः।

अत्र सुतोद्वहने नाटकत्वारोपो लिवौ प्रस्तावनात्वारोपे निमित्तमिति परम्परितरूपकमलङ्कारः, वृत्त्यनुप्रासच्छेकानुप्रासश्चेत्येतेषां मिथो निरपेक्षतया संसृष्टिः।

"लिपिर्लिविरुभे स्त्रियाम्" इति "स्राग्झटित्यञ्जसाह्नाय द्राङ्‌मंक्षु सपदि द्रुते" इति चामरः।

अत्रापि "प्रह्वे वा" इति विकल्पात् प्रस्तावनेति प्रशब्दस्य पूर्ववर्त्तिनो ह्रस्ववर्णस्य न दीर्घतेति न हतवृत्ततादोषः।

पृथ्वी वृत्तम्—"जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः" इति लक्षणात् ॥८७॥

इति श्रीहेमचन्द्रतर्कवागीशविरचितायां रुक्मिणीहरणटीकायां विचित्रायां चतुर्थः सर्गः ॥०॥

বাঙ্গালা—ভীষ্মকরাজা কৃষ্ণের করপল্লবে অসাধারণ সুন্দরী রুক্মিণীকে দান করিবার ইচ্ছা করিয়া কোন মুনিকুমারদ্বারা যে লিপি-(পত্র) লেখাইয়া, আপন পুত্র নূতন রাজা রুক্মীর নিকট প্রেরণ করিলেন ; সেই লিপি-(পত্র) খানিই রুক্মিণীর বিবাহরূপ নাটকের প্রস্তাবনাস্বরূপ হইল ॥৮৭॥

———○———

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

पञ्चमः सर्गः ।

——:०:——

वाचि वाचिकहरा गुरुदच्चः
कुण्डिनाख्यनगरीमगमत् सः ।
लीलया कमलया चिरगूढ़ां
विश्वगुज्ज्वलितकान्तिमवन्तीम् ॥१॥

निर्भयञ्च सहसा सहसास्ये
आगते परिचिते नृपदूते ।
गोपुरं परिजहौ प्रतिहारी
को न विश्वसिति वा सति लोके ॥२॥

दुर्गमेऽप्यविदितां गुरुसारे
सञ्चरत्प्रचुरतत्त्वविचारे ।
धीरबोध इव दर्शनशास्त्रे
प्राविशत् स नगरे धृतशस्त्रे ॥३॥

लोकलोचनफलं वितरन्तीं
भूभृतः परिषदं परिपश्यन् ।
विस्मयोल्लसितनिश्चलनेत्रः
श्रान्तिमागमनजामजहात् सः ॥४॥

आसनान्तिकगतानि समानि
त्रीणि निर्म्मलमणीनलिनानि ।
कान्तिमन्ति जगदुर्जगदुच्चैः
संसदो रसवतीं सरसीताम् ॥५॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

सव्यतारकमिनद्विजराजं
नीलचेलजवितानपयोदम् ।
तत् सदो गगनतां समधासीत्
शून्यतान्तु नहि गन्तुमशक्नोत् ॥६॥

लोलचेललुलितं ललितञ्च
मन्दमन्दमकरन्दसुगन्धिम् ।
अभ्रमद्भ्रमरराशिरुपेत्य
पुष्पकाननधिया गुणगायी ॥७॥

रुक्मिणी नवनृपस्य विचार-
चातुरीमिव विलोकितुकामाः ।
चित्रचित्रपटचित्रितदेवा
आगमन्नपरसंसदुपेताः ॥८॥

स्नेहमाधित मनो मनुजानां
पश्यतामविचलन्नयनानाम् ।
शीतलोज्ज्वलरुचो मणिदीपाः
जज्वलुर्धवलसौधशरीरे ॥९॥

भानुरास्थित न तूग्रमरोचिः
चन्द्रमाः समुदितो न तु रात्रिः ।
चन्द्रसूर्य्यमणिशालिनि सौधे
राजपीठमभितः सुभनोज्ञम् ॥१०॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

दुर्लभैर्विरचितं मणिपुञ्जै-
र्मञ्जुलासनमथैकमदीपि ।
रोचिषातिरुचिरेण चिरेण
भ्रान्तिरन्तमधिगच्छति येषाम् ॥११॥

रत्नदीधितिजटं गजमुक्ता-
च्छत्रदण्डपरिवर्द्धितपुच्छम् ।
दीप्तपीतमणिलोचनयुग्मं
स्वर्णपादमपि वज्रकृतास्यम् ॥१२॥

तच्च संसदि न केवलमुच्चैः
सिंहतां किल निजां निजगाद ।
स्वाश्रितस्य नृपतेरपि राज-
सिंहतां हतरिपुं प्रममौच ॥१३॥ (युग्मकम्)

तच्च शुक्लसुषमोपलपीठं
निर्म्मलं मनुजनाथसनाथम् ।
भूतनाथवसतिं विषमाङ्गं
श्वेतशैलमहसद्दनकीर्णम् ॥१४॥

रत्नराजिनवराजकिरीट-
प्रांशुगांशुनिचयैर्बहुवर्णैः ।
मौक्तिकस्रगुदितद्युति शुभ्रम्
आतपत्रमफलं कृतमेकम् ॥१५॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

यः प्रवर्णयितुमेकमपीड़
लोकपालममितं किल नालम् ।
अष्टदिक्पतिगतांशसमुत्थं
वर्णयेत् स कथमीशमवन्याः ॥१६॥

पातकादभिभवाच्च रिपूणां
रक्षति क्षितिमिमां स्म सदा यः ।
पूरुषा रुषितवत् परुषास्याः
रक्षिणः समवसन् परितस्तम् ॥१७॥

चन्दनेन्धनकृतं परिधुन्वन्
तालवृन्तमुपशान्तनिदाघम् ।
व्यर्थमागमनमत्र तवेति
दक्षिणानिलमवारयदन्यः ॥१८॥

भूपतेरनुमतिं स्पृहयालुः
लोलतामपि गतो नतशीर्षः ।
धैर्य्यमर्थ्यमरुचिर्द्विजवर्गः
मार्गयन्नपि धनं प्रतिपेदे ॥१९॥

मन्त्रिणं सुविपुलं समदर्शन्
राजकार्य्यमणुना मनसैव ।
दर्पणे हि विमले तनुमध्ये
विम्बितं भवति वस्तु समस्तम् ॥२०॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

तोषयन् धनपतिं नृपमेनम्
अन्तकञ्च नितरामपराध्यन्।
गोष्पतिं ललितयुक्ति सुवक्ता
योगिनं मुनिगणश्च ददर्श ॥२१॥

ऊर्द्धगा नृपसभा स्थिरभावा
सा जनौघभरिताऽप्यनिनादा।
ऊर्मिनादमुखरां चपलाञ्च
निम्नगामुपजहास सदैव ॥२२॥

धर्म्मराजपरिवर्ज्जितशोभा
नान्तकस्य गमनेऽप्यधिकारः।
सा सहस्रनयनेन कृतश्रीः
गोत्रभिन्न खलु कश्चन दृष्टः ॥२३॥

ईदृशीमथ स वीक्ष्य समज्यं
विस्मयं समितिमास्थित दूतः।
नूतना सकललोकललामा
कस्य नापहरति चलमच्चि ॥२४॥

वीक्ष्य संसदममुष्य मनीषा
कार्य्यगौरववशात् प्रयियासुः।
राजसन्निधिमपि न्यवृतच्च
कामिनीव विदधत्यभिसारम् ॥२५॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

भीतभीतमिव दूतमुपेतं
वीक्ष्य सोऽन्तिकगतावनुजज्ञे ।
किङ्करः किल गुरोरपि नीचः
गौरवी विनयिनां हि समीपे ॥२६॥

आधरानतशिरोधर एष
संप्रणत्य निकषा नृपपादम् ।
पञ्चशाखमधि तस्य विसारि
पत्रपत्रिणमतिष्ठिपदारात् ॥२७॥

नैच्छिताच्चरलिपिं परिगृह्य
किन्नु वृत्तमिति शङ्कितचेताः ।
मौनवान् नरपतिः स्वयमेव
निर्निमेषनयनो निपपाठ ॥२८॥

स्वस्ति ते कमलकोमलशील-
शालिने प्रकुरुतां वनमाली ।
सा तु सत्यपि चिराय सपत्नी
तां बधूमवधुनोतु न लक्ष्मीः ॥२९॥

निःसरन्नपि गृहाद्गृहचिन्ताम्
ईशितास्मि न परं परिहर्तुम् ।
नो वने निवसनेन मुनित्वं
हन्त शान्तविषयत्वमिदं तत् ॥३०॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

कानने परिवसन्नपि काश्चित्
नो गृहत्रुटिमुपेक्षितुमर्हः।
अस्तमस्तकगतोऽपि हि मित्रः
पूर्वपर्वतविभां न जहाति ॥३१॥

रुक्मिणी क्रमधृताङ्गविवृद्धिः
उल्लसल्ललितकान्तिसमृद्धिः।
मां न चन्दयति चन्द्रकलेव
या परं स्फुटकलङ्कवती स्यात् ॥३२॥

यादृशी गुणवती तव यामिः
नात्र तद्वदपरामवयामि।
भावना तदनुरूपवरस्य
नोत्तमा मुदमुपैत्यवरस्य ॥३३॥

अत्र निर्मलमनोगगने मे
भावनासलिलभृत्परिपूर्णे।
नारदानिलवचोभृशवेगात्
उद्गतः सुखसुधांशुरपूर्वः ॥३४॥

एष तस्य सुमहाननुपदेशः
देशकालगुणवंशविविक्तः।
मन्त्रतुल्यपरमार्थसमेतः
सर्वथैव किल नः समुपास्यः ॥३५॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

सागरादिव यदोर्वसुदेवात्
देवकीतनुजनी रजनीशः।
कोऽप्यसौ समभवद्भविकाब्धोः
कृष्णचन्द्र इति नामप्रतीतः ॥३६॥

पूतनानिपतनादि न चित्रं
कंसकंसनकरस्य चरित्रम्।
तत्र भास्वति भवेन्नदशेषः
तत्र वृष्टिहृति को हि विशेषः ॥३७॥

ईश्वरेति च मुनिर्मनुते तं
मादृशः कृशदृशा तु किमत्र।
अन्तरेण तरणिं विचरन्तं
को हि विष्णुपदमानमवैति ॥३८॥

जानकीव जनकालयवृत्ता
सा रमात्र रमते मम कन्या।
जन्मजन्मनि हरिं कमते सा
प्रत्यहं दिनविभेव दिनेशम् ॥३९॥

तस्य पाणिकमले कमलाङ्गीं
रुक्मिणीं प्रवितरन् प्रियवत्स!।
वेधसो जहि विनिर्मितिनिन्दां
पालयस्व च पितुर्हितवाक्यम् ॥४०॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

सन्नपोह नितरां वनवासो
श्रीमतां तदपि मङ्गलकामो ।
भीष्मको लिखितवान् लिपिमेनाम्
अस्तगोऽपि हरति तम इन्दुः ॥४१॥

वाचयन्निति नृपो विदधे सः
वैमनस्यपिशुनां मुखभङ्गीम् ।
आशयो हृदिशयो हि जनानां
चेष्टया मुखदृशोरनुमेयः ॥४२॥

ज्ञापयन्नगणितां प्रणतिं मे
तातपादनलिने वदिता त्वम् ।
आप्तलोकलपिते सति लब्धे
प्रेषितुर्निजलिपेः किमपेक्षा ॥४३॥

याति कारणमृते नहि भूयः
सुस्थितां गतपथं सुविवेकी ।
कानने निवसतो भवतोऽपि
युज्यते विषयगा नहि चिन्ता ॥४४॥

धारयन् गुरुधुरां धरणीशः
कार्य्यकार्य्यविमुखो जड़भावात् ।
वारिवाहपिहितो मिहिरो वा
राजते न भजते न च कीर्त्तिम् ॥४५॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

आश्रितस्य भवतो मुनिवृत्तिम्
एष भुक्तविषयेष्वनुरागः ।
राजतश्च तरणेरुपरागः
संतनोति नितरां मलिनत्वम् ॥४६॥

योगिवृत्त्यधिगमे च्युमते यः
तस्य गेहपटुता किमु चित्रा ।
तुङ्गको गिरिशिरस्यधिरोढः
कः श्रमः खलु ततः पतने हि ॥४७॥

तद्भवन् ! भव पुनर्भवनाशि-
भावुकोद्यमयुतो भवियोगी ।
तेन नः फलवती भवितेच्छा
कृत्यकृत् प्रियतमो हि समेषाम् ॥४८॥

नारदो बुधपशौ समदर्शी
जज्जरो यदि हरिं प्रशशंस ।
तत् प्रमाणमिह नास्य गुणित्वे
सर्व एव सुहृदो गुणवर्णी ॥४९॥

पूर्वमेव भगिनीमनुरूप-
रूपिणि क्षितिवराय वराय ।
दातुमौत्सुकयुतेन मयैव
प्रेषिता जनपदव्रजनौघाः ॥५०॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

रुक्मिणी चरगणैरुपदिष्ट-
प्रान्तपाणिकमले यदि गच्छेत् ।
तन्मदीयलिपिरेव भवन्तं
कौमुदीव मुदितं किल कर्त्री ॥५१॥

आजनेर्हरिविरोधितयैतत्
दुर्नयीत्र कथयन् स निवृत्तः ।
द्विष्यमाणजननामकथापि
शल्यतुल्यविषमा द्विषतः स्यात् ॥५२॥

क्वाथवा विनयिनो प्रकृतिः स्यात्
भूरिभूतिमदमत्तमतीनाम् ।
वारिधेरपटुनाविकनुन्ना
नो तरिर्भ्रमिगता स्थिरगत्वी ॥५३॥

ब्रूहि नो नृपमुनिं सममेतत्
सावलेपलपितं नृपसूनोः ।
तद्भवानपि भविष्यति द्वेष्यः
द्वेषभाग्भवति कः स्वगिरैव ॥५४॥

श्रीमती नृपसुता प्रकृतश्रीः
श्रीपतिं पतितास्वयितेव ।
जाह्नवीं जलधिमाजनि यान्तीं
प्राभवत् क इह नाम निषेद्धुम् ॥५५॥

इत्यसुक्तगुणयुक्तगिराथ
बोधितः सपदि कञ्चकिनाऽसौ ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

भूपतेः कृतनतिरनुमत्या
प्रास्थिताश्रमवनं प्रति दूतः ॥५६॥

अथ सूचयन्नवसितिं सदसः
सहसा सदस्यमन उत्सुकयन् ।
किरणैः परिच्छदगतैश्चलताम्
उदभूत् समं सुषमशङ्खरवः ॥५७॥

अभिवादयन् गुरुजनान् क्रमशः
प्रसभाजयन् सवयसश्च सखीन् ।
प्रियभाषया च सुखयन्ननुगान्
समपासरत् स समितेर्नृपतिः ॥५८॥

अवलोकमान इव तत् कृतक्रियः
करसञ्चयं प्रकलयन् प्रभाकरः ।
नवरक्तया सविधवर्त्तिसन्ध्यया
सहितो विवेश चरमाचलोदरम् ॥५९॥

अखिलमवनिभर्त्तुर्भ्रातदूतेन तेन
सममवहितकर्णालापमाकर्ण्य खिन्ना ।
सुमलिनवदनागात् कापि मुग्धा विदग्धा
चिरकृतवरिवस्यां रुक्मिणीं स्वां वयस्याम् ॥६०॥

इति श्रीहरिदासकृतौ रुक्मिणीहरणे महाकाव्ये
पञ्चमः सर्गः ॥०॥

———:———

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

षष्ठः सर्गः ।

——:०:——

हरगिरौ चपलामचलामिव
धवलमञ्चतले विसत्तनम् ।
शशिमुखीं ससखीं खलु सा सखी
समगमल्ललितां गलितालकाम् ॥१॥
रुचिरदन्तरुचीमचिरोद्गतां
स्मितसितेन सता बहुलीकृताम् ।
मलिनमालिमुखं कुमुदप्रभम्
उपनयन्त्यलपन्नृपतेः सुता ॥२॥
विजहती सखि ! मां क्व गता कथं
हरति धैर्य्यमहो विरहस्तव ।
कुमुदिनी नलिनी च परस्परं
नहि विहाय विभाति निजाश्रयम् ॥३॥
श्रवणमुक्तिसुधा, दृशमाकृतिः,
असुखि शून्यमनः प्रकृतिस्मृतिः ।
हरति चाङ्गचयं परिरिप्सुता
सखिवियोगविषं विषमो रिपुः ॥४॥
मलिनता तलिन। नलिनानने
विकसिते हसिते विसवत् सिते ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

सकललोकविलोभनलोकनं
किमिति भाति यथोषसि सारसे ॥५॥
स्वयमुदेत्ययि ! यच्च परस्परं
न जनकादिषु तादृशसौहृदम् ।
सरसिजं सरसि स्थितमेव हि
हसति वीक्ष्य रविं निशि मीलति ॥६॥
इति निवेद्य तदा नृपनन्दिना
करपुटे परिगृह्य निजासने ।
चिरमभिन्नतनुत्वमिवात्मनोः
परिनिवेदयितुं समवावसत् ॥७॥
कृतपरस्परकण्ठपरिग्रहं
भृशमदोपि तदा युवतिद्वयम् ।
न तु युवा मिलितः खलु तत्र यत्
समुदपादि ततो नहि कण्टकम् ॥८॥
सरभसं परिरभ्य नृपाङ्गजां
गजकरोरुमभाषत सस्मितम् ।
चपलतोन्मदतामृदुताः स्वतः
शिशुयुवप्रवय सु हि वीक्षिताः ॥९॥
तव किशोरि ! नु मादृशयोषिताम्
अवधिरेष परः परिरम्भणे ।
सयतनो युवको यदतः परम्
अधिकरिष्यति कण्ठमिमं तव ॥१०॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

सखि! नवीनजनप्रियतागता
प्रमुदिता किमु नः प्रणयेस्तराम्?।
कमलिनी तरणोच्चणपुष्पिता
तिरयते हि दलेन कुमुद्वतीम् ॥११॥

यदि सरित् सुचिरं सहचारिणीं
तरिमुपेच्य यियासति सागरम्।
ननु तदा किमसौ न निवर्त्तते
सहचरत्वकृतं किल सौहृदम् ॥१२॥

विरहजोत्कलिका कलिकां तव
तुदति मामुदजामिव यामिनी।
मृदुसुमे नवदामविमोचिते
भवति भाविनि! वा क इवादरः ॥१३॥

तव वियोगविभावनयानया
मम विषादकृताननलीलिमा।
सुखशशी हि यदा हृदयोदयी
स्फुरति तत्र सुखे किल कौमुदी ॥१४॥

इति निवेद्य महीपतिनन्दिनीं
कलविषादवती सुदती तदा।
विधुरिवाचिरकुन्दसुमे रुचं
विहसितं दशनेषु दिदेश सा ॥१५॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

अथ यदा धरणीश्वरनन्दिनी
प्रववृते वदितुं विवृतान्तरा ।
मतिमती खलु तत्र मुखे श्रियः
पदमदाद्विषतीव सरस्वती ॥१६॥

सकललोकविलोभिविलोकने
दशनभासि च चेतसि सुस्मिते ।
विशदताजनि, यौवनपूर्वतः
भवति सैव दशा हरिणीदृशाम् ॥१७॥

कुलकलत्रजनेऽतिविरञ्जिनी
चपलता निरुपप्लवशैशवे ।
अवहति प्रतिकूलसमीरणे
चलति शैवलिनी किमुत क्वचित् ॥१८॥

अनुचिता सखि हे ! खलु मत्तता
किमु दिने कभवाऽभवदीदृशी ।
किमथवा दुरितायतनाश्रयात्
ग्रहपरिग्रह एष नवस्तव ॥१९॥

किमपि कारणमत्र विनिह्नुषे
नहि तु धीरतरा तरलायसे ।
विजहती हि समीरसमीरणां
न चलति व्रततिर्न च निम्नगा ॥२०॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

परमतो महतस्तव कैतवात्
सुजन! बन्धुजनेऽजनि यातना।
अधिजिगांसुरुदन्तमिमं निजं
जलमृते व्यथते तृषितो यथा ॥२१॥

प्रणयिनि! प्रणयास्यसुमञ्जलिं
द्रुतमुदन्तमुदीरय दन्तुरे!।
कियदुदाहृतसंहृतवाचिकं
तपति लिप्सितमन्तरमन्तिवत् ॥२२॥

इति निशम्य गिरं मधुराक्षरां
क्षितिपतेर्दुहितुः सुदती तदा।
विदधती चिरसुख्यतदन्तरे
कमपि भावमथो नवमभ्यधात् ॥२३॥

पुरत एव चराः सहजेन ते
मृगयितुं सुवरं विनियोजिताः।
क्रमविवृद्धिमती कुलकन्यका
गुरुरुजा च भृशं सखि! दुःसहा ॥२४॥

सुरऋषिप्रतिबोधितचेतसा
प्रसवता तव विप्रहितस्वरः।
यदुपतिः सुषमावदुरःसरः
कमलिनो भवनाय हि रुक्मिणि ॥२५॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

मुररिपौ रिपुणा सहजेन ते
निषिषिधे विषयः स हरिग्रहः ।
असुमतां भुवि तत् सुखमीच्छति
सुमुखदैवमहो तदपेक्षते ॥२६॥

सखि ! यतस्व हरेः करगामिनी
प्रभवितुं स्वयमेव पुरःसरी ।
करिकरे चिरगामिसरोजिनीं
न लभतां वनगामुकवञ्चकः ॥२७॥

अननुभूतविभूतिगुणः परः
न खलु यावदियात् पत माधवे ।
अलिनिपेयरसा नलिनी किल
न खलु वायसचञ्चुमुपाञ्चतु ॥२८॥

तुदतु न सखि ! ते मधुराधरं
घनकठोरतनुर्दशनायसा ।
मृदुशिरीषप्रसूनविदारणं
करटचञ्चुपुटेन हि दुःसहम् ॥२९॥

ननु जहीहि भयं कुरु साहसं
व्रज यतस्व मनस्विनि ! मङ्गले ।
सुसमये किमयेऽप्यधुनातनो
न जड़ता भविता तव तापिनी ॥३०॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

न खलु या वदते स्वमनोरथं
परिणये किल बालिशबालिका ।
श्वपचकूपतले ननु जीवनं
स्वगयते भुवि सा हतभागिनी ॥३१॥

त्वपितदुर्द्दिनमद्दिं तदीधितिं
पतिगमान्न सुखारुणमीच्चते ।
अतिजड़ा बहुला कुलकन्यका
विलसितं हि विधेरतिदुर्गमम् ॥३२॥

किमु वरं वरभर्त्तृगमोत्सवः
किमथवा त्वपयात्र तिरस्क्रिया ।
त्वसुरीकुरुषेऽद्य परं यदि
परिणयेन कृतं गुरुलज्जिना ॥३३॥

मधुरिपूरसि भूरिरमाश्रये
भवतु तेऽवनते ! चिरसंश्रयः ।
सुखयते हि न कं कमलानने !
सुरसरित्-सरिदीश्वरसङ्गमः ॥३४॥

नृपसुतालिगिरामथ शृण्वती
किमपि शङ्कवती नहि भाषितुम् ।
न खलु भूतधृतिर्न च वा भयम्
अपि तु सा सहसा विमुमोह च ॥३५॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

विहसितं विगतं गदितं हतं
विचलिता ललिता च तनूलता ।
सततफुल्लसुखेक्षणपद्मयोः
मलिनतैधत शैवलवल्लिवत् ॥३६॥

निजतपोविवृतावतिधृष्टता
विवरणेऽपि भवेदिति न स्थिरम् ।
स्वमतकञ्जनकोऽप्यतिनाथवान्
परिणये न पुनः परिवर्त्तनम् ॥३७॥

भयमपास्य हरिः पुरि साहसात्
स्वगमने गणिकागणना गणे ।
न खलु वाऽविदितो हरिरेष्यति
नहि सहायजनो भुवि कश्चन ॥३८॥

बिसलतामृदुला क्व नु बालिका
क्व नु च वज्रसमा बहुदुःस्मृतिः ।
विकम्पितं कदलीदलवद्वपुः
भुवि पपात न सा चतुरोत्तरा ॥३९॥ (विशेषकम्)

विविधदुःखतरङ्गविभीषिकाम्
अनपनेयतमां परजीवने ।
चिरसुखैकमयया सरलाशया
प्रतियती सहसा विससाद सा ॥४०॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

चिरविषादविषोल्वणभीषणात्
पतिविलेशयदुःसहदंशनात् ।
कुलचरित्रतिरोहितिकृत्त्रपा-
यवनिकापसृतिः खलु मे वरम् ॥४१॥

इति विचिन्त्य तदा नृपनन्दिनी
समवदद्विदुषी विदिताखिला ।
प्रदृष्टे मुकुरे प्रतिविम्बवत्
मनसि भावचयो विमलान्तरे ॥४२॥

यदि लता गलिता मरुताकुला
तरुवरं वरयेत् विकला स्वतः ।
नहि ततो वितता जनगर्हणा
जगति हीनगतिर्हि नृयोषिताम् ॥४३॥

सहजनिर्जननी जनकोऽपरः
कुलविभूतिमहागुणसम्मदान् ।
प्रगणयन्ति न तूज्ज्वलकन्यका-
सुखलवं निगतिर्गुरुदारुणा ॥४४॥

सरणिशुष्कजलापि तरङ्गिणी
जलनिधिं प्रतियाति मृदन्तरात् ।
विमुखधातृकृता कुलकन्यका
न लभतेऽभिमतं न च लीयते ॥४५॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

क्व नु हरी रमणीनयनोत्सव:
क्व च विरक्तजना हृतरुक्मिणी ।
न खलु शैवलिनीं नलिनीप्रति:
मृगयते न हरिर्हरिणीमपि ॥४६॥

विनयनम्रजनप्रियमाधव:
प्रक्रमते यदि भीष्मककन्यकाम् ।
असुरपेयसुरामसुजारिणीं
मुनिमनोऽपि तदा कमिता किल ॥४७॥

प्रथममेव मया तु समर्पितं
निरुदयं हृदयं दयितोत्तमे ।
इह हि लोकरवि: क्व नु केशव:
गृहगुहान्तरिता क्व च रुक्मिणी ॥४८॥

अयि ! निवेद्य न हृद्यजने स्वकं
परमभीप्सति हन्त सती सती ।
सुरधुनी गिरिराजगुहागृहात्
जलधिमिव ययौ न नदान्तरम् ॥४९॥

किमधुना विपुलं प्रलपामि ते
हरिवियोगविषं व्यपयाङ्कुरे ।
सखि ! शिखोद्गम एव हुताशनं
शमयते यदि नातिवियत्तदा ॥५०॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

इति निशम्य तदा सुदतो गिरम्
अभिदधे दधता नृपजाकरम्।
सदृशदुःखसुखा चिरवल्लभा
समवयास्त्र सखी खलु दुर्लभा ॥५१॥

समय एष न ते नतकन्धरे!
गुरुविमूढ़तया स्थगितुं तव।
विविधकार्य्यवशाद्विधुरस्य हि
विपदुपैति जवादिह जन्मिनः ॥५२॥

सपदि कञ्चुकिना पटनाधुना
सुवचने! निजवाचिकमीरय।
गुरुसमीरसमीरितवल्लिका
श्रयति हि स्वयमेव महीरुहम् ॥५३॥

नियतमेव हरिर्भवतोमितो-
ऽमितगुणः प्रणयेद्‌गुणपन्नगः।
उषसि लोचनगोचरगामिनीं
कमलिनीं द्विरदः किमुपेक्षते ॥५४॥

रचय चारुतरामचिरं लिपिं
ललितकोमलभावविबोधिनीम्।
अहमितो गुरुकल्पवदावदं
तमयि! कञ्चुकिनं समुपह्वये ॥५५॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

इदमुदीर्य्य तदैव परागता
सपदि कञ्चुकिना नतिचञ्चला ।
स्म सह सा सहसा सहसानना
विशति वेशवती नृपजालयम् ।।५६।।

विकचकाशसुमोपमकेशिना
सुविशदातपवारणधारिणा ।
उपरिगे परिपूर्ण सुधाकरे
हिमवतीव शरत्समयागमे ।।५७।।

पतितदन्ततया गलिताधरा-
ऽस्फुटपदाच्चरगद्गदभाषिणा ।
पवनदोषवशाच्चलमौलिना
द्रुमदलेन यथा परिशुष्यता ।।५८।।

सनिनदं भुवि दण्डमवास्यता
धृतकमण्डलुदक्षिणपाणिना ।
तनुविभङ्गवता नतवर्ष्मणा
गुणवतीव पुरातनधन्वना ।।५९।। (कलापकम्)

अथ समापगतास्य सितात्मनः
कमलकमलोमूर्त्तिरसौ सखी ।
विशदलोध्रतरोरिव वल्लरी
सविनयं नयवत्तमभाषत ।।६०।।

निमन्त्रणं न्यायदृशां भवादृशां
साधीयसीं साधयितुं किल क्रियाम् ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

तदत्र यत्नं त्वयते मनो न नः
कार्यं हि कार्य्यार्थमनार्य्यमापदि ॥६१॥
अस्याः खलु क्षितिपतेर्दुहितुर्हितार्थं
द्वारावतीस्थितहरेर्हर पत्रमेनम्।
एषाथ ना फलवती भवितेति मन्ये
नालोकनं हि विफलं पुरुषोत्तमस्य ॥६२॥
अथमचिरमुदन्तो नान्तरा किन्तु वाच्यः
भवति फलवती चेत् स्वप्रकाश्या क्रिया स्यात्।
बहु वदति यदा प्राङ्मूलकल्पस्तदाऽल्पः
वहिरणति विहीनस्वान्तरङ्गो मृदङ्गः ॥६३॥
पाथेयार्थं स्वयमुपहृतं राजकन्यासखीभ्यां
लब्धप्रीतिः सविनयनमस्कारमङ्गाय गृह्णन्।
प्रस्थास्येऽहं रजनिविगमे भाषमाणः किलेदं
साकं भूभृद्दुहितृमनसा प्रत्यगादुयादवेशम् ॥६४॥
तृष्णा कृष्णाभिषङ्गे भवति बलवती किं भवेदेष लिप्सुः ?
लिप्सायां वापि सत्यां प्रभवति किमु वा स्वल्पसारः किशोरः ?।
चिन्ता सन्तापिनीयं वदनमलिनतां सन्ततान व्रजन्त्याः
तीव्रांशोर्वा सुधांशोर्विकचकुमुदिनीपङ्कजिन्योरिव श्रीः ॥६५॥

इति श्रीहरिदासकृतौ रुक्मिणीहरणे महाकाव्ये
षष्ठः सर्गः॥ ॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

सप्तमः सर्गः ।

——:०:——

श्वस्तने कलरवैः पतत्त्रिणां
तस्य कौशशयनीयशायिनः ।
सूरसूतसहितो धनागमात्
दैन्यशून्यहृदि बोध उद्गतः ॥१॥

अन्वयः—श्वस्तने पतत्त्रिणां कलरवैः कौशशयनीयशायिनः तस्य धनागमात् दैन्यशून्यहृदि सूरसूतसहितः बोधः उद्गतः ॥१॥

श्वस्तन इति । श्वस्तने परदिनप्रत्यूषकाले, पतत्त्रिणां पक्षिणाम्, कलरवैर्मधुरास्फुटध्वनिभिः, कुशानामिदमिति कौशं यत् शयनीयं शय्या तत्र शेत इति तस्य, तस्य ब्राह्मणस्य, धनागमात् रुक्मिणीसखीतः पाथेयार्थलाभात्, दैन्यं पाथेयाभावे यद्दौर्गत्यं तेन शून्यं यत् हृत् हृदयं तस्मिन्, सूरसूतेन अरुणेन सहितः, बोधश्चैतन्यम्, उद्गत आविर्भूतः ।

अत्र वृत्त्यनुप्रासच्छेकानुप्रासयोः संसृष्टिरलङ्कारः ।

"श्वः परश्वः परेऽह्नि" इति सूरसूतोऽरुणोऽनूरुः" इति चामरः ।

श्वः परदिने भवेत इति श्वस्तनः "सायं चिरम्" इत्यादिना तनट्-प्रत्ययः । कौशेत्यादि विशेषणेन ब्राह्मणस्य शिष्टत्वसूचनाद्दौत्ये श्वास्थ्याभावः सूचितः । हृदयस्य निद्रास्थानत्वादजागरणस्थानत्वमपि हृदयस्यैवेत्यत उक्तं दैन्यशून्यहृदीति । तथा च मार्कण्डेयपुराणम्—

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

नित्यकृत्यनियमान् समाप्य स
च्छत्रदण्डककमण्डलून् दधत्।
भस्मचन्दनविचित्रविग्रहः
प्रास्थिताभि वसुदेवजं द्विजः ॥२॥

"नेत्राख्यनासिकावाहुहृदयेभ्यस्तथोरसः।
निर्गम्य दर्शने तस्थौ ब्रह्मणोऽव्यक्तजन्मनः॥"

"नानावृत्तमयः क्वापि सर्गः कश्चन दृश्यते" इति दर्पणकारोक्तेरस्मिन् सर्गे प्रायेण रथोद्धता वृत्तानि। अष्टाष्टश्लोकान्तरन्तु अन्यान्यवृत्तानि यथास्थानं वक्तव्यानि। तत्रादावष्टसु श्लोकेषु रथोद्धता वृत्तम्—"रात् नराविह रथोद्धता लगौ" इति लक्षणात् ॥१॥

বাঙ্গালা—প্রভাতকালে পক্ষিগণের কলরবে কুশময়শয্যাশায়ী সেই ব্রাহ্মণের নিদ্রাভঙ্গ হইল এবং তৎকালে অরুণোদয় হইতে লাগিল। পূর্ব্বদিন রুক্মিণীর সখীদের নিকট পথখরচ লাভ করায় ব্রাহ্মণের মনে কোন দৈন্য ছিল না ॥১॥

অন্বয়ঃ—भस्मचन्दनविचित्रविग्रहः सः द्विजः नित्यकृत्यनियमान् समाप्य छत्र-दण्डक-कमण्डलून् दधत् (सन्) वसुदेवजं अभि प्रास्थित ॥२॥

अथ ब्राह्मणस्य रुक्मिणीदौत्यकरणाय कृष्णान्तिके प्रस्थानमाह नित्येति। भस्मना चन्दनेन च विचित्रो विग्रहः शरीरं यस्य सः, स द्विजो ब्राह्मणः, नित्यकृत्यानि सन्ध्यावन्दनादीनि नित्यकार्य्याण्येव नियमास्तान् समाप्य, छत्रञ्च दण्डकौ यष्टिश्च कमण्डलुर्जलपात्रविशेषश्च तान्, दधत् धारयन् सन्, वसुदेवजं कृष्णम्, अभि लक्ष्यीकृत्य, प्रास्थित प्रस्थितवान्।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

तुर्य्यमम्बरविभागमाव्रजन्
सञ्जिगाय जगतीं करैरिनः ।
बाल एव बलवान् य उच्चकै-
स्तस्य पादतलगो नगोऽपि हि ॥३॥

अत्रापि पूर्ववदेवालङ्कारः ।

दण्डकेत्यत्रानि कप्रत्ययः ॥२॥

বাঙ্গালা—সেই ব্রাহ্মণ ভস্ম ও চন্দনলেপনে বিচিত্র শরীর হইয়া, নিত্যকার্য্য সকল সমাপন করিয়া, ছত্র, দণ্ড ও কমণ্ডলু লইয়া কৃষ্ণের উদ্দেশে প্রস্থান করিলেন ॥২॥

अन्वयः—इनः तुर्य्यं अम्बरविभागं आव्रजन् करैः जगतीं सञ्जिगाय । हि यः बालः एव उच्चकैः बलवान् नगः अपि तस्य पादतलगः (भवति) ॥३॥

तुर्य्यमिति । इनः सूर्य्यः, तुर्य्यं चतुर्थम्, अम्बरविभागमाकाशांशम्, आव्रजन् गच्छन्नेव, करैः किरणैः हस्तैश्च, जगतीं पृथिवीम्, संजिगाय अन्धकारापसारणेनायत्तीचकार । हि तथाहि, यो जनः, बाल एव, उच्चकैराधिक्येन बलवान् भवेत्, नगः पर्वतोऽपि, तस्य, पादतलगः चरणाधोगतः किरणाधोगतश्च भवति ।

अत्र सूर्य्ये कार्य्यसाम्येन प्रबलराजव्यवहारसमारोपात् समासोक्ति-रलङ्कारः, सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः, वृत्त्यनुप्रास-श्छेकानुप्रासश्चेत्येतेषां परस्परनिरपेक्षतया संसृष्टिः ।

"इनः पतौ नृपार्कयोः" इति मेदिनी । "पादा रश्म्यङ्घ्रितुर्य्यांशाः" इति "शैलवृक्षौ नगावगौ" इति चामरः ॥३॥

বাঙ্গালা—ক্রমে সূর্য্য আকাশের চতুর্থভাগে উপস্থিত হইয়া কিরণ-

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

निःसरत्तिमिरसञ्चयांशुका
सर्वतः प्रियकरेण संयुता
पूर्वमार्जितमुखी निशाकृशा
वासरद्युतिरथो विदिद्युते ॥४॥

(হস্ত) দ্বারা পৃথিবী জয় করিলেন। কারণ, যে লোক বাল্যকালেই বিশেষ বলবান্ হয়, পর্ব্বতও তাহার পাদতলবর্ত্তী (পাদ—কিরণ ও চরণ) হইয়া থাকে ॥৩॥

अन्वयः—अथो निःसरत्तिमिरसञ्चयांशुका सर्वतः प्रियकरेण संयुता पूर्वमार्जितमुखी निशाकृशा (च) वासरद्युतिः विदिद्युते ॥४॥

निःसरदिति। अथो सूर्य्यस्य गगनचतुर्भागगमनानन्तरम्, निःसरन् निर्गच्छन् तिमिरसञ्चयः अन्धकारसमूह एव अंशुकं वसनं यस्याः सा, सर्वतः सर्वत्र, प्रियस्य दयितस्य सूर्य्यस्य च करेण हस्तेन किरणेन च, संयुता आमर्षणात् सम्मेलनाच्च मिलिता, पूर्वं मार्जितं तेन प्रियेणैव परिष्कृतं मुखं वदनम् आद्यभागश्च यस्याः सा, तथा, निशायां निशागमे कृशा प्रियस्य कार्य्यान्तरव्यापृततया स्थानान्तरगमनाद्विरहेण तनुभूता क्षीणा च, वासरद्युतिः दिनश्रीः, विदिद्युते क्रमेण प्रचकाशे।

अत्र तिमिरसञ्चयादौ अंशुकत्वाद्यारोपः शाब्दः, वासरद्युतौ अङ्गनात्वारोपस्तु आर्थ इत्येकदेशविवर्त्ति रूपकमलङ्कारो वृत्त्यनुप्रासच्छेकानुप्रासाभ्यां संसृज्यते ॥४॥

বাঙ্গালা—তদনন্তর অন্ধকারসমূহরূপ বস্ত্র নিঃসৃত হইল, সূর্য্যের কিরণ সর্ব্বত্র বিস্তৃত হইয়া পড়িল এবং প্রথমেই পূর্ব্বদিক্ পরিষ্কৃত

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

तीक्ष्णदीधितिरसौ दिवाकरो
यत्र दुःसहतया व्यराजत।
नैशमन्धतमसं गुहामगात्
स्यान्नु कस्य भुवने चिरोन्नतिः ॥५॥
निम्नगातटपथेन गच्छता
दृश्यते स्म बहुभावदर्शिना।

হইয়াছিল; ক্রমে রাত্রিকালে ক্ষয়প্রাপ্ত দিনশ্রী বিশেষভাবে প্রকাশ পাইল ॥৪॥

अन्वयः—असौ तीक्ष्णदीधितिः दिवाकरः यत्र दुःसहतया व्यराजत (तत्र) नैशं अन्धतमसं गुहां अगात्। भुवने कस्य नु चिरोन्नतिः स्यात् ॥५॥

तीक्ष्णेति। असौ तीक्ष्णदीधितिस्तीव्रकिरणः, दिवाकरः सूर्य्यः, यत्र काले, दुःसहतया व्यराजत प्राकाशत; तत्र काले, निशायाः इदमिति नैशम्, अन्धतमसं गाढ़ान्धकारः, गुहां पर्वतकन्दरम्, अगात् अगमत्। तथाहि, भुवने कस्य नु चिरोन्नतिः स्यात्; अपि तु कस्यापि नेत्यर्थः। निशायामुन्नतस्याप्यन्धकारस्य तदानीमवनत्यैव गुहागमनादिति भावः।

अत्र कार्य्यसाम्येन सूर्य्ये प्रबलनृपतेः गुहायाञ्च पलायिततद्वैरिणो व्यवहारसमारोपात् समासोक्तिरलङ्कारः, सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासश्च अनयोर्गुणप्रधानभावेनाङ्गाङ्गिभावात् सङ्करः।

"ध्वान्ते गाढ़ेऽन्धतमसम्" इत्यमरः।

"अन्धसमवेभ्यस्तमस्" इति राजादित्वादत्प्रत्ययः ॥५॥

বাঙ্গালা—যে সময়ে তীক্ষ্ণকিরণ সূর্য্য দুঃসহরূপে প্রকাশ পাইলেন সেই সময়ে রাত্রির গাঢ় অন্ধকার পর্ব্বতের গুহার ভিতরে গমন করিল। কারণ, কোন্ ব্যক্তির চিরকাল উন্নতি থাকে ॥৫॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

याहृशी हि सुषमा स्वभावजा
कृत्रिमा न खलु ताहृशी भवेत् ॥६॥
ग्राम्यगम्यतटिनीतटं गता
कापि काञ्चनसमाङ्गिकाङ्गना ।
भूगृहीतविलसत्तरङ्गिणी-
काञ्चिकान्तरमणिर्बभाविव ॥७॥

अन्वयः—निम्नगातटपथेन गच्छता (तेन ब्राह्मणेन) बहुभावदर्शिना (सता) हृष्यते स्म । हि स्वभावजा सुषमा याहृशी भवेत् कृत्रिमा ताहृशी न खलु (भवेत्) ॥६॥

निम्नगेति । निम्नगाया नद्यास्तटपथेन, गच्छता तेन ब्राह्मणेन, बहुभावदर्शिना पदार्थानामनेकावस्थादर्शिना सता, हृष्यते स्म । हि तथाहि, स्वभावजा स्वाभाविकी, सुषमा पदार्थानां परमा शोभा, याहृशी मनोहरदर्शना भवेत् ; कृत्रिमा तु सुषमा, ताहृशी मनोहर-दर्शना न खलु भवेत् ।

अत्र सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः ॥६॥

বাঙ্গালা—সেই ব্রাহ্মণ নদীর তীরপথে গমন করিতে থাকিয়া, নানা পদার্থের নানাবিধ ভাব দেখিয়া আনন্দিত হইতে লাগিলেন। কারণ, স্বাভাবিক সৌন্দর্য্য যেরূপ হৃদয় আকর্ষণ করে, কৃত্রিম সৌন্দর্য্য সেরূপ হৃদয় আকর্ষণ করিতে পারে না ॥৬॥

अन्वयः—ग्राम्यगम्यतटिनीतटं गता काञ्चनसमाङ्गिका का अपि अङ्गना भू-गृहीत-विलसत्तरङ्गिणी-काञ्चिकान्तरमणिः इव बभौ ॥७॥

ग्राम्येति । ग्राम्यैर्लोकैः गम्यं यत्तटिनीतटं नदीतीरं तत्र गता स्थिता, काञ्चनसमानि स्वर्णवर्णानि अङ्गानि यस्याः सा, कापि अङ्गना,

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

অংশুকাংশমপহৃত্য মস্তকাৎ
অঞ্চলং পরিহিতঞ্চ চালয়ন্।
কাঞ্চনাতিশয়সাহসোঽনিলঃ
স্পৃষ্টসর্ব্বতনুমাকুলাং ব্যধাৎ ॥৮॥

ভুবা পৃথিব্যা গৃহীতা ধৃতা বিলসন্তি শোভমানা তরঙ্গিণী নদ্যেব কাঞ্চিকা মেখলা তস্যা অন্তরমণির্মধ্যমণিরিব, বভৌ।

অত্র শ্রৌতোপমারূপকয়োরঙ্গাঙ্গিভাবেন সঙ্করঃ, সোঽপি চ ছেকানুপ্রাসেন সংসৃজ্যতে ॥৭॥

বাঙ্গালা—স্বর্ণবর্ণা কোন রমণী গ্রাম্যলোকের যাতায়াতের স্থান নদীতীরে থাকিয়া পৃথিবীকর্তৃক ধৃত সেই সুন্দর নদীরূপ মেখলার মধ্যমণির ন্যায় শোভা পাইতেছিল ॥৭॥

অন্বয়ঃ—অতিশয়সাহসঃ অনিলঃ মস্তকাৎ অংশুকাংশং অপহৃত্য পরিহিতং অঞ্চলং চ চালয়ন্ স্পৃষ্টসর্ব্বতনুং কাঞ্চন আকুলাং ব্যধাৎ ॥৮॥

অংশুকেতি। অতিশয়েন সাহসং যস্য সঃ, অনিলো বায়ুঃ, মস্তকাৎ, অংশুকাংশং বসনৈকদেশম্ অপহৃত্য, পরিহিতং কটিধৃতম্, অঞ্চলং বসনৈকদেশঞ্চ চালয়ন্ সন্, স্পৃষ্টা সর্ব্বা তনুঃ শরীরং যস্যাস্তাম্, কাঞ্চন কাঞ্চিদঙ্গনাম্, আকুলাং বিহ্বলাম্, ব্যধাৎ অকার্ষীৎ।

অত্র কার্য্যৈক্যে বায়ৌ শঠকামুকব্যবহারসমারোপাৎ সমাসোক্তিরলঙ্কারঃ, ছেকানুপ্রাসস্থানয়োঃ সংসৃষ্টিঃ ॥৮॥

বাঙ্গালা—অত্যন্তসাহসী বায়ু কোন রমণীর মস্তক হইতে বস্ত্র অপহরণপূর্ব্বক পরিধানের বস্ত্রও অপসারণ করিতে থাকিয়া এবং তাহার সমস্ত অঙ্গ স্পর্শ করিয়া তাহাকে আকুল করিতেছিল ॥৮॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

स्नानात् कचोच्चयमथो परिमार्जयन्त्याः
आर्द्रांशुकान्तरसरन्नवहेमकान्त्याः ।
आस्फालनैः कुचयुगं विजही स्वचेलम्
अत्युन्नतो नहि तिरस्कृतिमुत्सहेत ॥८॥

अन्वयः—स्नानात् अथो कचोच्चयं परिमार्जयन्त्याः आर्द्रांशुकान्तरसरन्नवहेम-कान्त्याः कुचयुगं आस्फालनैः स्वचेलं विजही । हि अत्युन्नतः तिरस्कृतिं न उत्सहेत ॥८॥

स्नानादिति । स्नानात् अवगाहनात्, अथो अनन्तरम्, कचोच्चयं दीर्घकेशपाशम्, परिमार्जयन्त्या पृष्ठतो गात्रमार्जन्याश्चखण्डाघातेन निर्जलं कुर्वत्याः, आर्द्रांशुकस्य परिहितस्तिमितवसनस्य अन्तरात् क्षुद्र-क्षुद्ररन्ध्रात् सरन्ती वहिर्गच्छन्ती नवस्य हेम्नः स्वर्णस्य कान्तिरिव कान्ति-र्यस्यास्तस्याः कस्याश्चिदङ्गनायाः, कुचयुगं स्तनद्वयं कर्तृ, आस्फालनैः उत्प्लवनैः, स्वचेलं निजावरणवस्त्रम्, विजही तत्याज पातयामासेत्यर्थः । हि तथाहि, अत्युन्नतः पदार्थो जनश्च, तिरस्कृतिमावरणं भर्त्सनञ्च न उत्सहेत सोढुं न शक्नुयात् ।

अत्र स्वभावोक्तिरलङ्कारः, सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः अन्त्यानुप्रासश्चेत्येतेषां मिथो नैरपेक्ष्यात् संसृष्टिः ।

इतःप्रभृत्यष्टसु श्लोकेषु वसन्ततिलका वृत्तम्—"उक्ता वसन्ततिलका त भ-जा जगौ गः" इति लक्षणात् ॥८॥

বাঙ্গালা—কোন রমণী নদীতে স্নান করিবার পর, তীরে দাঁড়াইয়া গামছা দিয়া চুল ঝাকড়াইয়া মাজিতে ছিল ; তখন নূতন সোনার কান্তির ন্যায় তাহার দেহের কান্তি ভিজা কাপড়ের ভিতর হইতে বাহির হইতেছিল,

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

দূরাদ্যদোন্নতভুজা গ্রহণী সযত্না
স্রস্তাংশুকং স্তনযুগং সহসাবলোক্য।
চেলাঞ্চলেন পিদধেঽবহিতা তদৈব
সখ্যেরিতং বসনমাশু পপাত তোয়ে ॥১০॥

এই সময়ে তাহার স্তনযুগল আস্ফালন করিয়া নিজের আবরণবস্ত্র ফেলাইয়া দিয়াছিল। কারণ, অত্যন্ত উন্নতপদার্থ আবরণ সহ্য করিতে পারে না ॥৯॥

অন্বয়ঃ—যদা উন্নতভুজা দূরাৎ গ্রহণী সযত্না অবহিতা চ (কাচিৎ অঙ্গনা) সহসা স্তনযুগং স্রস্তাংশুকং অবলোক্য চেলাঞ্চলেন পিদধে। তদা এব সখ্যা ঈরিতং বসনং আশু তোয়ে পপাত ॥১০॥

দূরাদিতি। যদা, উন্নতৌ উত্তোলিতৌ ভুজৌ যয়া সা, দূরাদ্দূর-দেশাৎ, গ্রহণী সখীনিক্ষিপ্তস্য শুষ্কবসনস্য ধারণী, সযত্না সাগ্রহা, অবহিতা কৃতাবধানা চ কাচিদঙ্গনা, সহসা ঝটিতি, স্তনযুগম্, স্রস্তং নিপতিতম্ অংশুকং বসনং যস্মাত্তত্তাদৃশম্ অবলোক্য, চেলাঞ্চলেন হস্তাভ্যামেবোত্তোলিততদ্বসনৈকদেশেন, পিদধে তন্নুন্মুক্তং স্তনযুগম্ আচ্ছাদয়ামাস; তদৈব, সখ্যা বয়স্যয়া, ঈরিতং তীরান্নিক্ষিপ্তম্, বসনং শুষ্কবস্ত্রম্, আশু শীঘ্রম্, তোয়ে নদীজলে পপাত; উত্তোলিতহস্তয়োঃ স্তনযুগাবরণে ব্যাপৃতত্বাৎ তত্রৈবাবধানাচ্চেতি ভাবঃ।

অত্রাপি স্বভাবোক্তিরলঙ্কারশ্ছেকানুপ্রাসেন সংসৃজ্যতে।

পিদধ ইতি "ধাঞ্‌নহ্যোরপেরুপসর্গস্যাদেঃ" ইত্যপেরকারলোপঃ। মহাকৌতুককরোঽয়ং ব্যাপারঃ ॥১০॥

বাঙ্গালা—কোন রমণী স্নান করিয়া জলের নিকট দাঁড়াইয়া সখীর নিকটে শুষ্ক বস্ত্র চাহিয়া হাত দুইখানি তুলিল এবং দূর হইতে সেই

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

बालेन लोलमतिना सलिलात् सलोलम्
आकृष्यमाणपरिधानदुकूलमूला ।
आदित्सुकापरमितश्च समस्तमस्तम्
आकुञ्च्य सस्मितमुखी द्रुतमप्सु मग्ना ॥११॥

শুষ্ক বস্ত্র ধরিবার জন্য সচেষ্ট ও অবহিত হইল, অমনি স্তন দুইটীর উপরের কাপড় পড়িয়া গিয়াছে দেখিয়া তাহা তুলিয়া, যখন স্তনের আবরণ করিতে লাগিল, তখনই সখীনিক্ষিপ্ত সেই শুষ্ক বস্ত্রখানি যাইয়া সত্বর জলে পতিত হইল ॥১০॥

अन्वयः—लोलमतिना बालेन सलिलात् सलीलं आकृष्यमाण-परिधान-दुकूल-मूला (काचित् अङ्गना) अपरं आदित्सुका (आसीत्) इतः च समस्तं अस्तं ; आकुञ्च्य सस्मितमुखी (सती) द्रुतं अप्सु मग्ना ॥११॥

बालेनेति । लोला चञ्चला मतिर्बुद्धिर्यस्य तेन तादृशेन, बालेन शिशुना पुत्रेण, सलिलाज्जलात्, सलीलं सकौतुकं यथा स्यात्तथा, आकृष्यमाणं परिधानदुकूलस्यार्द्रपरिधानवसनस्य मूलमधोदेशो यस्याः सा तादृशी काचिदङ्गना, अपरं शुष्कं वस्त्रम्, आदित्सुका आदातुं ग्रहीतुमिच्छुः आसीत्, इतः अस्यां दिशि च, समस्तं सर्वमेव परिहितमार्द्रं वस्त्रम्, अस्तं तेन बालेनाकृष्य जले निक्षिप्तम् । आकुञ्च्य तं बालं भर्त्सयित्वा, सस्मितं कौतुकात् समुद्गतहास्यं मुखं वदनं यस्याः सा तादृशी सती, द्रुतं झटिति, अप्सु नदीजले मग्ना आकटिदेशं कृतप्रवेशा । कटेरधोभागस्य तदानीं निरावरणतया लज्जानिवारणायेत्याशयः ।

अत्रापि स्वभावोक्तिरलङ्कारो वृत्त्यनुप्रासच्छेकानुप्रासश्चेत्येतेषां संसृष्टिः ॥११॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

বালপ্রবাললুলিতা চ ভুজপ্রতানা
পক্ষ্মালিচুম্বনচলন্নয়নপ্রসূনা ।
দূরোল্লসত্সুষমসৌরভলোভনীয়া
বৃক্ষং বিনা কুচফলা ললনা লতাসীত্ ॥১২॥

বাঙ্গালা—কোন মহিলা স্নান করিয়া উঠিয়া শুষ্ক বস্ত্র গ্রহণ করিবার ইচ্ছা করিতেছিল ; এমন সময়ে তাহার চঞ্চলমতি বালক পুত্র জল হইতে কৌতুকের সহিত উহারই পরিধানবস্ত্রের নিম্নদেশ ধরিয়া সবলে আকর্ষণ করিল ; তখন তাহার কটিদেশের সমস্ত বস্ত্রই স্খলিত হইয়া গেল ; সুতরাং সেই মহিলা বালকটীকে ভর্ৎসনা করিয়া সহাস্যমুখে তৎক্ষণাৎ কটিদেশপর্য্যন্ত জলে নিমগ্ন করিল ॥১১॥

অন্বয়:—ললনা বালপ্রবাললুলিতা ভুজপ্রতানা পক্ষ্মালি-চুম্বন-চলন্নয়ন-প্রসূনা দূরোল্লসত্-সুষম-সৌরভ-লোভনীয়া কুচফলা চ বৃক্ষং বিনা লতা আসীত্ ॥১২॥

বালেতি । ললনা কাচিদঙ্গনা, বালৌ বলয়মেব প্রবালঃ পল্লবস্তেন লুলিতা মনোহরা, ভুজৌ বাহূ এব প্রতানৌ শাখে যস্যাঃ সা, পক্ষ্মাণি নয়নলোমান্যেব অলয়ো ভ্রমরাস্তেষাং চুম্বনেন সংযোগেন চলত্ স্পন্দমানং নয়নমেব প্রসূনং পুষ্পং যস্যাঃ সা, দূরে উল্লসত্ প্রসরত্ যত্ সুষমং মনোহরং সৌরভং গন্ধস্তেন লোভনীয়া লোভজনিকা, কুচৌ স্তনাবেব ফলে যস্যাঃ সা তাদৃশী চ, বৃক্ষং বিনা বৃক্ষাবলম্বনব্যতিরেকেণ, একাকিন্যা এব তীরে স্থিতত্বাদিতি ভাবঃ, লতা লতাস্বরূপা আসীত্ ।

অত্র বৃক্ষং বিনেত্যনেন অধিকারূঢ়বৈশিষ্ট্যরূপকমলঙ্কারো বৃত্ত্যনুপ্রাস-চ্ছেকানুপ্রাসাভ্যাং সংসৃজ্যতে ।

"অলঙ্কারান্তরে মেধ্যে বালৌ বালা লুটিস্ত্রিয়োঃ" ইতি মেদিনী ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

लोलं दुकूलमनुकूलसमीरणेन
पान्थाः प्रयान्ति च पथि प्रनिरीक्षमाणाः ।
इत्याकुला बसनदूरगतीरतीर्णा
मार्ज्जांशुकेन पिदधे सपदि स्वगात्रम् ॥१३॥

"पल्लवोऽस्त्री किसलयं प्रवालः प्रवलो मतः" इति रभसः । "प्रतानः शाखा" इति रघुनाथः ।

लोभयतीति लोभनीया "कृत्यल्युटोऽन्यत्रापि" इति कर्त्तर्य्यनीयप्रत्ययः "दिग्व्यापिनीर्लोचनलोभनीया" इति भट्टिप्रयोगवत् ॥१२॥

বাঙ্গালা—কোনও ললনা নদীর তীরে একাকিনী দাঁড়াইয়া থাকিয়া বৃক্ষব্যতীত লতাস্বরূপ হইয়াছিল। তাহার বলয় ছিল—পল্লব, বাহু ছিল—শাখা, নয়নরোমরূপ ভ্রমরগণের সংযোগে তাহার নয়নরূপ পুষ্প দুইটী শোভা পাইতেছিল এবং স্তন দুইটী ছিল—ফল, আর দূরগামী সুন্দর সৌরভে সকলের লোভ জন্মাইতেছিল ॥১২॥

अन्वयः—अनुकूलसमीरणेन दुकूलं लोलं, पान्थाः च प्रनिरीक्षमाणाः (सन्तः) पथि प्रयान्ति इति आकुला वसन-दूरग-तीर-तीर्णा (काचित् अङ्गना) सपदि मार्ज्जांशुकेन स्वगात्रं पिदधे ॥१३॥

लोलमिति । अनुकूलः पथिकादर्शनसुविधाकारी यः समीरणो वायुस्तेन, दुकूलं परिहितमार्द्रं वस्त्रम्, लोलं चञ्चलं जातम् ; पान्थाः पथिकाश्च, प्रनिरीक्षमाणाः तं लोभनीयं भावं पश्यन्तः सन्तः, पथि प्रयान्ति ; इति हेतोः, आकुला विह्वला, वसनं परिधेयं शुष्कं वस्त्रं दूरगं दूरवर्त्ति यत्र तस्मिंस्तादृशे तीरे नद्यास्तटे तीर्णा उत्थिता काचिदङ्गना, सपदि द्रुतम्, मार्ज्जांशुकेन गात्रमार्जनवस्त्रेण, स्वगात्रम्, पिदधे आच्छादयामास ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

प्रक्षालितोञ्छितशिशुं तटमीयिवांसम्
आरादरं सुतरलं सलिले तरन्तम्।
द्रागेकपाणिकमले वसनं वसाना
नाभ्यन्तमग्नमदधात् परितर्ज्जयन्ती ॥१४॥

अत्रापि स्वभावोक्तिरलङ्कारो वृत्त्यनुप्रासच्छेकानुप्रासाभ्यां संसृज्यते ॥१३॥

বাঙ্গালা—কোন রমণী নদীতে স্নান করিয়া তীরে উঠিয়াছিল, তখন তাহার পরিধেয় শুষ্ক বস্ত্র দূরে ছিল, এমন সময়ে প্রবল বায়ু আসিয়া তাহার পরিহিত আর্দ্র বস্ত্র সঞ্চালিত করিতে লাগিল, ওদিকে পথিকেরা তাহার সেই অবস্থা দেখিতে দেখিতে যাইতে থাকিল; সুতরাং সে আকুল হইয়া দ্রুত গাত্রমার্জনীদ্বারা আপন গাত্র আবৃত করিয়া ফেলিল ॥১৩॥

अन्वयः—वसनं वसाना (काचित् अङ्गना) तटं ईयिवांसं सुतरलं आरात् अरं सलिले तरन्तं नाभ्यन्तमग्नं च प्रक्षालितोञ्छितशिशुं परितर्ज्जयन्ती (सती) एकपाणि-कमले द्राक् अदधात् ॥१४॥

प्रक्षालितेति। वसनं शुष्कं वस्त्रम्, वसाना परिदधाना, अतएव शिशुं सुतं प्रत्यनवधानेति भावः; काचिदङ्गना, तटं नद्यास्तीरम् ईयिवांसं स्नानात् परं गतवन्तम्, सुतरलमतीवचञ्चलस्वभावम्, आराद्-दूरात्, अरं सत्वरम्, सलिले नद्या जले, तरन्तं पतित्वा प्रविशन्तम्, नाभ्यन्तमग्नं नाभिपर्य्यन्तं जले मग्नञ्च, आदौ प्रक्षालितो जलन्यैव धौतगात्रः परञ्च उञ्छितो गात्रमार्ज्जन्या मार्ज्जितगात्रश्चेति स चासौ शिशुर्बालकपुत्रश्चेति तम्, परितर्ज्जयन्ती अतीवभर्त्सयन्ती सती, एकपाणिकमले शिशोरेवैकहस्ते, द्राक् झटिति, अदधात् धृतवती।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

नास्ते रसो मदधिक: कुचकुम्भमध्ये
नैवाधिकस्च परिणाहितया किलासौ।
इत्थं नदज्जलगलं कलसं वहन्ती
काचिद्ययावभिगृहं स्तिमितांशुकाङ्गी ॥१५॥

अत्रापि स्वभावोक्तिरलङ्कारश्छेकानुप्रासेन संसृज्यते।
"आराद्दूरसमीपयो:" इति "लघु क्षिप्रमरं द्रुतम्" इति "स्राग्-झटित्यञ्जसाह्नाय द्राङ्मंक्षु सपदि द्रुते" इति चामर:।
ईयिवांसमिति इणधातो: क्वसुप्रत्यये रूपम्। एकपाणिकमल इति "गले बद्ध्वा गौर्नीयते, शाखायां वृक्षं छिनत्ति" इत्यादिवदधिकरण एव सप्तमी। वसानेति "वस आच्छादने" प्रत्ययस्यानशि प्रयोग: ॥१४॥

বাঙ্গালা—কোন রমণী, অত্যন্ত চঞ্চল বালকপুত্রটীকে স্নান করাইয়া এবং গা মুছাইয়া দিলে, সেই বালকটী তীরে যাইয়া উঠিয়াছিল; এমন সময়ে সেই রমণী শুষ্ক বস্ত্র পরিধান করিতেছিল; এই অবসরে সেই বালকটী বেগে আসিয়া আবার জলে নামিয়া নাভিপর্য্যন্ত মগ্ন করিয়াছিল; তখন জননী ভর্ৎসনা করিতে থাকিয়া সত্বর তাহার একখানি হাত ধরিল ॥১৪॥

अन्वय:—कुचकुम्भमध्ये मदधिक: रस: न आस्ते असौ परिणाहितया न एव किल अधिक: च इत्थं नदज्जलगलं कलसं वहन्ती स्तिमितांशुकाङ्गी (च) काचित् (अङ्गना) अभिगृहं ययौ ॥१५॥

नेति। कुचकुम्भमध्ये ईदृशीनां स्तनकलसाभ्यन्तरे, मदधिको मद्रसादतिरिक्त:, रसो जलं शृङ्गारश्च, न आस्ते न वर्त्तते; असौ कुचकुम्भ:, परिणाहितया विशालतया च नैव किल अधिको मत्तो-ऽतिरिक्तश्च, इत्यम्, नदम् जलशब्देन वदन्निव चासौ जलं गले यस्य स

रात्रिन्दिवं प्रियतमेण ललामलीलाम्
आविष्कृतां सपुलकं पुलिने लपन्ती ।
वव्रे सखीं स्मितमुखीं विविधाक्षिभङ्गि
प्रायेण हि प्रियगतं युवतिर्ब्रवीति ॥१६॥

जलगलम्बेति तम्, कलसं वहन्ती, स्तिमितमार्द्रम् अंशुकं वस्त्रम् अङ्गेषु यस्याः सा, तादृशी च काचिदङ्गना, अभिगृहं गृहाभिमुखम्, ययौ ।

अत्र जलशृङ्गारयोर्भेदेऽपि रसशब्दस्य ऐक्याभेदाध्यवसायादिति-शयोक्तिरलङ्कारः, नदन्तित्यत्रेवशब्दाभावात् प्रतीयमाना क्रियोत्प्रेक्षा वृत्त्यनुप्रासश्च त्येतेषां परस्परनिरपेक्षतया संसृष्टिः ।

"रसो गन्धरसे जले" इत्यादि मेदिनी । "परिणाहो विशालता" इत्यमरः ॥१५॥

বাঙ্গালা—"এইরূপ যুবতিগণের কুচকুম্ভমধ্যে আমার রস (জল) অপেক্ষা অধিক রস (শৃঙ্গার) নাই এবং ঐ কুচকুম্ভ বিশালতায় আমা অপেক্ষা অধিক নহে" এইরূপই যেন যে কলস গলদেশের জলের শব্দদ্বারা বলিতেছিল, সেইরূপ একটী জলপূর্ণ কলস কক্ষদেশে লইয়া এবং আর্দ্র বস্ত্রই পরিধান করিয়া কোন রমণী গৃহাভিমুখে যাইতেছিল ॥১৫॥

अन्वयः—(काचित् अङ्गना) पुलिने (स्थित्वा) प्रियतमेन रात्रिन्दिवं आविष्कृता ललामलीलां लपन्ती (सती) विविधाक्षिभङ्गि स्मितमुखीं सखीं वव्रे । हि युवतिः प्रायेण प्रियगतं ब्रवीति ॥१६॥

रात्रीति । काचिदङ्गना, पुलिने नद्याः सिकतामयस्थले स्थित्वेति शेषः, प्रियतमेन पत्या, रात्रौ च दिवा चेति रात्रिन्दिवम्, आविष्कृतां प्रकाशिताम्, ललामा उत्तमा चासौ लीला शृङ्गारचेष्टेति ताम्, सपुलकं सरोमाञ्चम्, लपन्ती वदन्ती सती, विविधा अक्षिभङ्गि यस्मिन्

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

ज्यायसी पतितदन्तवाससो
धुन्वती समुदितास्फुटाक्षरा।
स्वीयपूर्ववयसः सुशीलतां
पप्रथे युवतिषु प्रथीयसीम् ॥१७॥

कर्म्मणि तद्यथा तथा, स्मितं मृदुहास्यं मुखे यस्यास्ताम्, सखीम्, वक्त्रे विवृत्य उवाच। हि तथाहि, युवतिः, प्रायेण बाहुल्येनैव, प्रियगतं पतिविषयकवाक्यम्, ब्रवीति।

अत्र सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारश्छेकानुप्रासो वृत्त्यनुप्रासश्चेति संसृष्टिः।

"ललामं पुच्छपुण्ड्राश्वभूषाप्राधान्यकेतुषु" इत्यमरः।

रात्रौ च दिवा चेति रात्रिन्दिवम् "श्चेन्वनुडुहादयश्च"ति निपातः ॥१६॥

বাঙ্গালা—কোন রমণী নদীপুলিনে থাকিয়া নানাবিধ নয়নভঙ্গী করিয়া রোমাঞ্চিত হইয়া সহাস্যমুখী সখীর নিকটে—প্রিয়তম দিবারাত্র যে উত্তম উত্তম লীলা প্রকাশ করিয়া থাকেন, তাহা বলিতে থাকিয়া প্রকৃত অপেক্ষাও অধিক বিবৃত করিতেছিল। কারণ, যুবতিগণ প্রায়ই প্রিয় পতির কথা বলিয়া থাকে ॥১৬॥

अन्वयः—ज्यायसी पतितदन्तवाससी धुन्वती समुदितास्फुटाक्षरा (च सती) युवतिषु प्रथीयसीं स्वीयपूर्ववयसः सुशीलतां पप्रथे ॥१७॥

ज्यायसीति। ज्यायसी काचिद्वृद्धा, पतिते मुखगह्वरगते च ते दन्तवाससी ओष्ठद्वयञ्चेति ते, धुन्वती अविरतं चालयन्ती, समुदितानि सम्यक्चेष्टया उक्तान्यपि अस्फुटानि दन्ताभावदस्पष्टानि अक्षराणि वर्णा यया सा तादृशी च सती, युवतिषु मध्ये, प्रथीयसीमतिमहतीम्,

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

आत्तयष्टिरतिकम्प्रमस्तका
काचनातिनतपूर्वकायिका ।
हन्त ! कुत्र पतितं नु यौवनं
मार्गयन्त्यभिययाविवालयम् ॥१८॥

स्वीयपूर्ववयसः स्वकीययौवनकालस्य, सुशीलतां सच्चरित्रताम्, पप्रथे प्रकर्षेणाचख्यौ ।

अत्र स्वभावोक्तिरलङ्कारः, वृत्त्यनुप्रासच्छेकानुप्रासाभ्यां संसृज्यते ।

"वर्षीयान् दशमी ज्यायान्" इति "ओष्ठाधरौ तु रदनच्छदौ दशनवाससी" इति चामरः ।

पप्रथ इति "प्रथ प्रख्याने" इत्यस्य परोक्षायां रूपम् ॥१७॥

বাঙ্গালা—কোনও বৃদ্ধা স্ত্রী মুখগহ্বরপ্রবিষ্ট ওষ্ঠদ্বয় অনবরত কম্পিত করিয়া বিশেষ চেষ্টাতেও অস্পষ্ট কথাই বলিতে থাকিয়া যুবতিগণের মধ্যে নিজের যৌবনকালের অত্যন্ত সচ্চরিত্রতার বিষয় বিশেষভাবে বলিতেছিল ॥১৭॥

अन्वयः—अतिनतपूर्वकायिका अतिकम्प्रमस्तका (अतएव) आत्तयष्टिः काचन हन्त ! यौवनं कुत्र पतितं नु (इति) मार्गयन्ती इव आलयं अभिययौ ॥१८॥

आत्तेति । अतिनतो वयोबाहुल्याददतिशयेन वक्रीभूतः पूर्वकायः शरीरोपरिभागो यस्याः सा, अतिकम्प्रं वातरोगात् अतिशयेन कम्पनशीलं मस्तकं यस्याः सा, अतएव आत्ता हस्तेन गृहीता यष्टिर्दण्डो यया सा तादृशी च, काचन काचिद्वृद्धा, हन्त खेदे, मम यौवनं कुत्र पतितं नु ? इति मार्गयन्ती पार्श्वद्वये मस्तकचालनात् अन्विष्यन्तीव, आलयं गृहम्, अभिययौ । अन्योऽपि हारितं वस्तु मस्तकं सञ्चाल्यैव भूमावन्विष्यतीति भावः ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

यान्तमन्तिकपथेन सन्ततं
नव्यलोकमवलोक्य सम्मुखम्।
व्यस्तवस्त्रविकसत्कलेवरा
वैमुखं गतवती वराङ्गना ॥१९॥

अत्र स्वभावोक्तिरलङ्कारः, आत्तयष्टित्वं प्रति पूर्वविशेषणपदार्थद्वयं हेतुरिति पदार्थहेतुकं काव्यलिङ्गम्, वाच्या भावाभिमानिनी क्रियोत्प्रेक्षा चेत्येतेषामङ्गाङ्गिभावेन सङ्करः ॥१८॥

বাঙ্গালা—দেহের উপরিভাগ অত্যন্ত অবনত হইয়াছিল এবং মাথাটীও অনবরত কাঁপিতেছিল, এহেন কোন বৃদ্ধ স্ত্রীলোক—'হায়! আমার যৌবনটী কোথায় পড়িয়া গেল' এইভাবে সেই যৌবনের যেন অন্বেষণ করিতে থাকিয়া গৃহের দিকে যাইতেছিল ॥১৮॥

অন্বয়:—व्यस्त-वस्त्र-विकसत्कलेवरा वराङ्गना सन्ततं अन्तिकपथेन यान्तं सम्मुखं नव्यलोकं अवलोक्य वैमुखं गतवती ॥१९॥

यान्तमिति। व्यस्तं वायुना विक्षिप्तं यदुवस्त्रमार्द्रं वसनं तस्मात् तदभ्यन्तरात् विकसत् प्रकाशमानं कलेवरं देहकान्तिर्यस्याः सा, वराङ्गना काचिदुत्तमा युवतिः, सन्ततमनवरतम्, अन्तिकपथेन यान्तं गच्छन्तम्, सम्मुखं स्वाभिमुखञ्च, नव्यलोकम्, अवलोक्य, वैमुखं पराङ्मुखत्वम्, गतवती प्राप्ता, लज्जावशात् लज्जायाश्च साम्मुख्येनैव प्रवृत्तेरिति भावः।

अत्र वृत्त्यनुप्रासच्छेकानुप्रासयोः संसृष्टिरलङ्कारः ॥१९॥

বাঙ্গালা—কোন সুন্দরী যুবতি স্নান করিয়া গৃহাভিমুখে চলিয়াছিল, এই সময় বায়ু আসিয়া তাহার বস্ত্র সঞ্চালিত করিতে থাকায় দেহকান্তি

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

নৈনিজন্নিজমথাঙ্গমঙ্গনা-
বৃন্দমন্তররবিন্দসুন্দরম্ ।
সংযযৌ যুবজনোঽবলোকয়ন্
কো ন পশ্যতি হি সান্দ্রচন্দ্রিকাম্ ॥২০॥

প্রকাশ পাইতেছিল; ওদিকে নিকটবর্ত্তী পথ দিয়া সর্ব্বদাই নব্য লোক সকল অভিমুখ হইয়া যাইতেছিল; তাহা দেখিয়া সেই যুবতি ফিরিয়া দাঁড়াইতেছিল ॥১৯॥

অন্বয়:—অথ যুবজন: অন্তররবিন্দসুন্দরং নিজং অঙ্গং নৈনিজৎ অঙ্গনাবৃন্দং অবলোকয়ন্ সংযযৌ। ক: হি সান্দ্রচন্দ্রিকাং ন পশ্যতি ॥২০॥

নৈনিজদিতি। অথ যুবজন:, অরবিন্দস্য অন্তরিত্যন্তররবিন্দম্, পদ্মকর্ণিকা তদ্বৎ সুন্দরম্ উত্তমগৌরবর্ণতয়া মনোহরম্, নিজম্ অঙ্গম্, নৈনিজৎ প্রক্ষালয়ৎ, অঙ্গনাবৃন্দম্, অবলোকয়ন্, সংযযৌ। কো হি জন:, সান্দ্রচন্দ্রিকাং নিবিড়জ্যোৎস্নাম্, ন পশ্যতি, অপি তু সর্ব্ব এব পশ্যতীত্যর্থ:।

অত্রোভয়োর্ব্বাক্যয়ো: গম্যসাম্যত্বাৎ অবলোকয়ন্ পশ্যতীতি ক্রিয়াভেদেন নির্দ্দেশাচ্চ প্রতিবস্তূপমালঙ্কার:, অর্থাপত্তিশ্চানয়োরেকাশ্রয়ানুপ্রবেশরূপ: সঙ্কর:, সোঽপি চ বৃত্ত্যনুপ্রাসচ্ছেকানুপ্রাসাভ্যাং সংসৃজ্যতে।

নৈনিজদিতি "ণিজির্ শৌচপোষণয়ো:" ইতি নিজধাতো: শতৃ‌ঙি "নিজিবিজিবিষাং গুণ: সার্ব্বধাতুকে" ইত্যভ্যাসে গুণ:। অন্তররবিন্দেতি "অন্তর্মন্দিরমভ্যগাৎ" ইত্যাদিবৎ অব্যয়ীভাব: ॥২০॥

বাঙ্গালা—পদ্মের কর্ণিকার ন্যায় উত্তম গৌরবর্ণ রমণীগণ আপন আপন অঙ্গ প্রক্ষালন করিতেছিল, এমন সময়ে যুবকেরা তাহাদগকে দেখিতে দেখিতে তীর দিয়া যাইতেছিল। কারণ, কোন্ ব্যক্তি নিবিড় জ্যোৎস্না দর্শন না করে? ॥২০॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

काचनापि रमणीकुले किल
व्यञ्जती रमणरामणीयकम्।
विग्रहे पुलकितेऽवलोकिते
शीतलत्वमलपन्नभस्वतः ॥२१॥
सत्वरत्तरुणकामिनीजनः
हेमकुम्भयुगमम्भसि क्षिपन्।
तुङ्गभङ्गचयभङ्गमादधत्
आजुहाव तटिनीमिवाह्वे ॥२२॥

अन्वयः—काचन अपि रमणीकुले रमणरामणीयकं व्यञ्जती (सती) किल पुलकिते विग्रहे (रमणीकुलेन) अवलोकिते (सति) नभस्वतः शीतलत्वं अलपत् ॥२१॥

काचनेति। काचनापि काचिदप्यङ्गना, रमणीकुले अङ्गनासमूह-मध्ये, रमणस्य पत्युः सुरतस्य वा रामणीयकं सौन्दर्य्यम्, व्यञ्जती वाचा विवृण्वती व्यञ्जनया वृत्त्या सूचयती वा सती किल, पुलकिते रोमाञ्चिते, विग्रहे स्वगात्रे, अवलोकिते तेनैव रमणीकुलेन दृष्टे सति, नभस्वतो वायोः, शीतलत्वं शैत्यम्, अलपत् अवदत्। वायोः शीतलत्ववशादेवायं मम रोमाञ्चः, न तु सात्त्विकभावोदयादित्यभिप्रायः।

अतएवात्र व्याजोक्तिर्नामालङ्कारः, छेकानुप्रासो वृत्त्यनुप्रासश्चेति संसृष्टिः ॥२१॥

বাঙ্গালা—কোন রমণী সখীগণমধ্যে পতির সৌন্দর্য্য বর্ণনা করিতে-ছিল, তখন তাহার শরীর রোমাঞ্চিত হইয়াছিল, সেই শরীর আবার সে সখীরা দেখিতেছিল, এমন সময়ে সেই রমণী তৎকালের বায়ুর অত্যন্ত শীতলতার কথা প্রকাশ করিতেছিল ॥২১॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

आगल्लं गलितकुन्तलावला
मग्नदेहलतिकातिकाञ्चना ।
वारिवेगविगलत् किलांशुकं
घूर्णनात् परिदधे कुतूहलात् ॥२३॥

अन्वयः—अम्भसि हेमकुम्भयुगं क्षिपन् सन्तरत्तरुणकामिनीजनः तुङ्ग-भङ्ग-चय-भङ्गं आदधत् (सन्) आहवे तटिनीं आजुहाव ॥२२॥

सन्तरदिति। अम्भसि नदीजले, हेमकुम्भयुगं स्वर्णकुम्भद्वयम्, तत्तुल्यं स्तनद्वयमित्यर्थः, क्षिपन् सन्, सन्तरंश्चासौ तरुणकामिनी-जनश्चेति स तथोक्तः, तुङ्गस्य उन्नतस्य भङ्गचयस्य तरङ्गसमूहस्य भङ्गं पराजयम्, आदधत् जनयन् कुर्वन् सन्, आहवे युद्धे, तटिनीं तां नदीम्, आजुहाव इव आह्वयति स्मेव। अन्योऽपि वीरः परपक्षसैन्यं पराजित्य युद्धे तन्नायकमाह्वयतीति भावः।

अत्र कुचयुगहेमकुम्भयुगयोर्भेदेऽप्यभेदाध्यवसायादतिशयोक्तिरलङ्कारः, "कथमुपरि कलापिनः कलापः" इत्यादिदर्पणोदाहरणवत्, वाच्या भावाभिमानिनी क्रियोत्प्रेक्षा छेकानुप्रासो वृत्त्यनुप्रासश्चेत्येतेषां मिथो नैरपेक्ष्यात् संसृष्टिः।

"भङ्गस्तरङ्ग ऊर्म्मिर्वा स्त्रियां वीतिः" इत्यमरः। "भङ्गो जयविपर्य्यये" इत्यादि मेदिनी ॥२२॥

বাঙ্গালা—যুবতি রমণীরা স্বর্ণকুম্ভযুগলের তুল্য স্তনযুগল জলে নিক্ষিপ্ত করিয়া সন্তরণ করিতে থাকিয়া উচ্চ তরঙ্গসমূহকে পরাজয় করিয়া, সেই নদীকে যেন যুদ্ধে আহ্বান করিতেছিল ॥২২॥

अन्वयः—गलितकुन्तला आगलं मग्नदेहलतिका अतिकाञ्चना (च) अबला वारिवेगलत् अंशुकं कुतूहलात् किल घूर्णनात् परिदधे ॥२३॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

सन्तरन्त्युपनयन्त्यथोन्मुखी
भारमम्बुनि नितम्बविम्बयोः।
फुल्लहेमकमलान्तिकेऽसृजत्
सालि तत्कलियुगं जलोपरि ॥२४॥

आगलमिति। गलिताः स्खलिताः कुन्तलाः केशा यस्याः सा, आगलं गलदेशपर्य्यन्तम्, मग्ना जले प्रविष्टा देहलतिका यस्याः सा, काञ्चनं स्वर्णं वर्णेनातिक्रान्तेति अतिकाञ्चना च, अबला काचिदङ्गना, वारिवेगेन विगलत् अङ्गात् प्रायेण स्खलत् अंशुकं परिहितं वस्त्रम्, कुतूहलात् किल, घूर्णनात् देहघूर्णनं कृत्वा, परिदधे।

अत्र स्वभावोक्तिरलङ्कारः, छेकानुप्रासवृत्त्यनुप्रासाभ्यां संसृज्यते ॥२३॥

বাঙ্গালা—স্বর্ণ অপেক্ষাও উত্তম গৌরবর্ণা কোন রমণী চুলগুলি খুলিয়া দিয়া এবং কণ্ঠদেশপর্য্যন্ত জলে মগ্ন করিয়া অবগাহন করিতেছিল, এমন সময়ে জলের বেগে তাহার পরিধানের বস্ত্রখানি প্রায় চলিয়া যাইতেছিল; তাই সে কৌতুকক্রমে দেহটীকে ঘুরাইয়া সেই বস্ত্র পরিধান করিল ॥২৩॥

अन्वयः—अथ उन्मुखी (काचित्) अम्बुनि नितम्बविम्बयोः भारं उपनयन्ती सन्तरन्ती (सती) जलोपरि फुल्लहेमकमलान्तिके सालि तत्कलियुगं असृजत् (इव) ॥२४॥

सन्तरन्तीति। अथ उन्मुखी उत्ताना काचिदङ्गना, अम्बुनि जले, नितम्बविम्बयोर्भारम्, उपनयन्ती स्थापयन्ती, परञ्च सन्तरन्ती सती, जलोपरि, फुल्लं प्रस्फुटितं यत् हेमकमलं स्वर्णपद्मतुल्यं निजमुखं तस्य अन्तिके, अलिभ्यां भ्रमराभ्यां भ्रमरतुल्यकृष्णवर्णस्तनमुखद्वयेनेत्यर्थः सहेति सालि, तस्य हेमकमलस्य कलियुगं कलिकाद्वयम्, असृजदिव;

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

उरसि विवसनायाः पीनतुङ्गस्तनाभ्यां
समरमिव चिकीर्षुः पीनतुङ्गस्तरङ्गः ।
सरभसमुपहत्य प्राप्तभङ्गो विलीनः
न खलु विजयतेऽस्मिन् भङ्गुरोच्चः स्थिरोच्चम् ॥२५॥

हेमकमलकलिकायुगलतुल्यस्तनयुगलमुदतोलयदित्यर्थः । जलान्तरेऽपि पद्मान्तिके तत्कलिकाद्वयमुत्तिष्ठति ।

अत्रापि "कथमुपरि कलापिनः कलापः" इत्यादिदर्पणोदाहरणवत् हेमकमलमुखमण्डलयोः स्वर्णकमलकलिकायुगलस्तनयुगलयोश्च भेदेऽप्यभेदाध्यवसायादतिशयोक्तिरलङ्कारः, प्रतीयमाना क्रियोत्प्रेक्षा, वृत्त्यनुप्रासश्छेकानुप्रासश्रुत्यनुप्रासश्चेत्येतेषां मिथो निरपेक्षतया संसृष्टिः ।

"द्विरेफपुष्पलिड्भृङ्गषट्पदभ्रमरालयः" इत्यमरः । "कलिः स्त्री कलिकायां ना शूराजिकलहे युगे" इति मेदिनी ॥२४॥

বাঙ্গালা—কোন কামিনী চিৎ হইয়া নিতম্বযুগলের ভার জলে রাখিয়া, সন্তরণ করিতে থাকিয়া, প্রস্ফুটিত স্বর্ণপদ্মের নিকটে জলের উপরে ভ্রমরযুক্ত সেই স্বর্ণপদ্মেরই দুইটী কলিকা যেন সৃষ্টি করিল ॥২৪॥

अन्वयः—पीनतुङ्गः तरङ्गः उरसि विवसनायाः पीनतुङ्गस्तनाभ्यां (सह) समरं चिकीर्षुः इव (सन्) सरभसं उपहत्य प्राप्तभङ्गः (अतएव) विलीनः (अभवत्) । अस्मिन् भङ्गुरोच्चः स्थिरोच्चं न खलु विजयते ॥२५॥

उरसीति । पीनतुङ्गः स्थूलोन्नतः, नद्यास्तरङ्गः, उरसि वक्षसि, विगतं वसनं यस्यास्तस्याः, वक्षसो गलितवसनायाः कस्याश्चिदङ्गनाया इत्यर्थः, पीनतुङ्गौ स्थूलोन्नतौ यौ स्तनौ ताभ्यां सह, समरं मल्लयुद्धम्, चिकीर्षुः कर्त्तुमिच्छुरिव सन्, सरभसं सवेगम्, उपहत्य स्तनावेवाहत्य, प्राप्तस्तत् स्तनविक्रमेणेव लब्धो भङ्गो द्वैधीभावः पराजयश्च येन स प्राप्त-

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

भङ्गो जातः ; अतएव विलीनो लयं प्राप्तः पलायनेन लुक्कायितश्चाभवत् ; तथा च अस्मिन् जगति, भङ्गुरोच्चः क्षणविनश्वरोन्नतिः पदार्थः, स्थिरोच्चं चिरन्तनोन्नतिं पदार्थम्, न खलु विजयते, अतएव क्षणविनश्वरोन्नतिस्तरङ्गः स्थिरोन्नतौ स्तनौ विजेतुं नाशक्नत्, प्रत्युत पराजित एवाभूदिति भावः ।

अत्र कार्य्येण नदीतरङ्गकामिनीस्तनयुगलयोः मल्लयोधव्यवहारसमारोपात् समासोक्तिरलङ्कारः, वाच्या भावाभिमानिनी क्रियोत्प्रेक्षा, भग्नतापराजययोर्भेदेऽपि भङ्गपदश्लेषेणाभेदाध्यवसायादतिशयोक्तिः, सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासश्चेत्येतेषामङ्गाङ्गिभावेन सङ्करः, सोऽपि च च्छेकानुप्रासेन संसृज्यते । पीनतुङ्गपदस्य उच्चपदस्य च द्विरुक्तावपि न कथितपदतादोषः, उद्देश्यप्रतिनिर्द्देश्यविषयत्वात् "उदेति सविता ताम्रस्ताम्र एवास्तमेति च" इति दर्पणोदाहरणवत् ।

"भाष्यं प्रसन्नगम्भीरम्" "प्रसन्नकर्कशा यत्र" इत्यादिवत् पीनतुङ्ग इति विशेषणयोरपि कर्म्मधारयसमासः । "भङ्गुरोच्चः स्थिरोच्च"मित्युभयत्रापि पूर्व्ववत् विशेषणयोरपि कर्म्मधारयसमास एव, तथा सत्यपि महासुन्दर इत्यादौ महत्त्वस्य सौन्दर्य्यविशेषणत्वमिव शब्दशक्तिवैचित्र्यात् भङ्गुरतायाः स्थिरतायाश्च उच्चत्वस्यैव विशेषणत्वम् ।

इतःप्रभृत्यष्टसु श्लोकेषु मालिनी नाम वृत्तम्—"न न-म-य-य-युतेयं मालिनी भोगिलोकैः" इति लक्षणात् ॥२५॥

বাঙ্গালা—কোন রমণী কণ্ঠপর্য্যন্ত জলে মগ্ন হইয়া বুকের কাপড় খুলিয়া স্নান করিতেছিল, তখন নদীর একটা স্থূল ও উচ্চ তরঙ্গ সেই রমণীর স্থূল ও উচ্চ স্তনযুগলের সহিত মল্লযুদ্ধ করিবার ইচ্ছা করিয়াই যেন বেগে আসিয়া তাহাতে আঘাত করিয়া ভগ্ন হইয়া লয় পাইয়া গেল।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

कुचयुगमतिदूरादूर्म्मिणाभ्यागतेन
सकुतुकमिव चक्रे तुल्यमास्फालनानि ।
न तु पुनरुभयोर्वा तुल्यतासीद्यदाद्यं
जितसुरगिरिचूड़ं तज्जलं कज्जलाभम् ॥२६॥

কারণ, এই জগতে যাহার উন্নতি ক্ষণস্থায়ী, সে কখনও স্থিরোন্নতকে জয় করিতে পারে না ॥২৫॥

অন্বয়:—(অঙ্গনায়া:) কুচযুগং সকুতুকং ইব অতিদূরাৎ অভ্যাগতেন ঊর্ম্মিণা (সহ) আস্ফালনানি তুল্যং চক্রে । ন তু পুন: উভয়ো: তুল্যতা বা আসীৎ ; যৎ আদ্যং জিত-সুর-গিরি-চূড়ং, তৎ জলং (তু) কজ্জলাভং (আসীৎ) ॥২৬॥

कुचेति । कुचयुगं कस्याश्चित् उद्दामयौवनाया अङ्गनायाः स्तनयुगलं कर्तृ, सकुतुकं सकौतुकमिव, अतिदूरात्, अभ्यागतेन अभिमुखमागतेन, ऊर्म्मिणा तरङ्गेन सह, आस्फालनानि तुल्यं चक्रे ; बन्धावागते बन्धुरामोदमिवेति भावः । न तु पुनः, उभयोः स्तनतरङ्गयोस्तुल्यता वा आसीत् । यद्यस्मात्, आद्यं कुचयुगम्, जिता वर्णगौरवेणाभिभूता सुरगिरेः सुमेरुपर्वतस्य चूड़ा शृङ्गं येन तत्तादृशम् ; तत् तरङ्गरूपं जलन्तु कज्जलाभं गगनप्रतिविम्बपातादञ्जनवन्नीलवर्णम्, आसीत् ; अतएवानयोः स्तनतरङ्गयोः वर्णवैषम्यात् न तुल्यत्वमिति भावः ।

अत्र प्रतीयमाना गुणोत्प्रेक्षालङ्कारः, उपमानभूततरङ्गापेक्षया उपमेयभूतस्तनयुगस्याधिक्याद्व्यतिरेकः, आर्थोपमाद्वयम्, छेकानुप्रासश्चेत्येतेषां परस्परनिरपेक्षतया संसृष्टिः ॥२६॥

বাঙ্গালা—কোনও উদ্দামযৌবনা রমণীর স্তনযুগল অতিদূর হইতে

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

निशि रमणविमर्द्दादञ्जनेनाननेन्दुं
विहितमलिनिमानं दृश्यमानं सखीभिः।
मृदु मृदु विहसन्ती पाणिना हेमकान्तिः
सपदि विपदुपेता मज्जनान्तमंमार्ज ॥२৭॥

আগত একটী তরঙ্গের সহিত মিলিত হইয়া কৌতুক করিবাই যেন সমান আস্ফালন করিতে লাগিল; কিন্তু বাস্তবিক পক্ষে যে উভয়ের তুল্যতা ছিল না। কারণ, স্তনযুগল ছিল—বর্ণগৌরবে সুমেরুচূড়াবিজয়ী, আর তরঙ্গরূপ জল ছিল—কজ্জলের ন্যায় নীলবর্ণ ॥২৬॥

अन्वयः—हेमकान्तिः विपदुपेता मृदु मृदु विहसन्ती (च सती) पाणिना निशि रमणविमर्द्दात् अञ्जनेन विहितमलिनिमानं सखीभिः दृश्यमानं (च) आननेन्दुं मज्जनान्तः सपदि ममार्ज ॥२৭॥

निशीति। हेम्नः स्वर्णस्य कान्तिरिव कान्तिर्वर्णो यस्याः सा तादृशी काचिदङ्गना, विपदुपेता सखीनां दर्शनात् लज्जाकुलत्वं प्राप्ता, अथ च कौतुकात् मृदु मृदु विहसन्ती सती, पाणिना, निशि पूर्वस्यां रात्रौ, रमणविमर्द्दात्, सुरतसङ्घर्षात्, अञ्जनेन नयनकज्जलप्रसरणेन, विहितः कृतः मलिनिमा मालिन्यं यस्य तम्, सखीभिस्तद्रूपतया दृश्यमानञ्च, आननेन्दुं मुखचन्द्रम्, मज्जनान्तः स्वशिरोमग्नतावसरे, सपदि शीघ्रम्, ममार्ज घर्षणेन प्रक्षालयामास।

अत्र शृङ्गाररसस्य लज्जादिभावापेक्षया गुणीभूतत्वाद्रसवदलङ्कारः छेकानुप्रासेन संसृज्यते ॥२৭॥

বাঙ্গালা—পূর্ব্বরাত্রিতে রমণসংঘর্ষবশতঃ নয়নের কজ্জল বিসৃত হইয়া স্বর্ণবর্ণা কোন রমণী চন্দ্রতুল্য মুখখানিকে মলিন করিয়া ফেলিয়া-

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

পয়সি সকুচমগ্না কাপ্যনুদ্বিগ্ননগ্না
কটিতটপরিমুক্তং ক্ষালয়ন্তী দুকূলম্ ।
গতবতি বহুনীচং বাতনুন্নে প্রবাহে
প্রবিবৃতনিখিলাঙ্গী লজ্জয়া দ্রাঙ্ মমজ্জ ॥২৮॥

ছিল, তৎকালে সখীরা আবার তাহা দেখিতেছিল ; সুতরাং সেই রমণী লজ্জায় আকুল হইয়া অথ চ মৃদু মৃদু হাস্য করিতে থাকিয়া ডুব দিয়া হস্তদ্বারা সেই মুখখানি মাজিতে লাগিল ॥২৭॥

অন্বয়:—পয়সি সকুচমগ্না (অতএব) অনুদ্বিগ্ননগ্না কা অপি কটিতটপরিমুক্তং দুকূলং ক্ষালয়ন্তী বাতনুন্নে প্রবাহে বহুনীচং গতবতি (সতি) প্রবিবৃতনিখিলাঙ্গী (সতী) লজ্জয়া দ্রাক্ মমজ্জ ॥২৮॥

পয়সীতি। পয়সি জলে, কুচাভ্যাং স্তনাভ্যাং সহেতি সকুচং যথা স্যাত্তথা, মগ্না স্তনপর্য্যন্তং মগ্নেত্যর্থঃ, অতএব অনুদ্বিগ্নেন লজ্জোদ্বেগাভাবেন নগ্না বিবস্ত্রা, কাপি রমণী, কটিতটাৎ পরিমুক্তং প্রচ্যাবিতম্, দুকূলং বস্ত্রম্, ক্ষালয়ন্তী সতী, বাতনুন্নে বায়ুচালিতে, জলস্য প্রবাহে, বহুনীচমত্যন্তাধোদেশম্, গতবতি সতি, প্রবিবৃতানি বসনাভাবাৎ প্রকাশিতানি নিখিলান্যঙ্গানি যস্যাঃ সা তাদৃশী সতী, লজ্জয়া, দ্রাগ্ঝটিতি, মমজ্জ জানুযুগলকৌটিল্যকরণেন জলে মগ্না বভূব।

অত্র স্বভাবোক্তিরলঙ্কারো বৃত্ত্যনুপ্রাসচ্ছেকানুপ্রাসাভ্যাং সংসৃজ্যতে।

সকুচমগ্নেতি "স্তোকনম্রা স্তনাভ্যাম্" ইত্যাদিবৎ দ্বিতীয়াতৎপুরুষসমাস এব। উদ্বিগ্নেতি ভাবে ক্তপ্রত্যয়ান্তং পদম্ ॥২৮॥

বাঙ্গালা—কোন তরুণী দেহটীকে কণ্ঠপর্য্যন্ত জলে মগ্ন করিয়া নিরুদ্বেগে নগ্ন হইয়া কটিদেশ হইতে স্খলিত বস্ত্রখানি প্রক্ষালন করিতে

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

तरलशिशुनिकाय: पूर्वंकायं निमज्य
जलमविरतधारं पञ्चषान् संसिषेच ।
कथमपि लघुरेकस्तत्र तीरं ततार
करपिहितदृशोऽन्ये न्यश्वसन् सिक्तशीर्षा: ॥२९॥

ছিল ; এমন সময়ে জলের প্রবাহ বায়ু চালিত হইয়া অত্যন্ত নীচে চলিয়া গেল, তখন তাহার সমস্ত অঙ্গ বাহির হইয়া পড়িল ; সুতরাং তৎক্ষণাৎ সে লজ্জায় মগ্ন হইল ॥২৮॥

অন্বয়:—तरलशिशुनिकाय: पूर्वंकायं निमज्य पञ्चषान् (प्रति) जलं अविरतधारं संसिषेच, तत्र एक: लघु: (सन्) कथं अपि तीरं ततार, अन्ये करपिहितदृश: सिक्तशीर्षा: च (सन्त:) न्यश्वसन् ॥२९॥

तरलेति । तरलश्चञ्चलस्वभावश्चासौ शिशुनिकायो बालकसमूहश्चेति स:, पूर्वकायं देहोपरिभागपर्य्यन्तम्, निमज्य जले मज्जयित्वा, पञ्च वा षड् वा परिमाणमेषामिति पञ्चषा: शिशवस्तान् प्रति, जलम्, अविरता अविच्छिन्ना धारा यस्मिन् कर्म्मणि तद्यथा तथा, संसिषेच, तरलतया चाञ्चल्यादेवेति भाव: । तत्र तेषु सिच्यमानेषु शिशुषु मध्ये, एक: शिशु:, लघु: सत्वर: सन्, कथमपि कष्टेन, तीरं नद्यास्तटम्, ततार उत्प्लुत्य जगाम ; अन्ये सिच्यमाना: शिशवस्तु, करैर्हस्तै: पिहिता आवृता दृशो नयनानि यैस्ते, सिक्तानि जलाप्लुतानि शीर्षाणि शिरांसि येषां ते तादृशाश्च सन्त:, न्यश्वसन् निश्वासान् अमुञ्चन् ।

अत्र स्वभावोक्तिरलङ्कारश्छेकानुप्रासेन संसृज्यते ।

पञ्चषानिति "सङ्ख्याया अवचोरन्त्यस्वरादिलोपश्च" इति अत्प्रत्यय:, षष्शब्दस्यान्त्यस्वरादिलोपश्च ॥२९॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

বিদধদপি জপং যত্তত্র কশ্চিদ্বিপশ্চিৎ
যুবতিজনমপশ্যন্নাল্পশঃ সোঽস্য দোষঃ।
হরতি হি নবনারী কৌমুদী পদ্মিনী চ
নয়নমবহিতানামপ্যকস্মাৎ স্বভাবাৎ ॥৩০॥

বাঙ্গালা—চঞ্চলমতি বালকগণ কণ্ঠপর্য্যন্ত জলে মগ্ন করিয়া অপর পাঁচ ছয়টী বালকের দিকে অবিচ্ছিন্নধারায় জল সেচন করিতেছিল; তখন তাহাদের মধ্যে একটী বালক কোন প্রকারে সত্বর যাইয়া তীরে উঠিল এবং অপর বালকগুলি হাত দিয়া চোখ চাপিয়া রয়া জলাপ্লুত মস্তক হইয়া হাঁপাইতে লাগিল ॥২৯॥

অন্বয়ঃ—তত্র কশ্চিৎ বিপশ্চিৎ জপং বিদধৎ (সন্) অপি যৎ যুবতিজনং অপশ্যৎ সঃ অস্য অল্পশঃ (অপি) দোষঃ ন। হি নবনারী কৌমুদী পদ্মিনী চ স্বভাবাৎ (এব) অকস্মাৎ অবহিতানাং অপি নয়নং হরতি ॥৩০॥

বিদধদিতি। তত্র তদানীম্, কশ্চিৎ, বিশিষ্য সর্ববিষয়াৎ চিনোতি জ্ঞানং সংগৃহ্লাতীতি বিপশ্চিৎ বিদ্বান্ জনঃ, জপং বিদধৎ কুর্বন্ সন্নপি, যৎ, যুবতিজনমপশ্যৎ; সঃ, অস্য বিপশ্চিতঃ, অল্পশঃ স্তোকোঽপি, ন দোষঃ। হি তথাহি, নবনারী, কৌমুদী জ্যোৎস্না পদ্মিনী চ, স্বভাবাদেব, অকস্মাৎ অতর্কিতভাবাৎ, অবহিতানাং বিষয়ান্তরনিবিষ্টচিত্তানাং জনানামপি, নয়নং হরতি। নবনার্য্যস্তু তদানীং স্বভাবাদেব তস্য নয়নং হরন্তি স্ম, ন পুনঃ সকামমস্য দর্শনমিতি ন দোষ ইতি ভাবঃ।

অত্র পূর্ব্বার্দ্ধবাক্যার্থং প্রতি পরার্দ্ধবাক্যার্থস্য হেতুত্বাদ্বাক্যার্থহেতুকং কাব্যলিঙ্গমলঙ্কারঃ, তথা নবনারী প্রস্তুতা কৌমুদীপদ্মিন্যৌ চাপ্রস্তুতে

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

अदिश्यदुदितवृद्धा काशनीकाशकेशा
निजयुवतिचरित्रं विस्मरन्ती विचित्रम् ।
चल चपलमगारं किन्नु जल्पैरनल्पैः
त्वर च चलनिचोलं पूरुषाः सञ्चरन्ति ॥२१॥

तासाञ्च हरतीत्येकया क्रिययाभिसम्बन्धाद्दीपकस्थानयोरङ्गाङ्गिभावेन सङ्करः, सोऽपि पुनश्छेकानुप्रासेन संसृज्यते ॥३०॥

বাঙ্গালা—তৎকালে কোন বিদ্বান্ লোক জপ করিতে থাকিয়াও যে যুবতিগণের প্রতি দৃষ্টিপাত করিতেছিলেন, তাহা তাঁহার অল্পদোষও নহে। কারণ, নবীন রমণী, জ্যোৎস্না এবং পদ্মিনী—এইগুলি স্বভাবতই অতর্কিতভাবে বিষয়ান্তরাভিনিবিষ্ট লোকদিগেরও দৃষ্টি হরণ করিয়া থাকে ॥৩০॥

अन्वयः—काशनीकाशकेशा उदितवृद्धा विचित्रं निजयुवतिचरित्रं विस्मरन्ती (सती इव) अदिशत् । अनल्पैः जल्पैः किं नु चपलं, अगारं चल, चलनिचोलं च त्वर, पूरुषाः सञ्चरन्ति ॥२१॥

अदिशदिति । काशैः काशकुसुमैः नीकाशास्तुल्याः पक्कतया सर्वथा शुभ्रवर्णाः केशाः यस्याः सा, उदिता तदानीमुपस्थिता चासौ वृद्धा चेति सा, विचित्रम्, निजं स्वकीयं यत् युवतिचरित्रं तरुणीसमय-स्वभावः तत्, विस्मरन्ती सतीव, एतेनास्या अपि यौवने ईदृशमेव चरित्र-मासीदिति सूचितम् ; अदिशत् तत्रत्यां काञ्चित् युवतिम् आदिष्टवती । किमदिशदित्याह—चलेति । अनल्पैर्बहुभिः, जल्पैरनावश्यकवाक्यैः किं नु फलं भवेत्, अपि तु किमपि नेत्यर्थः । चपलं शीघ्रम्, अगारं गृहम्, चल आगच्छ ; चलन्निचोलञ्च वायुना चञ्चलीभूतं वस्त्रञ्च, त्वर यथास्थानमारोपय । कुत एतदित्याह—पूरुषा इति । पूरुषाः पुरुषाः,

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

ইতি বিগুণবচোভির্যৌবনং তদ্বিরক্তং
সজলকলসকক্ষং সুষ্ঠু জোষং জগাম।
নিরগমদথ তাসামার্দ্রচেলান্তরালাৎ
বিরলজলদলেপাচ্ছীতরশ্মেরিব শ্রীঃ ॥৩২॥

সঞ্চরন্তি তীরপথেন ব্রজন্তি। অন্যথা তে তবৈতামবস্থামবলোক্য তাং নির্লজ্জামিব মন্যেরন্নিতি ভাবঃ।

অত্র চলনিচোলসংবরণং প্রতি পুরুষাঃ সঞ্চরন্তীতি বাক্যার্থো হেতুরিতি বাক্যার্থহেতুকং কাব্যলিঙ্গমলঙ্কারঃ, কাশনীকাশকেশীতি লুপ্তোপমা, বিস্মরন্তীবেতি প্রতীয়মানা ক্রিয়োৎপ্রেক্ষা বৃত্ত্যনুপ্রাসচ্ছেকানুপ্রাসশ্চ ত্যেতেষাং মিথো নিরপেক্ষতয়া সংসৃষ্টিঃ।

"পুরুষাঃ পুরুষা নরঃ" ইত্যমরঃ ॥৩১॥

বাঙ্গালা—এই সময় কাশপুষ্পের ন্যায় অত্যন্তশুভ্রবর্ণ কেশযুক্ত কোন বৃদ্ধ স্ত্রীলোক আসিয়া নিজের বিচিত্র যৌবনকালচরিত্র বিস্মৃত হইয়াই যেন কোনও যুবতিকে আদেশ করিল—'অনাবশ্যক কতকগুলি কথা বলিবার প্রয়োজন কি? সত্বর বাটী চল এবং চঞ্চল বস্ত্র সংবরণ কর, পুরুষেরা বিচরণ করিতেছে' ॥৩১॥

অন্বয়ঃ—তৎ যৌবনং ইতি বিগুণবচোভিঃ বিরক্তং (সৎ) সজলকলসকক্ষং জোষং সুষ্ঠু (চ) জগাম। অথ শীতরশ্মেঃ শ্রীঃ বিরলজলদলেপাৎ ইব তাসাং শ্রীঃ আর্দ্রচেলান্তরালাৎ নিরগমৎ ॥৩২॥

ইতীতি। তৎ, যুবতীনাং বৃন্দমিতি যৌবনম্, ইতি ইত্যম্, বিগুণ-বচোভির্দ্ধায়াঃ প্রতিকূলবাক্যৈঃ, বিরক্তং সৎ, সজলা জলপূর্ণাঃ কলসাঃ কক্ষেষু যস্মিন্ কর্ম্মণি তদ্‌যথা তথা, জোষং নীরবম্, সুষ্ঠু সুন্দরঞ্চ, গৃহং প্রতি জগাম। অথ শীতরশ্মেশ্চন্দ্রস্য, শ্রীঃ কান্তিঃ, বিরলৈরল্পৈঃ

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

हीनजातिवनिताकुलं क्वचित्
रैत्यभूषणविभूषिताङ्गकम् ।
तारकाभिरुपशोभिताम्बर-
श्रीयुतं पुलिनसैकतेऽद्युतत् ॥३३॥

जलदैर्मेघैर्यो लेप आवरणं तस्मादिव, तासां युवतीनाम्, श्रीः कान्तिः, आर्द्राणां चेलानां वस्त्राणामन्तरालात्, निरगमत् निर्गताभूत् ।

अत्र श्रौतोपमालङ्कारः ।

"यौवतं गणे" इत्यमरः ॥३२॥

বাঙ্গালা—সেই যুবতিগণ বৃদ্ধার এইরূপ প্রতিকূল বাক্যে বিরক্ত হইয়া জলপূর্ণ কুম্ভ সকল কক্ষে লইয়া নীরব ও সুন্দরভাবে গৃহের দিকে গমন করিতে লাগিল। তাহার পর অল্প অল্প মেঘের আবরণ হইতে চন্দ্রের জ্যোৎস্নার ন্যায় আর্দ্র বস্ত্রের ভিতর হইতে তাহাদের দেহকান্তি নির্গত হইতে লাগিল ॥৩২॥

अन्वयः—क्वचित् रैत्य-भूषण-विभूषिताङ्गकं (अतएव) तारकाभिः उपशोभिताम्बरश्रीयुतं हीनजातिवनिताकुलं पुलिनसैकतं अद्युतत् ॥३३॥

रैत्येति । क्वचित् नद्याः कुत्रचित् प्रदेशे, रैत्यभूषणैः पित्तल-मयालङ्कारैर्विभूषितानि अङ्गानि यस्य तत्, अतएव तारकाभिर्नक्षत्रै-रुपशोभितं यदम्बरं गगनं तस्य श्रीरिव श्रीर्वीरक्षणकान्तिस्तया युतम्, हीनजातिवनिताकुलं चण्डालादिस्त्रीसमूहः, पुलिनसैकतं तोयोत्थित-बालुकामयस्थानं, अद्युतत् प्रकाशते स्म ।

अत्र समासगतोपमालङ्कारः ।

"रीतिः स्त्रियामारकूटो न स्त्रियाम्" इत्यमरः ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

वादबीजमपि बीजवर्जितं
रोपयन्त्यपसदाङ्गना क्वचित् ।
धुन्वतो क्वणितकङ्कणं करं
सन्ततर्ज परुषाक्षरापराम् ॥३४॥

रीतिः कर्म्मणीमानीवेति "यण् च प्रकीर्त्तितः" इति प्रकीर्त्तित-ग्रहणात् कर्म्मार्थे इदमर्थे वा यण् ॥३३॥

বাঙ্গালা—পিত্তলময় অলঙ্কারে অলঙ্কৃত; সুতরাং নক্ষত্রশোভিত আকাশের ন্যায় ঘোর কৃষ্ণবর্ণ নিম্নজাতীয় স্ত্রীগণ নদীর বালুকাময় পুলিনে প্রকাশ পাইতেছিল ॥৩৩॥

अन्वयः—क्वचित् अपसदाङ्गना बीजवर्जितं अपि वादबीजं रोपयन्ती क्वणित-कङ्कणं करं धुन्वती परुषाक्षरा (च सती) अपरां सन्ततर्ज ॥३४॥

वादेति। क्वचित्, अपसदाङ्गना काचित् हीनजातिस्त्री, बीज-वर्जितं कारणहीनमपि, वदबीजं विवादमूलम्, रोपयन्ती प्रवर्त्तयन्ती, क्वणितानि शब्दायमानानि कङ्कणानि हस्तभूषणविशेषा यत्र तं तादृशम्, करं हस्तम्, धुन्वती सञ्चालयन्ती, परुषाणि निष्ठुराणि अक्षराणि वाक्यवर्णा यस्याः सा तादृशी च सती, अपरामपसदाङ्गनाम्, सन्ततर्ज भर्त्सयामास ।

अत्र स्वभावोक्तिरलङ्कारश्छेकानुप्रासेन संसृज्यते ॥३४॥

বাঙ্গালা—কোন স্থানে কোন নীচজাতীয় স্ত্রী বিনা কারণে বিবাদের বীজ রোপণ করিয়া শব্দায়মান কঙ্কণযুক্ত হস্ত কম্পিত করিতে থাকিয়া নিষ্ঠুর বাক্যে অপর কোন নীচজাতীয় স্ত্রীলোককে ভর্ৎসনা করিতেছিল ॥৩৪॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

दुःसहश्रमविषस्रविग्रहान्
मुक्तिमात्रपतितान् सरिज्जले।
मीलिताक्षमचलानसिस्नपन्
पुङ्गवान् कृषकपुङ्गवाः क्वचित् ॥३५॥
स्नानलब्धगुरुशान्तिनामुना
मुञ्चताप्यचिरजां कृतघ्नताम्।
कोटिना तटमखानि शृङ्गयोः
नाम्नि तिष्ठति पशोर्हि भद्रता ॥३६॥

अन्वयः—क्वचित् कृषकपुङ्गवाः दुःसह-श्रम-विषण्ण-विग्रहान् सरिज्जले मुक्तिमात्र-पतितान् पुङ्गवान् मीलिताक्षं असिस्नपन् ॥३५॥

दुःसहेति। क्वचित्, कृषकपुङ्गवाः कृषीवलश्रेष्ठाः, हलशकट-वहनादिना दुःसहेन श्रमेण विषण्णा अवसन्ना विग्रहाः शरीराणि येषां तान्, सरितो नद्या जले, मुक्तिमात्रं हलान्मोचनक्षण एव पतितान् मग्नान्, अचलान् स्पन्दनरहितान्, पुमांसश्च ते गावश्चेति पुङ्गवास्तान् वृषान्, मीलितानि तैः पुङ्गवैरेव मुद्रितानि अक्षीणि चक्षूंषि यस्मिन् कर्म्मणि तद्‌यथा तथा, असिस्नपन् स्नपितवन्तः।

अत्र स्वभावोक्तिरलङ्कारः, छेकानुप्रासश्चानयोः संसृष्टिः ॥३५॥

বাঙ্গালা—বহু সময় হল ও শকটপ্রভৃতি বহন করায় বৃষগুলির শরীর অবসন্ন হইয়া পড়িয়াছিল; সুতরাং কৃষকেরা নদীর কোন স্থানে যেই তাহাদিগকে ছাড়িয়া দিল, অমনি সেগুলি যাইয়া নদীর জলে পড়িল, পরে স্থির হইয়া দাঁড়াইল এবং চোখ বুজিয়া থাকিল; তখন কৃষকেরা সেগুলিকে স্নান করাইতে লাগিল ॥৩৫॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

ऊर्द्ध्वदण्डधृतवातवाससि
सन्ततेऽनुगुणमातरिश्वना ।
कोनिपातमवलम्ब्य सुस्थितः
नाविको मुदितचक्षुरुज्जगौ ॥३७॥

अन्वयः—स्नानलब्धगुरुशान्तिना अचिरजां अपि कृतज्ञतां मुञ्चता (सता) शृङ्गयोः कोटिना तटं अखानि । पशोः भद्रता नाम्नि हि तिष्ठति ॥३६॥

स्नानेति । स्नानेन लब्धा गुर्व्वी महती शान्तिर्येन तेन तथोक्तेन, अमुना पुङ्गवेन, अचिरजाम् अनधिकपूर्वजातामपि, कृतज्ञतां स्नानलब्ध-शान्तिरूपकृतोपकारस्मरणम्, मुञ्चता त्यजता सता, पुनरपि स्नपना-वश्यकतया कृषकपरिश्रमावश्यम्भावादिति भावः । शृङ्गयोः कोटिना अग्रभागेण, तटं नदीतीरम्, अखानि विदारितम् । अतएव पशोः पशुजातीयस्य तस्य पुङ्गवस्य, भद्रता भद्र इत्यानुपूर्वीमत्त्वम्, नाम्नि हि संज्ञायामेव, तिष्ठति ; कार्य्ये तु भद्रता साधुता नेत्यर्थः । स्नाना-नन्तरमेव तटखननरूपाभद्रकार्य्यकरणात् । "उक्षा भद्रो बलीवर्द्द ऋषभो वृषभो वृषः" इत्यमरोक्तेश्चेति भावः ।

अत्र कारणेन कार्य्यसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः, नाम्नि हि भद्रता तिष्ठति, अन्यत्र तु नेत्यन्यव्यपोहनादार्थी परिसंख्या चानयो-रेकाश्रयानुप्रवेशरूपः सङ्करः ॥३६॥

বাঙ্গালা—কোন বৃষ স্নান করায় গুরুতর শান্তি লাভ করিয় অচিরজাত কৃতজ্ঞতা পরিত্যাগপূর্ব্বক শৃঙ্গাগ্রদ্বারা নদীর তীর খনন করিতে লাগিল। কারণ, সে পশুর ভদ্রতা কেবল নামেই থাকে ॥৩৬॥

अन्वयः—ऊर्द्ध्वदण्डधृतवातवाससि अनुगुणमातरिश्वना सन्तते (सति) नाविकः कोनिपातमवलम्ब्य सुस्थितः मुदितचक्षुः (च सन्) उज्जगौ ॥३७॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

प्रातिकूल्यमुदके प्रधावति
कर्णधारनिकरो गुरुश्रमात्।
निक्षिपन् मुहुररित्रसन्ततिं
निश्वसंस्तरिमतीतरच्छनैः ॥३८॥

ऊर्द्ध्वेति। ऊर्द्ध्वदण्डेन उच्चस्तम्भेन धृतं यत् वातवासो वायुवस्त्रं तस्मिन्, अनुगुणमातरिश्वना अनुकूलवायुना, सन्ततं प्रसारिते सति, तथाभूतेन वायुनैव नौकायां चालितायां सत्यामित्यर्थः। नाविकः कर्णधारः, केनिपातं जलप्रवेशितपृष्ठवर्त्तिच्छिद्रदारिं तदुपरितनदण्डमिति तात्पर्य्यम्, अवलम्ब्य वामबाहुना कक्षमूले धृत्वा, सुस्थितः अचलभावेनावस्थितः, मुदितचक्षुर्निमीलितनयनश्च सन्, उज्जगौ उच्चस्वरेण गानं चकार।

अत्र स्वभावोक्तिरलङ्कारः।

"श्वसनः स्पर्शनो वायुर्मातरिश्वा सदागतिः" इति "अरित्रं केनिपातकं" इति चामरः ॥३७॥

বাঙ্গালা—অনুকূল বাতাস আসিয়া মাস্তলের পালের কাপড় ছড়াইয়া দিয়া নৌকা চালাইতে লাগিলে, নৌকার মাঝি হালের গুটী ধরিয়া স্থিরভাবে থাকিয়া চোখ বুজিয়া উচ্চৈঃস্বরে গান করিতেছিল ॥৩৭॥

अन्वयः—उदके प्रातिकूल्यं प्रधावति (सति) कर्णधारनिकरः गुरुश्रमात् अरित्रसन्ततिं मुहुः निक्षिपन् निश्वसन् (च सन्) शनैः तारं अतीतरत् ॥३८॥

प्रातिकूल्यमिति। उदके नदीजले, प्रातिकूल्यमाश्रित्य प्रतिकूलभावेनेत्यर्थः, प्रधावति वेगेन चलति सति, कर्णधारनिकरो नाविकसमूहः, गुरुश्रमादतीवायासात्, अरित्रसन्ततिं केनिपातश्रेणिम्, मुहुर्वारं

তিষ্ঠ মামপি নয়েতিভাষিণঃ
বিপ্রকৃষ্টপথিকস্য ধাবতঃ।
কোঽপি পারতরণিং প্রবাহয়ন্
অন্যতীরতরণায় তত্বরে ॥৩৯॥

বারম্, জলে নিক্ষিপন্, গুরুশ্রমাদেব নিশ্বসন্ সন্, শনৈঃ মন্দং মন্দম্, তরিং বিশালাং নৌকাম্, অতীতরৎ তারিতবান্।

অত্রাপি স্বভাবোক্তিচ্ছেকানুপ্রাসয়োঃ সংসৃষ্টিঃ ॥৩৮॥

বাঙ্গালা—নদীর জল প্রতিকূলভাবে বেগে চলিতে লাগিলে, নাবিকেরা অত্যন্ত পরিশ্রমসহকারে অরিত্র সকল (দাঁড়গুলি) মুহুর্মুহু জলে নিক্ষেপ করিতে থাকিয়া, অনবরত নিশ্বাস ত্যাগ করতঃ ধীরে ধীরে বৃহৎ নৌকা চালাইতেছিল ॥৩৮॥

অন্বয়ঃ—তিষ্ঠ মাং অপি নয় ইতি ভাষিণঃ ধাবতঃ বিপ্রকৃষ্টপথিকস্য কঃ অপি পারতরণিং প্রবাহয়ন্ অন্যতীরতরণায় তত্বরে ॥৩৯॥

তিষ্ঠেতি। হে নাবিক! তিষ্ঠ, মামপি স্বনৌকাং নয় ইতি ভাষিণঃ, ধাবতঃ বেগেনাগচ্ছতঃ, বিপ্রকৃষ্টো দূরবর্ত্তী চাসৌ পথিকশ্চেতি তস্য তমনাদৃত্যেত্যর্থঃ। অনাদরে ষষ্ঠী। কোঽপি নাবিকঃ, পারতরণিম্ উভয়তীরগমনাগমননৌকাম্, প্রবাহয়ন্ চালয়ন্, অন্যতীরে তরণায় গমনায়, তত্বরে ত্বরাং কৃতবান্।

অত্র স্বভাবোক্তিবৃত্ত্যনুপ্রাসয়োঃ সংসৃষ্টিরলঙ্কারঃ।

তত্বর ইতি "ত্বর সম্ভ্রমে" ইতি ত্বরধাতোঃ পরোক্ষায়াং প্রয়োগঃ ॥৩৯॥

বাঙ্গালা—'নাবিক! দাঁড়াও, আমাকেও লও' এই কথা বলিয়া কোন দূরবর্ত্তী পথিক ছুটিয়া আসিতে লাগিলে, কোন নাবিক তাহাকে

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

श्राम्यताभिमतदेशकाम्यता
तापितेन तरणेर्महातपैः।
केनचित्तटतरोस्तले क्षणं
बध्नता स्वतरणिं विशश्रमे ॥४०॥
प्रतिकूलगामिनि सवेगवारिणि
गुरुणा गुणेन तरणिं प्रतीरगाः।
परिकृष्य पञ्चषजनाः परिश्रमात्
गुणकर्त्तनेन सहसाऽपतन् भुवि ॥४१॥

অগ্রাহ্য করিয়া পরের নৌকা বাহিতে থাকিয়া, অন্য তীরে যাইবার জন্য ত্বরা করিতেছিল ॥৩৯॥

अन्वयः—अभिमतदेशकाम्यता तरणेः महातपैः तापितेन श्राम्यता (च) केनचित् तटतरोः तले क्षणं स्वतरणिं बध्नता (सता) विशश्रमे ॥४०॥

श्राम्यतेति। अभिमतं देशं गन्तुमिच्छतीति अभिमतदेशकाम्यता, तरणेर्मध्याह्नसूर्य्यस्य, महातपैस्तीव्रद्योतैः, तापितेन, श्राम्यता दीर्घकाल-तरीवाहनात् परिश्रमं प्राप्नुवता च, केनचिन्नाविकेन, तटतरोस्तीरस्थ-वृक्षस्य, तले अधोदेशे, क्षणं कियन्तं कालम्, स्वतरणिं निजक्षुद्रनौकाम्, बध्नता सता, विशश्रमे विश्रान्तं विश्रामं क्रियते स्मेत्यर्थः।

अत्र छेकानुप्रासोऽलङ्कारः।

अभिमतं देशमिच्छतीति वाक्ये "काम्य च" इति काम्यप्रत्ययः। विशश्रम इति श्रमधातोर्भावे परोक्षा ॥४०॥

বাঙ্গালা—অভিমতদেশগামী, পরিশ্রান্ত এবং মধ্যাহ্নসূর্য্যের গুরুতর তাপে সন্তপ্ত কোন নাবিক তীরস্থ কোন বৃক্ষের তলে নিজের নৌকা বন্ধন করিয়া কিছুকাল বিশ্রাম করিতেছিল ॥৪০॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

बहुकृष्टपच्यफललाभलोभिन:
चिरकर्षणोपचितघर्म्मबिन्दव: ।
रवितापतप्ततनव: कृषीवला:
अतिशीतले तरुतले विशश्रमु: ॥४२॥

अन्वय:—प्रतीरगा: पञ्चषजना: परिश्रमात् गुरुणा गुणेन प्रतिकूलगामिनि सवेगवारिणि तरणिं परिकृष्य सहसा गुणकर्त्तनेन भुवि अपतन् ॥४१॥

प्रतिकूलेति । प्रतीरगा नद्यास्तीरगता:, पञ्च वा षड्‌वा परिमाणमेषामिति पञ्चषाश्च ते जनाश्चेति ते पञ्चषजना:, परिश्रमात्, गुरुणा महता, गुणेन रज्ज्वा प्रतिकूलगामिनि, वेगेन सहेति सवेगं यद्वारि नद्या जलं तस्मिन्, तरणिं विशालां नौकाम्, परिकृष्य आकृष्याकृष्य, सहसा, गुणस्य तस्याकर्षणरज्ज्वो: कर्त्तनेन छेदनेन, भुवि अपतन् ; वेगसंवरणस्याशक्यत्वादित्याशय: ।

अत्रापि स्वभावोक्तिरलङ्कारश्छेकानुप्रासेन संसृज्यते ।

"कूलं रोधश्च तीरञ्च प्रतीरञ्च तटं त्रिषु" इत्यमर: ।

अत्रापि पञ्चषेति "संख्याया—" इत्यादिना अत् अन्त्यस्वरादिलोपश्च ।

इत:प्रभृत्यष्टसु श्लोकेषु मञ्जुभाषिणी नाम वृत्तम्—"स-ज-सा जगौ च यदि मञ्जुभाषिणी" इति लक्षणात् ॥४१॥

বাঙ্গালা—তীরবর্ত্তী পাঁচ ছয় জন লোক মহাকষ্টে বিশাল গুণ টানিয়া বেগবান্ উজান জলে নৌকা লইয়া যাইতেছিল, হঠাৎ গুণ ছিঁড়িয়া যাওয়ায় তাহারা ভূতলে পড়িয়া গেল ॥৪১॥

अन्वय:—बहुकृष्टपच्यफललाभलोभिन: कृषीवला: चिरकर्षणोपचितघर्म्मबिन्दव: रवितापतप्ततनव: (च सन्त:) अतिशीतले तरुतले विशश्रमु: ॥४२॥

बह्विति । बहूनि कृष्टे हलादिना कृतकर्षणे भूमिभागे पच्यन्त

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

महतातपेन तपनस्य तापित:
रसनां वितत्य विपुलं शुनां गण:।
चलिताङ्गसंहति विवर्द्धितानन:
विकचेक्षणोऽर्द्धशयित: समश्वसीत् ॥४३॥

इति कृष्टपच्यानि यानि फलानि धान्यादीनि शस्यानि तेषां लाभे लोभिनो लोभवन्त:, कृषीवला: कृषका:, चिरं यद्भूमे: कर्षणं तत् परिश्रम इत्यर्थ: तेन उपचिता बाहुल्येनाविर्भूता घर्म्मविन्दवो येषां ते तथोक्ता:, तथा रवितापेन तप्ता तनवा देहा येषां ते तादृशाश्च सन्त:, अतिशीतले तरुतले, विश्रम्यमुर्विश्राम चक्रु:।

अत्रापि स्वभावोक्तिरलङ्कारो वृत्त्यनुप्रासश्चानयो: संसृष्टि:।

"शस्ये हेतुकृते फलम्" इति "कृषकश्च कृषीवल:" चामर:।

कृष्टपच्येति "कृष्टपच्यकुप्ये संज्ञायाम्" इति निपात: ॥४२॥

বাঙ্গালা—কর্ষণ করা ভূমিতে প্রচুর শস্য জন্মিয়া থাকিবে এবং তাহা পাইবে এই লোভে লোভবান্ হইয়া কতকগুলি কৃষক দীর্ঘকাল ভূমি কর্ষণ করিয়াছিল, তাহাতে তাহাদের দেহে অধিক পরিমাণে ঘর্ম্মবিন্দু আবির্ভূত হইয়াছিল এবং সূর্য্যের তাপে তাহাদের শরীর অত্যন্ত সন্তাপ অনুভব করিতেছিল; সুতরাং তাহারা অতিশীতল কোন বৃক্ষতলে বিশ্রাম করিতেছিল ॥৪২॥

अन्वय:—शुनां गण: महता तपनस्य आतपेन तापित: अर्द्धशयित: विवर्द्धितानन: विकचेक्षण: (च सन्) चलिताङ्गसंहति रसनां वितत्य समश्वसीत् ॥४३॥

महतेति। शुनां कुक्कुराणां गण:, महता अधिकेन, तपनस्य सूर्य्यस्य, आतपेन द्योतेन तापित:, अर्द्धशयित: जानुचतुष्टयपातनेन भूमौ स्थित इत्यर्थ:, विवर्द्धितं व्यादत्तम् आननं मुखं येन स:, विकचे

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

घनकाननान्तरगतो गवां गणः
प्रथमप्रभुक्तयवसान् समुद्गिरन् ।
परिचालयन् हनुमनुच्चणं शनैः
अभिचर्व्य सर्वमुदरे न्यवीविशत् ॥४४॥

उन्मीलिततया प्रकाशिते ईक्षणे चक्षुषी यस्य स तादृशश्च सन्, चलिता निश्वासेनेव कम्पिता अङ्गानां संहतिः समूहो यस्मिन् कर्म्मणि तद्यथा तथा, रसनां जिह्वाम्, विपुलमधिकाम्, वितत्य विस्तार्य्य, समश्वसीत् छायायां स्थित्वा निरन्तरं श्वासमाविष्कृतवान् ।

अत्रापि स्वभावोक्तिरलङ्कारो वृत्त्यनुप्रासेन संसृज्यते ॥४३॥

वाङ्गाला—कुकुरगुलि सूर्य्येर गुरुतर तापे तापित हइया कोन छायाय अर्द्धशयित थाकिया, मुख विकृत करिया, चोख मेलिया, जिह्वाटाके अधिक बाड़ाइया एवं समस्त अङ्ग काँपाइया श्वास त्याग करितेछिल ॥४३॥

अन्वयः—गवां गणः घनकाननान्तरगतः शनैः अनुचणं हनुं परिचालयन् प्रथमप्रभुक्तयवसान् समुद्गिरन् (च सन्) अभिचर्व्य उदरे सर्वं न्यवीविशत् ॥४४॥

घनेति । गवां गणः, घनं निविड़ं यत् काननं वनं तस्यान्तरं मध्यं गतः, तत्रत्यच्छायायामवस्थित इत्यर्थः, शनैर्मन्दं मन्दम्, अनुचणं निरन्तरम्, हनुं गण्डावयवम्, परिचालयन् चर्व्वणार्थं सञ्चालयन्, प्रथममादौ प्रभुक्ता उदराभ्यन्तरे प्रवेशिता ये यवसा घासास्तान्, समुद्गिरन् उदरान्मुखाभ्यन्तरे आनयंश्च सन्, अभिचर्व्य सर्व्वतोभावेन तच्चर्व्वणं कृत्वा, उदरे, सर्व्वम्, न्यवीविशत् प्रवेशितवान् ।

अत्रापि स्वभावोक्तिरलङ्कारश्छेकानुप्रासवृत्त्यनुप्रासाभ्यां संसृज्यते ।

"घासो यवसम्" इत्यमरः । "यवसः पुंसि च" इति तत्रत्यटीकायां रघुनाथः । "गण्डौ कपोलौ तत्परा हनुः" इति चामरः ॥४४॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

পথিকো বৃহত্পথগমশ্রমাকুলঃ
পরিপীয় বারি নিবসন্ননাতপে।
শিশিরানিলোপজনিতাঙ্গনির্বৃতিঃ
বিবশো বভূব ভুবি নিদ্রিতো দ্রুতম্ ॥৪৫॥
রবিরশ্মিশুষ্করসগাত্রমার্জনীং
বিনিধায় মূর্দ্ধনি কৃষীবলাঃ খলে।
সততস্রুতপ্রসৃতঘর্ম্মবিন্দবঃ
হলিকৃষ্টভূমিগতশ্রমং ব্যপানয়ন্ ॥৪৬॥

বাঙ্গালা—গোসমূহ নিবিড় বনের ভিতরে থাকিয়া ধীরে ধীরে অনবরত গণ্ডযুগল গঞ্চালন করিয়া প্রথমভুক্ত ঘাস মুখে আনিয়া পুনরায় চিবাইয়া সে সমস্তই উদরের ভিতরে প্রবেশ করাইতেছিল ॥৪৪॥

অন্বয়ঃ—বৃহত্পথগমশ্রমাকুলঃ পথিকঃ বারি পরিপীয় অনাতপে নিবসন্ শিশিরানিলোপজনিতাঙ্গনির্বৃতিঃ বিবশঃ (চ সন্) দ্রুতং ভুবি নিদ্রিতঃ বভূব ॥৪৫॥

পথিক ইতি। বৃহতো দীর্ঘস্য পথো গমেন গমনেন যঃ শ্রমস্তেন আকুলঃ পথিকঃ, বারি নদ্যা জলং পরিপীয়, অনাতপে ছায়ায়াম্, নিবসন্নবতিষ্ঠমানঃ, শিশিরেণ শীতলেন অনিলেন বায়ুনা উপজনিতা অঙ্গানাং নির্বৃতিঃ শান্তির্যস্য স তথোক্তঃ, বিবশো নিদ্রাগমাদস্বাধীন-চেষ্টশ্চ সন্, দ্রুতম্, ভুবি, নিদ্রিতো বভূব।

অত্রাপি স্বভাবোক্তিরলঙ্কারশ্ছেকানুপ্রাসেন সংসৃষ্টঃ ॥৪৫॥

বাঙ্গালা—সুদীর্ঘ পথ গমন করায় পরিশ্রান্ত পথিকগণ নদীর জল পান করিয়া বৃক্ষের ছায়ায় বসিয়া বিশ্রাম করিতেছিল; এমন সময় শীতল বায়ু আসিয়া তাহাদের অঙ্গের শান্তি জন্মাইতে লাগিল বলিয়া, তাহারা অবশ হইয়া সত্বরই ভূতলে নিদ্রিত হইয়া পড়িতেছিল ॥৪৫॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

প্রথমাদ্দিনস্য পথিকঃ পথি ব্রজন্
প্রয়িয়াসিতস্থলসমীপগোঽপি সন্।
গমনীয়মল্পমপি মার্গমুন্মনাঃ
বুবুধে প্রভূতমিব দুঃসহশ্রমী ॥৪৭॥

অন্বয়ঃ—কৃষীবলাঃ মূর্দ্ধনি রবি-রশ্মি-শুষ্ক-রস-গাত্রমার্জনীং বিনিধায় সতত-স্রুত-প্রসৃত-ঘর্ম্মবিন্দবঃ (সন্তঃ) খলে হলিকৃষ্টভূমিগ-তৃণং ব্যপানয়ন্ ॥৪৬॥

রবীতি। কৃষীবলাঃ কৃষকাঃ, মূর্দ্ধনি মস্তকে, রবিরশ্মিভিঃ সূর্য্যকিরণৈঃ শুষ্কা রসা জলানি যস্যাঃ সা চাসৌ গাত্রমার্জনী চেতি তাম্, বিনিধায় বন্ধনেন সংস্থাপ্য, সততং স্রুতা নির্গতাঃ প্রসৃতা বিস্তৃতাশ্চ ঘর্ম্মবিন্দবো যেষাং তে তাদৃশাঃ সন্তঃ, খলে শস্যক্ষেত্রে, হলিভিঃ কৃষ্টা যা ভূমিঃ তত্র গচ্ছতি তিষ্ঠতীতি তত্তাদৃশং যত্তৃণং তৎ, ব্যপানয়ন্ উত্তোল্যোত্তোল্যাপনীতবন্তঃ।

অত্রাপি স্বভাবোক্তিরলঙ্কারঃ।

"খলং শস্যস্থানে শঠে ত্রিষু" ইতি ত্রিকাণ্ডশেষঃ ॥৪৬॥

বাঙ্গালা—কৃষকেরা মস্তকে সূর্য্যকিরণশুষ্ক গাত্রমার্জনী বন্ধন করিয়া হলকৃষ্ট ভূমিজাত তৃণ সকল তুলিয়া ফেলাইতেছিল, সেই সময়ে তাহাদের গাত্র হইতে অনবরত ঘর্ম্মবিন্দু নির্গত হইয়া বিস্তৃতভাবে নিঃসৃত হইতেছিল ॥৪৬॥

অন্বয়ঃ—পথিকঃ দিনস্য প্রথমাৎ পথি ব্রজন্ প্রয়িয়াসিত-স্থল-সমীপগঃ অপি দুঃসহশ্রমী উন্মনাঃ (চ) সন্ গমনীয়ং অল্পং অপি মার্গং প্রভূতং ইব বুবুধে ॥৪৭॥

প্রথমাদিতি। পথিকঃ, দিনস্য, প্রথমাৎ প্রভাতকালাদবধি, পথি ব্রজন্ গচ্ছন্, প্রযাতুমিষ্টং প্রয়িয়াসিতং যৎ স্থলং তস্য সমীপং গচ্ছতীতি সঃ, তাদৃশঃ সন্নপি, দুঃসহঃ শ্রমোঽস্যাস্তীতি স দুঃসহশ্রমী উন্মনা

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

ललितामला मृदुलपल्लवावली
प्रथमप्रकाशितमुखी नवा सती ।
प्रखरेण भास्करकरेण धर्षिता
प्रमुमोह साहसिकतावहिर्गमात् ॥४८॥

उत्सुकचित्तश्च सन्, गमनीयम्, अल्पमपि मार्गं पन्थानम्, प्रभूतं प्रचुरमिव, बुबुधे मेने । दुःसहश्रमीत्वादित्याशयः ।

अत्र अल्पस्य पथः प्राचुर्य्यबोधं प्रति दुःसहश्रमिपदस्यार्थो हेतुरिति पदार्थहेतुकं काव्यलिङ्गमलङ्कारः ।

दुःसहश्रमीति अतिशयार्थे मत्वर्थीय इन् । अतएव बहुव्रीहिणा तदर्थस्य बोधयितुमशक्यत्वात् "न कर्म्मधारयान्मत्वर्थीयः—" इत्यादिनिषेधस्य न प्रसक्तिरिति प्रागप्युक्तम् ॥४७॥

বাঙ্গালা—পথিকগণ দিনের প্রথম সময় হইতে পথে চলিতে থাকিয়া গন্তব্যস্থানের নিকটবর্ত্তী এবং উৎকণ্ঠিত হইয়াও অত্যন্ত পরিশ্রান্ত বলিয়া অল্প পথকেও অধিক বলিয়া মনে করিতেছিল ॥৪৭॥

अन्वयः—ललिता अमला नवा (च) मृदुलपल्लवावली साहसिकतावहिर्गमात् प्रथमप्रकाशितमुखी प्रखरेण भास्करकरेण धर्षिता (च) सती प्रमुमोह ॥४८॥

ललितेति । ललिता सुन्दरी, अमला निर्म्मला, नवा नूतना, च, मृदुला चासौ पल्लवानामावली श्रेणिश्चेति सा मृदुलपल्लवावली तादृशी रमणी च, साहसिकतया अल्पसमयेन साहसेन च वहिर्गमात् तरुलताशाखाभ्य उत्थानात् भवनाद्बहिर्गमनाच्च, प्रथमं प्रकाशितं मुखमाद्यभागो वदनञ्च यया सा तादृशी, अतएव प्रखरेण अतितीव्रेण, भास्करकरेण सूर्य्यकिरणेन विटहस्तेन च, धर्षिता ग्लाना आक्रान्ता च सती, प्रमुमोह अतीवविकला प्रमूर्च्छिता च बभूव ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

पादपादपि लताकुलादपि
भूतलादपि च दूरवर्त्तिनः ।
काचवज्जलधिवीचिचञ्चलं
निर्म्मलं किमपि तेज उद्गतम् ॥४९॥
शोषयन् रसमशेषवस्तुनः
तापयन् गृहगतान् जनानपि ।
दुःसहो दिनकरोऽकरोत्तदा
चण्डरोचिरिति नाम सार्थकम् ॥५०॥

अत्र कार्य्यसाम्येन विशेषणसाम्येन च तादृशपल्लवावल्यां तरुणी-व्यवहारसमारोपात् समासोक्तिरलङ्कारो वृत्त्यनुप्रासश्लानयोः संसृष्टिः ॥४८॥

বাঙ্গালা—নির্ম্মল, মনোহর, অল্পকালমাত্র নির্গত ও প্রথম প্রকাশিত মুখ তরুলতার নূতন পল্লবগুলি সূর্য্যের প্রখর কিরণে ম্লান হইয়া ক্রমে অতিবিকল হইতেছিল ॥৪৮॥

অন্বয়ঃ—কাচবৎ জলধিবীচিবৎ চঞ্চলং নির্ম্মলং (চ) কিং অপি তেজঃ দূরবর্ত্তিনঃ পাদপাৎ অপি লতাকুলাৎ অপি ভূতলাৎ অপি চ উদ্গতং ॥৪৯॥

पादपादिति । काचवत् लघुम्, जलधिवीचिवत् समुद्रतरङ्ग इव चञ्चलम्, निर्म्मलञ्च, किमपि तेजः, दूरवर्त्तिनो द्रष्टुर्दूरदेशस्थितात्, पादपाद्वृक्षसमूहादपि, लतानां कुलात् निचयादपि, भूतलादपि च, उद्गतमुत्थितमभूत् ।

अत्र श्रौतीपमालुप्तोपमयोः परस्परनिरपेक्षतया संसृष्टिः ।

इदन्तु तेजो निदाघकाले मध्याह्नसमये तीव्रातपे नितरामनुसन्धित्सूनां प्रत्यक्षीभवति ॥४९॥

বাঙ্গালা—কাচের ন্যায় হাল্‌কা, জলতরঙ্গের ন্যায় চঞ্চল ও নির্ম্মল, কোন তেজ দূরবর্ত্তী বৃক্ষ, লতা ও ভূতল হইতে উঠিতেছিল ॥৪৯॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

प्रायशस्त्रिजगतामकारणं
दृष्टिमेष मलिनो विलुम्पति ।
इत्यवेत्य किरणै रिवैरिरत्
अन्धकारमरुणो गुहान्तरे ॥५१॥

अन्वयः—तदा दुःसहः दिनकरः अशेषवस्तुनः रसं शोषयन् गृहगतान् अपि जनान् तापयन् (च) चण्डरोचिः इति नाम सार्थकं अकरोत् ॥५०॥

शोषयन्निति। तदा दुःसहो दिनकरः सूर्य्यः, अशेषवस्तुनो रसवतः धान्यादिसर्वपदार्थस्य, रसं शोषयन्, गृहगतानपि जनान् तापयंश्च सन्, चण्डं भीषणं रोचिरातपो यस्य स चण्डरोचिरिति नाम संज्ञाम्, सार्थकं व्युत्पत्त्यर्थयुक्ताम्, अकरोत्।

अत्र चण्डरोचिरिति नाम्नः सार्थकीकरणं प्रति प्रथमार्द्धगतपदार्थद्वयस्य हेतुत्वात् पदार्थहेतुकं काव्यलिङ्गमलङ्कारश्छेकानुप्रासेन संसृज्यते ॥५०॥

বাঙ্গালা—তৎকালে দুঃসহ সূর্য্য রসযুক্ত সমস্ত বস্তুর রস শোষণ এবং গৃহস্থিত জনগণেরও সন্তাপ জন্মাইতে থাকিয়া, 'চণ্ডরোচি' এই নাম সার্থক করিতেছিলেন ॥৫০॥

अन्वयः—एषः मलिनः अकारणं प्रायशः (एव) जगतां दृष्टिं विलुम्पति इति अवेत्य इव अरुणः किरणैः अन्धकारं गुहान्तरे ऐरिरत् ॥५१॥

प्रायश इति। एष मलिनः कृष्णवर्णः पापी च, अन्धकारः, अकारणम्, प्रायशो बाहुल्येनैव, जगतां जगद्वासिनां जनानां दृष्टिम्, विलुम्पति स्वभावेन मन्त्रौषधिप्रभावेण च अपहरति; इति अवेत्य ज्ञात्वेव, अरुणः सूर्य्यो राजा च, किरणैर्मयूखै राजपुरुषैश्च, अन्धकारं तिमिरं चौरञ्च, गुहान्तरे पर्वतकन्दरे कारागारे च, ऐरिरत् प्रेरितवान्।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

भास्वदंशुनिचयैस्तिरस्कृतः
सूर्य्यकान्तमणिरग्निमातनोत् ।
शक्तिमान् जगति को जनो मुधा
संसहेत हि परावमाननाम् ॥५२॥

अत्र कार्य्यसाम्येन सूर्य्ये राज्ञः अन्धकारे च चौरस्य व्यवहार-समारोपात् समासोक्तिरलङ्कारः, क्रियोत्प्रेक्षा चानयोरङ्गाङ्गिभावेन सङ्करः, सोऽपि च छेकानुप्रासवृत्त्यनुप्रासाभ्यां संसृज्यते ॥५१॥

বাঙ্গালা—এই মলিন অন্ধকার বিনাকারণে প্রায় জগদ্বাসী লোকেরই দৃষ্টি হরণ করে; ইহা জানিয়াই যেন সূর্য্য আপন কিরণদ্বারা অন্ধকারকে পর্ব্বতের গুহার ভিতরে প্রেরণ করিতেছিলেন ॥৫১॥

अन्वयः—सूर्य्यकान्तमणिः भास्वदंशुनिचयैः तिरस्कृतः (सन्) अग्निं आतनोत् । जगति शक्तिमान् कः हि जनः मुधा परावमाननां संसहेत ॥५२॥

भास्वदिति । सूर्य्यकान्तमणिः, भास्वतः सूर्य्यस्य अंशुनिचयैः किरणसमूहैः, तिरस्कृत आवृतो भर्त्सितश्च सन्, अग्निम्, आतनोत् विस्तारेणाविरकरोत् । जगति, शक्तिमान् प्रतिक्रियाप्रदर्शने समर्थः, को हि जनः, मुधा वृथा विनाकारणमित्यर्थः, परावमाननां परकृत-मपमानम्, संसहेत, अपि तु कोऽपि नेत्यर्थः ।

अत्रावरणभर्त्सनयोर्भेदेऽपि तिरस्कृत इति पदस्य श्लेषेणाभेदाध्य-वसायादतिशयोक्तिरलङ्कारः, सामान्येन विशेषसमर्थनरूपोऽर्थान्तर-न्यासश्चानयोरङ्गाङ्गिभावेन सङ्करः ।

रविकिरणस्पर्शे सूर्य्यकान्तमणेरग्नेराविर्भावः खलु स्वाभाविकः ॥५२॥

বাঙ্গালা—সূর্য্যকান্তমণি সূর্য্যের কিরণসমূহে আবৃত হইয়া অগ্নি

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

दीर्णभूविलमुपेत्य भास्करः
ध्वान्तशेषमिव हन्तुमुद्यतः।
नागलोकमगमद्विचक्षणः
नाथ्यलेशमपि नैव शेषयेत् ॥५३॥

तापितं रविकरेण सैकतं
तीव्रमुष्णकिरणं समासृजत्।
ताद्दृतेजसमुपेत्य यो जड़ः
दुर्भगः स खलु सर्वसम्मतः ॥५४॥

আবিষ্কার করিতেছিল। কারণ, জগতে শক্তিশালী কোন্ লোক বিনা কারণে পরকৃত অপমান সহ্য করে ? ॥৫২॥

अन्वयः—भास्करः दीर्ण-भू-विलं उपेत्य ध्वान्तशेषं (अपि) हन्तुं उद्यतः इव नागलोकं अगमत्। विचक्षणः नाथ्यलेशं अपि न एव शेषयेत् ॥५३॥

दीर्णेति। भास्करः सूर्य्यः, दीर्णाया निजकिरणैरेव विदारिताया भुवो भूमेः विलं गर्त्तम्, उपेत्य प्रविश्य, ध्वान्तस्य अन्धकारस्य शेषमवशिष्टमंशमपि, हन्तुमुद्यत इव सन्, नागलोकं पातालम्, अगमत् गन्तुमारभत स्म। विचक्षणो नीतिज्ञो लोकः, नाथ्यस्य हन्तव्यस्य लेशमल्पमंशमपि, नैव, शेषयेत् अवशिष्टतया रक्षेत्।

अत्र वाच्या भावाभिमानिनी क्रियोत्प्रेक्षालङ्कारः, सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासश्चानयोः परस्परनिरपेक्षतया संसृष्टिः ॥५३॥

বাঙ্গালা—সূর্য্য বিদীর্ণ ভূমির গর্ত্তের ভিতরে প্রবেশ করিয়া অবশিষ্ট অন্ধকারও যেন বিনাশ করিতে উদ্যত হইয়া পাতালে যাইতেছিলেন। কারণ, নীতিজ্ঞ লোক হন্তব্যের লেশও অবশিষ্ট রাখেন না ॥৫৩॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

शोषणाय सदनाङ्गने खगान्
खादतो विततशस्यसंहतिम्।
निस्वनन्नतिजरो जनो वसन्
कुञ्चिकाभिसरणैरसारयत् ॥५५॥

अन्वयः—सैकतं रविकरेण तापितं (सत्) तीव्रं उष्णकिरणं समासृजत्। यः तीक्ष्णतेजसं उपेत्य (अपि) जडः (एव तिष्ठति) सः खलु सर्वसम्मतः दुर्भगः ॥५४॥

तापितमिति। सैकतं सिकतामयं बालुकामयं स्थानमिति यावत्, रविकरेण सूर्य्यकिरणेन, तापितं सत्, तीव्रमुष्णकिरणम्, समासृजत् आविरकरोत्। यः पदार्थः, तीक्ष्णतेजसं पदार्थम्, उपेत्य प्राप्यापि, जड़ो निस्तेजा एव तिष्ठति, स खलु सर्वसम्मतो दुर्भगः।

अत्रापि सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः ॥५४॥

বাঙ্গালা—বালুকাময় স্থান সূর্য্যের কিরণে সন্তপ্ত হইয়া তীব্র উষ্ণ-কিরণ আবিষ্কার করিতেছিল। কারণ, যে পদার্থ, তীক্ষ্ণ তেজ পদার্থ পাইয়াও নিস্তেজই থাকে, সে পদার্থ সর্ব্বসম্মত দুর্ভাগ্য ॥৫৪॥

अन्वयः—अतिजरः जनः वसन् निस्वनन् (च) कुञ्चिकाभिसरणैः शोषणाय सदनाङ्गने वितत-शस्यसंहतिं खादतः खगान् असारयत् ॥५५॥

शोषणायेति। अतिजरः अतीववृद्धो जनः, वसन् अनतिदूर एवोपविशन्, निस्वनन् 'हुस्' इत्यादिरूपं शब्दं कुर्वन्, कुञ्चिकाया वंशशाखाया अभिसरणैः सर्वतः प्रचलनैः, शोषणाय शुष्ककरणाय, सदनाङ्गने गृहचत्वरे, वितता विस्तृता या शस्यसंहतिः धान्यादि-समूहस्ताम्, खादतः खगान् पक्षिणः, असारयत् अपसारितवान्।

अत्र स्वभावोक्तिरलङ्कारश्छेकानुप्रासेन संसृज्यते।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

भोज्यमुत्तमतमं स्वयं कृतं
सम्प्रशस्य समदन्तमन्तिके।
संस्थिता स्मितमुखी कुलाङ्गना
वल्लभं व्यजनवत्यतूतुषत् ॥৫৬॥

उपरि वद्धायाः कुञ्चिकाया बन्धनरज्जुसमाकर्षणेन तस्याः स्वयमिव सर्वतश्चलनमिति कारितप्रत्ययाभावेऽपि तदर्थप्रतीतिः ॥৫৫॥

বাঙ্গালা—শুকাইবার জন্য ঘরের উঠানে শস্য ছড়াইয়া রাখিয়াছিল; তখন পক্ষিগণ আসিয়া তাহা খাইতে লাগিয়া গিয়াছিল; এমন সময়ে কোন অত্যন্ত বৃদ্ধ লোক অদূরে বসিয়া 'হুইস্' ইত্যাকার শব্দ করিতে থাকিয়া এবং বাঁশের কঞ্চি সকল দিকে চালাইয়া সে পক্ষীগুলিকে তাড়াইতেছিল ॥৫৫॥

अन्वयः—अन्तिके संस्थिता स्मितमुखी कुलाङ्गना व्यजनवती (सती) स्वयं कृतं उत्तमतमं भोज्यं सम्प्रशस्य समदन्तं वल्लभं अतूतुषत् ॥৫৬॥

भोज्यमिति। अन्तिके संस्थिता, स्मितं मृदुहास्यं मुखे यस्याः सा स्मितमुखी, काचित् कुलाङ्गना, व्यजनवती तालवृन्तहस्ता, व्यजनं सञ्चालयन्ती सतीत्यर्थः स्वयमात्मना कृतं पक्वम्, उत्तमतममतीवोत्कृष्टम्, भोज्यं खाद्यम्, सम्प्रशस्य विशेषेण प्रशस्य, समदन्तं सम्यग्-भक्षयन्तम्, वल्लभं दयितम्, अतूतुषत् पाकनैपुण्येन व्यजनवातेन च सन्तोषितवती।

अत्र छेकानुप्रासोऽलङ्कारः ॥৫৬॥

বাঙ্গালা—কোন কুলবধূ নিজে যাহা পাক করিয়াছিল, তাহার প্রিয়পতি বিশেষ প্রশংসা করিয়া সেই অত্যুৎকৃষ্ট অন্ন ভোজন করিতেছিলেন; তখন সেই কুলবধূ তাঁহার নিকটে বসিয়া সহাস্য মুখে ব্যজন-সঞ্চালন করিতে থাকিয়া তাঁহাকে সন্তুষ্ট করিতেছিল ॥৫৬॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

प्रचण्डमार्त्तण्डमरीचिमण्डलैः
समाहतस्तप्तसमीरणैरपि ।
विगाहमानोऽपि सरोवरान्तरे
न देहदाहं स्म जहाति दन्तुरम् ॥५७॥
प्रभञ्जनो वह्निसमानस्पर्शनः
धरारजोराजिमुपाहरन् जवात् ।
सनिस्वनं नीरसपर्णमुद्वहन्
उदभ्रमत् सिन्धुजलभ्रमोपमम् ॥५८॥

अन्वयः—प्रचण्ड-मार्त्तण्ड-मरीचि-मण्डलैः तप्तसमीरणैः अपि समाहतः (जनः) सरोवरान्तरे विगाहमानः अपि (सन्) दन्तुरं देहदाहं न जहाति स्म ॥५७॥

प्रचण्डेति। प्रचण्डस्य प्रखरतया नितान्तभीषणस्य मार्त्तण्डस्य सूर्य्यस्य मरीचिमण्डलैः किरणसमू , तप्तसमीरणैरपि तन्मरीचिमण्डल-सन्तप्तवायुभिश्च, समाहतस्ताड़ितः भृशं स्पृष्ट इत्यर्थः, जनः, सरोवरान्तरे उत्तमजलाशयमध्ये विगाहमानो मज्जन्नपि सन्, दन्तुरं विषमं देहदाहं शरीरसन्तापम्, न जहाति स्म सहसा न तत्याज; तदतिरेकादिति भावः।

अत्र विगाहनरूपे कारणे सत्यपि देहदाहत्यागरूपतत्कार्य्यानुत्पत्तेर्विशेषोक्तिरलङ्कारः, वृत्त्यनुप्रासश्छेकानुप्रासश्चेत्येतेषां संसृष्टिः।

इतःप्रभृति पञ्चसु श्लोकेषु वंशस्थविलं वृत्तम् ॥५७॥

বাঙ্গালা—প্রচণ্ড সূর্য্যের কিরণ ও সন্তপ্ত বায়ুর সংস্পর্শের পরে মানুষ সরোবরমধ্যে অবগাহন করিতে থাকিয়াও সহসা দেহের দারুণ সন্তাপ ত্যাগ করিতে পারিতেছিল না ॥৫৭॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

क्कतक्षणं प्राणपतिं प्रवासिनम्
अवीक्ष्य साक्षाद्युवतिरुपागतम्।
सुदुःसहोऽन्तर्ज्वलितो महातपः
जिगाय मध्यन्दिनभास्वदातपम् ॥५९॥

अन्वयः—वह्निसमानमर्म्मा नः प्रभञ्जनः जवात् धरारजोराजिं उपाहरन् सनिस्वनं नीरसपर्णं उद्वहन् (च) सिन्धुजलभ्रमोपम उदभ्रमत् ॥५८॥

प्रभञ्जन इति। वह्निसमानमर्म्मनः अग्नितुल्यस्पर्शः, प्रभञ्जनो वायुः, जवाद्वेगात्, धराया भूमे रजोराजिं धूलिसमूहम्, उपाहरन्नाददानः, सनिस्वनं सशब्दम्, नीरसपर्णं वृक्षस्य शुष्कपत्रम्, उद्वहन्नुत्तोलयंश्च सन्, सिन्धुजलभ्रमः समुद्रजलावर्त्त उपमा यस्य कर्म्मणि इति तद्यथा तथा, उदभ्रमत् घूर्णितवान्।

अत्र स्वभावोक्तिरलङ्कारः, समासगतमार्थोपमाद्वयञ्चेत्येतेषामङ्गाङ्गि-भावेन सङ्करः, सोऽपि च छेकानुप्रासेन संसृज्यते ॥५८॥

বাঙ্গালা—অগ্নির তুল্য উষ্ণস্পর্শ বায়ু বেগে ভূতলের ধূলি লইয়া, শব্দের সহিত শুষ্ক পত্র বহন করিতে থাকিয়া, সমুদ্রের জলাবর্ত্তের ন্যায় (ঘোলার মত) ঘুরিতেছিল ॥৫৮॥

अन्वयः—क्कतक्षणं प्रवासिनं प्राणपतिं साक्षात् उपागतं अवीक्ष्य युवतेः अन्तर्ज्वलितः सुदुःसहः महातपः मध्यन्दिनभास्वदातपं जिगाय ॥५९॥

क्कतेति। क्कतः क्षण आगमनसमयनिर्द्दिष्टो येन तम्, प्रवासिनं विदेशस्थम्, प्राणपतिम्, साक्षादुपागतमुपस्थितम्, अवीक्ष्य अनवलोक्य, स्थिताया इति शेषः; युवतेः, अन्तः हृदयाभ्यन्तरे ज्वलितः, सुदुःसहो-महातपः तीव्रद्योतः, मध्यन्दिनभास्वतो मध्याह्नसूर्य्यस्यातपं द्योतम्, जिगाय जितवान्।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

क्षत: कुलायालयकोकिलेन य:
कुहूरव: काननतोऽन्तरेऽन्तरे ।
वियोगिनीनां स मनस्युहूरिति
ततान पीड़ापिशुनं प्रतिस्वनम् ॥६०॥

अत्र सन्तापविरहवेदनयोर्भेदेऽपि मध्यातपपदेन तयोरभेदाध्यवसायादेकातिशयोक्तिरलङ्कार:, जयासम्बन्धेऽपि तत्सम्बन्धोक्तेरपरा चातिशयोक्ति:, छेकानुप्रासश्चेत्येतेषां मिथो निरपेक्षतया संसृष्टि: ॥५९॥

বাঙ্গালা—প্রাণতুল্য প্রিয়পতি সেই সময়ে আসিবেন এইরূপ নির্দ্দেশ করিয়া বিদেশে গিয়াছিলেন ; কিন্তু তখনও তাঁহাকে প্রত্যক্ষে উপস্থিত না দেখিতে পাওয়ায় যুবতির হৃদয়ের ভিতরে অতিদুঃসহ বিশাল আতপ, মধ্যাহ্নসূর্য্যের আতপকে জয় করিতেছিল ॥৫৯॥

अन्वय:—कुलायालयकोकिलेन अन्तरे अन्तरे काननत: य: कुहूरव: क्षत: स: वियोगिनीनां मनसि उहू: इति पीड़ापिशुनं प्रतिस्वनं ततान ॥६०॥

क्षत इति । कुलायो नीरमालयोऽवस्थितिस्थानं यस्य स चासौ कोकिलश्चेति तेन, अन्तरे अन्तरे मध्ये मध्ये, काननतो वनात्, य: कुहूरव: क्षत:, स कुहूरव:, वियोगिनीनां विरहिणीनां रमणीनां मनसि, 'उहू:' इति इत्थम्, पीड़ापिशुनं वियोगवेदनासूचकम्, प्रतिस्वनं प्रतिध्वनिम्, ततान विस्तारयाञ्चकार ; कोकिलरवस्योद्दीपकत्वात् प्रतिध्वनेश्च प्रायेण ध्वन्यनुरूपत्वादित्याशय: ।

अत्र तादृशप्रतिस्वनोत्पादनासम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिरलङ्कार:, छेकानुप्रासो वृत्त्यनुप्रासश्चेत्येतेषां संसृष्टि: ।

"कुलायो नीरमस्त्रियाम्" इति "पिशुनौ खलसूचकौ" इति चामर: ॥६०॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

বহিঃ প্রতপ্তং তপনাতপৈর্বপুঃ
সুশীতলং স্বেদজলং কিলাকরোৎ।
অনঙ্গতপ্তং পথিকাঙ্গনামনঃ
নিরুদ্ধমপ্যশ্রুজলং ন কিঞ্চন ॥৬১॥

বাঙ্গালা—নীরবাসী কোকিল মধ্যে মধ্যে বন হইতে যে 'কুহুরব' করিতেছিল; তাহাই বিরহিণী রমণীগণের হৃদয়ে 'উহু' ইত্যাকার বিয়োগ-বেদনাসূচক প্রতিধ্বনি উৎপাদন করিতেছিল ॥৬০॥

অন্বয়ঃ—স্বেদজলং কিল তপনাতপৈঃ বাহ্যঃ প্রতপ্তং বপুঃ সুশীতলং অকরোৎ। (কিন্তু) নিরুদ্ধং অপি অশ্রুজলং অনঙ্গতপ্তং পথিকাঙ্গনামনঃ কিঞ্চন শীতলং ন অকরোৎ ॥৬১॥

বহিরিতি। স্বেদজলং ঘর্ম্মবারি কর্ত্তৃ কিল, তপনাতপৈঃ সূর্য্যদ্যোতৈঃ, বহিঃ প্রতপ্তম্, বপুঃ শরীরম্, সুশীতলমকরোৎ। কিন্তু, নিরুদ্ধম্ অন্তরে অবরুদ্ধমপি, অশ্রুজলং কর্ত্তৃ, অনঙ্গেন কামেন তপ্তম্, পথিকাঙ্গনায়াঃ পান্থস্ত্রিয়াঃ বিরহিণ্যা রমণ্যা মনঃ, কিঞ্চন কিমপি, শীতলম্, ন অকরোৎ।

অত্র স্বেদজলাশ্রুজলয়োর্যোগ্যতাভেদাদিনা বিরূপয়োঃ সঙ্ঘটনয়া বিষমালঙ্কারঃ, অশ্রুজলরূপকারণে সত্যপি শীতলত্বরূপতৎকার্য্যানুৎপত্তেৰ্বিশেষোক্তিশ্চানয়োরঙ্গাঙ্গিভাবেন সঙ্করঃ, সোঽপি চ ছেকানুপ্রাস-বৃত্ত্যনুপ্রাসাভ্যাং সংসৃজ্যতে ॥৬১॥

বাঙ্গালা—ঘর্ম্মজল সূর্য্যের তাপে বাহিরে সন্তপ্ত শরীরকে সুশীতল করিতেছিল বটে; কিন্তু অশ্রুজল অন্তরে অবরুদ্ধ করিলেও বিরহিণী রমণীর কামসন্তপ্ত মনকে ঈষৎ শীতলও করিতেছিল না ॥৬১॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

भानोर्भानुमहोष्णतामनुभवन् पत्रातपत्रान्तरात्
यानश्रान्तनितान्ततान्तकरणो गच्छन् स मध्यन्दिने ।
स्वच्छे व्योमनि यामिनीमणिमिव श्रीद्वारकापत्तनं
सिन्धौ सौधविभाविभासितसितं दूराद्ददर्शादरात् ॥६२॥

इति श्रीहरिदासकृतौ रुक्मिणीहरणे महाकाव्ये
मध्याह्नवर्णनं नाम सप्तमः सर्गः ॥७॥

—०:०:०—

अन्वयः—मध्यन्दिने यान-श्रान्त-नितान्त-तान्त करणः स पत्रातपत्रान्तरात् भानोः भानुमहोष्णतां अनुभवन् गच्छन् (च) स्वच्छे व्योमनि यामिनीमणिं इव सिन्धौ सौध-विभा-विभासित-सितं श्रीद्वारकापत्तनं दूरात् आदरात् ददर्श ॥६२॥

इत्थं प्रासङ्गिकं मध्याह्नवर्णनं समाप्य प्रकृतमनुसरन् भाविसर्गञ्च सूचयन् प्राक्प्रस्थितस्य रुक्मिण्या दूतभूतस्य ब्राह्मणस्य द्वारकानगरीदर्शनमाह भानोरिति । दिनस्य मध्यं मध्यन्दिनं तस्मिन् मध्यन्दिने मध्याह्नकाले, यानेन दीर्घपथगमनेन श्रान्तानि आयस्तानि नितान्ततान्तानि अत्यन्तक्लान्तानि च करणानि चरणादीनीन्द्रियाणि यस्य सः, स रुक्मिण्या दूतभूतो ब्राह्मणः, पत्रातपत्रं पर्णमयं यत् छत्रं तस्यान्तरात् मध्यादपि, भानोः सूर्य्यस्य, भानूनां किरणानां महोष्णतामनुभवन्, गच्छन् रुक्मिण्या दौत्यावश्यकत्वात् द्वारकां प्रति व्रजंश्च सन्, स्वच्छे निर्म्मले व्योमनि आकाशे, यामिनीमणिं चन्द्रमिव, सिन्धौ समुद्रे, सौधानां राजसदनानां या विभा शुभ्रप्रभा तया विभासितो विशेषेण प्रकाशितः सितः शुभ्रवर्णो यस्य तत्, श्रीद्वारकापत्तनं श्रीमद्द्वारकानगरम्, दूरादेव, सौन्दर्य्यातिशयेनादरात्, ददर्श ।

अत्र श्रौतोपमालङ्कारः, छेकानुप्रासो वृत्त्यनुप्रासश्च इत्येतेषां संसृष्टिः ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

"भानु: किरणसूर्य्ययो:" इति विश्व:। "करणं साधकतमं चैत्र-गात्रेन्द्रियेष्वपि" इत्यमर:।

द्वारकाया: कृष्णाधिष्ठानात् देवस्थानतया श्रीपूर्वकमभिहितं तत्, "देवं गुरुं गुरुस्थानं चैत्रं चैत्राधिपं तथा। साध्यं सिद्धाधिकारांश्च श्रीपूर्वं समुदीरयेत् ॥" इति स्मृते:। अत्र गुरुस्थानमिति गुरुपदं देवस्याप्युपलक्षणमिति गुरव:। श्रीमत्त्वे लक्षणा वा।

मध्यन्दिनमिति "पृषोदरादयश्च" इति निपात:। "गुणे शुक्लादय: पुंसि गुणि लिङ्गास्तु तद्वति" इत्यमरोक्तिप्रामाण्यात् सितशब्दोऽत्र गुणवचन:।

शार्दूलविक्रीड़ितं वृत्तम् ॥६२॥

अद्यार्त्तंवस्विन्दुमिते शकाब्दे सौराश्विने पञ्चदशे दिने च।
वङ्गानुवादान्वयसंयुतेयं समापिता सप्तमसर्गटीका ॥

इति श्रीहेमचन्द्रतर्कवागीशविरचितायां रुक्मिणीहरणटीकायां
विचित्रायां सप्तम: सर्ग: ॥०॥

বাঙ্গালা—রুক্মিণীর দৌত্যকার্য্য করিবার জন্য মধ্যাহ্নকালে সুদীর্ঘ-পথ গমন করায় সেই ব্রাহ্মণের প্রায় সমস্ত ইন্দ্রিয়ই পরিশ্রান্ত ও অত্যন্ত ক্লান্ত হইয়াছিল এবং তিনি পত্রময় ছত্রের অভ্যন্তর হইতেও সূর্য্যকিরণের গুরুতর উষ্ণতা অনুভব করিতেছিলেন; তথাপি তিনি কার্য্যের গুরুত্ব-বশতঃ গমন করিতে থাকিয়া দূর হইতেই আদরপূর্ব্বক দ্বারকানগরী দর্শন করিলেন। নির্ম্মল আকাশে পূর্ণচন্দ্রের ন্যায় সমুদ্রমধ্যে সেই নগরীটী বিরাজ করিতেছিল এবং অট্টালিকাসমূহের শুভ্রবর্ণে সেই নগরীটীর শুভ্রবর্ণ আরও উদ্ভাসিত ছিল ॥৬২॥

—o—

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

अष्टमः सर्गः ।

——:०:——

नाविको गुरुगम्भीरं कल्लोलकुलसङ्कुलम् ।
अशान्तं तं सरस्वन्तं नाव्यमेनमतीतरत् ॥१॥
ततार तरणिस्तीरे तरण्यातपतापितः ।
शोणपाषाणसोपाने पानेच्छापीनपीड़ितः ॥२॥
द्वारकान्तःसभाद्वारं प्रतिहारिप्रदर्शितम् ।
शेषशायिसभाशेषं विशन्नेष निरैक्षत ॥३॥
घनः स्वानो घनस्येव नर्त्तयन् शिखिदम्पती ।
सभावसानं संसूच्य शङ्खस्योदचरच्चिरम् ॥४॥
शृङ्गादिव तुषाराद्रेः स्रोतस्त्रिस्रोतसोऽम्भसाम् ।
केशवस्य सदस्यानां गोपुरात् परिनिर्ययौ ॥५॥
जनौघं तं विनिर्यान्तम् अविश्रान्तप्रसारिणम् ।
अतिचक्राम पार्श्वेन शैलसिन्धुमिव द्विपः ॥६॥
प्रविश्य नगरान्तः स बभूव हृषितान्तरः ।
अदृष्टपूर्वसौन्दर्य्य-विलोकलोललोचनः ॥७॥
लक्ष्मीपतेः पुरो लक्ष्मीम् अचिलक्ष्योचकार सः ।
स्वच्छेऽमरावतीच्छायाम् अम्बुधाविव विम्बिताम् ॥८॥
रत्नावलीविलम्बिन्यः कान्ताश्वारुमरीचयः ।
चत्वरेऽन्योन्यसंयोगात् इन्द्रेष्वासश्रियं दधुः ॥९॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

विशेषरत्नशीतांशु-निःशेषनिहतश्रमः।
नापेक्षते स्म सुस्थः सन् आकर्षव्यजनानिलम् ॥१०॥

विचिन्वन् शार्ङ्गधन्वानं लुलोके लोकमण्डले।
इदन्तयाऽज्ञातमपि प्रभावसंस्तुतं तु तम् ॥११॥

गिरीशगिरिशुभ्रांशु-रेवतीजानिपाणिना।
गङ्गाम्बुना गृहीताङ्गं प्रवाहमिव यामुनम् ॥१२॥

सवारिवारिदश्यामं पीतकौषेयवाससम्।
तप्तकाञ्चनसन्नद्ध-महानीलमणिद्युतिम् ॥१३॥

प्रियङ्गुकुसुमासन्ने कुन्दपुष्पमिव स्फुटम्।
बिभ्रतं नीलनासान्ते शुक्तिमौक्तिकमेककम् ॥१४॥

जगत्तिलकतां तस्य बोधयन्तमिवाखिलान्।
ललाटे तिलकं कान्तं धारयन्तं छिदान्तरम् ॥१५॥

भक्तपापपशुच्छेद-यूपेनेवोज्ज्वलात्मना।
तिलकेन ललाटान्तः अथवा भान्तमुच्चकैः ॥१६॥

मणिचूडाचरच्चारु-मरीचिचयचुम्बितम्।
प्रभया बर्हिणो बर्हं गर्हयन्तमिवात्मनः ॥१७॥

वनजाममलां मालां पीवरोरःस्थलस्थिताम्।
गोपीवियोगविषम-शोकलक्ष्मेव बिभ्रतम् ॥१८॥

गोपाङ्गनास्तनाघात-कलङ्कमिव वक्षसि।
श्रीवत्सलक्षणं स्पष्टं दधानं चन्दनाचितम् ॥१९॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

सूक्ष्मत्वेनाखिलं कार्य्यम् अस्ति कारणवस्तुनि ।
सांख्योक्तमिति गृह्णन्तं कन्दर्पजनकं स्फुटम् ॥२०॥

असत्यामपि योषायां जनयन्तं सुतं स्मरम् ।
अजातेनापि जातेन त्रिजगत्प्रथितोक्ततम् ॥२१॥

स्मितदन्तसितद्योत-स्नातां रोमाङ्कुरावलीम् ।
कैशोरस्येव सीमानं बिभ्राणं दन्तवाससि ॥२२॥ (कुलकम्)

अनंसात् सहसा शौरिः निनंसुमिममागतम् ।
अहो ! लोकललामस्य विनयः खल्वलङ्कृतिः ॥२३॥

आतिथेयोऽतिथेस्तस्य नयविद्विनयान्वितम् ।
अन्वयुङ्क्त स कल्याणं कल्याणाकरदर्शनः ॥ ४॥

सोऽपि फुल्लमनाः शौरिम् अनामयमनारतम् ।
पृच्छन्नुत्तरमादत्त दत्तोत्तरमनःसुखम् ॥२५॥

क्वणत्कङ्कणहस्ताभिर्वामाभिरुपवीजितः ।
चतुर्विधमुदारान्नं मुदा सुस्वादु सस्वदे ॥२६॥

हेमपर्य्यङ्कशय्याङ्के निषण्णे सुहसानने ।
विश्रान्ते तत्र गोविन्दः पादपीठमविन्दत ॥२७॥

कुतस्त्यः कथमत्रेति पिपृच्छन्तं निनंसया ।
बलिच्छलमृतेऽप्येनं वामनीकृतविग्रहम् ॥२८॥

कोमलस्पर्शिना शीर्षं स विप्रः पाणिना स्पृशन् ।
आचख्ये सस्मितं कृष्णं श्वेतयन् दन्तरोचिषा ॥२९॥ (युग्मकम्)

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

अनन्यगो गुणस्तेऽसौ रूपञ्च नयनामृतम्।
मन्ये परस्परस्पर्द्धि देहे साम्राज्यमिच्छति॥३०॥

सजलाभ्रतनो! बिभ्रत् अकाले सकलाः कलाः।
अतिचक्रमिथ क्षीणम् आचतुर्द्दशि शीतगुम्॥३१॥

अनन्तगुणकान्तस्य कान्तिः किन्तु महासुखम्।
स्वर्ण सौरभमित्यस्य प्रवादस्य निदर्शनम्॥३२॥

चापल्यं शोभते बाल्ये धैर्य्यं वैधुर्य्यसूचकम्।
बुद्ध्यङ्कुरो हि संसार-प्रवाते न स्थिरायते॥३३॥

जनानां यौवने जातु विलासो नहि दुष्यति।
नवीनस्य प्रवालस्य शोणतैव हि शोभते॥ ४॥

वलीपलितनिःसारे कृत्रिमश्रीर्न शस्यते।
नहि शुष्कसरोजस्य दत्तं मध्वपि कान्तिकृत्॥३५॥

अकाले तु विलासानां जलदानाञ्च दर्शनम्।
न चोपकुरुते किञ्चित् प्रत्युतोद्वेजयत्यलम्॥३६॥

वर्त्तमाना प्रवृत्तिश्चेद्धर्म्मे शर्म्मकरी चिरम्।
वृद्धे विषयतां याति क्षुधातुरिव मानवः॥३७॥

धर्म्मसमीरसद्वासः प्राप्य नैया तनूतरिः।
संसारसागरोत्ताल-कल्लोलैर्न विहन्यते॥३८॥

शैशवे साधिता शिक्षा वर्त्तते पुरुषायुषम्।
वल्लीवृततरोर्बाल्ये तल्लक्ष्म चिरमक्षयम्॥३९॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

शिक्षया खलु लोकोऽयं प्राधान्यमुपगच्छति।
रोचिरेव हि रत्नानाम् उपलेभ्योऽतिरिच्यते ॥४०॥

अनुकार्य्यत्वमाधातुं यतेत नानुकर्त्तृताम्।
राममेव हि संस्तौति नटं नास्याभिनायिनम् ॥४१॥

यं यं प्रार्थयते लोकः तं तं सन्दर्शयन् गुणम्।
अत्यच्छः शिक्षया याति नृणामादर्शतां नरः ॥४२॥

उपकारो न बन्धूनां नापकारो च वैरिणाम्।
स्वकार्य्याशक्तः परवान् शवस्योपैति तुल्यताम् ॥४३॥

तर्ज्यमानोऽपि संसत्सु प्रसादमभिलाषुकः।
पराधीनविड़ालोऽयं खादत्यत्कोचमूषिकम् ॥४४॥

परप्रयोजनाधीन-वृत्तिः परपदं लिहन्।
परार्थं जागुरूकस्य शुनकः परवानपि ॥४५॥

उच्छिष्टप्रार्थिनः सिंहात् ऐहिकादन्यजन्मनि।
स्वातन्त्र्यार्थं हतः श्वापि श्रेयान् मानुष्यपूर्वकम् ॥४६॥

स्वभीतान् प्राणिनः कुर्वन् वृत्तिमान् स्वयमर्ज्जितैः।
आश्रयन् गहनं दुर्गं धन्यः पुरुषकेशरी ॥४७॥

धर्म्मः समुदितः सोऽयं कैशोरे त्वयि वर्त्तते।
उदयत्येव हि शोभेन्दौ गुणो नापेक्षते वयः ॥४८॥

हित्वा हेतुमनर्थानाम् अविद्यामिव वैरिताम्।
तदास्पदात् स्थितो दूरे मुक्तात्मा प्रकृतेरिव ॥४९॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

चिरशान्तमहाऽमित्रः मकरध्वजवृत्तिमान् ।
रामाभिलषितासक्तिः अद्वितीयोऽधुना भवान् ॥५०॥

इत्यालप्य द्विजन्मासौ जन्मावधि यशस्विनम् ।
सुस्पर्शमस्पृशत् पाणिः शीतलेन तलेन तम् ॥५१॥

ततस्तत्महानन्दं सुचिरं रुचिरं वचः ।
स्मरन् स्मररुचिर्विप्रम् अदः समदमूचिवान् ॥५२॥

तवास्वाद्य सुधास्वादां सूक्तिं युक्तिसहामिमाम् ।
कृष्णोऽपि विशदात्मास्मि प्रक्षालितमनोमलः ॥५३॥

खगोऽपि कानने कौति कीचकोऽपि प्रकूजति ।
वक्ति यः परभावज्ञः स वक्ता भक्तिभाजनम् ॥५४॥

द्विजः परभृतः स स्याद्यश्चोन्मादयति स्वनैः ।
स्वतन्त्रः स द्विजो यस्तु तैरेव शमयत्यलम् ॥५५॥

असम्पृक्तः परो बन्धुः बलं निर्भृति रक्षकम् ।
अनाचार्यो ज्ञानदाता यथेष्टं यो हितं वदेत् ॥५६॥

अस्मिन् संसारकान्तारे शुभपादपमर्द्दिनम् ।
वागङ्कुशो निगृह्णाति मनोदन्तिनमुल्वणम् ॥५७॥

प्रतिभानुगृहीतस्य शिक्षा नोपैति योग्यताम् ।
तपने राजति व्योम्नि नहि दीपमपेक्षते ॥५८॥

सर्वं निविशते वस्तु सूक्ष्मा सूचिरभिन्दती ।
अतपन्ती रवेर्मूर्त्तिः प्रतिभा भासयत्यपि ॥५९॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

अनुक्तामपि सामर्थ्यात् पदवीमवगाहते ।
प्रतिभा नरमादाय शिक्षितेव तुरङ्गमो ॥६०॥

सर्वैरदृष्टसन्मूर्त्तिः अन्तरप्रतिवासिनी ।
अश्रान्तगत्याप्यश्रान्ता प्रतिभोपैति सज्जनम् ॥६१॥

अविशन्नपि तत्त्वेषु तीक्ष्णेन मतितेजसा ।
भासयत्यखिलं विद्वान् भास्वानिवोदयं गतः ॥६२॥

शून्यमापद्यमानोऽपि परार्थमनिशं भ्रमन् ।
न केन स्तूयते विद्वान् शान्तमूर्त्तिस्तमोनुदः ॥६३॥

उच्चैर्वादोऽयमस्मासु क्षुद्रेषु युज्यते न ते ।
मण्डूके करिसाम्योक्तिः भङ्गीभेदेन गर्हणा ॥६४॥

हितमस्मादृशान् वक्तुम् उपस्थानं भवादृशम् ।
आलोकनाय लोकानां भ्रमतीन्दुस्तमोपहः ॥६५॥

इत्यालप्य व्यरंसीत् स नताननसरोरुहः ।
श्रोतुमन्यां ततो वाचं व्यग्रता-पिशुनेक्षणः ॥६६॥

ब्रुवतः स्वरमाधुर्य्यं विभाव्य च दृशो. श्रियम् ।
तासां वाचामतृप्तस्य ब्राह्मणः पुनरालपत् ॥६७॥

लोकेऽस्मिन्नातिदुर्लभाः अर्थाः परिजनाश्च वा ।
गतः पुनरनावर्त्ती समयो हि सुदुर्लभः ॥६८।

अधिक मेऽभवन्नब्दा अविदन्तो विदन्त्यदः ।
वस्तुतस्ते न वर्द्धन्ते क्षीयन्ते हि शरीरिणाम् ॥६९॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

नानाभावां विजानानः ईदृशीं जागतीं गतिम् ।
न केवलोपदेशाय देशेऽस्मिन् गतिमादिशम् ॥७०॥

विदर्भाधीशितुर्धन्या कन्या कन्यासु मन्यते ।
व्याख्येया सा यया सम्यङ्नेच्यते वागमूदृशी ॥७१॥

नापि स्यादुपमोन्नेया समानविषया हि सा ।
अद्वैतत्वादसामान्यात् जगत्स्वेषा विलक्षणा ॥७२॥

यच्च यदिन्द्रियग्राह्यं तत्त् तेनैव तायते ।
व्यक्तीभवति वाङ्मात्रात् न रूपं सम्यगात्मनि ॥७३॥

आहरन्त्योः परं रूपं दृशोर्यदि कृतार्थता ।
तस्या एव तदा रूपं साक्षात्कृत्येति मन्यते ॥७४॥

अस्थानं नीयमानेव समीरेण तरङ्गिणी ।
नितान्तचञ्चला बाला प्रेषयामास मामसौ ॥७५॥

विकसन्नलिनीकान्ता सरसी च नवाङ्गना ।
सारस्य वयसः पातात् शान्तापि तरलायते ॥७६॥

मतो स्वतः प्रेति पतिं स्वयोग्यं
सुधायते तत्र गुरूपदेशः ।
मन्दाकिनी शैलपतेर्निपत्य
ययावजस्रं स्वयमेव सिन्धुम् ॥७७॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

पात्रस्य ते पत्रमपत्रपाकुला
ददाविदं रागनिदर्शनं मया ।
वल्ली विलोला नवसूनशालिनी
विकीर्य्य गन्धं श्रयते हि पादपम् ॥ ८८॥

इत्यर्चिवानुचितमेव यदा प्रदाय
शोणोत्पलामलकरे लिपिमास्त तूष्णीम् ।
उच्चाशयाकुलतया गुरुशङ्कया च
शौरिः स्म वाचयति तां ललिताक्षराङ्काम् ॥ ८९॥

इति श्रीहरिदासकृतौ रुक्मिणीहरणे
महाकाव्ये संलापो नामो
अष्टमः सर्गः ॥०॥

—०—

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

नवमः सर्गः ।

——:०:——

स्मरसुन्दर ! स्मरणमात्रवल्लभ !
रमणीप्रियातिरमणीयसद्गुण ! ।
शशि-चन्द्रमः-सम-यशोऽतिविक्रम !
हृदयाम्बरे पदयुगं निधेहि मे ॥१॥

विनिवेदने गुरुषु गौरवक्षतिः
स्वयमर्थने चपलता च धृष्टता ।
त्रपया स्थितिस्तु परमात्मवञ्चना,
वद नाथ ! किन्नु करणीयमत्र मे ॥२॥

गलितत्रपामलमलभ्यलालसां
वद मां तथापि परमाश्रयो भवान् ।
ललना लताप्यमलमूलशालिनी
धवमन्तरेण नहि जातु जीवति ॥३॥

विधिना तव प्रविहितं हितं हरे !
इममंशमुज्ज्वलरुचे ! रुचीकरम् ।
शुनको न कोऽपि हरतामनीहया
तदहो गुहाशय ! विजागृहि द्रुतम् ॥४॥

पशुरस्मि हीनसदसन्मतिः किल
पशुपाल ! पालयतु मां तथार्थिनीम् ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

अशिशुः सती नहि यथा पशूपम-
शिशुपालपाणिवशगामिनी स्त्रियै ॥५॥
ललनाशतेन ननु नाथ ! नाथितः
परिहर्त्तुमर्हसि न मामकिञ्चनाम् ।
बृहतोः समेत्य सरितः पयोनिधिः
घनवारिबिन्दुमभिविन्दते न किम् ॥६॥
पुरुषोत्तमो गुणितमः खलालसाम्
अबलाधमां न विगुणां विनिन्द माम् ।
कमते न किन्नु सरमा रमा-बलिं
भुवि लालसा निरवधिर्हि जन्मिनाम् ॥७॥
बहुचारचारणगणाननैरितः
चिरभावनारचितविश्वगोचितः ।
अनिशं दृशोरविषयं गतोऽपि सन्
उपकण्ठमर्पित इव प्रभासि मे ॥८॥
ननु कृष्णचन्द्र ! समुदित्य नित्यशः
ललितेऽत्र शून्यहृदये करं किरन् ।
अनिनार्थिनं जनमिमं यशःसितः !
कुमुदं प्रमोदय चिर-स्वयाचकम् ॥९॥
त्वदधीनवृत्तिरधुनात्मना अपि
नहि कैतवादिति भवन्तमालपम् ।
अनिधीयते जगति यत्र जीवनं
सुजनो न जातु किल तं हि वञ्चति ॥१०॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

इदमत्र रासरसिक ! स्मर स्वयम्
अधिकं ब्रवीमि भवतेऽहमीदृशम्।
परितो हि सौरभभरैः प्रसारिणि
सुमना मनागपि चलेत नालिनम् ॥११॥

अनुरागसूत्रबलितां चलाचलां
सुचिराय चारुचरणान्तचारिणीम्।
अपरार्थितामपरगां शुचिप्रियां
वनमालिकां स्वदयितामवेहि माम् ॥१२॥

दमघोषसूनुवशतागमान्मम
मरणं वरं मरणमेव वा भवेत्।
किमु कौमुदी बलति भास्वता धृता
मनसोऽनुकूलमिह जन्तुजीवनम् ॥१३॥

यदि नो भवान् यदुपते ! घनद्युते !
चपलामिमां प्रकुरुषे स्वचारिणीम्।
अचिरप्रभेव भविता स्वहेतुतः
क्षणमुल्लसन्त्यपि लयं गता पुनः ॥१४॥

प्रणिशम्य कोकिलकुलस्य काकलीम्
अवलोक्य वोपचितशीतदीधितिम्।
परिदृश्यसे च परिरभ्यसे न तु
किमनङ्गवन्नु भवतोऽङ्गसंहृतिः ॥१५॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

गृहमाम्बिकेयमभिसायमागता
भजते विवाहदिवसे कुमारिका ।
इदमस्ति नः किल कुलव्रतं विभो !
तदहो ! मयापि करणीयमादरात् ॥१ ॥

व्रजितास्मि तत्र ससखी परश्शतैः
परितो वृता प्रहरिभिर्धृतायुधैः ।
हर मां मनोहर हरे ! पराक्रमी
दलयन् परान् खगपतिः सुधामिव ॥१७॥

स्वविचर्वितेक्षुरसमुत्तमं विदुः
स्वयमाहृतञ्च कुसुमं परं प्रियम् ।
हरणं प्रसह्य परमं प्रतिग्रहात्
नहि विक्रमी परमुखं प्रतीक्षते ॥१८॥

ननु ! बाहुजस्य मुनयोऽनुमन्वते
प्रसभं हृतिं गुणितया गुणिप्रिय ! ।
ध्रुवमेव विश्वसिति तद्भवानिदं
भुवनं शिशिक्षयिषुरागतः क्षितौ ॥१९ ॥

विशिखस्य पञ्चविशिखस्य पञ्चता
मयि सम्प्रति प्रति भवन्तमुच्चकैः ।
अनुपागते त्वयि तदेति निश्चिनु
भवितातिवैभव ! ममैव पञ्चता ॥२०॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

इति वाचयन् वचनकौशलादसौ
बहुभावभावितमुखः सतां मुखम् ।
अतिदूरतः प्रथमरागतः स्वतः
विविनक्ति वोच्छ्वसिति वा स्म सीदति ॥२१॥

तिमिरान्तरे सपदि पूर्णदीपिकां
मरुमण्डले सुसरसीं गरीयसीम् ।
स्वयमर्थिनीं प्रथमयौवनेऽबलां
सशरीरनाकगमनं नृणां विदुः ॥२२॥

अपि संवरीतुमभिलाषिणो हरेः
प्रविकस्वरं स्मितमभून्मुखाम्बुजे ।
सुगभीरतार्गलमुदस्य हि द्रुतं
हृदयान्मुखे स्फुरति भावनिर्भरः ॥२३॥

अपरोक्षगामिव समीक्ष्य रुक्मिणीं
विकृतोऽभवत् स लिपिलाभमात्रतः ।
ददती लिपिं हृदयमस्य साहरत्
गुणगौरवश्रवणदत्तजीवना ॥२४॥

विषयं विदर्भतनयामनोषितम्
उररीचकार स हरिस्तदा हृदा ।
विजहाति किं जलधिरागतां नदीं
व्रततिं न वा तरुरपेक्षते श्रिताम् ॥२५॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

इति चेतसा निजमतं विवृण्वति
स्मितसुन्दराननतवक्त्रमच्युते।
पुनराप्तमद्विजनिरीक्ष पेशलं
नहि बुद्धिमान् परमनो न बुध्यते ॥२६॥

अलमच्युताच्युतमते! विकल्प्य ते
उपपाद्यतां नृपसुताकृतार्थता।
भवनान्तरे स्वयमुपेतकौमुदी
वद केन नाम वसनैः पिधीयते ॥२७॥

परमोज्ज्वलां विमलवर्णशालिनीं
नृपभोगयोग्यसुभगामतिश्रियम्।
अपि रुक्मिणीं पुरमचेतनामिमां
प्रविदाङ्करोतु ननु चेतनान्तु ताम् ॥२८॥

इयमुत्तमापि नगरी गरीयसी
नहि कृष्ण! योग्यगृहिणीं विनाधुना।
सुरसापि चारुसरसा महीयसी
नलिनीं विना न खलु पुष्यति श्रियम् ॥२९॥

भविता च यातचिरमद्य देहिनो
परिचीयतां प्रथममेव सा गुणैः।
असकृन्मृदोऽपि घटिका परीक्ष्यते
क्रयणेऽङ्गुलीप्रहरणैश्च वारिभिः ॥३०॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

सुरसैव कृष्ण ! वसुधातले सुधा
प्रियदर्शनैव परिपूर्णचन्द्रिका।
ननु सा च सा च ललिताऽबला सती
विषयेष्वियं किमपि वस्तु वास्तवम् ॥३१॥

मुखपुष्पिका स्तनफला सुकोमला
गुणसौरभा च विषयोष्णवारिणी।
ललिता सुवर्णललिका कुलाबला
रससेकतः क्रमिकपुष्टिशालिनी ॥३२॥

प्रियभाषिणी गुणवती नवा वधूः
भजते सुदुर्गतमपीह यं जनम्।
अमरावतीं वत स सन्त्यजेत चेत्
न तदा ततो भुवि विभाति बालिशः ॥३३॥

शततापितापि न भवेद्विरूपिका
मुहुराहतापि नहि भङ्गमेति वा।
प्रभवे सदा शुचिरुचिः प्ररोचते
ललना सती च कनकस्य मालिका ॥३४॥

विदधाति वेद इव नीरसं गुरुः
अपि नीतिवत् सरसनीरसं सुहृत्।
सरसं कलत्रमिव काव्यमुत्तमं
परलोकमैहिकमिति द्वयं क्रमात् ॥३५॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

परमुन्नयन्त्यलमधोगतं जनं
विषमेषु दुःखितहृदां प्रसादिनी।
कुलदेवतेव कुलसम्पदां प्रसूः
गृहिभिः सदैव गृहिणी निषेव्यताम् ॥३६॥

भजते करी जलजिनीं जलं मथन्
दिवसश्रियञ्च तिमिरं हरन् हरिः।
रिपुसैन्यचक्रमवजित्य रुक्मिणीं
सहकीर्त्तिमाहर हरे! पतिंवराम् ॥३७॥

लिपिमात्रतोऽस्य सुमहोत्सुकं मनः
वचसा ननर्त्त निपुणद्विजन्मनः।
समयोपयोग्यनुगुणञ्च भाषितं
त्वरितं तनोति हृदये तड़ित्क्रियाम् ॥३८॥

इह मन्त्रकर्म्मणि भवान् पुरःसरः
प्रणवो ममाद्य परमार्थवाचकः।
प्रयतिष्यते भवदुदीरिताध्वनि
गिरमित्थमस्य हरिरन्वमोदत ॥३९॥

अथ दारुकं निभृतमाजुहाव सः
प्रथमप्रचारकृतदोषभीरुकः।
त्वचिसार उत्खनति मारुतं स्पृशन्
अभिवृष्य गर्जति घनस्तु सारवान् ॥४०॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

तमुपागतं स निदिदेश सारथिं
रथयोजने प्रचुरयोजनं गमी ।
नतपूर्वकायमयमप्युपागमत्
तदमुष्य काम्यमिव पारितोषिकम् ॥४१॥

विविधैर्निजैः प्रहरणै रणक्षमैः
तुरगैश्चतुर्भिरसितैस्तरस्विभिः ।
सुखभोग्यपञ्चषदिनप्रवर्त्तिभिः
बहुवस्तुभिश्च समलङ्कृतं नवम् ॥४२॥

प्रणमन्नरं हरिरभीष्टदेवतां
सुखजन्मना सह तथा पदाश्रया ।
प्रतिकर्म्मचारुविकसत्कलेवरः
कृतसज्जजैत्ररथमारुरोह सः ॥४३॥ (युग्मकम्)

अथ संक्षिपन्निव दिशां कदम्बकम्
अभिवर्त्ति पत्तनमिव ग्रसन् मुहुः ।
समगाज्जवात् खगपतिं हसन्निव
परितर्पयन् सरथिसारथी रथः ॥४४॥

प्रथमः कविः स च पराशरात्मजः
स्थविरः स्थिरो वदतु तं जवं कथम् ।
भवभूतिरास्त तु समासचिन्तने
कियदामनेत् स तु शकुन्तलाकविः ॥४५॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

सविधस्थपार्श्वतरवः क्षणं पृथक्
अनुवर्त्तनात्सु वनवीथयः समाः ।
अभि दूरगाः स्वमभिधाविनो नगाः
सुजवं रथे दृष्टगिरिं प्रधावति ॥ ६॥

प्रथमा शताङ्गमभितो वनावली
प्रदधाव पृष्ठत इवातिरंहसा ।
पुरतः कियद्दूरवहिता द्वितीयिका
प्रयतो प्रदक्षिणमिवाभ्रमत् पुनः ॥४७॥

अपरस्परप्रमिलिताः स्थलान्तरे
वृतिभिर्वृते रथपथस्य पार्श्वयोः ।
नवपल्लवालिविलसत्पलाशिनः
हरिदश्मनाञ्जघुणिरे सुखादिव ।४८॥

रथवर्त्मनामुभयतो नतानताः
शतपर्विकादितृणराशयासितैः ।
कुशकाशसूननिकरास्तु पाण्डुरैः
वसनैर्वृता इव ययुः समानताम् ॥४९॥

युगपत् सहस्रधनुषोऽन्तरे रवं
निशमय्य तन्निहितलोचनो जनः ।
अवलोकयन्नभिमुखे रथं कियत्
श्रुतवान् सहस्रधनुषः परन्तु तम् ॥५०॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

दिवि सप्तसप्तिरपि सप्तसप्तिभिः
रथमुद्व्रजन्नतिरथस्य तं रथम्।
अवलोकयन् जवमलौकिकं किल
समनुद्रवन्ननुचरो बभाविव ॥५१॥

हरिदारुकौ चिररथ.नुशीलिनौ
जवगौरवात् प्रहृषितौ बभूवतुः।
द्विजानस्तु वेगजनितार्त्तिरच्युतत्
विष्टताच्युतो निजपदात् पदे पदे ॥५२॥

उपदिश्यमानमयनं द्विजन्मना
बहुचत्वराटविनगान्तरास्थितम्।
समतिव्रजन् व्रजपतिः परिव्यवि
स विदर्भदेशमगमद्दिनत्त्रये ॥५३॥

बहुलोकजैः कलकलैः सुदूरतः
परिसूचितां निविविशे पुरं हरिः।
निजकार्य्यवार्य्यपरकार्य्यट्टग्जनां
मकरस्तरङ्गमुखरामिवापगाम् ॥५४॥

कुशलाशिषा सुखजनिर्जनार्द्दनं
परिवर्द्धयन्नुपवने निवेशयन्।
सममुत्सुकेन मनसास्य यातवान्
ललनाकुलाकुलविदर्भजालयम् ॥५५॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

क्रमितुं स्वलक्ष्यमभिलक्षयन् हरिः
अतनुं तनूमपि विनिह्नुते रहः ।
स इमं प्रवादमभजत् प्रमाणयन्
नृपकन्यकामभिलषन् लतालयम् ॥५६॥

अथ दारुके सहरथे वहिर्गते
न बभूव दूरगतया स निष्क्रियः ।
भृशया तिरोहितदृशाम विद्यया
परमात्मवन्नयनगोचरो हरिः ॥५७॥

आकर्षिणीमब्जजनस्य सद्गुणां
निदानभूतां महदागमस्य च ।
मुक्तः पुमान् वा प्रकृतिं वनद्युतिं
स्वभोगयोग्यां सजलामलोकयत् ॥५८॥

असितनलिननीलो भक्तसंसक्तशीलः
कनकरुचिदुकूलः कान्तिकान्तानुकूलः ।
घन इव घनचञ्चद्विद्युदुद्यानमध्ये
निविड़तिमिरपुञ्जाकाशकाशे चकाशे ॥५९॥

आलीनां ललितालिभिः समवयोरूपाभिरन्तःपुरे
योग्याकल्पविकल्पनेन मुदिताऽप्येकान्तचिन्ताकुला ।
आयान्तं द्विजमन्तिके हरिकथाभावं निधायान्तरे
साशङ्कञ्च सहासुखञ्च ससुखं राजात्मजालोकयत् ॥६०॥

इति श्रीहरिदासकृतौ रुक्मिणीहरणे महाकाव्ये
कृष्णप्रयाणो नामो नवमः सर्गः ॥०॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

दशमः सर्गः ।

——:०:——

अथान्तिके कञ्चुकिनः कथञ्चन
सखीसभायाः सभयं जगाम सा ।
जलभ्रमिभ्रान्तसरोजिनीगणात्
प्रतीरमेकेव रयान्तरेरिता ॥१॥
यदा पदान्तेऽस्य ननाम नाम सा
तनूसवर्णातिसुवर्णभूषणा ।
तदेत्यवादीत् स विदन् विदर्भजे !
प्रसद्यतामद्य शुभं शुभे ! तव ॥२॥
ददर्श विप्रोऽथ गभीरचिन्तया
नृपात्मजायाः मलिनं किलाननम् ।
तनोति चिन्तान्तरगापि सन्ततं
दृशोर्ललाटे लपने च लक्षणम् ॥३॥
विशालशङ्कादहनस्य नीरस-
हृदिन्धनं सन्दहतो निरन्तरम् ।
उदीर्णबाष्पेण मलीमसाननां
हसन्नवोचत् पनन्दिनीं द्विजः ॥४॥
मनोरथस्ते सरथः समागतः
वधूपुरोद्यानतलेऽत्र विद्यते ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

लिपिर्वयस्येव विशुद्धवर्णिका
निकामकामं कुरुतेतरां प्रभुम् ॥५॥

जगन्ति तावन्ति भवन्ति सन्ति च
विशन्ति वाश्रित्य युगे युगेऽपि यम् ।
मयाऽनयास्मिन् दयया त्वदीयया
कृतं कृतार्थं नयनं तदीक्षया ॥६॥

अदारयिष्यत् कुलिशं यदि क्षितिं
महामहेन्द्रो यदि वाऽप्रदिष्यत ।
तदाऽभविष्यच्चकिता तथा न सा
विशृण्वती विप्रवचो यथाऽभवत् ॥७॥

तमागतं विप्रमवेक्ष्य दूरतः
शनैस्ततस्त्वतुराः किलालयः ।
अनुद्रुतास्तन्निखिलं न्यशोशमन्
किशोरकाले सुलभं हि कौतुकम् ॥८॥

धिनोतु पद्मापतिरेष पद्मिनीं
ततः स कामः फलतात् सुखेन वाम् ।
जहातु वृष्टिं भुवि शस्यदां घनः
वदन्निदं प्रास्थित सुस्थधीर्द्विजः ॥९॥

स्वयं निशम्यापि चिरागविप्रतः
प्रियाप्रयाणं निरणायि नो तया ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

न सम्भवा सम्पदपि प्रतीयते
प्रतीयते त्वापदसम्भवापि हि ॥१०॥
अये! सरस्वन्तमियं तरङ्गिणी
चलन्त्यविश्रान्तरया पुरोमुखा।
न जन्मभूजातलताः प्रतीच्छते
किमु प्रमुक्ता प्रथमात् कृतज्ञता ॥११॥
विना मृणालीमलिना सरोजिनी
विहाय सन्ध्यां शशिना च शर्वरी।
चिरानुगत्यं प्रतिहत्य युज्यते
कृतज्ञताऽस्माज्जगतो गतेव किम् ॥१२॥
विलक्षणं प्राप्य सुखार्णवं नवं
कथं कथां नः सदृशां स्मरेः स्वतः।
न किञ्चिदस्मादपरं चतामहे
सुनीरसा न सरसा स्मरिष्यसि ॥१३॥
चिराय युक्तेधि मनोहरे हरौ
घनं घनाङ्के चपला पलायताम्।
नरेन्द्रपुत्र्याश्चिबुकं दधत्यदः
समुन्नमन्ती सुखमालिरालपत् ॥१४॥
निशम्य सम्यग्वचनं सखीरितं
स्मिताननना राजसुताऽवदत् पुनः।
न कामिनी काचिदिहास्त्यमूदृशी
न या प्रियप्रेमगिरा प्रहृष्यति ॥१५॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

विदिग्दिगन्तस्तुतकीर्त्तिमालया
विनिर्म्मिते मर्म्मविदास्मि न स्वयम् ।
विलक्ष्यतामेष विलक्षणो विधुः
रुचिर्यदि स्याद्भवतोभिरादरात् ॥१६॥

करोत्यभिन्नात्मजनस्तु यां क्रियां
स्वयं कृता सेति मतं मनस्विनाम् ।
तरीं कपालं यदि युज्यते ततः
घटेत नो किं घटयुक्तिरन्तिके ! ॥१७॥

अगोचरा मादृशचेतसामपि
भवेन्ममार्थीति यथार्थमेव न ।
प्रवर्षुको वारिधरः सुदुर्लभः
पदे पदे चेत्तमसुष्य तु स्थितम् ॥१८॥

विलोलमासामवलोकनेच्छया
हरिः पुरोऽभूदधुना निदेशतः ।
ननर्त्त चित्तं मदमत्तमुल्लसत्
मनोऽनुकूलं वचनं किलामृतम् ॥१९॥

असौ नवालापललामलालसा
ततः सखीसन्ततिराततोत्सवा ।
उपासरत् संसरणाय पूरुषं
कृतप्रयत्ना प्रकृतिः शनैरिव ॥२०॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

सुदूरयालोकमरीचिमालया
तरोस्तमिस्रे तलिनीकृते तले ।
यमस्वसुर्नीलमिवोत्पलं जले
उपेत्य कृष्णं ददृशुर्मृगीदृशः ॥२१॥

समाङ्गभङ्गेन निजेन जोषकं
परीक्षणाशङ्कितयेव गोपयन् ।
अधस्तरोर्बालहरिस्तृषातुरः
व्यपेक्षमाणो हरिणीमिवावसत् ॥२२॥

विलोक्य नालं हरिमालयोऽभवन्
द्रुतं किलालापकृतौ स्मराकुलाः ।
विलालयत्येव महोज्ज्वलोऽबलां
हविर्न शीलं हि कृशानुसंस्तुतम् ॥२३॥

इमासु दृष्टासु न कापि रुक्मिणी
सुधीरभावा स्वयमागतासु सा ।
अलिं किलोपैति लता न तां तु सः
मुरद्विषेदं निरचायि चेतसा ॥२४॥

अथोदितेऽर्द्धे प्रथमे सखीगणैः
परार्द्धमाह स्म स वक्रया गिरा ।
सरोजिनीं यः सरसाञ्च कामिनीं
न चेक्षते वक्ति हतेन्द्रियो हि सः ॥२५॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

तरोस्तले किन्तु भवान् स माधवः
वदस्व विद्वन्! शुभमागतं तव ?।
स्फुटत्वशोकं ननु माधवोऽस्मि चेत्
शुभागताङ्गः शुभमागतं मम ॥२६॥

विभासि रूपेण नवोननीरदः
स्थिरायतां सा चपला चिरं त्वयि ।
द्रुतं निशान्तं विशतातिकोमलाः
उपैति वर्षं स्तिमिता भविष्यथ ॥२७॥

तव प्रिया नः प्रजिवाय रुक्मिणी
छलं तदस्मासु गिरा न युज्यते ।
न रुक्मिणी ह्रीरकिणी च वार्धिपा
सखीषु कुर्य्यादधिकं हि गौरवम् ॥२८॥

उदीर्य्यसे त्वं नरपुङ्गवो जनैः
जुषस्व पन्थानमृजुं तदत्र भोः ।
निरन्तरायं व्रजत स्थलान्तरं
वृहद्विषाणाहतिभीतिरस्ति चेत् ॥२९॥

इहोदितः केनचनाप्यनाकृतः
विविक्तगश्च त्वमतो मलिम्लुचः ।
स एष मामस्तु मलिम्लुचाभिधः
स्वयं पतत्येव विविक्तगोऽपि न ॥३०॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

सभाजनार्थं समुपागता वयं
कथं त्वया क्रूरधियावधीरिताः ।
तदा वहिर्देशसभाग्रहान् विना
किमत्र मामागमते कलं रहः ॥३१॥

नरेन्द्रपुत्रीमविदन्निदन्तया
प्रतारयन्नः स्वधिया प्रतारितः ।
स्तनोऽस्ति केशोऽस्ति, रमाकृतिर्हि सा
न चाधिकाङ्गी, किमु वेद्यमस्ति मे ॥३२॥

विधीयते किं खलता पदे पदे
प्रपद्यतामद्य सदर्थकं पदम् ।
विधातुमर्हः खलतामजोऽपि न
न चास्ति भाषासु निरर्थकं पदम् ॥३३॥

वचःप्रयोगे तव दक्षता मुखे
इतः स्फुरत्यन्तरसारता न किम् ।
मखात् पुरो यद्यरराकरोमि तां
परन्तु चेदिच्छति वः सखी हि माम् ॥३४॥

उपेत यामः कथयाम रुक्मिणीं
हरिः परेषां विवरानुवृत्तिमान् ।
अये ! किशोरीः सदृशो भवादृशोः
विलोकयन् को विवरं नहोहते ॥३५॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

प्रियं प्रियावाचिकमाचिकीर्षुणा
जिताश्च तां वीक्ष्य मधुद्विषोदितम् ।
कदाचिदर्थं प्रकृतं कृताग्रहं
न हेलया सत्पुरुषो जहाति हि ॥३६॥

सहासमाद्यार्द्दमवोचदच्युतः
परा प्रगल्भा च पराद्धमालपत् ।
विभाति वामास्वधिका हि चातुरी
तरोरुरस्वच्चलता लताकुले ॥३७॥

सखी सुखं वः कुसुमेषु वृत्तिभाक्
भुनक्ति किंवा विधुलालसा च सा ।
न साऽलिनी यत् कुसुमेषु वर्त्ततां
कुमुद्वती यन्न विधुश्च याचताम् ॥३८॥

समन्ततः सन्ततमेव सद्गुणा
निशम्यते सा किमु सम्यगित्यलम् ।
सखी सतैले लिखिताऽसितोपले
सुवर्णलेखेव भवेद्भवत्यहो ॥३९॥

द्विजैर्वयस्या कियतो न मादृशान्
न्यमन्त्रयत् पारतरीव नाविकैः ।
अलोककोलाहललाभलोभतः
हरीननैकानिह सा समग्रहीत् ॥४०॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

समीरलोलं कुसुमं कृतेङ्गितं
पतन् पतत्येव बहूनि षट्पदः।
बहून्यथैकार्थमुपेत्य लिप्सते
न षट्पदोऽसौ तु चतुष्पदो ध्रुवम् ॥४१॥

मधुव्रतेभ्यो ददते न चेन्मधु
स्फुटन्ति पुष्पाणि कथं तदा मुधा।
करोतुमन्धङ्करणं निजं रजः
दुराशभृङ्गस्य दृशोः स्फुटन्ति हि ॥४२॥

सरागपुष्पव्रतसुमनोमुखं पिबन्
रसान्तरोऽन्धोऽपि वरं प्रसूनलिट्।
विहीनमूर्त्तेर्मनसः चमेत कः
मुखं प्रपातुं ननु गोपबालक! ॥४३॥

अतीव ते दर्शनशक्तिशालिता
विलोकयते पण्डितमानिता तु न।
न गोपरागैरहमन्धतां गता
नवा गवालापकलासुपेशला ॥४४॥

तडिल्लतेव प्रभया प्रभाससे
घनेऽन्धकारेऽत्र भवाङ्गगोपिका।
तदत्र वृन्दावनशाद्वले नवे
चरेच्छया भद्र! भवामि गोपिका ॥४५॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

इहैकरम्भोपरि किञ्चिदुन्नतं
किमद्भुतं राजति मोचिकायुगम्।
नवानराणां खलु मोचया कियत्
फलं फलेनेव विपाकचारुणा ॥४६॥

करं किरत्येव निशाकरः स्वयं
स्वनीचणोल्लासिकुमुद्वतीं प्रति।
अतः शशाङ्कः सुचिरं कलङ्कितः
विधुन्तुदस्तं ग्रसति च भूयसा ॥४७॥

न धीरता धृष्टतयाऽनया हरेः
अभाजि भार्य्यासमभाविकेलिषु।
पुरःसरीकृत्य यतोः सरिद्वरां
प्रगल्भ कुल्या जलधिनं निन्द्यते ॥४८॥

स्पृशन् प्रसूनं छदनं समीरणः
जहाति नो वा कुमुदं विधुस्तृणम्।
न शैवलं वापि सरोजमर्थ्यमा
भवन्ति भूम्ना हि समाः सहायनाः ॥४९॥

प्रियावयस्यास्वपि यो न चाटुकृत्
न कौशलं तस्य कलासु किञ्चन।
न पद्ममाध्वीकमलिः-पिवन् यदि
धुनोति पत्रं ननु पङ्गुरेव सः ॥५०॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

सकेलिसंलापविलासहासतः
यथार्थमर्थं विरतोऽर्थयन् हरिः।
नवं रसं सारसिनीस्मितं जहत्
कलङ्कितं पङ्कलवैः क इच्छति ॥५१॥

प्रियां जिहीर्षन् वहुर्राचरच्चितां
अथो जिघृक्षन् सुपथं निरापदम्।
विशङ्कमानो विपदं पदे पदे
सखीः प्रियाया इदमन्वयुङ्क्त सः ॥५२॥

सरोजशोभा विमला न शीतला
शशाङ्ककान्तिस्तुहिना न निर्मला।
चिरं निरङ्का नितराञ्च शीतला
प्रलोभनायैव पतिंवराऽबला ॥५३॥

स्वयंवरां वीक्ष्य वराङ्गनां गुणैः
निजैर्मनोहारिसुधासुधाकरीम्।
समस्तरत्नं परयत्नमार्जितं
चिरं प्रतस्थे गिरिकन्दरान्तरे ॥५४॥

जनाननोद्गीतगुणामृतं पिबन्
यदीदृशं संहृषितोऽस्मि दूरतः।
कियन्न जानेऽथ समक्षवर्त्तिनो
विलासिनी मे प्रमदं विधास्यति ॥५५॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

परिश्रुताभिर्गुणवीचिवीथिभिः
प्रमाथिनीभिर्बलवन्मनोधृतीः ।
पुरोर्मिमामागमितः च्युतस्थितिः
परिप्लुतो भूमिरुहस्तटामिव ॥५६॥

प्रमथ्यमानादुदगात् सुधाम्बुधेः
निखायमानादपि रत्नमाकरात् ।
उपैति हन्त स्वयमेव मामियं
श्रमं सुदैवं समपेक्षते हि न ॥५७॥

बिभेमि नो भौमभटाबलैर्बलात्
नवा विशङ्के छलनञ्च मानिनाम् ।
अनेकजन्मार्जितसत्क्रियावशात्
भवेदियं लोचनगोचरो यदि ॥५८॥

विनिघ्नतारीन् महतो मनस्विनो
स्वमोजसा हारयितुं मयादिशत् ।
स्वयं निरस्यंस्तिमिरं तमोनुदः
नतो हि लोके दिवसश्रियं श्रय ॥५९

तदम्बिकायाः क्व नु सद्म विद्यते ?
कुतः कदा याति पुरा च रुक्मिणी ? ।
उपेत्य यादःपतिमीप्सया मणीः
न याति मानो यदि लाभ एव सः ॥६०॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

मनोऽनुकूलं लपितं हरेरिदं
निपीय हृत्सारसभासमुज्ज्वलाम्।
निवेशयन्त्या वदने स्मितच्छलात्
कयाचनावाचि वचस्तदीप्सितम् ॥६१॥

गुणैर्जगन्मोहन! भीरुवल्लभ!
सखीगुणैस्ते सुखमेतदद्भुतम्।
प्रसादमिन्दोर्भुवनैकनन्दिनः
तनोति खद्योततनुद्युतिः किमु ॥६२॥

सुहृत् प्रियप्रेमकथासु, सज्जनः
सदा सदालापकलासु केशव!।
क्रियावकाशेषु गुरुः, सयौवना
वधूर्भवन्तं शयनेषु चेप्सति ॥६३॥

शिशिश्चिप्सुस्त्वां गुरुमन्तकं रिपुः,
शिशुं स्वपूर्वां जन आर्त्तिमान् बलम्।
मुनिः परं ब्रह्म, मनोजमङ्गना
प्रपश्यतीयन्तु पुराणगाथिका ॥६४॥

सदा भवन्तं शशिनश्च पर्वणः
जगज्जनोऽयं निरपेक्षमिच्छति।
सुदुर्जयाद्दन्तुरजन्तुयौवनात्
कुतोऽबला त्वां चकिता चतेत न? ॥६५॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

बधूः प्रियं प्रायश एव बालिशं
स्वनिर्भरोपेत्य चिरं विषीदति ।
प्रतानिनी स्थाणुमुपाश्रिता लता
निजाङ्गभङ्गेन विधृत्य वर्द्धते ॥६६॥

चिरं कुमारी भवने भवत्वसौ
दधातु वैधेयकरे करन्तु न ।
सरित् सरस्वन्तमनाप्य शुष्यतु
वरं पदव्यामपि मा मरुं गमत् ॥६७॥

प्रियां न भर्त्ता यदि भर्त्तुमीशिता
निवर्त्ततां ग्राहयितुं करं पुनः ।
न चेदशक्यद्विनिधातुमात्मनि
किमग्रहीष्यत्तटिनीं तदाम्बुधिः ॥६८॥

रसेऽमृतम्, चक्षुषि चन्दनाञ्जनम्,
सुधा च वाचि, त्वचि दक्षिणानिलः ।
घनीकृतं शर्म्म च मानसेऽमले
परस्परं राजति जम्पतिद्वयम् ॥६९॥

अदृष्टमस्पृष्टमपृक्तसम्भवं
विलक्षणाकारमिदं विदेशगम् ।
परस्परं पाणिनिपीड़नात् परं
अनेकमेकं व्रजतीत्यहो विधिः ॥७०॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

स्वयं पतन्तीं स्वकरे सखीमिमां
कृपानिधे! नः कृपणामुपाश्रय।
विलोलवल्लीं विटपावलम्बिनीं
कृसत्प्रसूनां विटपी जहाति किम् ॥७१॥

यथा प्रियप्रेमपरा स्वयंवरा
वराङ्गनान्या ललितापि नो तथा।
यथा निदाघं प्रणिहन्ति दक्षिणः
तथा जलार्द्रीजनितोऽपि नानिलः ॥७२॥

विशाललावण्यजला मुखाम्बुजा
समुद्भवद्यौवनपूरशालिनी।
कुचोर्म्मिका मुख्यमहीभृदुद्भवा
सुदक्षिणा त्वं शफरी सखीसरित् ॥७३॥

अनन्तमक्षुब्धमगाधमव्ययम्
अलङ्घनीयं कमलावलम्बितम्।
स्वमन्यकेभ्योऽप्यमृतप्रदायिनं
सशङ्कं कृष्णनिधिं यियासति ॥७४॥

सहोदरात्यादरदित्सितापि सा
न चेदिनाथं यदुनाथ! नाथति।
विना न वेदेन हि धर्म्मसंहिता
समाहितार्थां पशुशास्त्रमृच्छति ॥७५॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

सुपक्वरम्भामिव स प्लवङ्गमः
इमां समायादभिलाषुकः सखीम् ।
यतिष्यतेऽप्येष नितान्तमन्ततः
न चानभिज्ञो निजयोग्यताङ्गता ॥७६॥
असौ तु पूर्वेण नवां वनोमिमां
...दम्बिकामन्दिरमौलिरोच्यते ।
मणित्विषा यत्र प्रदीपविभ्रमं
विधाय चूड़ा नव सच्चकासति ॥७७॥
आलिः सहालिरमुना चलिताच्च नान्ते
सायन्तने बलिबलैः सुमहे पथा स्वः ।
सौदामिनोमिव घनो घनलोकमध्यात्
अङ्कं नयन् हर हरे ! तिलकाङ्कितान्ताम् ॥७८॥
शशी शशकलङ्कितः समपचीयते चासिते
जलप्रकृतिपङ्कजं शिशिरलुप्तसर्वप्रभम् ।
कलङ्करहितं समं प्रकृतिचेति शश्वत्प्रभं
प्रतुष्यति विलोकयन् परमभीरुरत्नं भवान् ॥७९॥
कामं कामाभिलापात् सुरसरसगिरः कर्णमस्याङ्गनास्ताः
स्वान्तं तान्तं नितान्तं नयनमतरलं कान्तितस्त्वाहरन्त्यः ।
आकर्ण्योत्कर्णमन्तःसरणि घनरवं मन्दगस्यन्दनस्य
क्लान्त्यायासुः परेषामवगतिविहितोत्कण्ठमस्योपकण्ठात् ॥८०॥

इति श्रीहरिदासकृतौ रुक्मिणीहरणे महाकाव्ये
सखीसंलापो नाम दशमः सर्गः ॥०॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

एकादशः सर्गः ।

आनन्दकन्दलनिरस्तसमस्तचेष्टं
नानानिनादमधुरीकृतवेणुनादम् ।
सप्तस्वरश्रितविकस्वररागरम्यम्
उच्चैरुदच्चदचिरादविगीतगीतम् ॥१॥

अस्पष्टवर्णनिकरैरविनिश्चितार्थैः
कोलाहलैर्विकलितश्रवणैर्विशालैः ।
लोकाकुलीकृतमदो नगरं गरीयः
चञ्चत्तरङ्गमुखरं जलधिं जिगाय ॥२॥

वाद्यं प्रवादयितुमुद्यति वाद्यकारे
निःश्रेणिकं तमनुधावति सार्थसार्थे ।
संवस्यमानवसनं शिशुको जनन्या
मुञ्चन्नरं निरसरत् करदत्ततालम् ॥३॥

सौधाङ्गने चरति चारुकलाकलापे
आकल्पकल्पितरुचामबलावलीनाम् ।
यूनां पणायितुमिवोत्कलिकां चिराय
रूपापणः समजनि स्वमनोऽनुरूपः ॥४॥

दीपावलीविनिहतं तलिनं तमस्त्वं
निघ्नन्निशामिव दिनं विदधत् स्वधपः ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

स्त्रीपुंसयोः पुरसदोः प्रमदप्रवाहैः
सत्रोच्चकैरभिपतन् चपलेव रेजे ॥५॥
बालान् विलोललसितान् व्रहती बुभुक्षा
यूनः सुवेशरुचिरान् सुरसान् रिरंसा ।
प्रौढ़ानवश्यकरणीयपरान् चिकीर्षा
जीर्णांश्चकर्ष च यथासमयं सुषुप्सा ॥६॥
तस्मिन्निशीथपिशुनो घनसान्द्रमन्द्रः
साकं तदुत्सवमहालहरीविरत्या ।
शङ्खस्वनः समभवत् स्वपदाद्विनिद्रान्
उत्थापयन्नपि च जागरयन् प्रसुप्तान् ॥७॥
तत्राङ्गने युवतिराजिविराजितायाः
कुन्देन्दुसुन्दरतमस्मितपूर्वमेकः ।
दृष्टिं विवर्त्तिशफरीस्फुरिताभलोलां
भ्रू वभ्रमादलभत प्रणयी प्रियायाः ॥८॥
स्वैरस्वनं मशकसारणकैतवेन
निर्म्माय हर्म्यंग्रगमिनीं विमुखीमखिन्नाम् ।
बद्धाञ्जलिः परममञ्जुलताविलासां
कान्तां न्यवीविदटरं रतिदैन्यमन्यः ॥९॥
धीरोऽपि सम्मुखगतां दयितामधीरः
साङ्गोऽपि कान्तिविभवैः प्रचरन्ननङ्गः ।
दक्षेण दक्षिणतमामपि कोऽपि वामां
दोष्णा सतृष्णनयनः प्रजहार पुष्पैः ॥१०॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

फुल्लत्सहासलपनं चपलाक्षिपद्मं
नीचैः सखीः प्रियगुणं चिरमामनन्तीम् ।
चेलाञ्चलं निभृतमेत्य विकृष्य कश्चित्
निश्चिन्वतीं स्वमलमप्रतिभामकार्षीत् ॥११॥

स्तम्बाङ्गसङ्गतमथो दधतीं स्वमङ्गं
वृक्षाङ्गलग्नलतिकामिव कोऽपि कान्ताम् ।
दीपादधः स्थितवतीं विरलान्धकारे
तूष्णीमवोचदुचितं स्तनदत्तहस्तः ॥१२॥

कश्चित् प्रियां विजनवृत्तिमिदं ललाप
मुग्धे ! स्वयं प्रमनुतामयमुत्सवः कः ।
शय्याऽङ्गनं मनितगीतिरलङ्कृतीनां
वाद्यञ्च नौ हि नटनं सुमहान् महोऽयम् ॥१३॥

विस्रब्धमालिलपिताम्रतमापिबन्त्याः
मन्दागतप्रियगृहीतकराम्बुजायाः ।
सम्भ्रान्तिजातपुलकं भयविह्वलत्वं
निर्वर्ण्य तं परिणतं महति प्रमोदे ॥१४॥

तौर्य्यत्रिकीं मधुरतां प्रयतो स्मरन्ती
पश्चादुपेतपतिना पिहितद्विनेत्रा ।
स्वैरं शनैश्च करमस्य करेण धृत्वा
जानत्यजोहसदमुं व्यहसीत् स्वयञ्च ॥१५॥

स्वां वल्लभामिति बलादुपगूह्य मुह्यन्
नैषेत्यवेत्य च पलायत तूर्णमन्यः ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

वल्लोव विस्फिरविध्, तदला वयस्या-
चेलाञ्चलं धृतवती युवतिश्वकम्पे ॥१ ॥
संलापलोलमनसामबलावलोनां
पश्चाच्छनैरभिगृह्य दयितां व्रजन्तीम् ।
पार्श्वान्निवर्त्तन्निव नटः सुपटुः समेत्य
गण्डे चुचुम्ब चलकुण्डलतुल्यवर्णे ॥१७॥
उत्क्रम्य मोदविमनोकृतलोकसार्थान्
प्राङ्मिलनाद्युवजनाः प्रमदादमाद्यन् ।
आरम्भतोऽतिवहतः पुर एव वोजं
पूर्वं हि पूजनविधेरधिवासकर्म्म ॥१८॥
पूर्वं श्रमस्मृतिचलत्तनवो नवोढ़ाः
नात्युत्सुकाः सकुतुकास्त्रपिताः किशोर्य्यः ।
आनन्दनाम्बितधियश्च परास्तरुण्यः
मन्दं सखेलनमरञ्च ययुर्गृहाणि ॥१९॥
आजन्मयोगपरिशीलनया मुनीनां
नो योगवुद्धिरुदगात् कियती जड़ानाम् ।
सन्त्यज्य हन्त भगवत् किमुदाररतं
शश्वत् सुखं प्रभवतान्द्रियवृत्तिरोधात् ॥२०॥
संसारमाररससिन्धुषु यद्यमङ्क्ष्यन्
वैराग्यमार्गमृषयो न तदाऽगमिष्यन् ।
द्राक्षारसं रसयितुं रसवित् समर्थः
दिव्यां किमर्थयति कश्चन वालिशोऽपि ॥२१॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

रत्नान्ययत्नसुलभान्युपलिप्ससे चेत्
किं दूरतो मृगयतां तरुण! स्वगेहे।
सन्त्यत्र नीलमणि-शेवधि-चन्द्रकान्ताः
कान्तेक्षणस्तनयुगाननकैतवेन ॥२२॥

कान्तं विलासललितं शयने शयानं
वीक्ष्यावगुण्ठनवतीं विनिवर्त्तमानाम्।
आपृच्छ्य सस्मितमुखीभिरतीव खिन्नां
वाद्यात् सखीभिरररं निगडेन रुद्धम् ॥२३॥

उत्थाय भित्तितनुलग्नतनूरनूनं
श्लिष्टा प्रियेण चकितेव निजाङ्गलीना।
बालाकुलाऽननुगुणा भुवि जोषमास्त
किं खिद्दोत कलिका मधु षट्पदाय ॥२४॥

नीतेऽवगुण्ठनपटे मुदिताक्षियुग्मा
निःस्तेऽधरे नतमुखी, रुदती समुक्ता।
आलिङ्गिते वपुषि सङ्कुचिता च कान्तम्
अध्यापयेन्तमिव मूढमतिस्तताप ॥२५॥

तन्वन्तमन्तिकगतं पृथुबाहुपाशं
अदृष्टमिष्टमलमुद्यतदण्डभीमम्।
कार्य्यानुसारकृतदुःखसुखं दिधीषुं
कान्तं कृतान्तमिव पश्यति बालवामा ॥२६॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

सं श्यानदेहलतिकामणुलब्धशिक्षां
हारोपमां भुजयुगेन गलावलम्बीम् ।
अङ्केन सस्मितमुखीं शयनं वहन्तम्
अत्रापयद्धरिरमुं हसितं सखीनाम् ॥२७॥

चोचुम्व्यमानवदना दयितं चुचुम्ब
सासज्यमानकरणा च मनाक् ससञ्ज ।
उत्साहिनां किमपि सिध्यति न प्रयत्नात्
सम्प्रहितात् सुरभिरेत्यपि कर्णिकारात् ॥२८॥

चेलं हरन्तमखिलं पुलकाञ्चिताङ्गी
रन्तारमन्तरगतं निसिषेध नैषा ।
कालं कियन्तमबले खलु भीतिलज्जे
भावेन भीषणभटेन नियोद्धुमर्हे ? ॥२९॥

रोमाञ्चसञ्चिततनू रमणं वसन्तं
पुष्यत्कदम्बकलिकेव नवीनभृङ्गम् ।
मन्दं शिरो विधुनती विनिवारयन्ती
सञ्जातयोगहृषिता क्रमशः पुफुल्ल ॥३०॥

पश्यन् गवाक्षविवरादनयोर्विलासम्
आलोगणो विकृतिमाप नितान्तमन्तः ।
चिन्ता परेण हि परं परिपिष्यमाणा
प्रादुष्करोति परकीयमुखे जलानि ॥३१॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

सख्यो महाहवपदे सति सन्धिबन्धे
गाढ़ोत्सवात् प्रथमदोच्छ्रितयोः सवेऽस्मिन्।
आरिप्सिते सुमनसः खलु दक्षिणार्थम्
आकीर्य्य धैर्य्यविधुराः स्वसबाय जग्मुः॥३२॥

उत्कर्णमुत्कमनसो मनसि स्थितस्य
नृत्यत् स्वकीयगमनेन विशालनृत्यम्।
कर्णे स्व नूपुरयुगेन च शिञ्जितानि
पल्युर्वितीर्य्य भवने समगात् किशोरी॥३३॥

आमस्तकात् स्तनयुगावधिवर्त्तिचेलात्
अन्तःस्मितां निजमुखाम्बुजमापिबन्तीम्।
धम्मिल्लफुल्लसुमसौरभलोभनीयां
द्रागुत्थितः प्रियतमो दृढ़मालिलिङ्ग॥३४॥

उच्चुम्बार काममधरन्तु तदेव मस्याः
संश्लिष्य गाढ़मसकृत् सकृदेव तच्च।
आसाद्य दुर्लभमिदं ममचिन्ति तेन
नो संख्यया विनिमयोऽपि तु तारतम्यात्॥३५॥

शीत्कारभिन्नदशनच्छदद्ंशिनापि
निष्पेषिणापि कुचकोरकयोर्नितान्तम्।
प्राणप्रियेण विदधेऽङ्गुतशर्म्म तस्याः
धन्यो मनोजमहिमा हि महान् विचित्रः॥३६॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

नोवीं प्रिये सपदि मुञ्चति चञ्चलाची
रोमाञ्चकञ्चकितदेहलता विलोला ।
मामित्युवाच मनसात्यु ररीचकार
चेलं चकर्ष च करेण मुमोच चाल्पम् ॥३७॥

आच्छिद्य प्रच्छदपटे निहिते धरण्यां
पर्य्याकुला सपदि पर्य्यवृतद्यदा सा ।
तस्याः प्रहस्य करियुग्मकरौ सकुम्भौ
रेजे तदोरुयुगलं सनितम्वविम्वम् ॥३८॥

दूरे प्रहाय निजमंशुकमेष तस्याः
अंसद्वयोपरिगतेन करद्वयेन ।
आच्छाद्य चारुचुचुके परिरभ्य पश्चात्
गण्डे प्रचुम्ब्य च कियत् पटकर्म्म चक्रे ॥ ३९॥

सद्यस्त्रपां विजहती प्रजहार कान्तम्
आवृत्य वक्षसि कुचद्वितयेन भूयः ।
नव्योदये सति वृहत्तरुणीहरिण्योः
कण्डूयनं कुचविषाणयुगे हि दृष्टम् ॥४०॥

अन्योन्यमाचकृषतुः सुभृशं तथेमौ
अन्योन्ययोर्विविशतुर्नितरां यथोरः ।
एकं द्वयञ्च खलु तत्र तयोर्विरोधि
हन्त स्ववस्त्वपि भवेत् क्वचिदन्तरायः ॥४१॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

पादाग्रयोरधरयोरुरसोश्च दोष्णोः
संयोगभङ्गततमं क्रमशो विलोक्य।
केलीकलाऽभिनवदीक्षितयोररोदीत्
खेदच्छलादिव वियोजितपृष्ठयुग्मम् ॥४२॥

बिम्बाधरौ परिपिबन् विदलन्नुरोजौ
पादौ दधच्च युगपत् प्रपदद्वयेन।
तस्याश्चलाचलतनुः स रिरंसमानः
स्तब्धं पिबन्तमलिनं नलिनीं जहास ॥४३॥

निघ्नन्मनोजजवनानिलचञ्चलायां
वामाद्यपूरसरिति स्तनसैकतायाम्।
उद्दण्डनायकतनूतरणिः सवेगं
शश्वन्मुहुश्च निममज्ज समुन्ममज्ज ॥४४॥

वैचित्र्यमत्र रतनर्मणि यौवतस्य
वेशे गृहे च शयने परसम्भृतौ च।
या सप्तमो भवति या च महाष्टमोह
ताभ्यां महाय तु महानवमो चिगाय ॥४५॥

अश्रान्तमुज्ज्वलरुचिं रुचिरं युवानं
नाथं विलोकितवती युवतिः सहासम्।
पेयं पिबन्त्यपि तृषाविरतिं न लेभे
खेदच्छलेऽपि विपुलं पुलकं बभार ॥४६॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

चित्रप्रसाधनधनायितदर्शना सा
भासा स्वया हृतशयाहितदीपहेतिः ।
ताम्बूलसंवलितबालमृणालपाणिः
सज्जं जगाम सरया त्वरया स्वगेहम् ॥४७॥

उद्गन्धिपुष्पविशिखैः प्रहितैर्युवानौ
उद्वेजितुं पुरत एव मनोभुवेव ।
विष्वद्रुगतं सुरभिसाररसैश्च सिक्तं
पल्यङ्कमुच्चशयनीयतलं लुलोके ॥४८॥

अन्योन्यमक्षियुगले नियतं स्मितं यत्
तावप्यहो विविदतुर्न तु तस्य मर्म्म ।
कृत्वा न किञ्चिदपि सञ्चितदृष्टिमात्रौ
ईदृङ्ननन्दतुरुभौ न तथा कुतोऽपि ॥४९॥

हस्तान्तरावपि निरन्तरतां प्रयातौ
सद्यो हि मद्यमसमद्य च माद्यतः स्म ।
दोषाकरः शुचिकरो भवतीह येषां
तेषां नवीनवयसां नहि किं विचित्रम् ॥५०॥

दन्तच्छदं रमयितुर्नितरां निपीय
रम्यं प्रफुल्लपर्णं क्रमुकं ददौ सा ।
दष्टाधरा पुनरितस्तनुखण्डितं तत्
आसीसदच्च रसनादशनावकाशे ॥५१॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

राजीवजेन रचितं रतिमन्मथाभ्यां
नैवेद्ययुग्ममिव सत्तमशर्करायाः ।
वक्षोजयोर्युगमसौ कृतदानमुद्रः
ताभ्यां निवेदयितुमस्पृश ईङ्गनायाः ॥५२॥

आमृष्य वीक्ष्य च घनं कठिनञ्च पीनम्
एनोदृशः कुचयुगं बलवत्तुतोष ।
नो चेद्युगं भुवि भवेदनयोः परस्मिन्
एकस्य तस्य न तुला युवतेस्तदा स्यात् ॥५३॥

संस्पृश्य शीतचुचुकं गुरुमाप तापं
उत्पीय पूर्णमधरं नितरां ततर्ष ।
आबध्य बाहुलतया दयितो युवाऽसौ
लब्ध्वा सितस्मितरुचिञ्च बभूव रक्तः ॥५४॥

श्लेषं मुहुः सरसतां बहुगाढबन्धं
प्रायोऽप्यलङ्कृतिमनोहरशब्दशोभाम् ।
सद्वृत्तिकं युवयुगं युगपद्विधाय
काव्यस्य सुष्ठु महतस्तुलनामधासीत् ॥५५॥

मञ्चोपवेशिरमणाधरपानकाले
तत्कण्ठगाद्भुजयुगादवनीस्थितायाः ।
प्राक् स्रस्तमंशुकमुपांशु कटीप्रदेशात्
साकं भुवि त्रपितयेव ह्रिया विलीनम् ॥५६॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

पूर्णं ततो नवरसस्य जगत्प्रशस्यं
न्युब्जीकृतं सुविकचं कुचकुम्भयुग्मम्।
आलोक्य लोलमनसा सहसा सहासं
तत्पातशङ्कितया पिदधे कराभ्याम् ॥५७॥

आसीदसौ प्रथमतोऽस्य विशिष्य शिष्या
विद्यां गताद्य तु रतावभवत् किलोच्चैः।
उन्नत्यधोगतिविधौ नियतं नियन्त्री
वाञ्छेव यद्भगवतो जगतां जनस्य ॥५८॥

नग्नं तदाखिलमनङ्गवशा समङ्गं
निवर्ण्य पत्युरपि सा वसनं निरास।
जायापती व्यवहृती सदृशौ भवेतां
किं गोष्पतेर्गिरमिमामियमन्वधावत् ॥५९॥

अङ्काय निर्झृतकलालपितामृतः स
उत्तानमुत्तमवपुर्वि निधाय शिश्ये।
तस्मिन् पतिष्णुरबला विकसद्विहासा
सा पद्मिनि प्रशुशुभे स्फुटपद्मिनीव ॥ ०॥

आकाङ्क्षया सकलयोग्यतया च युक्ता
नित्यप्रसादमधुरा प्रियरीतिवर्णा।
शाब्दीव चारुरचना दयितोरसीयम्
आसत्तिमाप परमामुरसा निजेन ॥ ;१॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

उत्तानशायिनि नवे तरुणीजनेऽस्मिन्
यूनां चिरादुपरि सन्तरतामगाधे ।
अब्धाविवोच्चपुलिने धृतमीनचिह्ने
पीनोन्नतौ घनकुचाववलम्बनाय ॥६२॥

नीचं गतस्य रमणस्य निराश्रयस्य
तावेव पाणिविधृतौ परमाश्रयौ च ।
सिन्धुं गतस्य पुरुवेगपरिप्लवस्य
कूटाविव क्षितिभृतो नतिहस्तलभ्यौ ॥६३॥

हीनाश्रयः श्रयति यौ समदं रिरंसुः
शुष्काननः पिबति यौ च शिशुः पिपासुः ।
दृष्ट्वा च हृष्यति यतः सकलाऽबला तौ
स्वार्थं विना गुरुकुचौ दधती हि धन्या ॥६४॥

नास्ति स्तनो न च विलम्बितकेशपाशः
दूरं शिरो यदभृता बिभृयादियं सा ।
मान्द्यं गतेत्यु परिगः विपरीतरत्यां
वामाः किलात्र सुतरां सुरतेऽतिवामाः ॥६५॥

सन्दीप्तकाममधुरा विधुराऽधरस्य
पाने रते च तनुदीर्घतरप्रियेण ।
स्वोच्चस्थितेर्नियमतः स्वमुदीर्य्य कण्ठं
आश्वासिता प्रियतमा निपुणेन तेन ॥६६॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

आकुञ्चितोरुयुगले स्वनितम्बबिम्बं
पश्चात् प्रविभ्रति करद्वितयेन गाढ़म् ।
वामा प्रिये निजभुजौ विसवन्निधाय
वल्ली जलौघ इव पाकघना ननर्त्त ॥६७॥

कान्तश्चुचुम्ब चुचुके, ललना कपोले ,
वस्तिं ममन्थ तरुणी, तरुणस्तदूरू ।
एकोत्सवान्तशयितं पुनरप्यनङ्गम्
अन्योन्यमीदृशमिमावुददीपयाताम् ॥६८॥

क्वचिदज इव पश्चात् सम्मुखः क्वापि चोच्चः
क्वचन च शयितः सन् क्वापि चासीन एषः ।
रमणपरमदर्चां कान्तिकान्ताञ्च कान्तां
स्वसदृशकृतवृत्तिं तोषयामास तुष्यन् ॥६९॥

मन्दं मलयपवनो व्याधुनोत् पुष्पजातं
पुष्पात् पुष्पाद्दिशि दिशि महासौरभं पर्य्यगच्छत् ।
नवयुवतयः सौरभं प्रत्यगृह्लन्
तस्यां नव्या निशि समवसन् वा युवत्यां युवत्याम् ॥७०॥

साङ्गोपाङ्गमनङ्गमुत्सवविधौ सम्भाव्य नव्या जनाः
केलिक्लान्तनितान्ततान्तकरणाः श्रान्ताङ्गनालिङ्गिताः ।
शृण्वन्तश्च निशानिशीथपिशुनं शङ्खस्वनं शोभनं
सान्द्रस्यन्दनमन्दमन्द्रमिलितं द्रागेव निद्रां ययुः ॥७१॥

इति श्रीहरिदासकृतौ रुक्मिणीहरणे महाकाव्ये
सम्भोगशृङ्गारवर्णनो नाम एकादशः सर्गः ॥०॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

द्वादशः सर्गः ।

शशिनि निशामुपभुज्य निलीने
परिशिथिलांशुकशालिनि शैले ।
उरसि दिनेशमुषा नवरागा
विजनवियत्यदियाय दधाना ॥१॥

विटपिकुलायविलीनविहङ्ग-
कलकलिलो मृदुलोऽखिललोकान् ।
सुमधुरमङ्गलवाद्यनिनादः
युगपदजागरयत् सुजवेन ॥२॥

कलकलनादितधीवरजालं
दृढमभिगृह्य तदा वरजालम् ।
झषवति वारिणि नीरदवर्णम्
अगमदुदीर्य गिरा रदवर्णम् ॥३॥

वियति वितत्य पतत्रयुगानि
भ्रमणपराः परितः किल चिल्लाः ।
अधितटमुल्लसितानणुमीनान्
द्रुतमुपगृह्य नगान्तमपप्तन् ॥४॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

विशति शनैः सलिलं गलशेषं
जननिकरे परिकर्षति जालम् ।
विचकितरोहितका इव धानाः
सपदि विपुप्लुविरे प्रतिकूलम् ॥५॥

अचलनलोचनमूर्त्तिरटोपि
जनतुमुलान्निभृते प्रतितिष्ठन् ।
क्वचन वकः परमैकविलक्ष्यः
मुनिरिव लब्धसवीजसमाधिः ॥६॥

शिशुशफरीं दधतं कलविङ्कं
वदनपुटेन मुदा विरुवन्तम् ।
नभसि जयन् करटोऽपजहार
नहि बलवान् सदसद्दिविनक्ति ॥७॥

उपपुलिनस्फुरितं शिशुमीनं
सरभसमेत्य पतन्तमरिष्टम् ।
द्रुपदसुतान्वितसिन्धुमहोन्द्रं
परकरटोऽनुययाविव भीमः ॥८॥

स्थिरनयनभ्रमिभिः समयानैः
परिपतनैः सहसाक्रमणैश्च ।
विहगगणो गगनोपरि राजन्
अकृत सरस्तुमुलं घनरावी ॥९॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

पथि परितः परितस्तरिरं गां
प्ररुरुचिरे रुचिरेऽधि च कूले।
च्युतिविकले विकले सलिले च
जनविसरा विसराजिनि केचित् ॥१०॥

वसनतले पृथुले पृथुरोम्णि
चलति भृशं चलितं सहशङ्कम्।
विजनपथेन पटच्चरमारात्
नृपतिचरः प्रजहार विधूत्य ॥११॥

क्व तनुतमा जनभोजनलब्धिः
क्व तनुमताञ्च वधः प्रचुराणाम्।
परमणिचूर्णलवे विमतीनां
निजनखमार्जनमत्र न चित्रम् ॥१२॥

सुचिरचलाचलमीनसमुद्गं
पुरि शतशो नृपतेरुपनीतम्।
अतिमलिनापसदो पशुनाशी
प्रमदवतीव दधे यमदूती ॥१३॥

अधरचिकर्त्तिषया निगृहीतः
झटिति सहस्ररदः करशाखाः।
उरु विदशन् विजहेऽथ कयाचित्
विधुवति कः प्रतिवैरसमर्थम् ॥१४॥

धृतकवजो वृहती दृढपुच्छ-
परिधुनने विनिनाशयिषन्त्याः।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

दृशि विचकार च भस्मनिकायं
श्रपनपराऽप्यमुचच्च तमिका ।१५॥
क्वचिदधिवेणवखण्डगभिक्यं
स्फटिकघनानि दधीनि दधाना: ।
सुसदृशगोपजना विशिखायाम्
अभिपततो मनुजानतिपेतुः ।१६॥
ललितचतुर्विधभोज्यपदार्थान्
नृपभवनानि बहून्युपनिन्युः ।
समवहिता हितकर्म्मणि राज्ञ:
पुरु पुरुषा: प्रतिवस्तु ररक्षु: ॥१७॥
विविधमशान यथेप्सितमन्नम्
अललितमप्यलमेव ददस्व ।
अपि वसुधेशवसूनि गृहाण
स्वमतिमतानि तदा मतिमन्त: ॥१८॥
सुभगतया तुलिता किल कन्या
तदुपमिता नृपमानसवृत्ति. ।
इदमनुरूपतयातिमहः स:
तदनुगुणश्च जनागम आसीत् ॥१९॥
अथ विपद: पदमत्र भविष्यत्
किमपि विशङ्क्य कलङ्कनिदानम् ।
प्रतिविदधे पुर एव स रुक्मी
गहनगमो नहि किं स्मयतेऽस्त्रम् ॥२०॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

कृतशपथाः सुपथि नगरस्य
निविविशिरे पुरुषा धृतशस्त्राः ।
प्रतिभटगन्धमनाप्नुवतोऽपि
धरणिपतेः किमियं पृथुसज्जा ॥२१॥
अयमसतोऽपि जनोऽमुपगच्छन्
अणुमतगीतमदर्शनदर्शी ।
स्थिरतरभावुकभावककर्म-
ण्यशिषदशेषसुभोषणसज्जाम् ॥२२॥
विकसितनग्नतनूरसियष्टिः
शुचिरुचिरुन्मृदुला च कृशाङ्गी ।
जिगमिषुमीषदपि प्रविलोक्य
बलवदकम्पयदाहितकम्पा ॥२३॥
सशरशरासनधारयितारः
विबभुरुरश्छदगूढशरीराः ।
सशिवशतैकसहस्रबुधाङ्का
इव सदृशाः पुरुषा युगमानाः ॥२४॥
ग्रसितुमिव द्विषतो विवृतास्याः
धृतगुडिकाः सह चक्रशतघ्नीः ।
परि परिखां समया वरणान्ते
सुदृढमवीविशदन्तिकसैन्याः ॥२५॥
बुबुधिर एव यथा दलरावात्
अवदधिरेऽत्र तथा घनसैन्याः ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

न तु विविदुर्विदितागतिकन्या-
पुरविपिने हरिमद्रिगुहावत् ॥२६॥
सहगुलिकं नलिकं सुविशालं
पितृपतितर्जनिकामिव बिभ्रत् ।
निजपरिलोकनमात्रबिभात-
व्यपसृतलोकमलोकि च लोकैः ॥२७॥
अनिलविलोलनिचोलनिगूढं
नवललनोरुमभोच्च बभूव ।
कनकगदामिव काषनिविष्टां
कुसुमशरस्य भयाज्जड़ एकः ॥२८॥
अतिचकितः परितः परिपश्यन्
असिमुपवेश्य च चर्म्मणि सद्यः ।
गणतरुणीमभितः समुपेतां
समलपदीषदभोषितमन्यः ॥२९॥
अयनमुपागतमीशनिषिद्धं
शकटमतोच्चामलं प्रतिपिध्यन् ।
विचकितसूतगृहीतधनः सन्
अनुसुसुदे गमनाय च कोऽपि ॥३०॥
चतुरतमोऽथ चिरन्तनसेना-
पतिरसकृत् समितिप्रणिधायी ।
तुरगगतोऽखिलसैन्यततीनां
समवदधे सकलं किल तत्त्वम् ॥३१॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

अथ तुहिनाद्रिगुहामिव पूरः
सुरसरितः पुरमुच्चगभीराम् ।
निजनिजचिह्नचितो रथवारः
सधृति विवेश विशेषसुवेशः ॥३२॥

सपदि पदा पुरगापुरवर्त्तौ
विनयनयौ मतिमानपि रुक्मौ ।
करयुगलेन रथस्थितिमात्रम्
अदधत रश्मिमशान्तहयस्य ॥३३॥

विदितपरस्परवैभवमानौ
युगपदुभावपि नेमतुरेतौ ।
भवति समानगुरुः समनस्का
कियदुदिता तु तुला लघुताभाक् ॥३४॥

नृपतिमनामयमाप्तमनाः सन्
अपि शुभमागतमित्यपि पृच्छन् ।
कमपि नियोज्यममुष्य नियोज्य-
परिणदमैरिरदेष विशिष्टाम् ॥३५॥

पुरमुखतोरणनिम्नविभागे
विशति रथे जनसङ्कुलदुर्गे ।
द्रुतमवतीर्य्य च पृष्ठचरेण
ततिरुदसारि पथो विमनस्का ॥३६॥

ललितलयान्वितदुन्दुभिवेणु-
मुरजमुखध्वनितं क्षणशोऽथ ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

अगणितमुच्छ्रवणैरतिदूरात्
अवहितपौरजनैरनुभूतः ॥३६॥
स कलकलः क्रमशः सविधः सन्
समसुलभां गुरुतां लभमानः ।
समसुरसा दुहितुः क्षितिपस्य
नगरमकम्पयदाहितमोदम् ॥३८॥
स जनगणः स्फुटतामुपगच्छन्
अनवरतध्वनिभिः श्रुतियुग्मम् ।
नवनृपतेर्नयनेऽतुलवेशैः
प्रमदरसेश्च मनः प्रपुपूरे ॥३९॥
अथ पृतनां सकलो विलुलोके
महितमहेभशताङ्कपताकाम् ।
मकरवतीं तपनातपदीप्त-
तरलतरङ्गततिं तटिनीं वा ॥४०॥
अविकलपूर्णरुचिः स्वगणेन
सदृशरुचा च वृतः सुमहार्घैः ।
स्रज इव मध्यमणिः शिशुपालः
समुचितसूत्रधरः समुपागात् ॥४१॥
स विपुलमण्डनमण्डितमूर्त्तिः
नवनृपतेरकरोदतिरागम् ।
स्वयमधुना च वहन् गुरुभारं
व्यधित नतानि शिरांसि परेषाम् ॥४२

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

विधुरिह पूरयते चिरमुद्यन्
जलधिमलं कियतीमपि नाशाम्।
समुदित एव स भीष्मकसूनोः
युगपदपूरि मनः पुनराशाः ॥४३॥

सविधमुपेयुषि चेदिनरेन्द्रे
पृथुतरसिंहनिनादितसैन्ये।
सपदि विदर्भपतेरपि गृह्याः
प्रतिजगृहुः प्रतिनादकृतस्तम् ॥४४॥

शिशुललनाजनमुद्विजमाना
समुदितवीरमनो मदयन्ती।
अतितुदती श्रवणञ्च नराणाम्
असकृदगर्जदनेकशतघ्नी ॥४५॥

गमनवतीं महतीं वरसेनां
प्रथमसुसज्जितरुक्मिचमूः सा।
अभिपतितां तटिनीव तिरश्ची
सकलकलं सरितं समगृह्णात् ॥४६॥

अगणितलोकगणान्तरयातौ
निजरुचिरोचितचारुमरीचौ।
अधिमणि चेदिविदर्भनरेन्द्रौ
विमलमणीव शुभं शुशुभाते ॥४७॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

परमवलोकयतः शिशुपालं
धरणिपतेः प्रमदो हृदि यावान् ।
नृपदुहितुस्तु जनाच्छ्रुतवत्याः
तदधिक एव बभूव विषादः ॥४८॥

प्रमदिहृदोरितरेतरमूर्त्तौ
अभिगमनाय परस्परपाणी ।
विरचयितुं रभसादिव सेतुं
दधतुरुभौ पुलकाञ्चितदेहौ ॥४९॥

अविरलमालपतोर्ललितैलां
दशनसितांशुततेरभितोऽपि ।
उपरि विलोलविलोचनभृङ्गं
वदनसरोजयुगं प्रचकाशे ॥५०॥

समितिसमीपमुपेतमथासुं
सुरभिसमेतमनोजसमानम् ।
युगपदवेक्ष्य ससम्भ्रममाशु
सदसिसदः सदसः समुदस्थुः ॥५१॥

पटलतलात् प्रहिता वनिताभिः
धृतरजतातपत्रारिणि लाजाः ।
स्थितिसमयाविदिता जनासार्थैः
प्रविविदिरे परितो निपतन्तः ॥५२॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

नरनिकराः प्रचुरं जयशब्दं
द्विजनिगणाः परमाशिषमस्य ।
नवललना अतिसाधुगिरश्च
प्रति शिशुपालमजस्रमकार्षुः ॥५३॥

ललितललाममणिप्रचयेन
विरचितमासनमेष समेत्य ।
उदयशिलोच्चयशृङ्गमिवेन्दुः
सुचिरमरोचत राजसमाजि ॥५४॥

नवविपणीतरुणीगणपाणि-
विचलितचामरचञ्चलचूड़ः ।
अनिलविलोलशिरोलतिकालिः
परिषदि मेरुरिव प्रदिदीपे ॥५५॥

मणिमयमण्डनविम्बितदेहान्
कुतुककृतस्मितशोभिमुखाब्जान् ।
पृथु पृथुकान् प्रवहन्नभिवृत्तान्
स्फुटमभवत् स तदा शिशुपालः ॥५६॥

ललितविकस्वरसुस्वरशाली
महदभिनन्दितवन्दिसमूहः ।
पिक इव पञ्चमगो मधुमत्तः
नवनवगानगणैरनुवृत्तम् ॥५७॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

अविरलपङ्क्तिकृतैर्जनवर्गैः
विततवितानचयैश्च दिनेऽपि ।
क्षणमभवत् क्षणदाभ्रमकारि
सतिमिरसङ्कुलमाकुललोकम् ॥५८॥

सदसि च चेतसि चोपगतानां
सपदि सुहासमदुर्बहुदीपाः ।
सह सुतया जरतः क्षितिभर्त्तुः
घनतिमिरं तदगाच्चलचित्ते ॥५९॥

स्वसुखसुदोर्विषये विविधासु
कृतिषु सतीष्वपि रुक्मिजनानाम् ।
स तु विषसाद हृदा शिशुपालः
पिशुनयति स्वमनो हि भविष्यम् ॥६०॥

भूयिष्ठभूषणविभूषितमञ्जुमूर्त्तीन्
वामागणानिव निरीक्ष्य वरं दिदृक्षून् ।
सिन्दूरसुन्दरमुखी विरलान्धकार-
चेला विलोकितुमिवोपजगाम सन्ध्या ॥६१॥

परिषदि परिपूर्णं भूरिसम्भारभारं
समुदितवरलक्ष्मीराजितं चेदिराजम् ।
प्रमुदितमति पश्यन् भीरुसारां स्वसारम्
उदयितुमिह रुक्मी रुक्मिणीमादिदेश ॥६२॥

इति श्रीहरिदासकृतौ रुक्मिणीहरणे महाकाव्ये
शिशुपालागमनं नाम द्वादशः सर्गः ॥०॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

त्रयोदशः सर्गः ।

——:o:——

अपरां भजन् दिनमणिः क्रमशः
विगतप्रभावमहिमा समयात् ।
अकरोत् प्रदोषमपि सन्तमसं
स्वयमस्तमाप च मलानुसृतः ॥१॥
नियतिं न कोऽपि जगति क्रमितुं
क्षमते विधूतपुरुषक्षमताम् ।
उपरि भ्रमन् त्रिजगतां नयनं
सविता विवेश चरमाद्रिगुहाम् ॥२॥
विलयं गते दिनपतावसकृत्
जहतो दिनद्युतिरपि श्वसनम् ।
विकलस्वना मलिनकान्तिकला
सहगामिनी समभवत् सहसा ॥३॥
उदयाचलं चलति चन्द्रमसि
नवतारका मृदुलहासकृतः ।
क्रमशः प्रतिस्वमिव वेदयितुं
प्रियमाशयं समुदगुर्गगने ॥४॥
सहचक्रवाकमिथुना नलिनी
सहकौशिका कुमुदिनी च तदा ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

दुद्रुवे जहास च समायतना
न विधेर्विधिर्भवति नित्यसमः ॥५॥
पुरयोषितां हुलुरवैरुरुभिः
शुभगीतिभिर्विविधनादचयैः ।
मिलितः कलः कलकलैः कलिलः
सहसावरोधनगरादुदगात् ॥६॥
सततस्वनैर्बधिरितश्रवणः
जनसङ्कथामतिसमीपजनः ।
तटिनीनिमग्न इव वृष्टिकणां
कियदन्वमात् कियदपि व्यशृणोत् ॥७॥
परमम्बिकासदनगामिस्तुतिम्
अभिनिःसृतां नृपसुतां प्रविदन् ।
रणपारदृश्वपृतनामभि तां
झटिति न्ययुङ्क्त वसुधाधिपतिः ॥८॥
परिमुक्तकाशितशितासिधराः
पथिपार्श्वयोर्निपुणसैन्यगणाः ।
महदद्युतन्नु परिरिफभृतः
समपङ्क्तयो हल इव द्विगुणाः ॥९॥
सुषमासमालियुगलान्तरगा
पदचारिणी सपदि राजसुता ।
सुखमञ्जरी किसलयानुसृता
नवकेतकीव सरणिं निरगात् ॥१०॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

ललनासु तामतुलनां ब्रुवतो
परमाकृतिः सुकृतिजातकृता ।
उदिता समञ्चमवलोकयतां
समजीजनन्मनसि तर्कमिमम् ॥११॥

इयमेव हन्त कमला विमलात्
स्वपदादधो हि कमलं कमलम् ।
अबुधान् प्रबोधयितुमर्थमसुं
सुचिरान्न चारयति तत्र पदम् ॥१२॥

सुपदे स्थितान्नखविधून् दश तान्
विशदान् विलोक्य चिरचिह्नचितः ।
उषितः पराजयभयादपदे
विधुरेक एव किमु शून्यमगात् ॥१३॥

ननु वस्तुतत्त्वजड़ ! वाङ्निपुण !
कविसार्थ ! निश्चिनुत कोपमितिः ? ।
समधर्म्मवत्त्वमिति चेत् कदलीं
ललनोरुणा तुलयतेह कथम् ॥१४॥

अमुनोरुणा प्रभुरतिप्रभुणा
मसृणेन तप्तकनकच्छविना ।
पशुभोगकृत् सुकठिना विरुचिः
कदली हि कुत्सिततया दलिता ॥१५॥

अथवा विजित्य जगतां त्रितयं
सकलं स्मरेण किल भीषयितुम् ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

निहितं स्वमन्दिरमुखे कनक-
गदयोर्द्वयं न तु तदूरुयुगम् ॥१६॥
यत उद्भवो मनसिजो जनिभू-
समवस्तुशालियुवतीर्जगति ।
निजजन्मभूरुचिरतां गदितुं
स्पृहितास्वकार किमु वर्ण्यमिदम् ॥१७॥
अथवा यतः प्रभविता मदनः
मदनत्वमस्य किमु वाच्यमपि ? ।
जनयन्ति कारणगुणा हि गुणं
ननु कार्य्यवस्तुनि जगन्नियमात् ॥१८॥
रसनासनोकृतनितम्बयुगं
कनकाभमिष्टरुचितं मसृणम् ।
सुतरामराजदिव काममरि-
दधिरोहिणीपरिगवेदियुगम् ॥१९॥
पृथुलोन्नतौ नवनितम्बकुचौ
निखिलानुबन्ध्यतितनुं न तु माम् ।
इति चिन्तयेव चिरसन्ततया
क्रमशो महाकृशमभूदुदरम् ॥२०॥
परितो विघुष्य जगति स्वजयं
कुसुमेषुणा किमपि विश्रमितुम् ।
कलधौतदुन्दुभियुगं निहितं
परिवर्त्त्य वक्षसि कुचौ न तु तौ ॥२१॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

सुतनुस्तनरुहचयः सुतनोः
नतनाभितः स्तनगतः सरलः ।
भवने स्मरस्य च विहारवने
पदवो बभाविव गतागतयोः ॥२२॥

कमलं किलोपरि मृणालमधः
द्वयमेव रीतिरिति चेत् किमियम् ।
विचरन्त्यधोमुखचलन्नलिन-
द्वयवन्मृणालयुगलं वहति ? ॥२३॥

नवपल्लवो व्रजति पल्लवतां
मृदुलं न विद्रुमदलं विमलम् ।
सुरसं न विम्वमपि वा न ततः
तुलना मृदौ तदधरे मधुरे ॥२४॥

अतसीप्रसूनरुचि रक्ततलं
सुतनोः कपोलयुगलं ललितम् ।
निचितं लसत् कनकचूर्णचयैः
पृथुलं प्रवालफलमन्वकरोत् ॥२५॥

न तुला तिलस्य कुसुमेन यतः
सुदृशो नसोऽतिविषमेण समम् ।
विफलोपमा तदिह सा त्वभितः
वदनोचिता भवति येन तथा ॥२६॥

यदि दृष्टिशक्तिरसिताब्जदले
हरिणीदृशि सरलता यदि वा ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

ननु तेन तेन च तदा विपुलम्
उपमीयतां नृपसुतानयनम् ॥२७॥
मृदुमानितम्बपतितं कुटिलं
कचहस्तमस्तनिजकेशरुचिम् ।
त्रपया विलोक्य चतुरा चमरो
समाश्रयत् समजनामटवीम् ॥२८॥
सुतनोस्तनोर्विनिहिताभरणं
निखिलं तिरस्कृतिमिवाजनयत् ।
स्फुटसारसे सहजमञ्जुतमे
परिरञ्जनं खलु विरक्तिकरम् ॥२९॥
इयमेकला कुसुममात्रकरा
पृथुका प्रसूनसुकुमारवपुः ।
बहुयोधिनो बहुविधायुधिनः
समसूमुहत् सरलयेव दृशा ॥३०॥
सुषमाप्रवाहमधुरा मधुरा
पथि संवितीर्य्य सहसा सहसा ।
अखिलाक्षिशक्तिमुदिता मुदिता
चलिता तदैव चपलाऽचपला ॥३१॥
अथ रुक्मिणी सहचरोद्दितय-
सहगामिनी परमभक्तिमती ।
विहिताञ्जलिः क्षितिधरेन्द्रसुता
सदनं समेत्य किल तामनुवत् ॥ ३२॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

प्रकृतिः सतो त्वमसि सत्त्वरज-
स्तमसां समानमिलनप्रकृतिः।
अवबोधयत्तव महत्त्वमलं
महदद्भुतं समभवत् प्रथमम् ॥३३॥

पुरुषेण येन चिरयत्नवता
सकृदीक्षिता गुणवति! प्रकृते!।
सविधं प्रयासि नहि तस्य पुनः
कुलकामिनीमनुकरोषि किमु? ॥३४॥

प्रसुवत्यपि त्रिभुवनं पुरुषः
वहसे च सङ्गरहिताप्यखिलम्।
गुणवर्जितापि सगुणा प्रथसे
तव तत्त्वविन्न खलु कश्चिदपि ॥३५॥

जननि! त्वया सचिवयाधिकृतात्
परमात्मनो वियदिदं समभूत्।
अथ भूतऽन्यदमुतश्च जगत्
त्वमतः स्मृताखिलजगज्जननी ॥३६॥

अथवा त्वमेव परमात्मतया
विदिता स्वशक्तियुगलाधिकृता।
भजसीश्वरादिविविधामभिधां
वनपादपादिसमिताम्बरवत् ॥३७॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

त्रिविधस्वरोच्चरितमन्त्रमयीम्
अवपुष्मतीं भगवतीं भवतीम् ।
स्वरलेशमप्यविदुषी विमतिः
शिशुरङ्गना ननु नुयात् किमियम् ? ॥३८॥

अयि कष्टकर्म्मरहितोऽखिलवित्
समयाविशिष्टविभवः पुरुषः ।
भवतीति ते सकलसिद्धिकर-
प्रणिधानयोग्य इह नैष जनः ।३९॥

तव वाचकं प्रणवमात्रमहो !
महिला तु तत्र वदितुं क्षमते !
अपि नासि वाङ्मनसयोर्विषयः
तदियं नभःकुसुममेव नुतिः ॥४०॥

इति ते परस्परविभिन्नधियः
मुनयोऽम्ब ! रूपमनिरूप्यमिदम् ।
अशरीरशब्दमिव दूरगतं
स्वमनोऽनुरूपमसमं ब्रुवते ॥४१॥

रणभूः पुरा तव पदं स्पृशती
दनुजद्रुता शिवमवाप यदि ।
सुरवैरिपाणिभयगाद्य तव
प्रपदं श्रिता, मम शिवं कुरुतात् ॥४२॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

तव सन्त्यनन्तकजगन्ति तनौ
न जहासि तानि गुरुभारधिया ।
सुमनो नितान्तमणु सन्निहितं
पदसारसात् किरसि किं विरसा ॥४३॥

मृदुबाल एव बलवानपि सः
कथमुत्तरेत् प्रचुरवीररणात् ।
विहरन् पुरन्दरदिगङ्कतले
तिमिराणि हन्ति नु कियन्ति रविः ॥४४॥

इह नो हरेद्यदुपतिर्यदि माम्
अथवा स्पृशेत्तृषितचेदिपतिः ।
त्वमतः सतीत्वविगमान्न सती
शिरसां मणिः किमु पुरा व्यथसे ? ॥४५॥

पदपङ्कजं हरिरिह प्रददौ
इति भाषितं न खलु विश्वसिमः ।
कमलाकरान्तरविहारिकरो
न करोति दृष्टिमपि वृष्टिजले ॥४६॥

अनुपागतं हरिमुपागमय
ननु शक्तिरूपवति ! भक्तिनतम् ।
कलहायमानमधितिष्ठ हरिं
त्रिदशद्विषामिव पुरा समरे ॥ ७॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

अनलानिलाम्बरधरासलिलं
सकलं किल त्वमसि देवि ! जगत् ।
अनुरूपरूपनिकरैरमकैः
अनुकूलयस्व कुलकुण्डलिनि ! ॥४८॥

अतिचण्डचण्डहतिहेतुतमः
तव चण्डिमा भजतु चण्डि ! हरिम् ।
सुकुमारनूतनतनुः क्व हरिः
विकटा भटाः क्व च नु लौहघनाः ॥४९॥

लभतामजीवनिमसावसमः
कमिताद्य मां विमतिचेदिपतिः ।
सवदक्षिणामपजिहीर्षुमलं
न जनङ्गमं प्रहरतीह हि कः ॥५०॥

जगदम्बिकापदसरोजयुगे
भ्रमरायितं विदधती हृदयम् ।
युगपद्विषादसुखमध्यगता
तदगारतो विनिरगात् सुदती ॥५१॥

हरिरेष्यतीति महती मुदिता
क्षणमुच्चफुल्लवदना समगात् ।
कथमेष्यतीत्यतिविषादवशात्
मलिनानना च विकला न्यवृतत् ॥५२॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

अभितो वृतापि धृतशस्त्रचयैः
बिभयाञ्चकार पथि रक्षिभटैः ।
चलिता समेन च चलद्गमना
विमना मनाक् स्तुतिमतीतवती ।।५३।।

चपलामिव प्रचलिताममुकीं
समबोधि नाप्यवहितः पुरुषः ।
सुषमा सुरा च रसगौरविणी
जनचेतनापहरणी सुसमा ।।५४।।

नृपकन्यकारुचिरतानुभवात्
जनचक्रमालिखितवद्विबभौ ।
स्थलमोट्टगध्वनि बभूव यथा
क्षितिपाति कस्तृणमपि व्यरणीत् ।।५५।।

हरिरन्तरेऽत्र समदं चकितं
सविशङ्कमप्यनुरथं प्रचलन् ।
क्वचिदुज्झितध्वनि शनैः क्वचन
सजवं ययौ तदयनाभिमुखः ।।५६।।

पथिपार्श्वतः पथि रथोपहितः
रभसादुपेत्य घनसैन्यततेः ।
अनुतो रराज रजनीशकरे
इव दीपधामनि स नीलमणिः ।।५७।।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

प्रयती नरेन्द्रदुहिता सुहितं
सुचिरान्मनोरथशतेन रथे ।
चकिता विलोक्य किल विश्वसितुं
हरिरित्यसौ न सहसाऽसहत ॥५८॥

मिलनागमे नयनयोरनयोः
युगपन्मनो बलवदुच्छ्वसितम् ।
तटिनीप्रपातसमयेऽम्बुनिधौ
उभयोरिवातिजवमोघयुगम् ॥५९॥

चिरचिन्तितं हृदयदैवतवत्
पुरु रूपमङ्गुतमसेचनकम् ।
अवलोक्य लोचनसुधाञ्जनवत्
परिचिक्यतुः शुभसुभावुभयोः ॥६०॥

पलमात्रदृष्टिकलया सकलं
चिरजीवभावमितरेतरयोः ।
वदतः स्म तौ हि निपुणं नयनं
वचसामगोचरमपि प्रथते ॥६१॥

गुणसंस्तवात् सुचिरमङ्कुरितः
सुदृशा समक्षमधुनेक्षणतः ।
उदितः स्मिते हृदयराग इव
व्यतनोत् प्रभामधरयोरुभयोः ॥६२॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

प्रथमावलोकनकृतमुल्लहरी-
प्लवमानदेहलतिका सरला ।
हरिमाधुरीसमुदयोपगमात्
उदतोलयल्ललितदच्चकरम् ॥६३॥

अथवातिमञ्जुलममुं जगति
परिरभ्य सार्थकमभून्नयनम् ।
किमहं जडः ? पुलकजालचितः
इति चिन्तयन्निव करोऽभ्युदितः ॥६४॥

जगति स्वयोः सुषमयाऽसमया
विमनीकृतान् हतचितस्त्वतुरः ।
पुरुषान्निहत्य रथसम्मुखतः
स पुरःसरः समसरत् सरथः ॥६५॥

किमयं स्मरः ? स खलु पुष्पधनुः,
किमु चेदिराट् ? स तु सभाधिगतः ।
उत भूपतिः ? स किमु हन्ति निजान्
समतर्कयन्निति जनाः कतिधा ॥६६॥

अथ फुल्लपाणिनलिनं तलिनं
जितकाञ्चनाभरणकान्तिमतीं ।
परिगृह्य विद्युतमिवाम्बुवहः
वहतेतमां प्रियतमां स्म रथम् ॥६७॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

स्यन्दनोपरि परीतरुक्मिणी
कृष्णसंवलितकामनीयकम् ।
तप्तहेमनवनीलरत्नयोः
मिश्रितां श्रियमशिश्रियत्तदा ॥६८॥
परं परावर्त्य शताङ्गमिङ्गितात्
स दारुको दारुणवेगितं हरेः ।
प्रधिप्रमर्द्देन विमर्द्य पञ्चषान्
जनान् युयुत्सून् सजवं ययौ ततः ॥६९॥
व्याहर्त्तुमद्य ननु पद्यसमूहमेनं
यावानभूत् किल मया समयोऽपनीतः ।
सज्जीभवज्जनगणास्त्रविसर्गकाल-
सम्पादिते तु हरणे हरिणा न तावान् ॥७०॥
सुखं हरिर्वरगमिनीं जहार च
जघान चाच्चतकरणो भटानिमान् ।
इतो महाकलकलमाकुलोल्वणा
सरिज्जलभ्रमिरिव साऽकरोच्चमूः ॥७१॥
हरिर्हरति रुक्मिणीं किमिति हन्त नः पश्यतां
हरिर्हरति रुक्मिणीं वदत तूर्णमुर्वीपतिम् ।
हरिर्हरति रुक्मिणीं किमु शवाः स्थ निस्पन्दनाः ?
हरिर्हरति रुक्मिणीं निहत भिन्त रुन्धाग्रतः ॥७२॥

इति श्रीहरिदासकृतौ रुक्मिणीहरणे महाकाव्ये
रुक्मिणीहरणं नाम त्रयोदशः सर्गः ॥०॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

चतुर्द्दशः सर्गः ।

तत्र यात्यथ यथा सभां रवि
सम्भ्रमः समभवत् सभासदाम् ।
ह्लादिनो क्षितिविदारदारुणा
यद्यपत्तदपि नैव तादृशः ॥१॥

उच्छ्वसन्नपि रदच्छदं दशन्
घूर्णयन्नरुणलोचने मुहुः ।
धूनयन् सकलसंसदङ्गनं
पार्थिवो युगपदुत्थितोऽखिलः ॥२॥

रोषरुद्धवचनोद्यमो ज्वलन्
कोऽपि न प्रथमसुक्तिमाददे ।
केवलन्तु पुटपाकसम्मितः
संबभौ सुभृशतापितान्तरः ॥३॥

दन्तवक्र इति नाम भूपतिः
स्तम्भकं करतलेन ताड़यन् ।
आह्वयन्नखिनराजमण्डलं
संजगाद घनगर्जनस्वनः ॥४॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

हन्त भो यदि फणावतः प्लवः
मूर्द्धरत्नमपहर्त्तुमर्हति ।
तुच्छजीवनजनिः स गच्छतु
मानहानिमलिनाननो विलम् ॥५॥

पन्नगः खगपतेर्निपत्य चेत्
चञ्चुसञ्चितसुधाघटीं हरेत् ।
उच्छिनत्तु स वरं निजच्छदं
मज्जतूत सुचिरं सरिज्जलम् ॥६॥

आहरेत हरिणो हरेर्यदि
जाग्रतोऽपि रसनां रसक्रमः ।
वेधसं स मृगयन् मृगेन्द्रतां
संजहन्नवतु मन्दिरोन्दुरुः ॥७॥

सन्निपत्य च पतङ्गपोतको
लेलिहानविपुलानलार्च्चिषम् ।
संग्रसेच्चतुरसञ्चरो ध्रुवं
कोऽप्यचिन्त्यसमयोऽयमागतः ॥८॥

नीरधिं पिबति चेत् पिपीलिका
संभुनक्ति चटकोऽचलञ्च वा ।
नो तथापि शिशुपाललालसां
गोपभक्तहृतजीवनो हरेत् ॥९॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

सानहारिहरिहारितौजसः
संजहीत जड़राजराजयः ।
अद्य रत्नमुकुटं कटप्रभं
गौरवास्तनतमस्तकाद्‌द्रुतम् ॥१०॥

चेज्जलं ज्वलयति वनं नवा
सेकमिव तनुते तनूनपात् ।
अद्य भीष्मकसुतापहारतः
तन्न चित्रमपि सागरौकसः ॥११॥

लाघवाद्‌व्रजति सर्वमुच्चतां
गौरवाच्च ननु नीचतां पुनः ।
मानदण्ड इह तन्निदर्शनं
वस्तुतस्तु विपरीतिराहवे ॥१२॥

नीलवृत्तिरनिशं जलाश्रयः
मर्दितो व्रजति यस्तु नम्रताम् ।
तत्र को न कुरुते पदक्रमं
कर्दमं दलयते हि गौरपि ॥१३॥

शश्वदुन्नतिरतीवदुःसहः
आहतो द्विगुणमेधते तु यः ।
तं न मानयति को महस्विनं
पावकं वहति मूर्द्धनीश्वरः ॥१४॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

ारयन्तमुरसि स्वसिद्धये
दूषयन्तमपि वा बिभर्त्ति यः ।
पादपातमरवं सहेत सः
भूमिरत्र नितरां निदर्शनम् ॥१५॥

कण्डूपच्चयसुखो हरिर्जटां
स्वां चमेत विलिखन्तमुन्दुरम् ।
मानहान्यशनिशीर्णवच्चसः
किं चमध्वमिह रुक्मिणीहरम् ॥१६॥

यः प्रतापयति तेजसा जगत्
तं दधाति शिरसा महानपि ।
भास्वतः सकलशैलशाखिनः
पादमुद्दधति फुल्लविग्रहाः ॥१७॥

अद्य राजतनयाशशिप्रभां
द्रागपाहरत कृष्णनीरदः ।
राजराजिवदनप्रदोषकं
सोऽन्धकारनिकरः समश्नुते ॥१८॥

यः स्वयं ज्वलति भूयसौजसा
नो सहायमयमर्थयेत् क्वचित् ।
काननं दहति जातवेदसि
मारुतो वहति पूर्वतोऽधिकम् ॥१९॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

यस्तु वा प्रणमति किलात्मना
तं लघुं निजजनोऽपि मुञ्चति।
ओघभग्नपतितं तटद्रुमं
संजहाति चिरसङ्गतस्तरुः ॥२०॥

अर्पयन्नुरसि साहसात् पदं
यो विकर्षति पतन् दृशं भृशम्।
अन्तरेण कुणपं सहेत तं
को विचेतनविमुद्रितेक्षणः ॥२१॥

अद्य विद्युतितवैद्युतद्युतिं
मूर्त्तकीर्त्तिमिव रुक्मिणीं हरन्।
सासुरेव यदि यादवो व्रजेत्
यान्तु तत् पुरत एव नोऽसवः ॥२२॥

लिप्सते वधमरेर्यदि स्वयं
ध्वंसयत्यनुदितोऽपि तं सुहृत्।
पूर्वपव तमिरस्तमोनुदि
नो गतेऽपि हरतेऽरुणस्तमः ॥२३॥

मानिनः परकृता तिरस्कृतिः
क्षीयते न बहुनाप्यनेहसा।
दक्षशापकृतलक्षणं विधोः
लक्ष्यते तदधुनापि तुल्यवत् ॥२४॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

प्रज्ञया स्थिरतया समन्नया
सम्मदेन सह गौरवेण च ।
रुक्मिणीमपहरन्नयं हरिः
अद्य नो नु किमरच्छदच्छतः ॥२५॥

उष्महीनजलवृत्तयो जनाः
नीचि यान्ति विचलन्ति संहताः ।
यन्ति सव चरणं महोच्चतः
निष्पतन्ति मलमुद्वहन्त्यपि ॥२६॥

उन्नतिं श्रयति यः स्वयं परां
तं नुवन्त्यपि महौजसः सदा ।
अर्यमा भ्रमति मेरुभूभृतः
तापयन्नपि जगत्प्रदक्षिणम् ॥२७॥

इन्दिरारचितगौरवो भजन्
रत्नमण्डिततनूरगाधताम् ।
सोमशेषरहितो महोद्यमो
सागरश्च भुवि केन लङ्घ्यताम् ॥२८॥

धिग्धिगद्य चतुरङ्गवाहिनीं
संविधेयगुरुसाहसक्रियाम् ।
यां ददर्श स कुलाङ्गनामिव
सज्जितां समिति लज्जितामिव ।।२९॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

टी. जी. [illegible]
[illegible], बेदाग
"[illegible]" को अर्पण
१५-७-७५

कालखुप्तसकलाङ्गसौष्ठवं
सौधमप्यवनिमिव मज्जति ।
किन्नु कण्टकहतोन्नतिश्रियः
शीर्षमुन्नमयत क्रियानताः ॥३०॥

भूभृतां सदसि वल्लवाय यः
स्वां स्वसारमपहर्त्तुमर्हति ।
पङ्क्तिपावनमृते पुरोधसं
दक्षिणां किरतु पुक्कसाय सः ॥३१॥

अद्य वज्रमपतिष्यदेव चेत्
एकमेकमवनीभुजां शिरः ।
नो नतं तदभविष्यदोद्दृशं
धिङ्नृपानिममसुञ्च माञ्च धिक् ॥३२॥

भाषमाण इति भूरि निर्भरं
यज्जघान चरणेन स क्षितिम् ।
तद्व्यथामिव वदन्त्यतिस्वनैः
सा स्थिरापि चिरमस्थिराभवत् ॥३३॥

तत्क्षणात् क्षितिभृतां समुत्थितं
सिंहनादपरिबृंहितं मुहुः ।
विस्मितप्रचुरदोपदोष्मिम-
दुद्यतायुधभृणाजभृणायितम् ॥३४॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

कामिनीमुपनिनाय केशवः
दर्पकस्तु नृपतीन् समाश्रयत् ।
कोपपावकभृतो महीभृतः
तापमाप विपुलन्तु चेदिराट् ॥२५॥

कृष्णनेमिपरिदीर्णवक्षसः
शेरते स्म भुवि पञ्चषा भटाः ।
दारुणामुरुमरुन्तुदव्यथां
संपुपोष दमघोषनन्दनः ।२६॥

भीरुरत्नमधिगन्तुमिच्छतः
तस्य तत्र भजतोऽतिदुर्यशः ।
नागमूर्द्धमणिमुज्जिहीर्षतः
दश्यमानवपुषो दशाभवत् ॥२७॥

सर्व एव कमनीयकन्यया
सङ्गतः सकललोकगीतया ।
लज्जते गुरुजनात् पुरा वसन्
चेदिपस्तु तदकीर्त्तिमालया ॥२८॥

जन्मिनां प्रतिमुखं क्व सुस्तुतिः
क्वोच्चकैरियमकीर्त्ति घोषणा ।
चिन्तयन्निति महाकुलः किल
चेदिभूपतिरभूत् क्रमोज्झितः ॥२९॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

रुक्मिणीमहृत यादवः सुखम्
इत्यसौ गुरुमधीरतामगात् ।
गृह्णति स्वमभिपातुकां नदीं
मारुते किमुदधिर्न्न वायते ॥४०॥

संज्वलन् किमपि जोषमोजसा
भीषयन्नपगतावलाकुलम् ।
बिभ्रदुज्ज्वलमुरश्छदं दृढ़ं
प्राक् परात् स समनह्यदञ्जसा ॥४१॥

स्वान्तिकादहितयाभिसंग्रह-
तापतप्तमनसाऽथ रुक्मिणा ।
दन्तवक्त्रवचनानलैः पुनः
प्लुष्यमाणवपुषेति संजगे ॥४२॥

कर्म्म साधयितुमल्पमुद्यमो
भूरिराहुरविमृष्यकारिता ।
गोष्पदं परितरीतुमीहते
कोऽब्धियोग्यजलयानयोजनम् ॥४३॥

मातुरङ्कमधिशय्य कौमुदीं
पाणिनैव शिशुको जिघृक्षति ।
अप्रभुत्वविरतः स्वयं पुनः
लुण्ठति क्षितितलेऽपि तत्क्षणात् ॥४४॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

यादवापसदसादनक्रिया
साधनोद्यततमेऽल्पके मयि ।
किं भवद्भिरचलाविचालनो-
त्तोलनक्षमतमैः समुत्थितम् ? ॥४५॥

अद्य मे वत यथा नराधमः
नो भवत्सु तु तथापराध्यति ।
मर्कटो हि परिमृश्य वल्लरीं
स्वं दुनोति न वनान्तरद्रुमम् ॥४६॥

स्वैरगुप्तसमयोपपातिनः
गोपरक्तनिजुषो जलौकसः ।
प्रोथयामि विशिखेन विग्रहे
विग्रहं विचलतोऽद्य सोढ्यता ॥४७॥

सांख्यसम्मतचितो यथा नृपाः
अत्र कर्म्मणि चिरादुदासताम् ।
एषकः प्रकुरुते प्रधानवत्
सन्निधाननिपुणीकृतः क्रियाम् ॥४८॥

कृत्तकृष्णशिरसः समुत्सर-
च्छोणितोच्चितभुवा सहाधुना ।
रागिणीं चितिभृतामनीकिनीं
वाढ़मेव विदधीय धामतः ॥४९॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

भीष्ममार्गणगणस्य यास्यतः
दुर्द्धरध्वननधूतचेतनम्।
वीक्ष्यतामिह हरिं परिस्खल-
द्दन्दशूकदशनाप्तदर्दुरम् ॥५०॥

भूभृतोऽद्य समितं समेत्य भोः!
केवलं भवत साक्षिणः क्षणम्।
नैष वल्लवकलङ्कवल्लभं
नानिहत्य नगरे निवर्त्स्यति ॥५१॥

सोऽसुभिर्हरतु मेऽद्य रुक्मिणीं
तामहं तदसुभिर्नवाददे।
दुर्यशःक्षितिरजोभिरुज्ज्वलं
जीवनं हि मलिनं विधीयते ॥५२॥

भाषमाण इति नद्धकङ्कटः
रोषरूक्षनयनेन तत्क्षणात्।
स्नेहमस्थिरतनूरवापयन्
अग्रहीदसिमसीमसाहसः ॥५ ॥

यावदुच्चरति खे जयध्वनिः
सिंहनादवधिरीकृतश्रुतिः।
तावदेव स समाश्रयत् समं
स्यन्दनं निखिलदृष्टिवृष्टिभिः ॥५४॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

सत्पथे रथमथो सुसारथेः
आज्ञयैव सितपीतपीतयः ।
चक्रपाणिमनु रुक्मिणी मनः
यायि जेतुमनसोऽत्यतत्वरन् ॥५५॥

पार्थिवस्य पृतनानुपातिनी
घोरनादमुखरा निरन्तरा ।
तां पुरःसरभगीरथामर-
निम्नगाश्रियमशिश्रियत्ततः ॥५६॥

दन्तवक्रशिशुपालपूर्वकाः
स्वस्वसैनिकनिकायसंहिताः ।
भङ्गमेकमनुभङ्गवीथयः
वारिधेरिव समन्वगुर्नृपम् ॥५७॥

क्व प्रमोदलहरी विवाहजा
क्वाधुना परमदारुणो रणः ।
आकुलाकुलकुलाङ्गनाकुलं
मन्दमन्दमगमद्गृहं क्रमात् ॥५८॥

आचकाङ्क्ष च जयं परं प्रिये
रुक्मिणीञ्च हरिहस्तगामिनीम् ।
दुर्घटं तदुभयन्तु चिन्तयन्
अन्वतप्त भृशमङ्गनाजनः ॥५९॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

भूरिवर्णशवला बलावली
गर्जनोर्जितपरस्परा श्रिता ।
विद्युतेव विविधास्त्रलेखया
मेघराजिरिव गामपिप्लवत् ॥६०॥

उत्साहयन्तोऽतिमनांसि पुंसां
प्रणर्त्तयन्तो द्विपसप्तिसैन्यम् ।
तरङ्गशब्दानुदधेर्हसन्तः
उच्चैरुरच्चैर्घनवाद्यनादाः ॥६१॥

वीच्य स्वसारमतिसाध्वसबाहुवल्ली-
संवेल्लिताच्युतगलां पुरतः शताङ्गे ।
सौदामिनीमिव घनाङ्गगतां सुमेरौ
रुक्मी तुतोष च रुरोष च योग्यताज्ञः ॥६२॥

हरिरगणितसैन्यं धावदाच्छाद्य भूमिं
हरिणगणसमानं विप्रकृष्टाद्विलोक्य ।
चकितचकितचित्तां सम्यगाश्वास्य कान्तां
झटिति चलमकार्षीत् सम्मुखे तं शताङ्गम् ॥६३॥

इति श्रीहरिदासकृतौ रुक्मिणीहरणे महाकाव्ये
प्रयाणं नाम चतुर्दशः सर्गः ॥०॥

———:———

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

पञ्चदशः सर्गः ।

——:०:——

बलोऽथ सबलो बालमनेकाक्रान्तमेककम् ।
उपलभ्य समालभ्य हलिं हालामदोऽभ्यगात् ॥१॥

अग्रे तमग्रजं वीक्ष्य शुभ्रांशुमिव शुभ्रशुम् ।
आननश्रीः श्रियः पत्युः तमीव विद्युतेतमाम् ॥२॥

पद्मबन्धः ।



(एष मद्धाक्षरादारभ्य दिग्दलेषु निर्गमप्रवेशाभ्यां विदिग्दलेषु तु क्वचित् प्रवेशेन क्वचित् निर्गमेन च अधस्तात् विन्यस्तः श्लोको भवति ।)

तान्ततामागतामीश-श्रमोता मदमापता ।
तापमाप नता सेना नासेताहितताम्तता ॥३॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

विभक्ताग्रा परभाविन्या शून्यं तद्रुक्मिणो बलम् ।
असंख्यमेकरूपञ्च मेन आत्मानमव्ययम् ॥४॥
गजेन्द्रगमनाऽधीरा सुगुप्ता सा महोन्मदा ।
वाहिनो तमसाच्छन्ना दधाव परनायकम् ॥५॥
पदातिपोतिसम्पन्नाः सहसा रथिकुञ्जराः ।
अधावन्त हरिं मत्ताः सहसारथिकुञ्जराः ॥६॥
रामः सेनामुखे तिष्ठन् सेनां नानाविधायुधाम् ।
यथास्थानं समाविश्य समानगुणगौरवाम् ॥७॥
वार्त्तं वार्त्तां स्वयं लिप्सुरालोकलोललोचनः ।
चातकः शातकोऽरीणां सजलं जलदं यथा ॥८॥
कादम्बरीप्रियः प्रायात् कादम्बहरिणो हरिम् ।
कादम्बरेणुरोमाञ्चः कादम्बकधनुर्द्धरम् ॥९॥

गोमूत्रिकाबन्धः ।

दो	प्र	नी	ला	व	लो	श्या	मं	धा	म	स	न्तु	ष्ट	लो	क	कम्
प	प्र	च्छ	ला	ङ्ग	लो	चे	मं	भू	म	द	न्तु	र	लो	क	कम्

(प्रथमायाः पङ्क्तेः प्रथमाक्षरस्य, द्वितीयायाः पङ्क्तेः द्वितीयाक्षरस्य, प्रथमायास्तृतीयस्य, द्वितीयायाश्चतुर्थस्य इत्येवं क्रमेण पाठे प्रथमार्द्धम्, पुनः द्वितीयायाः पङ्क्तेः प्रथमाक्षरस्य, प्रथमायाः द्वितीयस्य, द्वितीयायास्तृतीयस्य प्रथमायाश्च चतुर्थस्य अक्षरस्य एवं क्रमेण पाठे द्वितीयार्द्धं सम्पद्यते । तेन चायं श्लोकः ।)

दो प्र नी ला वं लो श्या मं धा म स न्तु ष्ट लो क कम् ।
प प्र च्छ ला ङ्ग लो चे मं भू म द न्तु र लो क कम् ॥१०॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

बलरामात् सरामः स क्षियाननमनोनमत् ।
मनस्वी विघ्ननिघ्नोऽपि विनयं न जहाति हि ॥११॥

ऊचे शौरिररीन् हन्तुः सर्वं मङ्गलमङ्ग ! मे ।
पश्यतोऽर्य्यमणश्चार्य्यं कस्य नश्यति नाशुभम् ॥१२॥

सह तेन समुद्युक्तः समिति समयादरम् ।
सहते न समुद्युक्तः समिति समयादरम् ॥१३॥

समुद्गयमकम् ।

प्रागङ्गाय नृपो गृह्णन् सज्यं कोदण्डमखण्डलम् ।
रुक्मिणीजानये बाणं पञ्चबाण इवाकिरत् ॥१४॥

त्रासयन्नहितानीकं पूरयन् विदिशो दिशः ।
दारयन् रन्ध्रमद्रीणां सिंहनादं ननाद च ॥१५॥

चिरं चारुरुचा रोचो विभवो विबभौ विभुः ।
कोपपाकाकुपः कोऽपि चलाचलोऽचलाचलः ॥१६॥

द्व्यक्षरपादः ।

विविद्वान् युद्धविद्वान् स प्रजिहीर्षुं हरिं हली ।
दन्तवक्रं प्रचुक्रोध कः क्षमः क्षमते खलम् ॥१७॥

विशेषविषयः सोऽथ कालिन्दीभेदनोऽभिनत् ।
ख॰ः खगेशवेगैस्तम् उत्सर्गमिव बाधकः ॥१८॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

श्लोकद्वयेन लताबन्धः ।



CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

(अत्र निम्नपुष्पस्य वामदलगत 'वा' शब्दादारभ्य क्रमिकवज्राघरसहितपाठेन अधस्ताद्विन्यस्तं श्लोकद्वयं सम्पद्यते । चमत्कारिताविशेषस्तु अधोदेशात् वज्राघराणां ऊर्ध्वदिशि क्रमिकपाठे "हरिदासकृतिरियं" इति वाक्यमुपजायते ।)

वाहवाहसहव्यूहः भूरिवैरिप्ररिष्टिकृत् ।
सदामदा पदातिश्च व्यसरत् सह सङ्गिभिः ॥१९॥
प्रकृष्टकृतिकृद्घोरः भूतिभातिस्तुतिश्रितः ।
हरिङ्गरिपरिव्राजो चायं चायं स्वयं ययौ ॥२०॥
लोकः समालुलोके प्राक् स्थिरायामस्थिरं शिरः ।
रुक्मिसैन्यस्य जन्येऽस्मिन् हरिमुक्तं शरं परम् ॥२१॥
अन्योन्यशस्त्रसम्पात-विदीर्णवर्म्मवर्ष्मणाम् ।
रोषेण सह शूराणां दारुणो रण ऐधत ॥२२॥
परारिपारुप्रापूरैः पुरारिपुरुरूपपैः ।
पुरः पुरः परं पारं प्रपुपूरे परैः परैः ॥२३॥ द्व्यक्षरपादः ।
शार्ङ्गेण शार्ङ्गिणा मुक्ता शरराजिरराजत ।
अचला चञ्चला चेत् स्यात् सौपम्यं सम्यगीयुषी ॥२४॥
शतशः सन्निधौ कृष्णं किरन्तं विविधायुधम् ।
संपश्यत्तद्बलं नश्यत् परःशतममंस्त तम् ॥२५॥

सर्वतो भद्रः ।

ना लो सा रा रा सा लो ना
लो ल या म म या ल लो ।
सा या ता ता ता ता या सा
रा म ता जि जि ता म रा ॥२६॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

उपासन्नो द्विधा चक्रे चक्रेण चक्रपाणिना ।
विप्रकृष्टः समाकृष्टः पाशेन पशुवत् परः ॥२७॥
सहस्रकिरणाकारं सहस्रशरकारिणम् ।
दुर्द्दर्शं तं ददर्शाग्रे हरिं हरिणवञ्जनः ॥२८॥
दीनरावबती वारे रामाला वहदाहवा ।
वाहदाहवलामारा रेवातीववरा नदी ॥२९॥

श्लोकप्रतिलोमयमकम् अथवा गतप्रत्यागतम् ।

विदर्भभूपतिः पश्यन् नश्यन्तीं स्वामनीकिनीम् ।
मधुद्विषं विदिद्वेष महाद्विपमिव द्विपः ॥३०॥
सपक्षा रिपुपक्षाशा सशिखा विशिखावली ।
मुक्ता तेन हरिः कण्ठेऽकुण्ठमापतदुन्नता ॥३१॥

व न मा लि का य पा तो
न वा नि खि ल जो व पा ।
मा नि ता ता ला हा जो य
लि खि ता ङ्ग क ला ल का ॥३२॥

अर्द्धभ्रमकः । युग्मकम् ।

मुखेन सह रुक्मिण्या म्लानमूर्त्तिः शरैररेः ।
तस्याश्च सह हासेन केशवोऽवीवृधन्महः ॥३३॥
आसन्नं दूरसञ्चारं सुदुर्द्दर्शं सुदर्शनम् ।
आलोकलुप्तप्रत्यर्थि-प्रकाशं स समग्रहीत् ॥३४॥
भीतीनां तरसाधारं तरसा धारयन् हरिः ।
द्विषत्सु सहसाक्षिप्यं सहसाक्षिप्य तद्दृशः ॥३५॥

पादाद्यन्तयमकम् ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

कृत्यमानां परग्रीवां तेन पश्यन् परः पुरः ।
द्राक् पलायितुमारब्धः स्वं गलं छिन्नमन्वभूत् ॥२६॥
एकस्यापि हरेरग्रे शतशो रुक्मिसैनिकाः ।
नातिष्ठन्त क्षीयमाणा अवश्याया रवेरिव ॥२७॥

वृक्षबन्धः ।



CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

(उपरितनशाखयोर्वामशाखास्थचतुर्दलपुष्पस्य उपरिदलस्थ'प्र'रूपादक्षरादारभ्य अक्षाक्षरेण सह प्रथमं पाठः। परञ्च अपरदलस्थयोरपि अक्षरयोस्तथैव पाठः। तत्परञ्च पत्रशीर्षस्थाक्षरयोः तथैव पाठः। तेन च प्रथमचरणं सम्पद्यते। एवं-रूपेण उपरितनशाखयोर्दक्षिणशाखायां द्वितीयचरणम् अधस्तनयोः शाखयोर्वाम-शाखायां तृतीयचरणम्, दक्षिणशाखायाञ्च चतुर्थचरणं पठनीयम्। तेन चाधस्तनः श्लोकः सम्पद्यते।)

प्रकामकार्य्यकाम्येक-भूपतिः पतिपर्व्वक।
नाश्यपश्य आश्वरविः तेजः स्वोजः सुजः पविः ॥३८॥

सन्दधे शत्रुशस्त्राणि चकर्त्त च मुमोच च।
जघान च द्विषत्सेनां युगपत् स विदर्भराट् ॥३९॥
युग्मकम्।

रोषताम्रास्यसूर्य्यस्य सकाशेऽप्यस्य संयुगे।
नयनेन्दीवरद्वन्द्वं पुस्फोट तारकालिकम् ॥४०॥

विकलं विकलं कृत्वा सकलं सकलं द्विषम्।
समरे समरेऽदीपि समदः समदर्शनः ॥४१॥

रुक्मिणः स महान् मानः बभूव स्वविपत्तये।
उपरागाय शीतांशोः पूर्णिमायां हि पूर्णता ॥४२॥

खर्व्वीकरिष्यन् गर्वं तं विक्रमं स त्रिविक्रमः।
ततान ताड़ितो यद्वत् आशुगेनाशुशुक्षणिः ॥४३॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

मुरजबन्धः ।



(प्रथम'स'कारादारभ्य तिर्य्यग्रेखानुसारेण पाठे प्रथमचरणम्, तथैव चतुर्थचरणम् । द्वितीयचरणस्यप्रथमाक्षरादारभ्य तिर्य्यग्रेखानुसारेण प्रथमचरणगतयोर्द्वितीयतृतीययोर्द्वितीयचरणगतयोश्चतुर्थपञ्चमयोः प्रथमचरणगतयोः षष्ठसप्तमयोरक्षरयोर्द्वितीयचरणस्यास्य अन्तिमस्याक्षरस्य च पाठे पुनर्द्वितीयचरणं निष्पद्यते । तृतीयचतुर्थचरणयोस्तथैव पाठे पुनस्तृतीयचरणं निष्पद्यते, तेन च निम्नलिखितश्लोकः सञ्जायते ।)

स ह सो च्च त मा न स्रोः
सा ह सो ज्ञिं त मा न सः ।
स ह सो ह्र र्द्ध मा न स्रोः
स ह सो च्च त मा न नः ॥४४॥

प्रयोगैर्विविधैर्बन्धान् महाजन्यक्षदादधत् ।
महाकाव्यकरः कृष्णः महाकविरिवाद्युतत् ॥४५॥

विक्रान्तवन्तमत्यन्तं क्षान्तमूर्त्तिर्विदर्भराट् ।
न सेहे यादवाधीशं मृगेशमिव कुञ्जरः ॥४६॥

सत्वा तेन नते त्रास कातरेऽप परे तका ।
बाला नूतनलावा चारुहाससहा रुचा ॥४७॥

प्रतिलोमानुलोमपादः ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

विद्वेषादिव रुक्मिण्याः श्रितं शौरिं जयश्रिया ।
जिगीषामास निर्वर्ण्य बलभद्रो द्विषद्बलम् ॥४८॥

विदधे विशिखासार-च्छलेनार्कान्तिकेऽपि सः ।
अश्रान्तलेखानाकाश-प्राङ्गणे ज्योतिरिङ्गनान् ॥४९॥

छिद्रबन्धः ।

(एकस्य पत्रस्योपरि अपरं पत्रं निधाय तस्मिन्नुपरितने पत्रे श्रेणीद्वयेन कियत्कियदन्तरम् अष्टौ अष्टौ कृत्वा षोड़शच्छिद्राणि विधेयानि । तेषां छिद्राणां मध्ये आदिमं तृतीयं पञ्चमादिकञ्चाक्षरं लेखनीयम् । येन तानि अधःपत्रे स्थितानि स्युः । द्वितीयं चतुर्थादिकञ्चाक्षरं छिद्रान्तरालेषु लेखनीयम् । येन तानि उपरितने पत्रे स्थितानि स्युः । ईदृशविन्यासे च अधस्तात् विन्यस्तः श्लोकः सञ्जायते । चमत्कारितातिशयस्तु उपरितनपत्रापसारणे अधस्तनपत्रगतानाम् अक्षराणां पाठे वङ्गभाषायाम् इदं वाक्यमुपजायते । यथा—"तेर शत षोल सन ए रचना समापन ।")

ते श र प्रा श जा त ङ्का षो ढ़ा ल च्य स दो न तान् ।
ए तान् र णे च ला ना धुः स ञ्जा मा न प तीन् न कान् ॥५०॥

सभावाग्विक्रमौ दन्त-वक्रस्तुक्रोध विच्चतः ।
पूर्ववाग्व्यक्तमर्थं हि नानुतिष्ठन् श्रियः पदम् ॥५१॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

अश्रान्तवर्षुकः क्षिप्रं चञ्चलाङ्गद्युतिश्रितः ।
गम्भीरगर्जनः शत्रून् जलदश्च जिगाय सः ॥५२॥

चन्द्रहासेन तेनाथ ते नाथक्रतपालनाः ।
पाल-नाशन-निष्प्राणाः निष्प्राणाः पेतुराहताः ॥५३॥

हली समाहतस्तेन तेने तेजस्वितां पृथुम् ।
नोल्लोलयति कल्लोलान् वातनुन्नः किमर्णवः ॥५४॥

सोऽधुसेवनरक्ताभं विशालं लोललोचनम् ।
प्रभात इव शोणाब्जं रोषात् सुरक्ततां ययौ ॥५५॥

दन्तवक्त्रं क्रमात् क्रामन् हलभृत् स हलाग्रतः ।
मुषलेन ममर्द्दालं प्रहारोद्धतमुद्धतम् ॥५६॥

अतालव्यः ।

प्रहृतः कोऽपि निःसंज्ञः संवुवूर्षुं सुराङ्गनाम् ।
विलोक्येव लब्धसंज्ञः रणे प्रववृते पुनः ॥५७॥

निहतात्मजसोदर्य्यो धैर्य्यमाधाय धीरधीः ।
शस्त्रपाणिः सीरपाणिं ययौ यममिवापरः ॥५८॥

कुण्डली हलिनो भीतः खगीशादिव कुण्डली ।
वेशवान् आहतः कश्चित् बभूव रन्ध्रवेशवान् ॥५९॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

शस्त्राशस्त्रि महोत्साहैः हस्ताहस्ति नखानखि ।
ववृधे तुमुलं जन्यं सेनयोरुभयोरलम् ॥६०॥

हत्वासन्नान् स शस्त्रेण शत्रूनस्त्रेण दूरगान् ।
समीपविप्रकृष्टानाम् अभवत्तुल्यदारुणः ॥६१॥

समस्ता रिपुसेनास्ता रामास्त्राशुगसंभृतः ।
दूर्वा इव बभुः प्रातः शिरःशिशिरशीकराः ॥६२॥

दयावान् स बलो भग्नान् दलनायाततानवान् ।
संववर्ज लोलहृदः भटान् लग्नान् व्यनीनशत् ॥६३॥

गूढ़प्रथमपादः ।

पलायामासिरे सेना मूर्च्छां नीते कराहते ।
भास्वता दन्तवक्त्रेऽस्मिन् सोमे तारा इव प्रगे ॥६४॥

अङ्गनालिङ्गिताङ्गं तं गोविन्दमिन्दुसुन्दरम् ।
तदा बलोऽवलोक्येव शिश्राय विजयश्रियम् ॥६५॥

रोचनस्तेजसा शौरिः मध्यन्दिनविरोचनः ।
रोचनश्रीस्तताड़ारीन् नेत्रनिन्दितरोचनः ॥६६॥

रुक्मी प्राणपणोद्योग-महोत्साहसहोऽपि सन् ।
नात्येतुमच्युतं सेहे प्रतिकूलं यथा विधिम् ॥६७॥

सूतं जघान चिच्छेद ध्वजं सह जयाशया ।
बिभेद च शनैः शौरिः युगपद्वर्म्म रुक्मिणः ॥६८॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

विलोक्योच्चूर्णि योद्धृणां दुर्नीतिं नेतुरोट्टशीम् ।
चेतो विषेदे निःश्रेणि-स्थितोनां दुःस्मृतिश्रिति ॥६८॥

निरौष्ठ्यः ।

जेतुं जवमिविष्णूणां मुहुरापततां हरेः ।
परि पुरःसरीभूय दुद्रुवुद्रुं तमाहवात् ॥६०॥

विनेशुः सैन्यसेनान्यः सहायस्तु पराजयः ।
स्मरन्निति स निर्विंसः सासिरासीद्‌गतो रथात् ॥७१॥

विद्धास्त्रं स वपुः पातिशिलीमुखकदम्बकम् ।
वहन्निवागात् क्षणं स-शिलीमुखकदम्बकम् ॥७२॥

चिच्छेदागच्छतस्तस्य निशातशरसञ्चयैः ।
मुष्टौ रिष्टिमरिष्टारिः रुक्मिणी रुक्मपुङ्खकैः ॥७३॥

गदाधरं दधावाथ गदामादाय दारुणाम् ।
शतवाधावधूतोऽपि कार्थ्याद्दाम्यति नोद्यमो ॥७४॥

लोललोलाललो लोला-ल्लालो लोलालिलोलल: ।
लोलेलालो लाललाल: लोललोलोऽललालल: ॥७५॥

एकाक्षरपादः ।

माधवस्तां निकृत्यारात् चक्रेणाक्रम्य तं गले ।
सज्यस्य धनुषोऽग्रेण च्छेत्तुं निस्त्रिंशमाददे ॥७६॥

युग्मकम् ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

पाणावुन्नमिते तस्मिन् चन्द्रबिम्बानुबिम्बितः ।
चन्द्रहासो जहासास्य रथे चन्द्र इवापरः ॥७७॥

सुवर्णभूषिता साऽलं नाथस्य करमाददे ।
सुवर्णभूषिता सालं लतेव नृपजाकुला ॥७८॥

रामोऽथ दूरतो वीक्ष्य तत्क्षणादेत्य तत्पुरः ।
समयोचितमत्युच्चम् अवोचदच्युतं वचः ॥७९॥

मानिनो माननाशः स्यान्मृत्युरप्राणनाशकः ।
तुल्या दशैव तिग्मांशोरस्ते चाब्दतिरस्कृते ॥८०॥

उष्माभावः परं जाड्यं प्राणमोक्षो महीशयः ।
पारवश्यं परैर्घृण्यं क्षौणीजःशवयोर्भुवि ॥८१॥

महान् खल्वपकर्त्तॄणां दयते तु हिनस्ति न ।
ग्रसते न दधात्येव स्वां खनन्तमपि क्षितिः ॥८२॥

उपकारः प्रतीकारः महीयानपकारिषु ।
प्रभूतेन्धनदानेन ज्वलनो हि प्रशाम्यति ॥८३॥

विरसं तज्जहीहीमं विरसं पन्नगं यथा ।
सदनं यातवानेष सदनं प्रति गम्यताम् ॥८४॥

अथवैनं क्षुरप्रेण मुण्डयित्वा विहापय ।
अयमेव वधः प्रोक्तः वध्यस्यालोककर्म्मणः ॥८५॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

अभिषिक्तो वियोक्तव्यः नासुभिर्वसुधेशिता ।
विशेषतस्तु सम्बन्धो स्वसासन्ना च सादिनो ॥८६॥

इति ज्यायस आदेशात् विमुखोऽभूत् स तद्वधात् ।
नहि लङ्घयति धीमान् पूज्यं पूजितसद्गुणः ॥८७॥

अमूर्द्धन्यः ।

केशपाशं हृषीकेशः लुलुञ्चे तस्य कुञ्चितम् ।
मानहानेर्वभौ भूमौ पुञ्जीकृतमिवायशः ॥८८॥

जीवन्मुक्तः परोद्योगात् अदृष्टाद्देहवानयम् ।
पुनर्नारायणी योक्तुं न पुनः प्राविशत् पुरम् ॥८९॥

प्रायोपवेशनं चक्रे उग्रात्मा पुरतोऽन्तरे ।
नालोचयदवस्थां ताम् उग्रात्मा पुरतोऽन्तरे ॥९०॥

स्वपुरं प्रति दारुके रथं
सरत्नं प्रेषयति प्रहृष्यति ।
स सितस्मितराजजाऽधरे
नलिने वा नलिनं दधेऽधरम् ॥९१॥

सम्मदो विजयिनीमनीकिनीं
द्वारकापथमथापि सा समम् ।
सोऽपि तत्र निखिलान् खलान् खलु
व्यानशे व्रजपतो व्रजत्यरम् ॥९२॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

विशेषपद्मबन्धः ।



(दलबहिःस्थितं 'वि'शब्दादिक्रमारभ्य दक्षिणक्रमेण सरलभावेन बद्धाक्षरसहितं 'व्वं'शब्दादिपर्य्यन्तम् एकैकचरणं पठनीयम्। तेन चाधस्तनः श्लोकः सञ्जायते। चमत्कारिताविशेषस्तु दलबहिःस्थितानां 'वि'शब्दादीनां क्रमिकपाठे ईदृशं कविदेश-परिचायकं वाक्यमुपजायते। यथा—"विप्रकविव्वंङ्गवासी"।)

विघोषणीयः परिपूर्णगर्व्वं प्रधानशक्तोः परमो जयोऽङ्ग।
कसत्तथालाप-हरिप्रभा वाऽविशत् पुरं सा परपद्महासी ॥८३॥

इति श्रीहरिदासकृतौ रुक्मिणीहरणे महाकाव्ये
कृष्णविजयो नाम पञ्चदशः सर्गः ॥०॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

षोड़शः सर्गः ।

——:o:——

धाम निजं सरमेऽथ रमेशे
प्राप्तवति स्वनितादपि नृणाम् ।
नूतनहारिहरीक्षणजन्मा
तुङ्गतमः प्रमदः प्रबभूव ॥१॥

सिक्तसुमृष्टमहापथसार्थैः
केतुगणैर्धृतचित्रपताकैः ।
अत्यलसच्च चलत्सुममाल्यैः
भीष्मकजामिव वीक्ष्य पुरश्रीः ॥२॥

वस्तु समजं यदेकसमोके
लोकललामतमं द्वितयं सः ।
तत्र चलाप्यचला कमलाभूत्
कीर्त्तिरितीव निरीक्ष्य चलासीत् ॥३॥

भीष्मकजां मुरवैरिविहारात्
कान्तिमतीमवलोक्य नितान्तम् ।
द्वारवती सुपुरी पुरुरूपैः
मत्सरिणी चकितेव चकाशे ॥४॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

स्त्रीच्छलिका किमु पुञ्जितकान्तिः ?
चन्द्रविभा किमु मूर्त्तिमती वा ।
देहमिता नु सुधा वसुधायां
तामिति वीक्ष्य जनैः समतर्कि ॥५॥

नीलमणिर्विमलो वनमाली
स्वर्णमयीयमपि प्रियदृष्टिः ।
दैवकृतो मणिकाञ्चनयोगः
एषक इत्थमलापि च लोकैः ॥६॥

श्रेणिकृता प्रमदा प्रमदाली
नव्यबधूं व्यवधूय नरौघम् ।
स्वैरमुलुध्वनिनाऽध्वनि नाम
क्षेमयितुं सहसा सहसायात् ॥७॥

सान्द्रमुदां नगरी लहरीभिः
भूरिरवा समहा महतीभिः ।
तुङ्गतरङ्गततिं सरिदीशम्
अन्वकरोदिव सा न्वतिसाध्वी ॥८॥

राक्षस एव भवेन्नु विवाहः
दानविधिं न विधिर्विदधीत ।
चिन्तयतीत्थमितो वसुदेवे
दैववशाद्‌दृशे ध्वजमारात् ॥९॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

आनकदुन्दुभिमानसमेषः
यानपथेन समं परिणत्य ।
सन्ततचक्रविवर्त्तविघातैः
आगतवानथ भीष्मकराजः ॥१०॥

हासविकासितशान्तिसुखस्य
शस्त्रनिवृत्तिसुवृत्तिशुभस्य ।
हेतुमिहागमनेऽस्य मनुष्यः
युद्धमबुद्ध न बुद्धिविवृद्धः ॥११॥

सन्निहितेऽतिहिते वसुदेवः
सत्वरमेत्य तुरङ्गमवल्गाम् ।
आददतादरपूर्णविकासं
धीरमतेर्विनयो नयसिद्धः ॥१२॥

स्यन्दनतोऽवनतिर्भवतोऽस्याः
उन्नतिमेव पुरो विदधीत ।
अञ्जलिमानिति मञ्जुललापो
तस्य धरावतरञ्च ययाचे ॥१३॥

भीष्मकभूमिपताववतीर्य्ये
पीठमुपाश्रयति श्रितसौख्ये ।
सुष्ठु वचश्चतुरोऽनुनिनीषुः
सौम्यवदोऽवददच्युततातः ॥१४॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

धीर ! धराधिपते ! चपलत्वम्
अस्य शिशोः परिमृष्य विमृष्य।
वेदनिकाममविदन् विषजन्यां
संबिभ्रयात् फणिनोऽपि मणिं यः ॥१५॥

सस्मितसद्दरदित्सितवत्सां
बालतमोऽपहरन् हरिरेषः।
रोषयति स्म वरं युवराजं
क्षेपयति स्म च माञ्च भवन्तम् ॥१६॥

ब्रूहि विधेयमहो तदिदानीम्
आश्रव एष जनस्तव वृत्तः।
यो विमुखो हि सतः किल कृत्यात्
शश्वदसौ भविताऽलमवद्यः ॥१७॥

इत्थममुष्य वचो विनिशम्य
भूपतिरेतदवोचत रुष्यन्।
भावविबोधितवेशविशेषः
नैव जनः सदसद्विविनक्ति ॥१८॥

इत्थमनल्पवचांस्यलमुक्त्वा
सूनुहरः स्म हरिर्दयते मे।
शैवलिनीं प्रमृशन् द्विजराजः
स्यात् सरसोऽपि मुखोज्ज्वलताकृत् ॥१९॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

ईदृशमात्मसना बहुयोगं
संविदधल्लभते वरपात्रम् ।
मत्तनयामनयत् स्वयमेषः
वक्तु विभो ! किमितो मम भाग्यम् ॥२०॥

सत्कुलशीलवराय वराय
नोन्नतिमान् प्रददत्तनयां कः ।
धूर्जटये तनुजां प्रतिपाद्य
नूनमभूद्गिरिराड़तितुङ्गः ॥२१॥

विष्णुपदादभवत् पतिता सा
विष्णुपदी भुवनानि पुनाना ।
द्वे पवितुं स्वकुले पुनरेषा
विष्णुपदं समगादतिदीना ॥२२॥

आचिनुते तनयां स्वयमेव
काम्यवरो यदि को नु निषिध्येत् ।
गम्यतरुं व्रततीं निपतन्तीं
को हि हठं विभजत्यतिबाल्यः ॥२३॥

जीवजनस्पृहणीयमिवेह
ब्रह्म वरं तनुजेव च विद्या ।
लम्भयते यदि शक्तिवशेन
प्रीतिमयानि जगन्ति तदा स्युः ॥२४॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

तद्भवतामनुसत्यनुवर्त्ती
दातुमिमां विधिवेऽहमुपेतः ।
दानमृते परकीयपदार्थे
स्वत्वमुदेति नहि ग्रहमात्रात् ॥२५॥

स्नेहयुतां बहुसंस्कृतिशुद्धाम्
आहुतिमद्य परामिव कन्याम् ।
श्रीहरये शुचये शुचये वा
सम्भवितास्मि ददच्चरितार्थः ॥२६॥

जानति तामनुजानति तस्मिन्
उत्सवसैनमपि प्रतिभृत्यान् ।
संववृधे स च तस्य निदेशात्
सिन्धुतरङ्ग इवानिलनुन्नः ॥२७॥

दुर्द्दमदारुणवैरिपिताऽयम्
आपतितः सहसा कथमेकः ।
द्वारवतीजनसंशय एष
साकमरं रविणाऽगमदस्तम् ॥२८॥

तोरणमूर्द्धनि तुल्यनिवेशा
दीपततिर्विशदा विकसन्ती ।
दोषमुदस्य प्रदोषमशेषं
लोकदृशि प्रगुणं प्रणिनाय ॥२९॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

वातचला प्रतिहारपताका
दीपशिखां लुनती किल काञ्चित् ।
संज्वलिता परयेति निरीक्ष्य
द्राङ् निरवाप्यत केनचनेत्य ॥३०॥

उच्चशिरःसु कलङ्कितचन्द्रः
न्यस्यति पादमितीव समन्युः ।
सौधगणोऽपि स सर्वशुचिस्तम्
अस्पृशदुज्ज्वलदीपकपादैः ॥३१॥

नृत्नमहाद्युतिरत्नजभूरि-
भूषणभङ्गितमञ्जुलवामा ।
अङ्गितताऽट्टशिखासु दिदृक्षुः
व्योम्नि धनुर्व्यतनोदिव जिष्णोः ॥३२॥

मङ्गलगीत्युलुलुस्वनवाद्य-
वेणुरवा लयतालसमिताः ।
ऐक्यगता इव सुश्रवणीयाः
लिल्युरुदन्वति खे विचरन्तः ॥३३॥

दान-सभाजन-देवन-मानाः
स्पर्शन-दर्शन-भाषण-हर्षाः ।
हास-विकास-विलास-विहाराः
तन्नगरीगरिमाणमतन्वन् ॥३४॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

मञ्जुलसज्जितनागरनारी
मन्दिरचत्वरमभ्यतिफुल्ला ।
कृष्णपुरःसरभीष्मककन्यां
तां वसुदेवगिरोपनिनाय ॥२५॥

पर्व्वणि चन्द्रमसः सुषमेव
पङ्कजिनीव शरद्यपनिद्रा ।
सम्मथने जलधेश्च सुधेव
लोकदृशः समतोषयदेषा ॥२६॥

सम्मदपूरविपूरितचेताः
क्षोविनतो वहिरच्युत आसीत् ।
एष निसर्गनयश्चतुरस्य
सन्निहितस्य हि दारगुरूणाम् ॥२७॥

प्रीतिविकासि मनस्त्वरते च
वारयते च पुनर्गुरुलज्जा ।
आलिरलं प्रयियासयते च
विक्लवतामिति सापि जगाम ॥२८॥

भीष्मकजाऽच्युतयोर्युगलेऽस्मिन्
पीठमुपाश्रयति श्रितपाणौ ।
शान्ततड़िन्नवनीरदकान्तौ
नाभवदेव तुला भुवनेऽस्मिन् ॥२९॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

स्वेदचितात्तरुणीजनहस्तात्
सुस्मितशुक्लतमोक्षितलाजाः ।
विष्वगिवाल्लिकसौधशिरस्तः
पुष्करुरस्य यशांसि पतन्तः ॥४०॥

द्वावपि लोकयितुं मनुजानाम्
आपततां विफलाऽभवदाशा ।
एकतरं खलु दृङ् निपतन्ती
येन ततोऽतितृषा न निवृत्ता ॥४१॥

साक्षिण ईशितुरस्य जगत्याः
साध्यविधानपरोऽथ पुरोधाः ।
रागसुखेन तयोः सह साग्निः
अग्निरुचा समजिज्वलदुच्चैः ॥४२॥

उद्यमितासुखचन्द्रिकयाऽथ ते
विविलोकिषवोऽखिललोकाः ।
सम्मुखराजितिरस्कृतगात्राः
संदष्टश्मश्रु वहिष्कृतवक्त्राः ॥४ ॥

स स्तिमितोऽस्थिरताप्रतिपाद्य-
क्षोभपदेऽपि बभूव समाजः ।
कस्यचिदुच्चजवे करणस्य
सन्निभृतान्यपराणि भवन्ति ॥४४॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

तत्र परस्परवक्त्रमवेच्य
तौ सुतरामवशेन्द्रियसार्थौं ।
बद्धपरस्परलोचनपद्मौ
प्रीतिरियं कियतीति न बुद्धौ ॥४५॥

वाढ़सुभावितरेतरकान्ति-
राशिविलग्नविलोचनयुग्मम् ।
स्पन्दनहीनतनू प्रतिपत्तुं
शेकतुरुन्मनसौ न मुहूर्त्तम् ॥४६॥

रूपसुधोदधिदूरनिमग्न-
नेत्रयुगौ स्वगतभ्रमसारौ ।
हृष्यति जगतां नहि किञ्चित्
न स्म विलोकयतो न च वित्तः ॥४७॥

आसीनां कनकासनेषु सुमुखीं प्रत्यङ्मुखीं प्रीतिमान्
राजा हारमनोहराय हरये प्रागाननायार्चयन् ।
उत्कण्ठाकुललोकलोचनकुलैरालोक्यमानामदात्
पुण्यं विश्वगुरोर्गुरुत्वममलं प्रत्यग्रमप्यग्रहीत् ॥४८॥

लोकानां विकलीकृतश्रुतिकुलैरानन्दकोलाहलैः
नानानादससैधितैः सुमधुरं गानं बधूनां जितम् ।
तूष्णीभूतनिजाननैर्जनगणैरुत्कर्णमाकर्णितं
संधावज्जनतान्तरादपि तयोर्दृष्टं चिरेष्टं सुखम् ॥४९॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

स न्नान्ताऊ पुष्ट्यर्थ ५१ प्रत्ययः तथा

चित्रालापाश्चतुरतरुणाः कृष्णमुत्प्रासमुग्धं
हेलालोला नवयुवतयो रुक्मिणीं क्रीविनम्राम्।
भूयःस्नानोच्चितकलकलाक्रान्तकर्णं विकर्णीं
पुष्पासारैः प्रतितनु गृहं निन्यिरेऽन्योन्यलग्नाः ॥५०॥

लक्ष्मीं लक्ष्मीर्घितासौ सुकृतमतिकृतौ भीष्मकः पौरलोकः
आशातीतामशेषां मुदमुदवसितं सर्वमेकान्तकान्तिम्।
इष्टार्थं प्रार्थिसार्थौ मुदितयदुपतिरन्नमन्नाभिलाषी
शान्तिं लेभे तदानीं जगदपि लभतामेवमेवाधुनापि ॥५१॥

घोरीकुलोद्भवमहम्मदनामधेयः
दिल्लीं विजित्य जितवानपि कान्यकुब्जम्।
एकां कलामिव विधोरपरां गृहीता
स्वर्भानुराधित तमोऽखिलभारतेऽस्मिन् ॥५२॥

ततस्तदुत्पीड़ितकान्यकुब्जतः
श्रीराममिश्रः सह भार्य्ययात्मजः।
रिरक्षिषन् धर्म्ममुदश्रुसस्खलः
पूर्व्वं नवद्वीपमियाय काश्यपः ॥५३॥

तदात्मभूमाधवमिश्रदेहज-
गोपालपुत्रो गणपत्युदीरितः।
तदात्मजस्तद्भयतः सनातनः
कोटालिपाड़े पुनरागमत्ततः ॥५४॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

गुणार्णवो नाम गुणी तदात्मजः
पुरन्दराख्यं समजीजनत् सुतम् ।
सुखे ष्वसौ पञ्चसु मुख्डमालिनीम्
अतिष्ठिपच्चीनशियापुरे निजे ॥५५॥

श्रीनाथो यादवानन्दो मधुसूदन एव च ।
वागीशश्चेति चत्वार आसन् पुरन्दरात्मजा ॥५६॥
चूड़ामण्युपनामासीत् श्रीनाथो विबुधाग्रणीः ।
सुधीरो यादवानन्दो न्यायाचार्येत्युपाधिमान् ॥५७॥

अद्वैतसिद्धिप्रभृतिप्रणीता
संक्षेपशारीरकभाष्यकर्त्ता ।
योगी महस्वी मधुसूदनः स
सरस्वतीं सन्धृतवानुपाधिम् ॥ ८॥

गौरीदासो यादवानन्दसूनुः
गोविन्दाख्यः साग्निकस्तत्सुतोऽभूत् ।
सत्तेजस्वी सद्यशस्वो मनस्वी
तस्याप्यासन् सप्त पुत्राः पवित्राः ॥५८॥

तद्द्वितीयतनयो बलरामः तर्कभूषणसुपाधिमुपेतः ।
चारुधीरचतुरश्चतुरोऽसौ आत्मजानजनयन्निजरूपान् ॥६०॥
लक्ष्मीनारायणो ज्येष्ठो हरिनारायणोऽपरः ।
पुरुषोत्तम इत्यन्यो रामदासश्च शेषजः ॥६१॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

LIBRARY
Jangamawadi Math, Varanasi
Acc. No. ......3224.

विद्यालङ्काराभिधो रामदासः
तत्पुत्रोऽभूत् रुक्मिणीकान्तनामा ।
गौरीनाथो देहजस्तस्य जातः
राधानाथोऽप्यस्य सूनुः सुविज्ञः ॥६२॥

काशीचन्द्रस्तस्य पुत्रोऽतिविद्वान्
लोकख्यातो नाम वाचस्पतीति ।
भूरिज्ञानं यस्य वीच्यातिसूक्ष्मम्
अन्यो व्यासोऽमन्यतान्यान्यलोकैः ॥६३॥

गङ्गाधरः प्रथमजः प्रथितस्तदीये
पुत्रत्रये बुधगणप्रवरः पिता मे ।
द्वात्रिंशवत्सरवयाः खलु पूर्णिमायां
चन्द्राग्निनागविधुमानशकाब्दमाघे ॥६४॥

कोटालिपाड़नगरीनशियानिवासो
मन्दात्मनापि कविलभ्ययशोऽभिलाषी ।
भूभृल्लिलङ्घयिषुपङ्गुसमानधर्म्मा
श्रीमानिदं रचितवान् हरिदासशर्म्मा ॥६५॥

इति श्रीहरिदासकृतौ रुक्मिणीहरणे महाकाव्ये
विवाहो नाम षोड़शः सर्गः ॥०॥

———:०:———

समाप्तमिदं रुक्मिणीहरणम् ॥०॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

महामहोपाध्याय-महाकवि-भारताचार्य-

श्रीयुक्तहरिदाससिद्धान्तवागीशभट्टाचार्यप्रणीता

मूलग्रन्थावली ।

तत्र मुद्रिता ग्रन्था ।

	ग्रन्थनामानि	मूल्यं	माशुलादि
१ ।	স্মৃতিচিন্তামণিঃ (ব্যবস্থাগ্রন্থঃ, চতুর্থবারং সংস্কৃতঃ)	৪৲	॥৶০
২ ।	বিধবার অনুকল্প (২য় সংস্করণ)	॥০	।৶০
৩ ।	যুধিষ্ঠিরের সময় (২য় সংস্করণ)	১৲	॥/০
४ ।	वियोगवैभवं खण्डकाव्यम् (मिवारप्रतापेन संयुक्तम्)		
५ ।	रुक्मिणीहरणम् (महाकाव्यं सटीकानुवादम्)	३)	॥=०
६ ।	विराजसरोजिनी नाटिका (सुखाभिनययोग्या)	१)	॥०
७ ।	वङ्गीयप्रतापं नाटकम् (प्रतापादित्यचरित्रीयम्)	२)	॥०
८ ।	मिवारप्रतापं नाटकम् (प्रतापसिंहचरित्रीयम्)	२)	॥०

मुद्रापणीया ग्रन्थाः ।

९ । সমাজসংস্কার (হিন্দুসমাজের উৎকর্ষসাধক গবেষণাগ্রন্থ)

१० । शङ्करसम्भवम् (खण्डकाव्यम्) ११ । सरला (गद्यकाव्यम्)

१२ । कंसवधं (नाटकम्) । १३ । जानकीविक्रमं (नाटकम्) ।

१४ । शिवाजीचरितम् (महानाटकम्) ।

१५ । वैदिकवादमीमांसा (इतिहासः)

१६ । काव्यकौमुदी (अलङ्कारग्रन्थः)

पाठ्या अपरे टीकानुवादादिरूपा महाभारतादयो मुद्रिता ग्रन्थाः पत्रान्तरे द्रष्टव्याः ।

श्रीहेमचन्द्र-काव्य-व्याकरण-पुराणतीर्थः, ४१ नं हेवलेन, कलिकाता ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative